इति श्रीश्वेतांबराचार्यवर्यधूर्य श्रीधर्मघोषसूरिविनिर्मितं ऋषिमंडलशास्त्रं समाप्तमिति संवत् १७२६ विक्रमतः, शाके १५९१ शालिवाहनतः अब्दे २१९६ श्रीमद्देवाधिदेव श्रीमन्महावीरवर्धमान शिवसुखसंप्रापणतश्चैत्रमासि श्रीधिग पंचमीतिथौ कुंजवासरे सुनक्षत्र-सुयोगे श्रीपट्टपत्तनाहवजनपदे श्रीवीरपादनाम्नि महादेव्या श्री बाकुलाषा महास्थाने श्रीखरतरवेगडनामगच्छे श्री जिनेश्वरसूरिसंताने श्रीजिनपत्ति जिनकुशल, जिनधर्म जिनगुणप्रभ जिनेश्वरादीनां पट्टश्रृंगारभट्टारक युगप्रधान श्रीजिनचन्द्रसूरीश्वराणां पट्टादि-सहस्रकरावनार सवाई युगप्रधान श्रीजिनसमुद्रसूरीश्वरविजयराज्ये शिष्य पं. समुद्रेण लिपिकृतम् । श्रेयसे भूयात् ।

Entry no. 1491, (p. 303) : विचारषट्त्रिंशिका of जिनाब्धिसूरि is mentioned. जिनाब्धि could be जिनसमुद्र. It is of the form of प्रश्नोत्तर in five leaves. The date of composition is v.s. 1724. Obviously it could be the second Jina° of the 17th cen. A.D. The end reads as :

श्रीमद्वेगडगच्छेश जैनचन्द्रस्य सद्गुरोः ।
शिष्येण विहिता चैषा सूरिणा श्रीजिनाब्धिना ॥१॥

सिद्धसंयमसंख्याब्दे (=१७२४) स्थिरप्रदे मासि फाल्गुने शुक्लपक्षे द्वितीयायां वासरे रोहिणीपतौ ॥२॥ शुभं भवतु । कल्याणमस्तु ।

Entry no 1017; (p. 266) : मनोरथमाला; वि. सं. १७०८ मां 'मनोरथमाला'नी रचना करी – The entry suggests that Jina° wrote मनोरथमाला in V.S. 1708. This is a referenae obviously to Jina° of the 17th cen. A.D. — The L. D. Institute of Indology, Ahmedabad has in its collection a copy of this work. The acc. no is 6641, पत्र ४५, granthāgra 745, sarva granthāgra 1050, dhāla २१. There are two more mss. of this work in the L.D. collection. All the three mss. belong to 18th cen. A.D. The अंत reads as follows :—

सेह मनोरथमालिका श्रावकशुद्धगुणफूल ।
गूंथी प्रवचनसूत्रसों परिमल अतिबहुमूल ।
बहुमूलपरिमल अधिक महकइ तीन भुवनइ विचारइ
गुरुहाथि पहिरई हृदइ सहि रहीं तेह भवसागर तरई ॥
अनुक्रमई पागइ मुगति ना सुख सदा संपद आलिका ।
जिनसमुद्रसूरि सनूरजंपई तेह मनोरथमालिका ॥१॥
प्रवचनरचना निपनउ ग्रंथमहा सिरिकार ।
श्रीसंघनइ आग्रह करी श्रीथेरावाद मझार
श्रीथेरावादमझार संवत् **वेदद्रुममुनिविधु** समइ ।
४ २ ७ १
सिद्धान्तसारविचार उपरि भविकना मनमें गमइ
उत्सूत्रखंडण सूत्रमंडण जिसौ मोती छिपनउ ।
श्रीजिनसमुद्र सनूरभाषित प्रवचनरचना निपनउ
तेह जहाज तणी परे भवितारण सुकयत्थ ॥
पिणतिणयोग्यहवइ सदा तव पामइ परमत्थ ।
परमत्थ पामइ तिणि ठामइ प्रथमतिण मिलवाभणी
लगमंतकार गदुरितवारण वरतराज जिसी भणी
एमणी कुमतमत हणी प्रथमजिनमतिशुद्ध रई.
जिनसमुद्र सनूरभाषित ते जहाज परितणई ।
संवत सत्तरचोविसए विक्रमविरसी एम
एकविंशसई चोरागुण पिवद्धण बहु प्रेम

वदु प्रेम पिवद्धण सुमासई नंदवद्धण पत्र भलउ
रविवार हंसतसुयोग शिवदिन वीरजिन नउ गुण नीलउ ॥
थिरपुरई श्रीचंद्रगच्छ खरतर वेगडा सुजगीश ए
पट्टर प्रभणइ संवत सत्तर चोवीस ए ॥४॥
संवत दस असइ समे श्रीअणहिलपुरमांहि
दुर्लभराजा आगली गच्छचोरासी साहि ।
गच्छ साहि चोरासी संघातइ धरमवाद थयो तिहां
जयसिरि पामी अरियनामी वडउ बिरुद लयउ जिहां
खरतर साचा, उरकाचा इसी वाचा परिगमई
जिनसमुद्रसूरि सनूरभाखइ संवत दशअसी समइ ॥५॥
सूरि जिनेसर गहगहइ श्रीवर्धमानसूरिश
विरुदवडउ जिण पामिअउ गुरुखरतरसुजगीश
सुजगीस खरतरबिरुद धारक श्रीजिनचंद्रसूरिश्वरा मणिधार
सारसहु पिछाणई मनई जास दिल्लीश्वरा
अभयदेवसूरिसूरिन्द नवअंगवृत्तिकारक कहई
जिनसमुद्रसूरि सनूरभाषित सूरिजिनेश्वर गहगहई ॥६॥
श्रीसंगरंग वधामणां श्रीजिनदत्तसूरि प्रसाय
श्रीजिनकुशलपरंपरा युगप्रधान कहाय
प्रधानयुगना सदा ए गुण श्रीजनवल्लभसारिखा
गुणप्रभजिनेश्वर सकल ईश्वर प्रकट प्रवचन पारिखा
जुगवर जय उ जिणचंदसूरिवर जासु अतिशय अतिघणां
श्रीजिनसमुद्र सनूर भाखई श्रीसंघरंगवधामणा ।

इति श्री विविधभावपुष्पकलिका ललित मनोरथमालाय अनेकच्छेक सुविवेक संवेगरंगशालायां मोक्षवर्गसाधनगुंफोऽयं समाप्तः । तत्समाप्तौ समाप्ता । श्री श्राद्धमनोरथशाला । श्रेयसे भूयात् पठितृश्रोतृजनानाम् । ग्रंथाग्र. ७४५ पूर्वमिलने १०५० सर्व ढाल १३ पूर्वमिलने ढाल २१ सर्व श्लो. सं. १८००. आशरे. श्रेयसे भूयात् श्री ।

(xvi) Catalogue of Gujarati Mss.

Punyavijayjee Collection

Publication – L. D. Institute of Indology

L. D. series no. 5, 1978, Ahmedabad.

On p. 71 mention is made of उत्तमचरित्ररास by Jina०. The acc. no. of the ms. is 3977, of the L. D. mss. collection. The आदि and अंत read as follows :

आदि : भारत्यै नमोनमः । श्री सीमंधर आदिदेव विहर जिनराज ।
हितवत्सल जगजीवनै करई अनोवचकाज ।
उद्योतन वर्धमानगुरु जिनइसर (= जिनेश्वर) जिनचंद ।
अभयदेव जिनदत्तगुरु जिनवल्लभगुरुनंद ॥
अे सहु नई प्रणयी करी प्रणमी सद्गुरु पाय ।
दानधर्मफल वर्णयौ आणी अधिक उच्छाह ॥
पात्र चार सिद्धिसिंह पू इमजाणी छ
पहेलि एक खंड इ हती करी जिनचंद्रसूरि
तापिछइ मधखंडमइ समुद्र कहइ गुण पूर ॥
नवनवरस नवनवचरित नवनवरागसुगंध
नवरससागर नाम ए रास रसिनवरंग
नवनवविधिनी चातुरी जाणे चतुरसुजाण
वेधकहोइ सुजाणजो करजो सभा वखाण ॥

अंत : ढाल कही अे विजयगणी भली हो मास अढारमी ढाल श्री जिनसमुद्र कहई
हिव देखी जो हो जे फले पुण्य रसाण ।

It may be noted that this Jina° belongs to the 17th cen. A.D. who has written only in Gujarati and Hindi.

(xvii) **जैन धातु प्रतिमा लेख (प्रथम भाग)**
संपादक-मुनि कांतिसागर
श्री जिनदत्तसूरि प्राचीन पुस्तकोद्धारफंड, ग्रंथांक ६०,
ई. स. १९५०, सूरत.

There are three entries from this source. They refer to Jina° of the 15th cen. A.D.

Entry no 262; (p. 58) : संवत् १५५२ वर्षे माघ सुदि ३ दिने ऊकेशवंशे परीक्ष (ख) सं. परबत भा. भणती पु. सु. तेजसिंहेन भार्या डाही भ्रातृ प. हतादि परिवारयुतेन श्रीविमळनाथबिंबं कारितं खरतरगच्छे श्रीजिनसमुद्रसूरिभिः प्रतिष्ठितम् ।

Entry 264; (p. 58) : संवत् १५५२ वर्षे माघ सुदि १३ श्री ऊकेशवंशे वडुरागोत्रे स० कुरा० भा० लहकू पुत्र सा० वछा सा० पासाकेन भार्या रुपाइ युतेन पितृव्य सा० सदापुण्यार्थं श्रीसंभवनाथबिंबं कारितं प्रतिष्ठितं श्रीखरतरगच्छे श्री जिनसमुद्रसूरिभिः गुरुपुष्ये योगे ॥

Entry no 276; (p. 60) : संवत् १५६३ वर्षे वैशाखसुदि ३ दिने श्रीमालज्ञातीये भाण्डीया गोत्रे सा० अजिता पुत्र सा० लाखा भा० पटी सुश्राविकया श्रीचंद्रप्रभबिंबं कारितं स्वपुण्यार्थं प्रतिष्ठितं खरतरगच्छे श्रीजिगसमुद्रसूरिपट्टालंकार श्री जिनहंससूरिभिः । कल्याणं भूयात् । महा सुदि १५ दिने ।

Taking into account all the references cited by us it looks that at least two Jina° can be traced, one each belonging to the 15th cen. A.D. and 17th cen. A.D. The earlier Jina° seems to be a man of a very high status and was engaged in quite a number of religious activities. He was not only listed as 'yuga-pradhāna', but was also mentioned as 'savāi–yuga pradhāna.' Perhaps he wrote this sanskrit commentary on the Raghuvaṃs'a. The other Jina° of the 17th cen. A.D. who is credited with quite a number of works either in Hindi or Gujarati has no work in Sanskrit to his credit. But the problem of authorship remains open but with a greater possibility of the earlier famous Jina° being the aulhor of a Sanskrit work. It should be noted in passing that the sanskrit language of the pras'astis cited above has quite a number of grammatical faults which we have not listed as it falls beyond our scheme of work.

(B) The ms. material :

The editing of Jinasamudrasūri's Raghuvaṃs'a — ṭīkā is based on a single ms. — accession no. 2779, available from the collection of mss. in the L. D. Institute of Indology, Ahmedabad. The editor has not been able to locate till day, any other copy of this ms. any where else. The commentator calls his attempt to be "रघुकाव्यान्वयमात्र" and this is borne out from not only all the colophons given at the end of the sargas, but also from its careful study. The author himself makes no tall claims about his effort. It is very clear that this commentary is not for the delight of the learned but aims at the benefit of fresh students only. However the idea behind the editing of this commentary will be made

clear in due course. For the present it will be interesting to note the description of the ms. material and the methodology adopted by the editor.

description of the ms. material

पत्र – १३०

कर्ता – जिनसमुद्रसूरि

सर्ग – १९ पर्यंत

परिमाण – २७ × ११.२ से.मी.

पङ्क्ति – १३; १४

अक्षरसंख्या – ४६ (as the letters are not of equal measurement the total number may be one or two more or less)

स्थिति – श्रेष्ठ

आदि – श्रीमत् परमपार्श्वजिनाय नमः ॥
वागर्थाविव संपृक्तौ. (verse 1/1 is quoted fully. As for all the rest only प्रतीकs are given).

अंत – इति भट्टारक जिनचंद्रसूरिशिष्य आचार्यश्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वंशप्रतिबंधो नाम एकोनविंशतितमः सर्गः ॥१९॥

पुष्पिका by the scribe : अथ संवत्सराष्टादशशतचतुर्विंशत्यौ भाद्रपदे शुक्लपक्षे त्रयोदश्यां रविदिने चातुर्मासे पट्टालयनामनगरे राघवी टीका संपूर्णा लिख्यते। शुभमस्तु लेखकपाठकयोः ।

The colophons at the end of each sarga read as given below. It may be noted that here the text will be presented as it is, without any emendation. The colophons not only do not have an identicel expression but errors are also noticed. They read as :

सर्ग १—इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ अन्वयमात्रे वशिष्टगमनो नाम प्रथमस्सर्गः ।

The commentator calls his attempt an 'अन्वयमात्र'. He does not make any tall claims. There is no mentioning of the name of the author here. 'वशिष्टगमनो नाम' should read as 'वसिष्ठाश्रमगमनो नाम'.

सर्ग २—इति श्रीभट्टारक जिनभद्रसूरिशिष्याचार्य श्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वरलाभो नाम द्वितीयस्सर्गोलमिति । शुभं भवतु ।

Here also there is an error, perhaps on the part of the scribe. Jinasamudra was the desciple of Jinachandra who in his turn was the desciple of Jinabhadra. Jinacandra as our authour's preceptor is mentioned in practiclly all the colophons that follow. The expression 'अलमिति/शुभं भवतु ।' is also not read at all places. An 'अवग्रह' 'ऽ' should be read like 'सर्गोऽ '

सर्ग ३—इसि जिनसमुद्रविरचिते रघुकाव्यटीकान्वयमात्रे आश्रमप्रवेशो राज्यलाभो नाम तृतीयस्सर्गोलमिति । श्रीरस्तु ।

The expression 'रघुकाव्यटीकान्वयमात्रे' is clumsy. जिन०विरचिते should have 'श्री' in the beginning in keeping with similar expression at other places. The name of the author's preceptor is also not seen here. Once again we have सर्गोलमिति in places of सर्गोऽलमिति. Here 'श्रीरस्तु' is read in place of 'शुभं भवतु' at the end of the second सर्ग. Neither is read at the end of the first सर्ग.

सर्ग ४—इति जिनसमुद्रविरचिते रघुकाव्यटीकायां चतुर्थः सर्गोलम् ।

The colophon is very short. The subject matter is not at all mentioned. The colophon at the end of the first सर्ग had–'श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ अन्वयमात्रे', at the end of the second सर्ग it was–'रघुकाव्यटीकान्वयमात्रे'...and at the end of the third it was 'रघुकाव्यटीकायां'. Again 'विरचिते' should he 'विरचितायां', or 'टीकायां' should be replaced by 'टीकान्वयमात्रे' as at the end of the third सर्ग, or should be रघुकाव्यान्वयमात्रे' or 'अन्वयमात्रे' as at the end of the second or first सर्ग. All this makes one point very clear that the author does not seem to be very careful about his expression and seems to commit even grammatical errors, or perhaps this is from the scribe

सर्ग ५—इति जिनसमुद्रविरचितो रघुकाव्यान्वयटीकायां स्वयंवरगमनो नाम पञ्चमसर्गः ।

The expression 'श्रीरस्तु' or 'शुभं भवतु' has now disappeared. But 'विरचितो...टीकायां' cannot be tolerated. The expression involves obvious grammatical errors. The name of the preceptor is also absent as in case of the end of the first, third and fourth सर्गs while in case of the second सर्ग it is wrongly given as observed above.

सर्ग—६ इति श्रीभट्टारक श्रीजिनचन्द्रसूरिशिष्य आचार्यश्रीजिनसमुद्रसूरिविरचिते रघुकाव्यान्वयमात्रे स्वयंवरप्रदानो नाम षष्ठस्सर्गः ।

This is the first clear expression in the colophon. The name of the preceptor is correctly given and the author calls himself 'आचार्यश्री...which he certainly was.

सर्ग ७—इति श्रीरघुवंशे भट्टारकश्रीजिनचंद्रसूरिशिष्य जिनसमुद्राचार्यविरचिते रघुकाव्यान्वयमात्रे अजस्य कन्यालाभो नाम सप्तमः सर्गः समाप्तः । श्री ।

The expression is clear but once again 'श्री', which should read as 'श्रीः', appears at the end. This is read only once more in the colophon of सर्ग ९.

सर्ग ८—इति श्रीभट्टारक० रघुकाव्यान्वयमात्रे प्रायोपवेशनो नामाष्टमः सर्गः ।

There seems to be omission of a complete expression and only 'श्रीभट्टारक०' is read. Perhaps the scribe was responsible for this.

सर्ग ९—इति श्रीभट्टारकजिनचंद्रसूरिशिष्याचार्यश्रीजिनसमुद्रविरचिते रघुवंशकाव्यान्वयमात्रे मृगयाप्रहारो नाम नवमः सर्गः ॥९॥ श्रीजिनाय नमः । श्रीः

We have 'श्रीजिनाय नमः' which is not read elsewhere. Again सूरि' in 'श्रीजिनसमुद्रसूरिविरचिते is not read as in case of the colophons at the end of सर्गs viz. १, २, ३, ७, ८, १०, ११, १२, १३, १४, १६, १७, १८ and १९. The colophon at the end of सर्ग १५ has a different error altogether as will be observed later.

सर्ग १०—इति भट्टारक श्रीजिनचंद्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे देवावतारो नाम दशमः सर्गः ॥१०॥

सर्ग ११—इति श्रीभट्टारकजिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते लघुकाव्या-
न्वयमात्रे भार्गवपराजयो नाम् एकादशमः सर्गः ।

The colophon at the end of सर्ग १० has भट्टारकश्री while here it is read as श्रीभट्टारक. 'लघु.' for 'रघु.' seems to be an obvious scribal error.

The expression 'श्रीभट्टारक.' is read in colophons at the end of सर्गs viz. २, ६, ८, ९ and ११, while in colophons to सर्ग १, ३, ४, ५, we miss the mentioning of 'भट्टारक'. These irregularities could not all be credited to the scribe only. The author himself, as he was busy in various activities and was a big name, perhaps was not very particular about such minute details.

सर्ग १२—इति भट्टारकश्री जिनचंद्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्या-
न्वयमात्रे रावणवधो नाम द्वादशः सर्गः ।

The expression 'अन्वयमात्रे' or 'रघुकाव्यान्वयमात्रे' is not seen only at the end of the commantary on सर्गs viz. ३, ४ and ५, while 'रघुकाव्यटीकान्वयमात्रे' is read at the end of सर्ग ३, and 'रघुकाव्यटीकायां', 'रघुकाव्यान्वयटीकायां' 'रघुवशकाव्यान्वमात्रे' and लघुकाव्यान्वयमात्रे is read in colophons to सर्गs ५, ६, ९ and ११ respectively.

सर्ग१३—इति भट्टारकश्री जिनचंद्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्या-
न्वयमात्रे समुद्रवर्णनो नाम त्रयोदशमः सर्गः ॥ ३॥

The author has expressions like 'एकादशमः', 'त्रयोदशमः' and 'सप्तदशमः' in place of the usual 'एकादशः' त्रयोदशः' and 'सप्तदशः'.

सर्ग १४—इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्रीजिनसमुद्रविरचिते रघुकाव्या-
न्वयमात्रे सीतापरित्यागो नाम चतुर्दशः सर्गः ।

सर्ग १५—इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्रीजिनचन्द्रसूरिशिष्ये रघुकाव्यान्वयमात्रे स्वर्गारोहणं नाम पञ्चदशः सर्गः ।

The expression जिनचन्द्रसूरिशिष्य आचार्यश्रीजिनचन्द्रसूरिशिष्ये' is an obvious scribal mistake. After 'आचार्यश्री' the name of the author should be read with 'विरचिते' at the end of the compound.

सर्ग १६—इति भट्टारक श्रीजिनचन्द्रसूरिशिष्य आचार्य श्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे 'कुमुद्वतीलाभो' नाम षोडशः सर्गः ।

It may be observed that the scribe at times places the methamatical figures also at the end, and at times not. Figures are placed at the end of सर्गs viz. ९, १०, ११, १३, १४, १८ and १९.

सर्ग १७—इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्र विरचिते रघुकाव्यान्वयमात्रे प्रकृतिसंग्रहो नाम सप्तदशमः सर्गः ।

सर्ग १८—इति भट्टारकश्रीजिनचन्द्रसूरिशिष्य आचार्य श्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वंशवर्णनो नाम अष्टादशः सर्गः ॥१८॥

सर्ग १९—इति भट्टारकजिनचन्द्रसूरिशिष्य आचार्यश्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वंशप्रतिबन्धो नाम एकोनविंशतितमः सर्गः ॥१९॥

The scribe mentions the date and place of copying, which was completed In the year V. S. 1824 i.e. 1768 A.D. in the month of Bhādrapada, on Sunday, the 13th day of the bright-half. The name of the scribe is not given. It is surprising that if Jina° wrote this commentary in the 15th cen. A.D., a copy of his work earlier than this ms. dated 18th cen. A.D. is not seen, nor any other copy can be traced. This brings us closer to the second Jina° of the 17th cen. A.D. But he wrote everything in Hindi or Gujarati as the record shows. Moreover no reference mentions any sanskrit work, much less this रघुवंशटीका written by him. So we are back to square A, i e. with the first Jina°, who was with greater certainty our author Moreover no bio-data concerning the second Jina° is collected.

When these colophons are placed along with those found in the Saṃjīvinī by Mallinātha, important points can be noticed. The sub-titles read in the colophon to each sarga were, of course, the creation of the commentators. Here, Jina° also shows some ingenuity in naming the sargas as a

comparative study will reveal. The names given to the different sargas in both Mallinātha and Jina∘ read as :—

Mallinātha	Jinasmudra
सर्ग १—'वसिष्ठाश्रमाभिगमनो नाम...	१—'वसिष्ठगमनो' – This seems to be obviously faulty.
सर्ग २—'नन्दिनीवरप्रदानो नाम···'	२—'वरलाभो नाम···'
सर्ग ३—'रघुराज्याभिषेको नाम ··'	३—'राज्यलाभो नाम···'
सर्ग ४—रघुदिग्विजयो नाम ··'	४—There is no mention of any name for this सर्ग, obviously a carelessness observed in our author.
सर्ग ५—'अजस्वयंवराभिगमनो नाम'	५—'स्वयंवरगमनो नाम'··· Jina∘ at times chooses to be brief, as seen in सर्ग २, & ३ also.
सर्ग ६—'स्वयंवरवर्णनो नाम···'	६—'स्वयंवरप्रदानो नाम···'
सर्ग ७—'अजपाणिग्रहणो नाम···'	७—'अजस्य कन्यालाभो नाम ··'
सर्ग ८—'अजविलापो नाम'···	८—'प्रायोपवेशनो नाम ··' Perhaps Jina∘ shows a better insight and poetic judgement in keeping this title.
सर्ग ९—'मृगयावर्णनो नाम'···	९—'मृगयाप्रहारो नाम ' Jina∘ has underlined the importance of 'प्रहार'.
सर्ग १०—'रामावतारो नाम···'	१०—'देवावतारो नाम...'
सर्ग ११—'सीताविवाहवर्णनो नाम···	११—भार्गवपराजयो नाम···' Even here Jina∘ shows better poetic insight.
सर्ग १२—'रावणवधो नाम···'	१२—Same as in Mallinātha. This happens in case of sarga–14 also.

सर्ग १३—'दण्डकाप्रत्यागमनो नाम ··	१३—'समुद्रवर्णनो नाम···' Jina∘ again exhibits a subtler poetic judgement. The description of the ocean refers to the great poet's special charm whereas 'दण्ड–काप्रत्यागमन' mentions only an event.
सर्ग १४—'सीतापरित्यागो नाम···'	१४—Same as in Mallinātha.
सर्ग १५—'रामस्वर्गारोहणो नाम···	१५—'स्वर्गारोहणं नाम '
सर्ग १६—'कुमुद्वतीपरिणयो नाम···'	१६—कुमुद्वतीलाभो नाम···'
सर्ग १७—'अतिथिवर्णनो नाम···'	१७—'प्रकृतिसंग्रहो नाम ' Jina∘ again shows better judgement. The title perhaps is selected with reference to verse no. 78.
सर्ग १८—'वंशानुक्रमो नाम'···'	१८—'वंशवर्णनो नाम···'
सर्ग १९—'अग्निवर्णश्रृङ्गारो नाम'	१९—'वंशप्रतिबंधो नाम···' Once again Jina∘ seems to select a better title.

The comparison reveals that Jina∘ was a man of finer poetic judgement and if he can be excused for all the blemishes and other lapses, at least we find in him an interesting personality with a higher and subtler understanding of poetry.

(C) Stylistic peculiarities of Jina∘ and the scribe

The scribe shows the following special habits, which we will illustrate to some extent.

At times he does not write a संयुक्ताक्षर or joint consonant wherever it is necessary, e.g. at—

रघु० १/२५ we have दंडान् forदंड्यान्,
रघु० ४/२१ we have अनूभूत् for अन्वभूत्,
रघु० ६/७२ we read विक्षात for विख्यात,
रघु० ७/१५ we read मैत्रज्ञं for मैत्र्यज्ञं ;

At times he does not seem to observe the distinction between स्, श्, ष्, e.g. at २/१७ we have स्यामायमानानि for श्यामाय०

He writes 'ख' for 'ष' as in 'सूत्रशेखा' for 'सूत्रशेषा' (रघु. ७/१०). He also reduplicates the letter having a 'रेफ' over it, e.g. व्यसर्ज्जयत् (रघु. ७/३२); पर्व्वान्वये (रघु. ७/३३), दर्प्पयुक्तः (रघु. ७/३५); लक्षितपूर्व्वकेतून् (रघु. ७/४४); अपवर्ग्गः (रघु. ८/१५), etc. There is a note in the beginning of the eighth canto which is not read elsewhere e.g. we read : 'श्रीमद्रामेयं नमः ।' Perhaps this was added by the scribe. We also find वर्णव्यत्यय as in 'एकास्पराप्रार्थितयोः' for 'एकाप्सरा०' at रघु. ७/५३, etc. The scribe is not in the habit of placing an अवग्रह – ऽ sign e.g. रजोन्धकारस्य (रघु. ७/४२); मांसप्रियापि (रघु. ७/५०) etc. He writes 'ज' for 'य' as in, मानधनाग्रयाजी for ०यायी (रघु. ५/३); प्रजत्नैः for प्रयत्नैः (रघु., ५/६); अग्रजायी for अग्रयायी (रघु. ५/६५); अजोजयतां for अयोजयतां (रघु. १०/५८). But at times we also have 'य' for 'ज' as in 'यामातृवर्गो' for 'जामातृवर्गो' (रघु. ६/८७), पर्यन्यः for पर्जन्यः (रघु. १७/१५); etc. We have also noted some scribal mistakes as read in various colophons. The scribe does not seem to be a careful writer.

We will now go to observe certain stylistic peculiarities of Jina०.

It may be noted that at times Jina० attempts the commentary of two verses at a time even though it may not look obligatory; e.g. at रघु. १/४९, ५०; रघु. ४/५८ which is equivalent to Mallinātha's two verses viz. रघु. ४/५१, ५२; etc. He seems to have taken up a verse shown as a variant verse by Mallinātha as independent verse and has commented on the same as at रघु. १/८१. It is also seen that the commentary on the first few verses of any sarga seems to

be longer as compared to the brief presentation later. Jina० is also in the habit of placing a series of questions at a time and then giving replies to the same, e.g. at रघु. ३/४७. किं कुर्वन्निव ? किं कृत्वा ? कः ? काभिः ? कमिव ? as at रघु. ३/६२; कः ? कस्य ? कस्मिन्निव ? at रघु. ४/४३; etc. etc. Normally his comments on a given verse are short and pertain to 'अन्वयमात्र' or only sequence. But at times Jina० gives a long commentary also as at, रघु. ९/१०, ९/१५, ९/१६, ९/२७, ९/२८, ९/३०, ९/७६, and at रघु. १०/२३, १२/७३, १२/१०५; १३/३; १३/६४; १३/६७; १९/३३ etc. etc. At times we have a glimpse of a vernacular touch as in 'घूमरीजालमानः' at रघु. ७/६०; wherein 'घूमरी' seems to be Gujarati. Similary we have 'उतार्य' used in the Gujarati sense of 'उतारीने' i.e. 'getting someone descend', at रघु. ६/३१, and ब्रूडित्वा at १०/३, १६/७६ etc. Jina० is fond of quoting from laxicons such as हैम., वैजयन्ती etc. as at रघु. ९/२२, १९/२४, २५, १७/२१; १७/४०; etc. At times he depicts his personal observation as at रघु. ६/७०, etc. He also quotes from other poets as at रघु. १६/६५. Jina० also takes note of a figure of speech here or there as at रघु. ६/६८ etc. He also gives clever and fresh explanations as at रघु. ९/५ where we read अहीनां इनः, शेषः;…… तम् । at रघु. १४/४८ as in – असिपत्रं सेहुन्ड स्तुही संज्ञा वृक्षविशेषः, etc. He also but very rarely exhibits his learning e.g. at रघु. ३/१६,. With all this there are certain passages that have remained 'not clear' as at रघु. १५/९१ इति समययूकमूचे; १६/६२ क्रियकोचित्वात्; १७/७१ शशी सागराविव शैनच; १८/५२ उपदेशमात्रणैकबुध; and १९/८ च्छुप्तस्य etc. It should be noted that the author has never shown any sign of narrow sectarian outlook. His respect for faiths other than his seems to be tremendous.

The general style of our author is very lucid and flowing without any claims to learning of high level, though he himself must have been a man of learning. His attempt is at 'रघुकाव्यान्वयमात्र' and he sticks to it and avoids all gra-

mmatical and philopohical discussions or references. He has only a beginner before his eyes and he does justice to him.

(D) The purpose of editing this commentary, the method adopted and the appendices suggesting the outcome of our research introduced :—

The editor has made it amply clear that this commentary is not going to prove to be the delight for the learned. It is no match to Mallinātha's effort. However, the intrinsic value of this commentary lies elsewhere. The discerning scholars are highly aware of the fact that till day whatever efforts have been made in the direction of preparing a critical text of any work of Kālidāsa have been sadly incomplete. Actually Kālidāsa – text – criticism is a Mahābhārata task. Preparing a critical text of the works of Kālidāsa requires as much application, care, insight and critical understanding as in case of the great epic Mahābhārata or Rāmāyaṇa. For that purpose any manuscript of whatever age has to be taken care of. It is absolutely clear to a critical and discerning eye that every manuscript has to be treated as sacred and has to be weighed most seriously. May be a manuscript belongs to a later period, but it represents a tradition or preserves a reading that may be older and even original. May be, through collation we may arrive at a reading which is original and preserved also in a later manuscript. May be it looks less poetical than a popular reading and thus harming the accepted reputation of our great poet.

It is with this single purpose of providing research material for a learned editor with enough talent and genius that this task is taken up. We know the reputation of jaina writers, Hemacandra in particular, in preserving and faithfully representing the original text of earlier writers. Dr. V. M. Kulkarni could reconstruct the Abhinava – bhāratī on

Barata's Nāṭyaśātra, ch. VII, the Bhāvādhyāya, only with the help of the Viveka by Hemacandra on his own Kāvyānuśā'—sana. Gnoli prepared a critical text of the Abhinava-bhāratī on the rasādhyāya with the help of the critical text of Hemacandra's Kāvyānus'āsana prepard by Prof. R. C. Parikh and Prof. Dr. V. M. Kulkarni. This justifies our effort in editing Jina°'s commentary on the Raghuvaṃs'a. For preparing a critical text of any work of Kālidāsa, all the mss. from any corner of the world have to be consulted, be that in any script even other than devanāgari and we have also to take into account the readings preserved in the works of great ālaṃkārikas beginning with Vāmana and Ànandavardhana or Bhoja as they are likely to prove very important research tools throwing light on the older or original reading or tradition.

While preparing a critical text of this commentary, we had a recourse to only a single ms. available from the collection of mss. in the L. D. Institute of Indology, Ahmedabad. But when we tried to compare the traditions and readings as preservd by Jina° with those accepted by Mallinātha, a very interesting study was made possible, resulting in carefully prepared fourteen appendices providing food for genuine research.

It should be noted at the outset, that we have made use of four types of brackets in editing the text. The small bracket i.e. ( ), suggests emendation or correction that may look obvious and may render the passage meaningful and therefore readable. Then the larger bracket, i.e. { } suggests omission, thereby omitting some unnecessarily reduplicated words or passages, which have crept in the body of the text through the oversight or negligence of the scribe. The largest bracket, [ ], suggests unavoidable additions warranted by references from Kālidāsa or the context in the commentary itself. This also aims at clearer under-

standing of our text The bracket < > suggests passages that have remained obscure to us Inspite of our best possible efforts to arrive at sense. These are words or passages to be taken as 'not clear'. Before we introduce the fourteen useful appendices that may help the original cause of arriving at a text – critical edition of Raghuvaṃs'a, it should be very clearly understood that for the present, our claim or effort is not in the direction of fixing up or giving a final critical text of Raghuvaṃs'a, but is only in the direction to assist a great editor of the works of Kālidāsa like Dr. Rewaprasad who has embarked upon this great Mahābhārata task. The traditions and readings as represented by Jina∘ differ so widely from those presented by Mallinātha, that the comparision becomes not only interesting but also most useful.

The list of appendices as planned by us reads as follows :—

Appendix I

Sequence of verses as seen in Jina∘ and Malli∘

(i.e. Mallinātha).

The study reveals that not only both the commentators differ widely in presenting the sequence of verses in practically all the sargas, excepting sarga no. II, wherein we find only three instances and sargar VII and XIV, XVI and XIX wherein we find not a single instance, in the rest of them some verses metioned as variant verses or interpolated verses by the editors of Malli. have been taken up in the body of the text by Jina∘. At times single charaṇas or even half verses seem to be interchanged in the text represented by both the commentators.

Appendix II

Variants seen in Jina∘ and Malli∘

At times there are more than one variants noted by editor of Malli. (Ref. N. S. Edn. 1882, Parab; Bombay)

Jina. differs from Malli○ in 34 instances only in the first sarga. In sarga II we have 21 instances, in sarga III, 35 instances, in sarga IV we have 30 cases, sarga V offers 32 instances, wherein Jina○ V. 47 is cited as a variant verse or पाठान्तर under Malli○ V. 46, and V. 48 is only a part i.e. चरण of the variant verse shown under V. 46 in Malli○ on p. 108, (N. S. edn. 1882, Parab, Bombay.) Jina○ V. 45 is also read as a variant verse under Malli○ V. 45, on p. 107, (N. S. Edn. 1882.). Sarga VI offers 16, sarga VII has 19, and sarga VIII has 37 with Jina○ VIII 40, read as a variant under Malli. VIII. 38. Sarga IX has 12 differences, X has 21, XI has 32, XII has 37, wherein Jina○ vs. 96 A is read as vs. 94 A in Malli○ Sarga XIII has 28, XIV has 47, XV has 47, XVI has 47, XVII has 42, sarga XVIII has 35 cases of difference in reading and sarga XIX has 41.

Appendix III

Variants seen only in Jina○

There are in all 66 variants in the whole of the Raghu. text as represented by Jina○ that are seen only in Jina○ and not at all noted elsewhere.[1] It should be noted that all this discussion concerning variants from Jina○ refers to those suggested by him in his commentary only, for he has not quoted the full text at all.

Appendix IV

Other variats not seen either in Jina○ but taken note of under Malli○ N. S. edn. 1882, Parab, Bombay.[1]

1 The second edition of Kālidāsa–granthāvalī by Rewaprasad was made available to us later. We have noted the readings from that edition in the appendix concerned. The N. S. Edn. 1882, Parab, Bombay is not consulted by Rewaprasad.

This could be useful for the purpose of critical–text preparation.

Appendix V

क्षेपक verses shown under Malli° in the N. S. Edn. 1882 but read in the body of the text by Jina° This shows the different traditions that were prevalent.

Appendix VI

क्षेपक or interpolated verses shown as such under Malli° in the N. S. Edn. 1882, Parab, Bombay; but not seen in Jina°.

Appendix VII

Variant verses noted as pāṭhāntara shown under Malli. N. S. Edn. 1882, and taken up as regular verses in the body of the text by Jina° This again reflects the different traditions prevalent.

Appendix VIII

Variant verses shown under Malli° N. S. Edn. 1882, but not seen in Jina°

Appendix XIX

More than one verse in Jina° equal to just one verse from Malli.

Appendix X

More than one verse from Jina° equal to more than one verse from Malli° The two appendices viz. no. VIII and IX show how the text in Kālidāsa has been treated by different authorities. For critical-text-preparation such cases also would prove extremely interesting.

Appendix XI

Verses read in Jina° but not found in Malli. These verses also should prove to be interesting while fixing a

critical text. Whether they find support in other commentaries or not has to be seen.

Appendix XII

Verses read in Malli० but not found in Jina० –

Appendix XIII

चरणs of some verses as read in Jina० are found in different verses in Malli०; and vice versa. This also would make the question of critical text all the more interesting and complicated.

Appendix XIV

Totally extra verses read in Jina० and not mentioned either as क्षेपकs or पाठान्तरs in the foot-notes in Malli०, N. S. Edn. 1882, Parab, Bombay.

Suffice it, to say that in editing this commentary the editor's effort is to point to the problem of a text-critical approch and not to offer any solution. The editor will feel satisfied if scholars keep this in view and apply themselves to bring up a critical text of Raghuvaṃs'a. The importance of the N S. Edn. 1882, Parab, Bombay and of the second edn. of कालिदासग्रन्थावली by Rewaprasad can never be overlooked.

T. S. Nandi.

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

प्रथमः सर्गः ।[1]

श्रीमत्पार्श्वजिनाय नमः ।

१. वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥

व्या. अहं पार्वतीपरमेश्वरौ वन्दे । कथंभूतौ पार्वतीपरमेश्वरौ ? संपृक्तौ, सम्मिलितौ एकीभूतौ । काविव ? वागर्थाविव । कस्मै प्रयोजनाय ? वागर्थप्रतिपत्तये । पार्वती च परमेश्वरश्च; पार्वतीपरमेश्वरौ । पक्षे[2] पार्वतीं पातीति पार्वतीपः, रमायाः लक्ष्म्याः ईश्वरः रमेश्वरः, पार्वतीपश्च रमेश्वरश्च पार्वतीपरमेश्वरौ, हरिहरौ । पुनः कथंभूतौ ? जगतः पितरौ । माता च पिता च पितरौ । मातापित्रोरित्येकशेषः । वाक् चार्थश्च वागर्थौ ताविव । वागर्थाविव । इवेन सह नित्यं(त्य)समासो विभक्त्यलोपश्चेति । इवेन सह ऐकपद्यं, विभक्तेः अलोपश्च । वाचामर्थो[2] यत्र स वागर्थः, काव्यम् । तस्य प्रतिपत्तिर्निष्पत्तिः, संपूर्णता । तस्यै वागर्थप्रतिपत्तये काव्यनिष्पत्तये इत्यर्थः । उभयोः किमिति नमस्कारः ?—

शिवा शब्दमयी प्रोक्ता शंभुश्चार्थमयः स्मृतः ।
अतः शब्दार्थनिष्पत्तिसिद्धये तौ नतौ मया ॥

कथं मातुः पूर्वं नतिः ? अभ्यच्य(र्च्यं)तत्वात्पितुर्युज्यते, यश्चार्चितं द्वयोरिति स्ववचनात्, कवेर्देवीनाम्ना प्रसिद्धत्वात् तत्प्रसादप्राप्तमहत्त्वाच्च शै(शि)वाभ्यर्चिता ।

अन्यच्च – पतितोऽपि पिता त्याजा(ज्यो) माता नैव च नैव[3] च !
गर्भाधारणपोषाभ्यां ताभ्यां माता गरीयसी ॥१॥

---

1. Ms. No 2779 L. D. Institute of Indology, Ahmedabad—
पत्रसंख्या १३०

2. Jinasamudra shows freshness of approach at places and gives something more than we meet with in Mallinātha. These two are instances in point. But mostly, as is claimed by him, he shows sequence only अन्वय मात्र and gives very simple explanation, avoiding discussion on grammatical subtleties and pointing out alaṃkāras.

3. कदाचि(च)न

२. क्व सूर्य० ।

सूर्यप्रभवो वंशः क्व, अल्पविषया मे मम मतिश्च क्व। क्व शब्दो महदन्तरे। मोहादज्ञानात् उडुपेन काण्डप्लवेन दुस्तरं तर्तुमशक्यं सागरं समुद्रं तितीर्षुरस्मि। तर्तुमिच्छुस्तितीर्षुः। प्रभवत्यस्मादिति प्रभवः। सूर्य[:] प्रभवो यस्य स सूर्यप्रभवः। अल्पो विषयो ग्राह्यो यस्याः सा अल्पविषया मन(म) न(मे) मतिः। दुःखेन तीर्य्यते इति दुस्तरम् ॥२॥

३. मंदेति।

मंदोऽहमुपहास्यतां गमिष्यामि। कथंभूतोऽहम्? कवियशःप्रार्थी। प्रेप्सुः। कवीनां वाल्मीक(कि)प्रभृतीनां यशः कीर्ति प्रेप्सुः। प्राप्तुमिच्छुः। क इव? वामन इव। कथंभूतो वामनः? प्रांशुलभ्ये फले मोहादज्ञानात् उद्बाहुः। उद्गतौ बाहू यस्य स उद्बाहुः। उद्गतौ उत्थापितौ बाहू भुजौ येन स उद्बाहुः। प्रांशुना उच्चेन (उन्नतेन?) पुरुषेण लभ्ये लब्धुं योग्ये। उपहसनाहु:(र्हः) उपहास्यः, तस्य भाव उपहास्यता, ताम् ॥३॥

४. अथवेति।

अथवा पक्षांतरे, पक्षांतरद्योतकः। अस्मिन् सूर्यप्रभवे वंशे मे मम गतिरस्ति, रू(उ)पायोऽस्ति। कथंभूते वंशे? पूर्वसूरिभिः कृतवाग्द्वारे। पूर्वे च ते सूरयश्च पूर्वसूरयः, तैः कृतं वाग्द्वारं यत्र सः कृतवाग्द्वारस्तस्मिन् कृतवाग्द्वारे। कस्मिन् कस्येव? वज्रसमुत्कीर्णे मणौ सूत्रस्येव। वज्रेण हीरकेण समुत्कीर्णो विद्धो वज्रसमुत्कीर्णस्तस्मिन् ॥४॥

५. सोहमति।

सोऽहं लब्धोदयो रघूणां रघुवंशोद्भवानां अन्वयं वंशं वक्ष्ये। कथंभूतोऽपि सन्? तनुवाग्विभवोऽपि सन्। पुनः कथंभूतोऽहम्?[1] तद्गुणैःस्तेषां गुणैस्तद्गुणैः कर्णं आगत्य चापलाय तरलस्वभावाय प्रेरितः प्रोत्साहितः। कथंभूतानां रघूणाम्? आजन्मशुद्धानां, जन्मनः आ आजन्म, आजन्म[नः] गर्भाधानपर्यंतशुद्धं(द्धि)र्विशुद्धिर्येषां ते आजन्मशुद्धास्तेषाम्। पुनः कथंभूतानां रघूणां? आफलोदयकर्मणां, फलोदयात् आ{फलोदयं} आफलोदयं कर्म येषां ते आफलोदयकर्माणस्तेषाम्। पुनः कथंभूतानां रघूणाम्? आसमुद्रक्षितीशानां, समुद्रात् आ, आसमुद्रं आसमुद्रं क्षितेरीशा; आसमुद्रक्षितीशाः, तेषाम्। पुनः कथंभूतानां रघूणाम्? आनाकरथवर्त्मनां, नाकात् आ आनाकं, आनाकं रथवर्त्म येषां ते आनाकरथवर्त्मानः; तेषाम् ॥५॥

---

1 Jina.'s own poetic observation, not seen in Mallinātha.

६. यथेति ।

पुनः कथंभूतानाम् ? यथाविधिहुताग्नीनाम् । विधिमनतिक्रम्य यथाविधि । यथाविधिहुताः अग्नयो यैस्ते, यथाविधिहुताग्नयस्तेषाम् । पुनः कथंभूतानाम् ? यथाकामार्चितार्थिनाम् । काममनतिक्रम्य यथाकामम् । यथाकामं अर्चिताः अतिथयो यैस्ते, यथाकामार्चितार्थिनस्तेषाम् । पुनः कथंभूतानाम् ? यथापराधदंडानाम् । अपराधं अनतिक्रम्य यथापराधं, यथापराधं दंडो येषां ते, यथापराधदंडास्तेषाम् । पुनः कथंभूतानाम् ? यथाकालप्रबोधिनाम् । कालमनतिक्रम्य यथाकालं, प्रबोधितुं शीलं येषां ते यथाकालप्रबोधिनस्तेषाम् ॥६॥

७. त्यागायेति ।

पुनः कथंभूतानाम् ? संभृतार्थानां, संभृतः संचितः अर्थो यैस्ते संभृतार्थास्तेषाम् । कस्मै प्रयोजनाय ? त्यागाय, दानाय । पुनः कथंभूतानाम् ? मितभाषिणां मितं स्वल्पं भाषन्ते इत्येवंशीला मितभाषिणस्तेषाम् । कस्मै ? सत्याय । पुनः कथंभूतानाम् ? विजिगीषूणां, विजिगीषंते विजिगीषवस्तेषाम् । कस्मै ? यशसे । पुनः कीदृशानाम् ? गृहमेधिनां, गृहैर्दारैर्मेध्यंते (मेधन्ते) शुध्यंते गृहमेधिनस्तेषाम् । कस्मै ? प्रजायै, संतत्यै ॥७॥

८. शैशवेति ।

पुनः किंविशिष्टानाम् ? अभ्यस्तविद्यानां, अभ्यस्ता विद्या यैस्तेऽभ्यस्तविद्यास्तेषाम् । क्व ? शैशवे, बाल्ये । कीदृशानाम् विषयैषिणां, विषयं भोगं इच्छंति वाञ्छन्ति विषयैषिणस्तेषाम् । क्व ? यौवने, तारुण्ये । पुनः कीदृशानाम् ? मुनिवृत्तीनां, मुनेर्वृत्तिरिव वृत्तिर्येषां ते मुनिवृत्तयस्तेषाम् । क्व ? वार्धके(क्ये) वृद्धावस्थायाम् । पुनः कथंभूतानाम् । तनुत्यजां, तनुं शरीरं त्यजंतीति तनुत्यजस्तेषाम् । क्व ? अंते, मरणावस्थायाम् । केन ? योगेन ॥८॥

९. रघूणामिति[1] । १०. तमिति ।

संतस्साधवः तं रघुवंशं श्रोतुं अर्हति । योग्याः । कस्मात् कारणात् ? हेम्नः सुवर्णस्य विशुद्धिर्निर्मलता वा अथवा श्यामिका मलिनताऽपि अग्नौ संलक्ष्यते परीक्ष्यते ॥१०॥

११. वैवस्वतेति ।

मनुर्नाम वैवस्वतः महीभृतां आद्यः प्रथमः आसीत्, बभूव । कथंभूतो मनुः ? मनीषिणां माननीयः पूजनीयः पूज्यः । केषां क इव ? छंदसां वेदसां(दानां) प्रणव इव, ॐकार इव ॥११॥

---

1 The Commentator has ignored I. 9

१२. तदन्वयेति ।

तस्य मनोः अन्वयो वंशस्तदन्वयस्तस्मिन् दिलीप इति राजेन्दुः प्रकृष्टराजा प्रसु-(सू)तः उत्पन्नः । कथंभूते तदन्वये ? शुद्धिमति, शुद्धिर्विद्यते यस्य सः शुद्धिमान्, तस्मिन् शुद्धिमति । कस्मिन् क इव ? क्षीरनिधौ रि(इ)न्दुरिव, चन्द्र इव । कथंभूतो दिलीपः ? शुद्धिमत्तरः । प्रकृष्टः शुद्धः शुद्धिमत्तरः ॥१२॥

१३. व्यूढ इति ।

पुनः कथंभूतो दिलीपः ? व्यूढोरस्कः । व्यूढं विस्तीर्णं उरस्कं(उरः) हृदयं यस्य सः। पुनः कथंभूतः ? वृषस्कंधः, वृषस्य वृषभस्य स्कंध इव स्कंधौ यस्य सः । पुनः कीदृशः ? शालप्रांशुः । शालः सर्जतरुस्तद्वत् प्रांशुरुच्चः । पुनः कीदृशः ? महाभुजः, महांतौ भुजौ यस्य सः । दिलीपः क इव ? आत्मकर्मक्षमं देहं आश्रितः क्षात्रो धर्म इव । आत्मनः क्षत्रियस्य कर्म आत्मकर्म, आत्मकर्मणा क्षमः समर्थस्तम् । क्षत्रिय-स्यायं क्षात्रः ॥१३॥

१४. सर्वेति ।

पुनः कथंभूतः ? आत्मना ओ(उ)र्वीं क्रान्त्वा स्थितः । कथंभूतेनात्मना ? सर्व-तेजोवि(भि)भाविना, सर्वेषां तेजः प्रकाशः, तत् अभिभवितुं जेतुं शीलं यस्य सः सर्वते-जोऽभिभावी, तेन । पुनः कीदृशेन ? सर्वेषु पंचस्थानेषु उन्नतस्तेन । पुनः किमात्मना ? सर्वातिरिक्तसारेण । सर्वेभ्योऽतिरिक्तो सारो बलं यस्य सस्तेन । दिलीपः क इव ? मेरुरिव ॥१४॥

१५. आकारेति ।

पुनः कीदृशो दिलीपः ? आकारेण सदृशी प्रज्ञा यस्य सः । आकारसदृशप्रज्ञः । पुनः कीदृशः ? सदृशः(शा)[गमः], समानशास्त्राध्ययनं यस्य सः । कया ? प्रज्ञया, मत्या । पुनः कीदृशः ? समानः सदृशः आरंभा(भः) कार्यारंभो यस्य सः, सदृशारंभः । कैः ? आगमैः शास्त्रैः । पुनः कथंभूतः ? प्रारम्भसदृशोदयः, प्रारंभेण सदृश उदयो यस्य सः ॥१५॥

१६. भीमेति ।

स राजा उपजीविनां सेवकानां अधृष्यश्च असेवनीयः अनाक्रमणीयः । अधिगम्यः सेवनीयः समीपगमनयोग्यश्च । कैर्नृपगुणैः, कथंभूतैर्नृपगुणैः ? भीमकांतैः भीमाः रौद्राः, कान्ताः मनोहराश्च ते नृपगुणाश्च तैः । कैः क इव ? यादोरत्नैः अर्णव इव । यादांसि जलजन्तवश्च रत्नानि च यादोरत्नानि, तैः ॥१६॥

१७. रेखामात्रेति ।

रेखामात्रमिति । नियंतुः शासयितु(सितु)स्तस्य प्रजा लोकाः आत्मनः स्वजातेः वर्त्मनः मार्गात् रेखामात्रं ईषदपि परं अधिकं न व्यतीयुः नातिचक्रमुः । कथंभूतात् वर्त्मनः ? क्षुण्णात् परिसो(शो)धितात् । कथंभूताः प्रजाः ? नेमिवृत्तयः, नेमेः चक्रधारायाः वृत्तिरिव वृत्तिर्वर्तनं यासां ताः नेमिवृत्तयः ॥१७॥

१८. प्रजेति ।

स राजा प्रजानामेव भूत्यर्थं ताभ्यः प्रजाभ्यः बलिं दण्डं अग्रहीत् जग्राह । हि यस्मात् कारणात् रविः सूर्यः सहस्रगुणं रसं पानीयं उत्स्रष्टुं(स्त्रष्टुं) दातुं रसं जलं आदत्ते गृह्णाति ॥१८॥

१९. सेनेति ।

सेनापरिच्छदस्तस्य राज्ञः द्वयमेव अर्थसाधनं बभूव । किं तत् द्वयम् ? शास्त्रेषु व्यापृता बुद्धिः, धनुषि आतता मौर्वी प्रत्यंचा च । सेनैव परिच्छदः परिवारो यस्य स सेनापरिच्छदस्तस्य ॥१९॥

२०. तस्येति ।

तस्य राज्ञः प्रारंभाः कार्यारंभाः फलानुमेया आसन् । कथंभूतस्य तस्य ? संभृतमंत्रस्य । पुनः कथंभूतस्य ? गूढाकारेङ्गितस्य च प्रारंभाः । क इव ? प्राक्तनाः संस्कारा इव । संभृतः संचितो मंत्रो येन सस्तस्य । आकारश्च इङ्गितं च आकारेङ्गिते गूढे गुप्ते आकारेङ्गिते यस्य सस्तस्य । फलैः परिपाकैरनुमीयंते ज्ञायंते फलानुमेनुयाः, तैः ॥२०॥

२१. जुगोपेति ।

स राजा अत्रस्तः अभीतः सन् आत्मानं जुगोप ररक्ष । अनातुरः अरोगी सन् धर्मं भेजे । अगृध्नुः अलोभी सन् अर्थान् द्रव्याण्याददे जग्राह । असंलग्नः सुखं अनु(न्व)भूत् अनुबभूव ॥२१॥

२२. ज्ञानमिति ।

तस्य राज्ञः ज्ञाने सति मौनं आसीत्, शक्तौ सत्यां क्षमा आसीत्, त्यागे दाने सति श्लाघायाः विपर्ययः अभावः आसीत् । तस्य राज्ञः गुणाः गुणानुबन्धित्वात्, गुणानां अनुगमात् सप्रसवा इव, समानप्रसूता इव आसन् ॥२५॥

२३. अनाकृष्टस्येति ।

धर्मरतेस्तस्य जरसा विना वृद्धत्वं आसीत् । कथंभूतस्य तस्य ? विषयैः चक्रंदन(?)वनितादिभिः अनाकृष्टस्य अवशीकृतस्य । पुनः कथंभूतस्य ? विद्यानां पारदृश्वन पारगामिनः । ॥२३॥

२४. प्रजानामिति ।

स राजा प्रजानां पिता आसीत् । कस्मात् ? विनयाधानात् । पुनः कस्मात् ? रक्षणात् भरणादपि । तासां पितरः केवलं जन्महेतवः जन्मकारणानि आसन् ॥२४॥

२५. स्थित्यै० ।

तस्य मनीषिणः पण्डितस्य अर्थकामावपि धर्मं एवास्ताम् । कथंभूतस्य तस्य ? स्थित्यै दंडा(ड्या)न् दण्डयतः । पुनः कथंभूतस्य ? प्रसूतये संतत्यै परिणेतुर्विवाहयितुः ॥२५॥

२६. दुदोहेति ।

स राजा यज्ञाय गां दुदोह । यज्ञार्थं पृथिव्याः धनं आचकर्ष । मघवा इन्द्रः सस्याय दिवं स्वर्गं दुदोह । उभौ इन्द्रदिलीपौ संपद्विनिमयेन परिवर्तेन भुवनद्वयं दधतुः, धारयामासतुः ॥२६॥

२७. न किलेति ।

राजानस्तस्य रक्षितुर्यशः नानुययुः न [अनु]गताः । किलेति प्रसिद्धौ । यत् यस्मात्कारणात् परस्वेभ्यः परद्रव्येभ्यः व्यावृत्ता त{र}स्करता चौर्यं श्रुतौ वेदे च वा स्थिता, कर्णे ॥२७॥

२८. द्वेष्यो[ऽ]पि ।

तस्य राज्ञः द्वेष्यो[ऽ]पि शत्रुरपि शिष्टः उत्तमश्चेत् सम्मतः प्रीतः आसीत् । कस्य कमिव ? आर्तस्य औषधमिव । प्रियो[ऽ]पि दुष्टो[ऽ]पि दुष्टश्चेत् त्याज्यः परिहरणीयः आसीत् । क इव ? अहिना सर्पेण दष्टो दूषितः अंगुष्ट इव ॥२८॥

२९. तं वेधेति ।

वेधा ब्रह्मा महाभूतसमाधिना तं विदधे । महाभूतादीनां पृथिव्यादीनां समाधिः प्रयत्नस्तेन । तथा हीति दृष्टान्ते । तस्य सर्वे गुणाः परार्थैकफला आसन् ॥२९॥

३०. स वेलेति ।

स राजा उर्वीं एकपुरीमिव शशास ररक्ष । कथंभूतां उर्वीम् ? वेलावप्रवलयां, वेलैव वप्रवलयो यस्याः सा ताम् । कथंभूतां उर्वीम् ? परिखीकृतसागराम् । अपरिखाः परिखाः कृताः सागराः यस्याः सा ताम्, पुनः कथंभूतां उर्वीम् ? अनन्यशासनां, न अन्यस्य शासनं आज्ञा यस्यां सा, अनन्यशासना, ताम् ॥३०॥

३१. तस्येति ।

तस्य राज्ञः नाम्ना सुदक्षिणेति पत्नी स्त्री आसीत् । कथंभूतेन नाम्ना ? दाक्षिण्य-रूढेन, दाक्षिण्यं परेच्छानुवर्तित्वं, तेन रूढं प्रसिद्धं तेन । कथंभूता सुदक्षिणा ? मगध-वंशजा, मगधदेशराज्ञः वंशे जाता, मगधवंशजा । कस्य केव ? अध्वरस्य यज्ञस्य दक्षिणेव । ॥३१॥

३२. कलत्रेति ।

वसुधाधिपो दिलीपः तया मनस्विन्या लक्ष्म्या च आत्मानं कलत्रवंतं मेने । कस्मिन्नपि सति अवरोधे स्त्रीसमूहे महत्यपि सति अधिके[ऽ]पि सति ॥३२॥

३३. तस्या इति ।

स राजा विलंबितफलैर्मनोरथं(थैः) कालं वर्षं निनाय अतिवाहितवान् । कथंभूतः सः ? आत्मानुरूपायां आत्मयोग्यायां तस्यां आत्मजन्मसमुत्सुकः, आत्मनः पुत्रस्य जन्म उत्पत्तिस्तत्र समुत्सुकः सोत्कण्ठः ॥३३॥

३४. संतानार्थायेति ।

तेन राज्ञा जगतो गुर्वीं धूः गरिष्ठा धूः राज्यभारः सचिवेषु मंत्रिषु निचिक्षिपे, निक्षिप्ता । कथंभूता धूः ? स्वभुजात् निजभुजदण्डात् अवतारिता अवनीता । कस्मै प्रयोजनाय ? विधये, पुनः महते गरिष्ठाय सुतलाभाय पुत्रप्राप्तये ॥३४॥

३५. गङ्गेति ।

संततिमिच्छता तेन राज्ञा मंत्रिषु कौशला अयोध्या न्यस्ता, समर्पिता । केनेव ? गङ्गामिच्छता भगीरथेनेव । कथंभूतां गङ्गाम् ? पूर्वेषां पितॄणां पावनाय पवित्रीकरणाय क्षमां समर्थां, संततेरपि विशेषणम् ॥३५॥

३६. अथेति ।

अथानंतरं तौ दंपती स्त्रीपुरुषौ गुरोर्वसिष्ठस्याश्रमं तपोवनं जग्मतुः । किं कृत्वा ? विधातारं ब्रह्माणं अभ्यर्च्य, संपूज्य । कथंभूतौ तौ ? प्रयतौ, सावधानौ । कया ? पुत्रकाम्यया, पुत्रवाञ्छया ॥३६॥

३७. स्निग्धेति।

कथंभूतौ तौ ? एकस्यंदनं आस्थितौ। एकश्चासौ स्यन्दनो रथश्च, एकस्यन्दनं(नः) [तम्]। कथंभूतं एकस्यन्दनम् ? स्निग्धगंभीरनिर्घोषं, स्निग्धो मधुरः गंभीरो दूरापाति(ती), निर्घोषः शब्दो यस्य [स]स्तम्। तौ काविव ? प्रावृषेण्यं पयोवाहं आस्थितौ विद्युदैरावताविव। चंचलाविव। प्रावृषि भवः प्रावृषेण्यः तम्। पयोवाहं मेघं आस्थितौ विद्युच्च ऐरावतश्च, तौ। 'मेघस्योपरि यो मेघः स ऐरावण उच्यते' इत्यमरः ॥३७॥

३८. मा भूदिति।

कथंभूतौ तौ ? इति परिमेयपुरःसरौ। इतीति किम् ? आश्रमपीडा मा भूत्। तु पुनः अनुभावविशेषात् प्रभावाधिक्यात्, सेनापरिगताविव, सेनां(ना)वेष्टिता इव ॥३८॥

३९. पवनस्येति।

कथंभूतौ तौ ? तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टितौ। न स्पृष्टाः अलकाः केशाः परिवेष्टनं शिरोवेष्टनं ययोस्तौ। कस्मात् ? पवनस्यानुकूलत्वात् पृष्ठानुगामित्वात्। कथंभूतस्य पवनस्य ? प्रार्थनासिद्ध(द्धि)शंसिनः। प्रार्थना वाञ्छा, तस्याः सिद्धिर्निष्पत्तिस्तां शंसतीति प्रार्थनासिद्धिशंसी, तस्य ॥३९॥

४०. हैयंगवीनमिति।

पुनः कथंभूतौ तौ ? घोषवृद्धान् आभीरान् वन्यानां वनोद्भवानां मार्गशाखिनां वृक्षाणां नामधेयानि नामानि पृच्छतौ। कथंभूतान् घोषवृद्धान् ? हैयंगवीनं नवनीतं आदाय नीत्वा उपस्थितान् प्राप्तान् ॥४०॥

४१. सरसीष्विति।

कथंभूतो तौ ? सरसीषु सरोवरेषु अरविन्दानां आमोदं परिमलं उपजिघ्रंतौ सिंघंतौ।[1] कथंभूतं आमोदम् ? वीचिविक्षोभशीतलं, वीचीनां तरङ्गानां विक्षोभश्चलनं, तेन शीतलं तम्। पुनः कथंभूतम् ? स्वनिःश्वासानुकारिणं, स्वस्य आत्मनः निःश्वासः स्वनिःश्वासस्तमनुकरोति अनुहरति स्वनिःश्वासानुकारी तम् ॥४१॥

४२. सेव्यमानाविति।

पुनः कथंभूतौ तौ ? सेव्यमानौ। कथंभूतैर्वातैः ? सुखं ददातीति सुखदः स्पर्शो येषां ते सुखस्पर्शास्तैः। पुनः कथंभूतैः वातैः ? शालनिर्यासगंधिभिः शालवृक्षस्य

1 सिंघंतौ-is not Sanskrit. It seems to be a local vernacular Gujarati usage.

निर्यासः क्षीरं, तस्य गंधो विद्यते येषां ते शालनिर्यासगंधयस्तैः । पुनः कथंभूतैः वातैः ? पुष्परेणूत्किरैः । पुष्पाणां रेणव पुष्परेणवस्तान् पुष्प रेणू [न्] उत्किरंति उत्क्षिपंति पुष्परेणूत्किरास्तैः । पुनः कथंभूतैः ? आधूतवनराजिभिः, आधूता कंपिता वनराजिर्यैस्ते आधूतवनराजयस्तैः ॥४२॥

४३. मनोभिरामेति ।

पुनः कथंभूतौ तौ ? केकाः शृण्वन्तौ । केका वाणी मयूरस्येत्यमरः । कथंभूताः केकाः ? मनोभिरामाः, चित्तहारिण्यः । पुनः कथंभूताः केकाः ? ख(ष)ड्जसंवादिनीः । ख(ष)ड्जस्वरं संवादिन्यस्ताः । पुनः कथंभूताः केकाः ? शिखण्डिभिर्मयूरैर्द्विधा भिन्नाः । शिखण्डिन्यश्च शिखण्डिनश्च शिखण्डिनः, पुमांस्त्रियेत्येकशेषस्तैः शिखण्डिभिः । पुनः किंभूतैः ? रथनेमिस्वनोन्मुखैः ॥४३॥

४४. परस्परेति ।

पुनः कथंभूतौ ? मृगद्वंद्वेषु परस्पराक्षिसादृश्यं पश्यंतौ । कथंभूतेषु मृगद्वंद्वेषु ? अदूरोज्झितवर्त्मसु । अदूरे निकटे उज्झितं त्यक्तं वर्त्म यैस्ते, अदूरोज्झितवर्त्मानः तेषु । पुनः कथंभूतेषु मृगद्वंद्वेषु स्यन्दनबद्धदृष्टिषु । स्यन्दने रथे आबद्धा दत्ता दृष्टिर्यैस्ते, स्यन्दनाबद्धदृष्टयस्तेषु ॥४४॥

४५. श्रेणीति ।

पुनः कथंभूतौ ? सारसैः पक्षिभिः क्वचित् { उन्नति } उन्नमिताननौ । कथंभूतैः सारसैः ? श्रेणीबंधात् अस्तंभां तोरणस्रजं वितन्वद्भिर्विस्तारयद्भिः । यादृशी {वि}तोरणपरिमाला क्रियते तादृश्येव तैः पंक्तिभिर्विरचिता । केवलं स्तंभौ तत्र न स्तः । कथंभूतैः सारसैः ? कलनिर्ह्रदैः कलो मधुरो निर्ह्रदः शब्दो येषां तैः ॥४५॥

४६. ग्रामेष्विति ।

पुनः किंभूतौ ? अर्घ्यानुपदं यज्वनां अमोघाः सफलाः आशिषः आशीर्वादान् प्रतिगृह्णन्तौ स्वीकुर्वन्तौ । केषु ? ग्रामेषु । किंभूतेषु ग्रामेषु ? आत्मनि(वि)सृष्टेषु, आत्मना दत्तेषु । पुनः कथंभूतेषु ? यूपचिह्नेषु, यज्ञस्तंभसहितेषु ॥४६॥

४७. आदिक्रियाकुलकम् । कापीति ।

व्रजतोस्तयोः कापि अभिख्या शोभा आसीत् । कथंभूतयोस्तयोः ? शुद्धवेशयोः । कयोरिव ? योगे संयोगे चित्राचंद्रमसोरिव । कथंभूतयोः चित्राचंद्रमसोः ? हिमनिर्मुक्तयोः । हिमेण तुषारेण निर्मुक्तौ, तयोः ॥४७॥

४८. तत्तदिति ।

बुधोपमः देवोपमः स भूमिपतिः लङ्घितमप्यध्वानं न बुबुधे । किं कुर्वन् ? तत्तत् पूर्वोक्तं पत्न्यै दर्शयन् । कथंभूतः सः ? प्रियदर्शनः प्रियं दर्शनं यस्य सः ॥४८॥

४९. स इति ।

स राजा सायं तस्य महर्षेः आश्रमं प्रापत् । कथंभूतः स राजा ? दुष्प्रापयशाः । पुनः कथंभूतः सः ? श्रान्तवाहनः । पुनः कथंभूतः ? महिषीसखः महिष्याः सखा महिखी(षी)सखः । कथंभूतस्य महर्षेः ? संयमिनः, संयमो विद्यते यस्य स संयमी । तस्य ॥४९॥

५०. आकीर्णेति । वनांतरा [इति ।][1]

कथंभूतं आश्रमम् ? तपस्विभिः यतिभिः पूर्यमाणम् । किंभूतैस्तपस्विभिः ? वनांतरात् उपावृत्तैः । आगतैः । एकस्मात् वनात् यत् अन्यद्वनं तद्वनान्तरं, तस्मात् । पुनः कथंभूतैः ? स्कंधासक्तसमित्कुशैः । पुनः किंभूतैः ? अग्निप्रत्युद्गमात् अग्निप्रत्युत्थानात् पूतैः पवित्रैः ॥५०॥

५१. सेकान्ते इति ।

पुनः कथंभूतं आश्रमम् ? सेकान्ते वृक्षसेचनावसाने मुनिकन्यकाभिः ऋषिपुत्रीभिः तत्क्षणोज्झितवृक्षकम् । सेचनान्ते उज्झितास्त्यक्ताः वृक्षकाः बालवृक्षाः यत्र सः, तम् । अल्पार्थे कः । कस्मै प्रयोजनाय ? विहंगानां पक्षिणां विश्वासाय निर्भयाय । किंभूतानां विहंगमानाम् ? आलवालाम्बुपायिनाम् । आलवालस्य जलाधारस्य अंबु पिबन्ति इति आल्वालांबुपायिनस्तेषाम् ॥५१॥

५२. आतपात्ययेति ।

पुनः कथंभूतम् ? मृगैर्वर्तितरोमंथम् । कासु ? उटजाङ्गणभूषि(मि)षु । कथंभूतासु भूमिषु ? आतपात्य[य]संक्षिप्तनीवारासु । कथंभूतैः मृगैः ? निषादिभिः उपविष्टैः ॥५२॥

५३. पाठान्तरम् । आकीर्णेति ।

पुनः कथंभूतम् ? मृगैराकीर्णं व्याप्तम् । किंभूतैर्मृगैः ? ऋषिपत्नीनां उटजद्वाररोधिभिः । कैरिव ? अपत्यैरिव । पुत्रैरिव । पुनः कथंभूतैः ? नीवारभागधेयोचितैः नीवारस्य तृणधान्यस्य भागधेये अंशे उचिताः योग्यास्तैः ॥५३॥

---

1 Jina. does not comment on आकीर्णे here, but at I. 53. later.

५४. अभ्युद्धते[ति] ।

पुनः कथंभूतं आश्रमम् ? धूमैरतिथीन् पुनानं पवित्रीकुर्वाणम् । किंभूतैः धूमैः ? आहुतिगन्धिभिः । घृतपरिमलयुक्तैः । कथंभूतान् अतिथीन् ? आश्रमोन्मुखान् । पुनः कथंभूतैः धूमैः ? अभ्युद्धताग्निपिशुनैः उत्थिताग्निसूचकैः ।।५४।।

५५. कुलकम् । अथेति ।

अथानंतरं स राजा तां पत्नीं रथात् अवारोपयत् अवतारयामास । स्वयं च अवततार । किं कृत्वा ? इति यंतारं सारथिं आदिश्य । [आ]ज्ञास्य(प्य) । इतीति किम्? हे यंतो(ता) धूर्यान् अश्वान् विश्रामय श्रमरहितान् कुरु ।।५५।।

५६. तस्मै इति ।

सभ्याः मुनयः सभार्याय तस्मै अर्हणां चक्रुः । कथंभूताय तस्मै ? गोप्त्रे रक्षकाय । पुनः किंभूताय ? अर्हते पूज्याय । कथंभूता मुनयः ? गुप्ततमेन्द्रियाः अत्यंतसंयम(मि)-तेन्द्रियाः । पुनः कथंभूताय तस्मै ? नयचक्षुषे नीतिशास्त्रलोचनाय ।।५६।।

५७. विधेरिति ।

स राजा सायंतनस्य विधेः अंते तपोनिधिं वसिष्ठं ददर्श । किंभूतं तपोनिधिम् ? अरुंधत्या अन्वासिनं, सेवनम् (सेवितम् ?) । कया कमिव ? स्वाहया पत्न्याहविर्भुजमिव वैश्वानरमिव ।।५७।।

५८. तयोरिति ।

तौ राजा राज्ञी च माधवी तयोः पादान् जगृहतुः । गुरुः गुरुपत्नी च प्रीत्या प्रतिननन्दतुः शुभासंशिनं (?) चक्रतुः ।।५८।।

५९. तमिति ।

आतिथेयो मुनिः तं राज्ये कुशलं पप्रच्छ । कथंभूतं तम् ? विनिताध्वपरिश्रमः(मम्) । पुनः कथंभूतं तम् ? राज्याश्रममुनिम् ।।५९।।

६०. अथेति ।

अथानंतरं विजितारिपुरःसरः अर्थपतिस्तस्य मुनेः अग्रे अर्थ्यां(र्थ्या) अर्थसहितां वाचं आददे जग्राह । कथंभूतस्य तस्य ? अथर्वविदः वसिष्ठऋषेः । कथंभूतः सः ? वदतांवरः ।।६०।।

६१. उपेति ।

ननु भो मुने मे मम सप्तसु अङ्गेषु शिवं कल्याणं उपपन्नं युक्तं यस्य मे मम दैवीनां मानुषीणां च आपदां त्वं प्रतिहन्ता ॥६१॥

६२. तवेति ।

भो मुने मंत्रभृतस्तव मंत्रैर्मे मम शरान् दूरात् प्रत्यादिशं(श्यं)त इव । निराक्रियंत इव । कथंभूतैः मंत्रैः ? दूरात् संशमितारिभिः नाशितशत्रुभिः । कथंभूताः शराः ? दृष्टलक्ष(क्ष्य)भिदः प्रत्यक्षलक्ष्यभेदको(काः) ॥६२॥

६३. हविरिति ।

भो होतः त्वया विधिवत् अग्निषु आवर्जितं हविः शष्या (सस्या)नां वृष्ट्यै भवति, वृष्टिकारणं भवति । कथंभूतानां श(स)स्यानाम् ? अवग्रहवि{ श }शोषिणां, वृष्टिबाधाशुष्काणाम् ॥६३॥

६४. पूर्विति । (पुरुषेति) ।

भो मुने अस्मदीयाः प्रजाः पुरुषायुषजीविन्यः संपूर्णायुषः भवन्ति । यत् निरातंकाः भयरहिताः । यत् निरीतयः उपद्रवरहिताः तत् त्वद्ब्रह्मवर्चसं, तेजसां हेतुः कारणम् ॥६५॥

६५. त्वयैवेति ।

भो मुने, त्वया गुरुणा एवं विचिंत्यमानस्य मे मम संपदः सप्रवाहाः कथं न स्युः ? कथंभूतस्य मे ? निरापदः आपद्रहितस्य । कथंभूतेन त्वया ? ब्रह्मयोनिना वेदोत्पत्तिस्थानेन ॥६५॥

६६. किमि(न्त्वि)ति ।

किंतु विशेषोऽस्ति एतस्यां तव वध्वाम् । अदृष्टसदृशत्र(प्र)जं मां सद्वीपा रत्नसूरपि रत्नप्रसविन्यपि मेदिनी ना[ऽ]वा(व)ति न प्रीणाति ॥६५॥

६७. नूनमिति ।[1]

पूर्वे पितरः स्वनिश्वासकवोष्णं पय उपभुंजते ! किंभूतं पयः ? मया आवर्जितं दत्तम् । किं कृत्वा ? नूनं निश्चितं मत्परं दुर्लभं मत्वा । नूनं मत्वेति (मत्त इति ।)

---

1 In his commentary, Jina. his covered both I. 66 and 67 as seen in Malli. In the verses that follow, the commentary is very thin.

वंश्याः पूर्वजाः आद्ये प्रकामभुजः न प्रकाशं अतिशयेन भजंते । प्रकामभुजः न, [न] अधिकभोजिनः इत्यर्थः । कथंःभूताः वंश्याः ? सु(स्व)धासंग्रहतत्पराः । पुनः कथंभूताः । वंश्याः ? नूनं निश्चितं मत्तः परं पिण्डविच्छेददर्शिनः ॥६७॥

६८. स इति ।

सोऽहं प्रकाशश्चांधकारश्च वर्ते(?)। कथंभूतोऽहम् ? इज्याविशुद्धात्मा । पुनः कथंभूतः ? प्रजालोपनिमीलितः । क इव ? लोकालोकः अचल इव ॥६८॥

६९. लोकान्तर[सुख]मिति ।

तपोदानसमुद्‌भवं पुण्यं लोकोत्तरसुखं तु पुनः शुद्धवंश्या संततिः परत्र इह च शर्मणे सुखाय भवति ॥६९॥

७०. नयेति ।

भो विने(धा)तः, शिक्षक (?) तया संतत्या दी(ही)नं मां पश्यन् कथं न दूयसे, न दुःखितो भवति(सि) ? कमिव ? स्नेहात् स्वयं सिक्तं वन्ध्यं निष्फलं आश्रमपादपमिव ॥७०॥

७१. असह्येति ।

भो भगवन् अत्यन्तं ऋणं पितृ(पैतृकं) ऋणं मे मम असह्यपीडं अवेहि । कस्य कमिव ? नवबद्धदंतिनं अरुंतुदं मर्मपीडकं आलानमिव ॥७१॥

७२. तस्मादिति ।

तस्माद् ऋणात् यथाऽहं विमुच्ये मुक्तो भव(वा)मि तथा संविधातुं अर्हसि । इक्ष्वाकूणां दुरापे दुष्प्रापे अर्थे सिद्धयः मनोरथास्त्वदधीनाः त्वदायत्ताः ॥७२॥

७३. इति वि० ।

राज्ञा इति विज्ञापितः ऋषिः क्षणमात्रं ध्यानस्तिमितलोचनस्तस्थौ । क इव ? यथा शब्दः इवार्थे । सुप्तमीनः ह्रद इव । तडागं इव । ध्यानेन स्तिमिते निश्चले लोचने यस्य सः ॥७३॥

७४. स इति ।

स मुनिः प्रणिधानेन प्रकृष्टध्यानेन संततेः स्तंभकारणं अपश्यत् । भुवो भर्तुः भावितात्मा ज्ञातपरमात्मस्वरूपः स मुनिः । अथ पश्चात् एनं राजानं प्रत्यबोधयत् प्रतिबोधयामास ॥७४॥

७५. पुरेति ।

भो राजन् पुरा पूर्वं शक्रं इन्द्रं उपस्थाय सेवित्वा उर्वीं प्रति यास्यतः गच्छतः तव पथि मार्गेषु सुरभिः कामधेनुः आसीत् बभूव । कथंभूता सुरभिः ? कल्पतरुच्छायामाश्रिता ॥७५॥

७६. इमामिति ।[1]

भो राजन् प्रदक्षिणाक्रियातीतस्त्वं तस्याः कोपं अजीजनः जनितवान् । कथंभूतस्त्वम् ? इमां देवीं ऋतुस्नातां स्मृत्वा सपदि सत्वरः ॥७६॥

७७. अवजानासीति ।

सा धेनुः इति त्वां शशाप । इतीति किम् ? भो राजन् यतः मां अवजानासि ते तव प्रजा न भविष्यति । किं कृत्वा ? मत्प्रसूतिं अनाराध्य ॥७७॥

७८. स शापेति ।

भो राजन् स शापः त्वया न श्रुतः । कस्मिन् सति ? अ(आ)काशगङ्गायाः श्रो(स्रो)तसि उद्दामदिग्गजे नदति सति ॥७८॥

७९. अवेहीति । (ईप्सितमिति ।)

तस्याः धेनोः अवगणनात् तदवज्ञानात् मनोरथं यत्नापेक्षं आत्माधीनं अवेहि । यस्मात्कारणात् पूज्यपूजाव्यतिक्रमः श्रेयः प्रतिबध्नाति । आत्मनः ईप्सितं सार्गलं विद्धि ॥७९॥

८०. हविषे [इति] ।

सा धेनुः इदानीं पातालं अधितिष्ठति । कथंभूतं पातालम् ? भुजंगपिहितद्वारम् । कस्मै ? दीर्घसत्रस्य प्रचेतसः हविषे ॥८०॥

८१. स त्वं, पाठान्तरम् ।

भो राजन् सपत्नीकः स त्वं मदीयां वत्समातरं आराधय । कथंभूतां वत्समातरम् ? तस्याः कामधेनोः एकांतरां, एका अंतरा मध्ये यस्याः सा, एकांतरा, तां एकांतराम् । प्रीता सा धेनुः वां युवयोः कामं विधास्यति ८१॥[2]

---

1 This verse is read differently in NS. (I. 76) Edn. 1882, Bombay, with Malli.'s comm. It (NS I 76) carries similar sense, but is not read identically. At I. 81, Jina. reads a variant verse.

2 The ms. has wrongly numbered it here as I. 82. Actually it is I. 81. The mistake in numbering continues upto I 86, which is repeated twice in the ms., thus improving upon the original number. We have mentioned the corrected numbers only.

८२. इतीति ।

अनिंद्या नन्दिनी नाम कामधेनुः वनात् आववृते, आगता । कथंभूता धेनुः ?– अस्य होतुः आहुतिसाधनम् । कथंभूतस्यैवास्य ? इति वादिन एव ॥८२॥

८३. ललाटेति ।

कथंभूता सा धेनुः ? स्वे(श्वे)तरोमाङ्कं बिभ्रती । कथंभूतं स्वे(श्वे)तरोमाङ्कम् ? ललाटोदयम् । पुनः कथंभूतम् ? आ ईषत् भुग्नं वक्त्रम् । कथंभूता धेनुः ? पल्लवस्निग्धपाटला । का कमिव ? संध्या{नं}शशिनमिव ॥८३॥

८४. [भुवमिति] ।

पुनः कथंभूता धेनुः ? प्रस्नवेन भुवं अभिवर्षन्ती । कथंभूतेन प्रस्नवेन ? वत्सालोकं प्रवर्तिना । पुनः कथंभूतेन ? कोष्णेन, स्वल्पतप्तेन । पुनः कथंभूतेन ? अवभृथादपि मेध्येन । कथंभूता धेनुः ? कुण्डोध्नी ८४॥

८५. रजःकणैरिति ।

पुनः कथंभूता धेनुः ? महीपतेस्तीर्थाभिषेकजां शुद्धिं आदधाना । कैः? रजः– कणैः । कथंभूतैः रजःकणैः ? खुरोद्धूतैः । पुनः कथंभूतैः ? अन्तिकात् निकटात् गात्रं स्पृशद्भिः ॥८५॥

८६. तामिति ।

निमित्तज्ञस्तपोनिधिः तपोधनः याज्यं यजमानं पुनः अब्रवीत् । किं कृत्वा ? तां पुण्यदर्शनां दृष्ट्वा । कथँभूतं याज्यम् ? आशंसितावन्ध्यप्रार्थनं, आशंसिता कथिता अवंध्या सफला प्रार्थना यस्य सः, तम् ॥८६॥

८७. अदूरेति ।

भो राजन्, आत्मनं(नः) सिद्धे(द्धिं) अदूरवर्तिनीं विगणय यद्यस्मात् कारणात् नाम्नि कीर्तिते उच्चारिते एव इयं कल्याणी मंगलकारिणी उपस्थिता प्राप्ता ॥८७॥

८८ वन्येति ।

भो राजन् वन्यवृत्तिः फलमूलाहारी त्वं इमां धेनुं शश्वत् आत्मानुगमनेन पृष्ठानुगामित्वेन प्रसादयितुं सेवयितुं (सेवितुं) प्रसन्नां कर्तुं अर्हसि । केन कामिव ? अभ्यसनेन विद्यामिव ॥८८॥

८९. प्रस्थितायामिति ।

प्रस्थितायां अस्यां त्वं प्रतिष्ठेथाः । स्थितायां अस्यां त्वं स्थानं स्थितिं आचरेः । निषण्णायां अस्यां त्वं निषीद उपविश । पीतांभसि अस्यां त्वं अपः पिबेः ॥८९॥

९०. वधूः इति ।

भक्तिमतीर्वधूश्च अर्चितां एनां, आ तपोवनात् प्रयता सावधाना प्रातः अन्वेतु अनुगच्छतु । सायं समयेऽपि प्रत्युद्व्रजेत् अभिमुखं गच्छेत् ॥९०॥

९१. इति ।

भो राजन् इत्यनेन प्रकारेण आप्रसादात् प्रसन्नतापर्यंतं अस्याः परिचर्यापरं(रः) शुश्रूषा[यां] तत्परो भव ॥ ते तव अविघ्नमस्तु । त्वं पितेव पुत्रिणां धुरि स्थेयाः, स्थिरो भूयाः ॥९१॥

९२. तथेति ।

प्रीतिमान् सपरिग्रहः स्त्रीसहितः स शिष्यः तथेति तथाऽस्तु [इति] शासितुः आदेशं आज्ञां प्रतिजग्राह । कथंभूतः ? आनतः नम्रीभूतः । पुनः कथंभूतः ? देशकालज्ञः ॥९२॥

९३. अथेति ।

अथानंतरं सूनृतवाक् स्रष्टुः सूनुः प्रदोषे विशां पतिं सं{नि}वेशाय विससर्ज । कथंभूतः स्रष्टुः सूनुः ? दोषज्ञः । कथंभूतम् ? उर्जितश्रियम् ॥९३॥

९४. सत्येति ।

कल्पवित् विधिज्ञः मुनिः अस्य दिलीपस्य वन्यामेव वनोद्भवामेव संविधां उपहारं कल्पयामास रचयामास । कया ? नियमापेक्षया । कस्यामपि सत्याम् ? तपःसिद्धौ सत्यामपि ॥९४॥

९५. निर्दिष्टामिति ।

कुशशयने संविष्टः स राजा निशां निनाय । कथंभूतः ? प्रयतपरिग्रहद्वितीयः, सावधानस्त्रीसहितः । कथंभूतां निशाम् ? तच्छिष्याध्ययननिवेदितं अवसानं यस्याः सा ताम् । किं कृत्वा ? कुलपतिना वशि(वसि)ष्ठेन निवेदितां पर्णशालां अध्यास्य, प्राप्य ॥९५॥

इति श्री रघुवंशे महाकाव्ये कविकालिदासकृतौ वशि(सि)ष्ठगमनो नाम प्रथमः सर्गः ।[1]

1 We have noted in the introduction how Jina. has not only worded his colophons differently but shows lack of care and punctuality with reference to the same.

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

द्वितीयः सर्गः॥

१. अथेति ।

अथानंतरं प्रजानां अधिपो दिलीपः प्रभाते ऋषेः धेनुं वनाय वनं नेतुं मुमोच । कथंभूतां धेनुम् ? जायाप्रतिग्राहितगन्धमाल्याम् । कथंभूताम् ? पीतप्रतिबद्धवत्साम् । कथंभूतः सः ? यशोधनः । जायया प्रतिग्राहिते गन्धमाल्ये यया सा ताम् । पायितः स पीतः पूर्वं पायितः पश्चात् प्रतिबद्धः वत्सो यस्या सा, ताम् । यश एव धनं यस्य स यशोधनः ॥१॥

२. तस्या इति ।

मनुष्येश्वरधर्मपत्नी तस्याः धेनोः मार्गं अन्वगच्छत् । कथंभूतं मार्गम् ? खुरन्यासपवित्रपांशु(सु)म् । कथंभूता सा ? अपांशु(सु)लानां सतीनां धू(धु)रि कीर्तनीया । का कस्याः कमिव ? स्मृतिः श्रुतेः अर्थमिव ॥२॥

३. निवर्त्येति ।

दयालुः स राजा तां सौरभेयीं जुगोप ररक्ष । किं कृत्वा ? दयितां निवर्त्य । कथंभूतो राजा ? यशोभिः सुरभिः श्रेष्ठः । {पयोधरीभूतचतुःसमुद्राम् ।} धेनुं कामिव ?[1] गोरूपधरां उर्वीमिव । कथंभूता उर्वी ? पयोधरीभूतचतुःसमुद्रां, पयसा अधरीभूताः चत्वारः समुद्राः यस्याः सा, ताम् । उर्वीपक्षे अपयोधराः पयोधराः संपन्नाः चत्वारः समुद्राः यस्याः सा, ताम् ॥३॥

४. व्रतायेति ।

तेन धेनोः अनुचरेण व्रताय शेषोऽपि अनुयायिवर्गः सेवकसमूहः न्यषेधि व्यावर्तितः । तस्य शरीररक्षा च अन्यतो न । हि निश्चितं, मनोः प्रसूतिः स्ववीर्यगुप्ता स्वबलरक्षिता भवति ॥४॥

---

1 We believe that 'धेनुं कामिव ? should precede पयो० etc. or, the words पयो० etc., as they are repeated later in the proper context, should not be read here.

५. आस्वा[दवद्भिरिति] ।

स सम्राट् समाराधनतत्परः अभूत् । कैः ? आस्वादवद्भिः रुचिकरैः तृणानां कवलैः ग्रासैः । पुनः कैः ? कण्डूयनैः अङ्गसंवाहनैः दंशनिवारणैश्च । किंभूतायास्तस्याः ? अव्याहतस्वैरगतेः, न व्याहिता नाशिता स्वैरा स्वेच्छागतिः गमनं यस्याः सा तस्याः । "येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्रा"–ड्थ राजकमित्यमरः ।।५।।

६. स्थित इति ।

स भूपतिः छायेव तां अन्वगच्छत्, अनुगतो बभूव । कथंभूतः ? स्थितां तां अनुलक्षीकृत्य स्थितः । पुनः कथंभूतः ? प्रयातां{नां} अनुलक्षीकृत्य उच्छ(च्च)लितः । पुनः कथंभूतः ? निषेदुषीं तां अनुलक्षीकृत्य स्थितः । पुनः कीदृशः ? जलं आददानां तां अनुजलाभिलाषी ।।६।।

७. स न्यस्तेति ।

स राजा अंतर्मदावस्थः द्विपेन्द्रः इव आसीत् । कथंभूतः द्विपेन्द्रः ? अनाविष्कृतदानराशिः, अप्रकटीकृतमदरेखः । पुनः कथंभूतः ? न्यस्तचिह्नामपि राजलक्षीं(क्ष्मीं) दधानः । किंभूतां राजलक्षीं(क्ष्मीम्) ? तेजोविशेषानुमिताम् । न्यस्तानि त्यक्तानि चिह्नानि छत्रचामरादीनि यस्याः सा ताम् । तेजोविशेषण अ(आ)धिक्येन ज्ञाता, ताम् ।।७।।

८. लतेति ।

स राजा दावं वनं विचचार । कथंभूतः ? लताप्रतानोद्ग्रथितैः केशैरुपलक्षितः । पुनः कथंभूतः ? अधिज्यधन्वा । किं कुर्वन्निव ? गुरुहोमधेनोः रक्षोपदेशात् वन्यान् दुष्टसत्त्वान् दुष्टजीवान् विनेष्यि(ष्य)न्निव शिष्य(क्ष)यितुमिव ।।८।।

९. विसृष्टेति ।

पार्श्वद्रुमाः तस्य राज्ञः आलोकशब्दं उदीरयामासुरिव । कैः ? वयसां विरावैः । पक्षिणां शब्दैः । कथंभूतानां वयसाम् ? उन्मदानाम् । कथंभूतस्य ? विसृष्टपार्श्वानुचरस्य । पुनः कथंभूतस्य ? पाशभृता समस्य । वरुणेन बु(तु)ल्यस्य ।।९।।

१०. मरुदिति ।

बाललताः तं प्रसूनैः अवाकिरन् । कथंभूताः बाललताः ? मरुत्प्रयुक्ताः । कथंभूतं तम् ? मरुत्सखाभम् । पुनः किंभूतम् ? अर्च्यम् । पुनः कथंभूतम् ? आरात्समीपे अभिवर्तमानम् । काः कैरिव ? पौरकन्याः आचारलाजैरिव ।।१०।।

११. धनुरिति ।

अस्य नृपस्य वपुर्विलोकयन्तः हरिण्यः अक्षणी(क्ष्णां) विस्तारफलं आपुः । कथंभूतस्यापि अस्य ? धनुर्भृतोऽपि । कथंभूतं वपुः ? विशंकैः भयरहितैः अंतःकरणैश्चित्तैः दयार्द्रमावं आख्यातं, दयया आर्द्रः भावः यस्य तम्, दयार्द्रभावम् ।।११।।

१२. स इति ।

स राजा कुंजेषु स्वं यशः शुश्राव । कथंभूतं यशः ? वनदेवताभिः उच्चैः उद्गीयमानम् । कथंभूतं यशः ? मारुतपूर्णरन्ध्रैः कूजद्भिः कीचकैः आपादितवंशकृत्यम् ।।१२।।

१३. पृक्तेति ।

पवनो वायुस्तं शिषेवे । कथंभूतः पवनः ? गिरिनिर्झराणां तुषारैः पृक्तः । पुनः कथंभूतः पवनः ? अनोकु(क)हाकंपितपुष्पगन्धिः । कथंभूतं तम् ? आतपक्लान्तम् । पुनः कथंभूतं तम् ? आचारपूतम् । पुनः कथंभूतं तम् ? अनातपत्रं, छत्ररहितम् ।।१३।।

१४. शशामेति ।

वृष्ट्याऽपि विनाऽग्निः शशाम । विशेषात्फलपुष्पवृद्धिरासीत् । सत्त्वेषु अधिकः ऊनं अल्पवनं(बलं) न बबाधे । कस्मिन् सति ? तस्मिन् गोप्तरि वनं गाहमाने सति ।।१४।।

१५. संचारेति ।

पतङ्गस्य प्रभा मुनेः धेनुश्च दिनान्ते प्रदोषे निलयाय गन्तुं प्रचक्रमे । किं कृत्वा ? दिगन्तराणि संचारपूतानि कृत्वा । कथंभूता धेनुः ? पल्लवरागताम्रा । कथंभूता प्रभा ? पल्लवरागताम्रा ।।१५।।

१६. तामिति ।

मध्यमलोकपालः तां अन्वग् ययौ । कथंभूतां ताम् ? देवतापितृ(त्र)तिथिक्रियार्थाम् । सा च तेन बभौ । कथंभूतेन तेन ? सतां मतेन । केन केव ? विधिना साक्षात् उपपन्ना श्रद्धेव ।।१६।।

१७. स इति ।

स राजा वनानि पश्यन् ययौ । किंभूतानि वनानि ? पल्वलोत्तीर्णवराहयूथानि । पुनः कथंभूतानि ? अ(आ)वास[वृक्षोन्]मुखबर्हं(र्हि)णानि । पुनः कीदृशानि ? मृगाध्यासितसा(शा)द्वलानि । स्य(श्या)मायमानानि ।।१७।।

१८. आपीनेति ।

उभौ धेनुदिलीपौ अंचिताभ्यां मंथराभ्यां गताभ्यां तपोवनावृत्तिपथं अलंचक्रतुः । गृष्टिः धेनुः । कस्मात् ? आपीनभारोद्वहनात् । नरेन्द्रः कस्मात् ? वपुषः गुरुत्वात् । एकवारं प्रसूता गृष्टिः कथ्यते ॥१८॥

१९. वशि(सि)ष्ठेति ।

वनिता सुदक्षिणा वशि(सि)ष्ठधेनोरनुयायिनं तं लोचनाभ्यां पपौ । साकाङ्क्षं ददर्श लोचनाभ्याम् । काभ्यामिव ? उपोषिताभ्यामिव । कथंभूतं तम् ? वनांतात् आवर्तमानम् । कथंभूता वनिता । निर्मे(मे)षाला(ल)सपक्ष्मपङ्क्तिः ॥१९॥

२०. पुरेति ।

तदन्तरे सा धेनुः विरराज । कथंभूता धेनुः ? वर्त्मनि पार्थिवेन पुरस्कृता । पुनः कथंभूता ? पार्थिवधर्मपत्न्या प्रत्युद्गता धेनुः । केव ? दिनक्षपामध्यगता सन्ध्येव ॥२०॥

२१. प्रदक्षिणीति ।

सुदक्षिणा अस्याः शृङ्गान्तरं आनर्च पूजयामास । किं कृत्वा ? तां तपस्विनीं धेनुं प्रदक्षिणीकृत्य प्रणम्य च । कथंभूता सुदक्षिणा ? साक्षतपात्रहस्ता । साक्षतं पात्रं हस्ते यस्याः सा । शृङ्गान्तरं किमिव ? अर्थसिद्धेर्द्वारमिव ॥२१॥

२२. वत्सेति ।

वत्सोत्सुकाऽपि सा धेनुः स्तिमिता सती सपर्यां पूजां प्रत्यग्रहीत् इति तौ ननन्दतुः । हि निश्चितं तद्विधानां गोसदृशानां भक्त्या सेवया उपपन्नेषु प्राप्तेषु प्रसादचिह्नानि पुरः–फलानि भवन्ति ॥२२॥

२३. गुरोरिति ।

भुजोच्छिन्नरिपुर्दिलीपः दोहावसाने पुनरेव निषण्णां दोग्ध्रीं भेजे । किं कृत्वा ? सदारस्य गुरोः पादौ निपीड्य । पुनः किं कृत्वा ? साध्यं विधिं समाप्य । कथंभूतो दिलीपः ? भुजोच्छिन्नरिपुः ॥२३॥

२४. तामिति ।

गृहिणीप्रियः गृहिणीसहायः स गोप्ता गुप्तां तां क्रमेण अनु सं{नि}विवेश सुप्तवान् । सुप्तोत्थितां तां प्रातः अनूदतिष्ठत् । किं कृत्वा ? अन्वास्य । किंभूतां ताम् ? अन्तिकन्यस्तबलिप्रदीपाम् ॥२४॥

२५. इत्थमिति ।

महिष्या समं प्रजार्थं इत्थं व्रतं पालयतस्तस्य राज्ञः सप्तत्रिग(स्त्रिगु)णानि दिनानि व्यतीयुः । कथंभूतस्य ? दीनोद्धरणोचितस्य । पुनः कीदृशस्य ? महनीयकीर्तिः-(र्तेः) ॥२५॥

२६. अन्येद्युरिति ।

आत्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गौरीगुरोः गह्वरं आविवेश । कथंभूतं गह्वरम् ? गङ्गाप्रपातांतविरूढशष्पम् ॥२६॥

२७. सेति ।

सिंहः तां प्रसह्य चकर्ष । किलेत्यलीके । कथंभूतः सिंहः ? नृपेण अलक्षिताभ्युत्पतनः । कथंभूतेन नृपेण ? इति अद्रिशोभाप्रहितेक्षणेन । इतीति किम् ? सा धेनुः हिंस्रैः क्रूरैः मनसाऽपि दुष्प्रह(ध)र्षा, अनाक्रमणीया ॥२७॥

२८. तदियेति ।

तदीयं आक्रन्दितं नृपस्य दृष्टिं निवर्तयामास । किंभूतं आक्रन्दितम् ? गुहानिबद्ध-प्रतिशब्ददीर्घम् । कथंभूतस्य तस्य ? आर्तसाधोः । किं कृत्वेव ? रश्मिषु रज्जुषु आदायेव ॥२८॥

२९. स इति ।

स धनुर्धरः पाटलायां गवि तस्थिवांसं केसरिणं ददर्श । कस्यां कमिव ? सानुमतः धातुमय्यां अधित्यकायां पर्वतोपरिभूमौ प्रफुल्लं लोध्रद्रुममिव ॥२९॥

३०. तत इति ।

ततो[ऽ]नन्तरं जाताभिषङ्गो नृपतिः मृगेन्द्रस्य वधाय निषङ्गात् शरं उद्धर्तुमैच्छत् । कथंभूतो नृपतिः ? मृगेन्द्रगामी । किंभूतस्य मृगेन्द्रस्य ? वध्यस्य । पुनः किंभूतो नृपतिः ? शरण्यः; शरणे साधुः शरण्यः । पुनः कथंभूतः ? प्रसवोद्धतारिः ॥३०॥

३१. वामेति ।

वामेतरस्तस्य प्रहर्तुः, वामेतरः दक्षिणः करः सायकपुङ्खे सक्ताङ्गुलिः लग्नाङ्गुलिः इव अवतस्थे । कथंभूते सायकपुङ्खे ? नखप्रभाभूषितकङ्कपत्रे । करः क इव ? चित्रार्पितारम्भ इव ॥३१॥

३२. बाहुप्रतिष्टंभेति ।

राजा स्वतेजोभिः अंतः अदह्यत । कथंभूतो राजा ? बाहुप्रतिष्टंभविवृद्धमन्युः कथंभूतैः स्वतेजोभिः ? अभ्यर्णे निकटे, आगस्कृतं अपराधं (अपराधकारिणं) अस्पृशद्भिः। अप्रव(वृ)द्भिः । राजा क इव ? मन्त्रौषधिरुद्धवीर्यः भोगीव ॥३२॥

३३. तमेति ।

सिंहस्तं भूपालसिंहं मनुष्यवाचा निजगाद । किं कुर्वन् ? आत्मवृत्तौ विस्मापयन् । कथंभूतं तम् ? आर्यगृह्यम् । कथंभूतः सिंहः ? निगृहीतधेनुः । पुनः कथंभूतं तम् ? विस्मितम् । पुनः कथंभूतं तम् । मनुवंशकेतुं, सूर्यवंशभूषणम् ॥३३॥

३४. अलमिति ।

भो महीपाल ! तव श्रमेण अलं पूर्य(क्रिय)ताम् । इतो मयि प्रयुक्तमपि अस्त्रं वृथा स्यात् । मारुतस्य वायोः पादपोन्मूलनशक्तिरंहः शिलोच्चये पर्वते न मूर्च्छति ॥२४॥

३५. कै[लासगौरमि]ति ।

राजन् मां अष्टमूर्तेः किंकरं अवेहि । किं नाम ? कुम्भोदरं नाम । किंभूतं माम् ? निकुम्भतुल्यम् । किं भूतम् ? अष्टमूर्तेः पादार्पणानुग्रहपूतपृष्ठम् । किंभूतस्य अष्टमूर्तेः ? कैलासगौरं वृक्षं(षं) आरुरुक्षोः ॥३५॥

३६. अमुमिति ।

भो राजन् ! पुरः अग्रतः अमुं देवदारुं पश्यसि । असौ देवदारुः वृषभध्वजेन पुत्रीकृतः । यो देवदारुः स्कंदस्य मातुः पयसां दुग्धानां रसज्ञः । किंभूतानां पयसाम् ? हेमकुम्भस्तननिसृतानाम् ॥३६॥

३७. कण्डूयमानेनेति ।

कटं कण्डूयमानेन वनद्विपेन कदाचित् अस्य वृक्षस्य त्वक् उन्मथिता । अथ पश्चात् अद्रेस्तनया एनं वृक्षं शुशोच । कमिव ? असुरास्त्रैः आलीढं सेनान्यमिव ॥३७॥

३८. तदेति ।

ततः प्रभृत्येव मतङ्गजानां त्रासार्थं अस्मिन् अद्रिकुक्षौ शूलभृता अहं व्यापारितः । किं कृत्वा ? सिंहत्वं विधाय । किंभूतं सिंहत्वम् ? अङ्कागतसत्त्ववृत्ति ॥३८॥

३९. तस्या[लमि]ति ।

तस्य क्षुभितस्य मे मम एषा शोणितपारणा उपस्थिता । कथंभूता एषा ? तृप्त्यै अलम् । कस्य केव ? सुरद्विषः राहोः चान्द्रमसी सुधेव ॥३९॥

४०. स त्वमिति ।

भो राजन् ! स त्वं लज्जां विहाय निवर्तस्व । भवान् गुरौ दर्शितशिष्यभक्तिः अभूत् । शस्त्रेण रक्षं(क्ष्यं) वस्तु यत् अशक्यरक्षं(क्ष्यं) भवति तद्वस्तु शस्त्रभृतां यशः न क्ष(क्षि)णोति ॥४०॥

४१. इतीति ।

पुरुषाधिराजः आत्मनि अवज्ञां शिथिलीचकार । किं कृत्वा ? इति मृगाधिराजस्य प्रगल्भं वचो निशम्य । कथंभूतः पुरुषाधिराजः ? गिरिशप्रभावात् प्रत्याह[तास्त्रः] ॥४१॥

४२. पत्यब्रवीदिति ।

पुरुषाधिराजः न केवलं आत्मनि अवज्ञां शिथिलीचकार, एवं प्रत्यब्रवीच्च । कथंभूतः ? तत्पूर्वसङ्गे इषुप्रयोगे वितथप्रयत्नः । क इव ! अ(त्र्य)म्बकवीक्षितेन जडीकृतः वज्रं मुमुक्षन् वज्रपाणिरिव ॥४२॥

४३. संरुद्धेति ।

भो मृगेन्द्र ! संरुद्धवेषो(चेष्टो)ऽहं तु पुनः यद्वचः विवक्षुः तत्कामं हास्यं, भवान् प्राणभृतां अंतर्गतं सर्वं भावं विवेद, अतः अभिधास्ये ॥४३॥

४४. मान्ये(न्य)[इ]ति ।

स परमेश्वरः मे मम मान्यः । कथंभूतः सः ? स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः । आहिताग्नि(ग्ने)र्गुरोरपि इटं धनं अनुपेक्षणीयम् । कथंभूतं धनम् ? पुरस्तात् नश्यत् ॥४४॥

४५. स इति ।

भो मृगेन्द्र ! स त्वं मदीयेन देहेन शरीरवृत्तिं आहारं निर्वर्तयितुं संपादयितुं पूरयितुं प्रसीद । दिनावसानोत्सुक[बाल]वत्सा इयं महर्षेः धेनुः विमुच्यताम् ॥४५॥

४६. अथेति ।

अथानंतरं स भूतेश्वरपार्श्ववर्ती सिंहः किंचिद्विहस्य भूयः अर्थपतिं बभाषे । किं कुर्वन् ? दंष्ट्रामयूखैः गिरिगह्वराणां अंधकारं शकलानि कुर्वन् ॥४६॥

४७. एकातेति ।

भो राजन् ! मे मम विचारमूढः प्रतिभासि । किं कुर्वन् ? अल्पस्य हेतोर्बहु हातुमिच्छन् । किं तद्बहु ? जगतः एकातपत्रं प्रभुत्वं, नवं वयः कान्तमिदं वपुश्च ॥४७॥

४८. भूतेति ।

भो प्रजानाथ ! भो राजन्, चेद्यदि ते तव भूतानुकंपा तर्हि त्वदन्ते तवावसाने इयं एका स्वस्तिमती भवेत् । शश्वत् उपप्लवेभ्यः प्रजाः पासि । क इव ? पितेव ॥४८॥

४९. अथेति ।

भो राजन् ! अथ एकधेनोः अपराधदण्डात् कृशानुप्रतिमात् [बिभेषि] तर्हि भवता अस्य मुनेः मन्युः विनेतुं शक्यः । कथंभूतेन भवता ? कोटिशः घटोघ्नीः घटप्रमाणस्तना गाः धेनूः स्पर्शयता ददता ॥४९॥

५०. तदिदि ।

भो राजन्, तत् तस्मात्कारणात् कल्याणपरम्पराणां भोक्तारं ऊर्जस्वलं आत्मदेहं रक्ष । हिं निश्चितम् । महीतलस्पर्शनमात्रभिन्ने ऋद्धं राज्यं ऐन्द्रपदमाहुः ॥५०॥

५१. एतावदु[क्त्वेति] ।

एतावदुक्त्वा शिलोच्चयोऽपि प्रीत्या उच्चैः क्षितिपालं तमेव अर्थं अभाषतेव । केन ? प्रतिस्वनेन प्रतिशब्देन । कथंभूतेन ? आत्मगुहाशयेन । कस्मिन् सति ? मृगेन्द्रे एतावत् उक्त्वा विरते सति ॥५१॥

५२. निशम्येति ।

मनुष्यदेवः पुनरपि उवाच । किं कृत्वा ? देवानुचरस्य वाचं निशम्य । कथंभूतो मनुष्यदेवः ? तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः । पुनः कथंभूतः ? सुतरां दयालुः ॥५२॥

५३. क्षतेति ।

क्षतात् त्रायते किल इति क्षत्रस्य शब्दः उदग्रः गरिष्ठः भुवनेषु रूढः । तद्विपरीतवृत्तेः राज्येन किम् ? वा, अथवा उपक्रोशमलीमसैर्निन्दागर्हितैः प्राणैः किं प्रयोजनम् ? ॥५३॥

५४. कथमिति ।

भोः सिंह ! अन्यपस्विनीनां विश्राणनात् दानात् मुनेः अनुनयः प्रतिबोधः कथं शक्यः ? इमां सुरभिं सुरभेः अनूनां देवगवीप्रभवां अवेहि । तु पुनः त्वया अस्यां रुद्रौजसा प्रहृतम् ।।५४।।

५५. सेयमिति ।

भो सिंह ! सा इयं धेनुः स्वदेहार्पणनिक्र(ष्क्र)येण मया भवतः मोचयितुं न्याय्या एव । तव पारणा विहता न स्यात् । मुनेः क्रियार्थश्च अलुप्तो भवेत् ।।५५।।

५६. भवानिति ।

भो सिंह ! परवान् भवानपि इदं{धनं}अवैति । हि यस्मात् कारणात् देवदारौ तव महान् यत्नः । हि निश्चितम् । स्वयं अक्षतेन पुरुषेण रक्ष्यं वस्तु विनाश्य नियोक्तुः अग्रे स्थातुं न हि शक्यम् ।।५६।।

५७. किमिति । किमप्यहिंस्येति ।

भो सिंह ! चेद्यदि अहं ते तव किमप्यहिंस्यः तर्हि मे मम यशःशरीरे दयालुर्भव । मद्विधानां एकान्तविध्वंसि{के}षु भौतिकेषु पिण्डेषु अनावस्था अनादरः खलु ।।५७।।

५८. संबंधमाभाषणेति ।

भो भूतनाथानुग ! संबंधं कुटुम्बित्वं आभाषणपूर्वमाहुः । स संबंधः वनांते संगतयोः नौ आवयोः जातः । भो भूतनाथानुग ! तस्मात्कारणात् संबंधिनः मे मम प्रणयं प्रीतिं विहन्तुं नाशयितुं नार्हसि ।।५८।।

५९. तथेति ।

स दिलीपः हरये स्वदेहं उपानयत् । कथंभूताय हरये ? तथेति तथास्तु इति गां उक्तवते । कथंभूतो दिलीपः ? न्यस्तशस्त्रः । पुनः कथंभूतः ? सद्यः प्रतिष्टंभ-विमुक्तबाहुः । स्वदेहं कथंभूतमिव ? आमिषस्य पिण्डमिव ।।५९।।

६०. तस्मिन्निति ।

तस्मिन् क्षणे प्रजानां पालयितुः उपरे(रि) विद्याधरहस्तमुक्ता पुष्पवृष्टिः पपात । कथंभूतस्य ? अवाङ्मुखस्य । पुनः कथंभूतस्य ? उग्रं सिंहनिपातं उत्पश्यतः ।।६०।।

६१. उत्तिष्ठेति ।

उत्थितः सन् स राजा अग्रतः प्रश्नविणीं गां ददर्श, सिंहं न । किं कृत्वा ? 'भो वत्स उत्तिष्ठ' इत्यमृतायमानं उत्थितं वचः निशम्य । गां कामिव ? स्वां जननीमिव ॥६१॥

६२. तमिति ।

धेनुर्विस्मितं तं उवाच । भो साधो मया मायामुद्भाव्य परीक्षितोऽसि । ऋषिप्रभावात् अन्तकोऽपि मयि हतुं(न्तुं)न प्रभुः । अन्यहिंस्राः दुष्टसत्त्वाः किमुत, किं पुनः ? "भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्म(स्मि) ते, वत्स वरं वृणीष्व । न केवलानां पयसां प्रसूतिमवेहि मां कामदुग्धां(धां)प्रसन्नाम् ।"[1] ॥६२॥

६३. भक्त्येति ।

भो वत्स, गुरौ भक्त्या मयि अनुकम्पा(म्प) [या] च अहं ते, तुभ्यं प्रीताऽस्मि । वरं वृणीष्व । मां केवलानां पयसां [प्रसूतिं]न अवेहि । मां कामदुग्धां(धां)कामधेनुं अवेहि जानीहि ।

"ततः समानीय स मानितार्थी
हस्ती(स्तौ) स्वहस्तार्जितवीरशब्दः ।" ॥६३॥

६४. तत इति ।

ततो[ऽ]नन्तरं मानितार्थी स राजा सुदक्षिणायां तनयं ययाचे । किं कृत्वा ? हस्तौ समानीय संयोज्य । कथंभूतो राजा ? स्वहस्तार्जितवीरशब्दः । कथंभूतं तनयम् ? वंशस्य कर्तारम् । पुनः कथंभूतं तनयम् ? अनन्तकीर्तिम् ॥६४॥

६५. संतानकामायेति ।

सा पयस्विनी इति तं समादिदेश । इतीति किम् ? भो पुत्र । मदीयं [पयः] पत्रपुटे दुग्ध्वा उपभुङ्क्ष्वेति । किं कृत्वा ? संतानकामाय राज्ञे नृपाय तथेति तथा[ऽ]स्तु इति कामं अभिलाषं प्रतिश्रुत्य अङ्गी{कारं}कृत्य ॥६५॥

६६. वत्सस्येति ।

भो मातः, वत्सस्य होमार्थविधेश्च शेषं ते तव औधस्यं क्षीरं पातुं इच्छामि । किं कृत्वा ? गुरोः अनुज्ञां अधिगम्य प्राप्य । औधस्यं किमिव ? रक्षिताया उर्व्याः षष्ठांशमिव ॥६६॥

---

1 Surprisingly here vs. 2/63 is quoted in the commentary. Similarly 2/64 (ab) is quoted under 2/63.

६७. इत्थमिति ।

क्षितीशेन इत्थं विज्ञापिता वसिष्ठधेनुः प्रीततरा बभूव । तदन्विता नृपसहिता हैमवतात् कुक्षेः अश्रमेण आश्रमं प्रत्याययौ च ॥६७॥

६८. तस्या इति ।

प्रसन्नेन्दुमुखः स राजा तस्याः प्रसादं वाचा प्रियायै शशंस । वाचा कयैव ? पुनरुक्तयैव । कथंभूतः सः ? नृपाणां गुरुः । किं कृत्वा ? गुरवे निवेद्य ॥६८॥

६९. स इति ।

अनिन्दितात्मा सद्वत्सलः स राजा नन्दिनीस्तन्यं पपौ । कथंभूतः सः ? वसिष्टेन कृताभ्यनुज्ञः । कथंभूतं स्तन्यम् ? वत्सनिपीतशेषं स्तन्यम् । किमिव ? शुद्धं यश(शो) मूर्तं इव । किम् ? सो[ऽ]धितृष्णः ॥६९॥

७०. प्रातर् इति ।

वशी वसिष्ठः तौ दम्पती स्वां राजधानीं प्रति प्रस्थापयामास । किं कृत्वा ? प्रातर्व्य(र्य)थोक्तव्रतपारणान्ते प्रास्थानिकं प्रस्थानयोग्यं स्वस्त्ययनं मङ्गलाचरणं प्रयुज्य ॥७०॥

७१. प्रदक्षिणीकृत्येति ।

सन्मङ्गलोदग्रतरप्रभावो नृपः प्रतस्थे । कि कृत्वा ? हुतं हुताशं प्रदक्षिणीकृत्य । किं कृत्वा ? भर्तुरनंतरं अरुन्धतीं वसिष्ठभार्यां प्रदक्षिणीकृत्य । पुनः किं कृत्वा ? सवत्सां धेनुं प्रदक्षिणीकृत्य ॥७१॥

७२. तमिति ।[1]

प्रजाः तं नेत्रैः[पपुः] । कथंभूतं तम् ? अदर्शनेन आहितोत्कण्ठम् । पुनः कथंभूतम् ? प्रजार्थव्रतकर्शिताङ्गम् । कमिव ? नवोदितं औषधीनां नाथमिव ॥७२॥

७३. पुरमिति ।

पुरंदरश्रीः स राजा भूयः पुनरपि भुजगेन्द्रसमानसारे भुजे भुमेर्धुरं आससञ्ज । किं कृत्वा ? उत्पताकं पुरं प्रविश्य । पुनः कथंभूतः ? पौरैः अभिनन्द्यमानः स्तूयमानः ॥७३॥

---

1 Jina. 2/72, 73, 74 are Mall, 2/73, 74, 72. The sequence in Malli. is logical.

७४. श्रोत्राभिरामेति ।

धर्मपत्नीसहितः सहिष्णुः स राजा रथेन मार्गं ययौ । कथंभूतेन रथेन ? श्रोत्राभिरामध्वनिना । पुनः कथंभूतेन ? अनुद्घातसुखेन सौम्यगमनसुखप्रदेन रथेन । केनेव ? स्वेन पूर्णेन मनोरथेन ॥७४॥

७५. अथेति ।

अथानन्तरं राज्ञी नरपतिकुलभूत्यै गर्भं आधत्त । का कामिव । सुरसरिद् वह्निनिष्ठ्यूतमैशं तेजः इव । कथंभूतं गर्भम् ? गुरुभिः लोकपालानुभावैः अभिनिविष्टं अनगतम् ॥७५॥

इति श्रीभट्टारक जिनभद्रसूरिशिष्याचार्य श्री जिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वरलाभो नाम द्वितीयस्सर्गोऽलमिति ॥ शुभं भवतु ॥

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

तृतीयः सर्गः ।

१. अथेति ।

अथानन्तरं सुदक्षिणा दोहदलक्षणं गर्भं दधौ । कथंभूतं दोहदलक्षणम् ? भर्तुः दिलीपस्य ईप्सितं वाञ्छितम् । पुनः कथंभूतम् ? उपस्थितोदयं प्राप्तोत्पत्तिः(त्तिम्) । पुनः कथंभूतम् ? सखीजनोद्वीक्षणकौमुदीमुखम् । परिवारजनज्योत्स्नाप्रारम्भम् । पुनः कथंभूतम् ? इक्ष्वाकुकुलस्य संततेः निदानम् ॥१॥

२. शरीरेति ।

सा सुदक्षिणा मुखेन अलक्ष(क्ष्य)त । कथंभूता ? शरीरसादाह(द)समग्रभूषणा । कथंभूतेन ? लोध्रपाण्डुना । केन केव ? तनुप्रकाशेन शशिना प्रभातकल्पा शर्वरीव । कथंभूता शर्वरी ? विचेयतारका ॥२॥

३. तत इति ।

ततो[ऽ]नन्तरं प्रकृतिप्रियंवदा प्रिया दोहदश्रद्धां प्रपेदे । दोहदं कमिव ? विशांपत्युः किञ्चित् उदयोन्मुखं मनोरथमिव । कथंभूतस्य विशांपत्युः ? अनन्यसन्ततेः । पुनः कथंभूतस्य ? अनन्यसौहार्दरसस्य ॥३॥

४. मुखेनेति ।

सा सुदक्षिणा मुखेन प्रभातकल्पां रजनीं व्यडम्बयत् । कथंभूतने मुखेन ? केतकपत्रपाण्डुना । कथंभूता सा ? कृशाङ्गयष्टिः । पुनः कथंभूता सा ? परिमेयभूषणा । कथंभूतां रजनीम् ? स्थिताल्पताराम् । पुनः कथंभूताम् ? भरणेन्दुमण्डलाम् ॥४॥

५. तदाननमिति ।

क्षितीश्वरः रहः एकान्ते तदाननं समाघ्राय तृप्तिं न ययौ । कथंभूतं तदाननम् ? मृत्सुरभि मृत्सुगन्धिकम् । [कः]कमिव ? करी वनराजिपल्वलमिव । कथंभूतं पल्वलम् ? शुचिव्यपाये पयोमुचां पृषतैः सिक्तम् ॥५॥

६. दिवमिति ।

अतः कारणात् सा सुदक्षिणा तथाविधे अभिलाषे प्रथमं मनः बबन्ध । किं कृत्वा ? अन्यरसान् विलङ्घ्य । अतः कुतः ? दिगन्तविश्रान्तरथो मत्सुतः महीं भोक्ष्यते । कः कामिव ? मरुत्वान् दिवमिव ॥६॥

७. नेति ।

उत्तरकोसलेश्वरः आदृतः सन् इति अनुवेलं प्रिय(या)सखीः पृच्छति स्म । इतीति किम् ? मागधी राज्ञी केषु वस्तुषु स्पृहावती । मे मम ह्रिया किञ्चित् ईप्सितं न शंसति ॥७॥

८. उपेत्य सेति ।

सा सुदक्षिणा दोहददुःखशीलतां उपेत्य यदेव वव्रे तदेव आहृतं अपश्यत् । अधिज्यधन्विनः भूपतेः अस्याः इष्टं त्रिदिवे[ऽ]पि अनासाध्यं दुष्प्रापं न बभूव ॥८॥

९. दिनेष्विति ।

नितान्तपीवरं आनीलमुखं तदीयं स्तनद्वयं वारणदंतकोशयोः समुद्गमो कान्ति जभार । कथंभूतयोः दन्तकोशयोः ? गवलापिधान्ययोः । कथंभूतं स्तनद्वयम् ? [1]मधू[क]-पाण्डुरम् । केषु सत्सु ? दिनेषु गच्छत्सु सत्सु ॥९॥

१०. दिनेष्विति ।

नितान्तपीवरं आनीलमुखं तदीयं स्तनद्वयं भ्रमरावलीढयोः गवलापिधान(न्य)योः सुजातयोः पङ्कजकोशयोः श्रियं व्यतिकरश्चकार । केषु सत्सु ? दिनेषु गच्छत्सु सत्सु ॥१०॥

११. क्रमेणेति ।

उपोढगात्रोपचया प्रचीयमाना[वयवा] स्थूलीभवंतः अवयवा स्तनजघनादयो यस्याः सा । सा सुदक्षिणा रराज । किं कृत्वा ? क्रमेण दोहदव्यथां च वि(नि)स्तीर्य । केव ? पुराणपत्रापगमादनन्तरं सन्नद्धं {अन्योन्यं} मनोज्ञं(ज्ञ)पल्लवा लतेव ॥११॥

१२. निधानगर्भामिवेति ।

नृपः ससत्त्वां महिषीं अमन्यत । महिषीं कामिव ? निधानगर्भा[मिव] सागराम्बरामित्र । पुनः कामिव ? अभ्यंतरलीनपावकां शमीमिव । पुनः कामिव ? अंतःसलिलां सरस्वतीं नदीमिव ॥१२॥

---

1. In ३. ९, which is Malli. ३.८, Jina. seems to accept both 'नितान्तपीवरं and 'मधूकपाण्डुरम्'. The N. S. Edn. Bombay 1882, P. ५४ has mentioned मधूक॰ as a variant of नितान्त in the ft. note. Again Jina. at ३. 10 reads the पाठान्तर of the same verse. But here we have भ्रमरावलीढयोः गवलापिधान्ययोः ।

१३. प्रियानुरागस्येति ।

धीरः स राजा यथाक्रमं पुंसवनादिकाः क्रियाः व्यधत्त । कथंभूताः क्रियाः ? प्रियानुरागस्य सदृशीः । पुनः कथंभूताः ? मनःसमुन्नतेः सदृशी । पुनः कथंभूताः ? भुजार्जितानां दिगन्तसम्पदां सदृशीः । पुनः कथंभूताः ? श्रुतेश्च सदृशीः ॥१३॥

१४. सुरेन्द्रेति ।

नृपः तया ननन्द । कथंभूतया तया ? पारिप्लवनेत्रया । पुनः कथंभूतया तया ? सुरेन्द्रमात्राश्रितगर्भगौरवात् प्रयत्नमुक्तासनया । पुनः कथंभूतया ? उपचाराञ्जलिखिन्नहस्तया । कथंभूतो नृपः ? गृहागतः अंतःपुरमध्यगतः ॥१४॥

१५. कुमारभृत्येति ।

निरत्ययाय प्रसवाय तस्थुसि(षी) सा सुदक्षिणा बभौ । सा केव ? समासन्नफला क्रियेव । कस्मिन् सति ? कुमारभृत्याकुशलैः बालचिकित्साप्रवीणैः आप्तैः भिषग्भिः गर्भवेश्मनि अधितिष्ठते(ति) सति ॥१५॥

१६. ग्रहैस्ता(स्त)[तः] ।

ततो[ऽ]नन्तरं शचीसमा सुदक्षिणा समये पुत्रमसूत । का कमिव ? त्रिसाधन-शक्तिः अक्षतं अर्थमिव । कथंभूतं पुत्रम् ? असूर्यगैः अनस्तमितैः उच्चसंश्रयैः पञ्चभिर्ग्रहैः सूचितभाग्यसम्पदम् ।

रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य च ॥
जीवस्य कर्कौ(र्क)मकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मंदश्च(स्य) उच्चनीचौ उदाहृतौ ॥१६॥

१७. दिश इति ।

दिशः प्रसेदुः, सुखाः सुखदाः मरुतो ववुः । प्रदक्षिणार्चिः अग्निः हुतं आददे । तत्क्षणं सर्वं शुभशंसि बभूव । हि निश्चितम् । तादृशां भवो जन्म लोकाभ्युदयाय ।१७॥

१८. अरिष्टेति ।

प्रसूतिकाशय्यां [परितो] निशीथदीपाः सहसा हतत्विषो बभूवुः । केन ? सुजन्मनः तस्य निजेन तेजसा । कथंभूतेन तेजसा ? अरिष्टशय्यां प्रसूतिकाशय्यां परितः विसारिणा । निशीथदीपाः के इव ? आलेख्यसमर्पिता इव ॥१८॥

१९. जनायेति ।

भूपतेः शुद्धान्तचराय जनाय द्वयमेव अदेयं आसीत् । किं तद् द्वयम् ? शशिप्रभं छत्रं उभे चामरे च । कथंभूताय जनाय ? अमृतसम्मिताक्षरं कुमारजन्मशंसिने ॥१९॥

२०. स इति ।

स युव(वा) तरुणः पिता चिरात् पुत्रस्य मुखं वीक्ष्य तदा[मुदः] आत्मनः शरीरे न प्रबभूव । यथाशब्दः इवार्थे । क इव ? निधानकुम्भस्य दुर्गति(तः) इव । पुनः क इव ? इन्दूदयमूर्छितः पयोधिरिव ॥२०॥

२१. निवातपद्मेति ।

नृपस्य आत्मनि गुरुः प्रहर्षः प्रबभूव । कथंभूतस्य नृपस्य ? निवातस(प)द्मस्तिमितेन चक्षुषा कान्तं सुताननं पिबतः । प्रहर्षः क इव ? इन्दुदर्शनान्महोदधेः पु(पू)र इव ॥२१॥

२२. स जातकर्मेति ।

दिलीपसूनुः अधिकं बभौ । कथंभूतः दिलीपसूनुः ? प्रयुक्तसंस्कार इव । आकरोद्भवः मणिरिव । कस्मिन्सति ? तपोवनात् एत्य पुरोधसा अखिले कर्मणि कृते सति ॥२२॥

२३. सुखश्रवेति ।

सुखश्रवाः मङ्गलतूर्यनिस्वनाः केवलं मागधीपतेः सद्मनि न व्यजृम्भन्त । दिवौकसामपि पथि व्यजृम्भन्त । कैः सह ? वारयोषितां प्रमोदनृत्यैः सह ॥२३॥

२४. न संयतः इति ।

तस्य रक्षितुः संयतो न बभूव । सुतजन्महर्षितः सन् यं पुरुषं विमोचयेत् तदा पितृणां ऋणाभिधानात् प्रबंधनात् स्वयमेव मुमुचे ॥२४॥

२५. श्रुतस्येति ।

अयं अर्भकः श्रुतस्य अन्तं यायात् । तथा युधि संग्रामे पराणां शत्रूणां [अन्तं] यायात् इति हेतोः पार्थिवः धातोर्गमनार्थं अवेक्ष्य आत्मसंभवं नाम्ना रघुं चकार । कथंभूतः पार्थिवः ? अर्थवित् ॥२५॥

२६. पितुरिति ।

स रघुः शुभैः शरीरावयवैः दिने दिने वृद्धिं पुपोष । कस्मात् ? समग्रसंपदः पितुः प्रयत्नात् । कस्मात्क इव ? हरिदश्वदीधितेः अनुप्रवेशात् बालचन्द्रमा इव ॥२६॥

२७. उमेति ।

उमावृषाङ्कौ शरजन्मना ननन्दतुः, यथा जयन्तेन शचीपुरन्दरौ ननन्दतुः तथा मागधी च [नृपःच]तेन सुतेन, तत्सदृशेन ॥२७॥

२८. रथाङ्गेति ।

एकसुतेन विभक्तमपि तत्तयोः प्रेम परस्परस्योपरि न पर्यहीयत । यत्प्रेम रथाङ्ग-नाम्नोः भावबन्धनमिव परस्पराश्रयं बभूव ॥२८॥

२९. यदाहेति ।

यत् धात्र्या प्रथमोदितं वचः आह्वयत् । तदीयां अङ्गुलिं अवलम्ब्य ययौ । तत्प्रणिपातशिक्षया नम्रश्चाभूत् । तेन सः अर्भकः पितुर्मुदं ततान ॥२९॥

३०. तमिति ।

उपान्तसंमीलितलोचनो नृपः चिरात्सुतस्पर्शरसज्ञतां ययौ । किं कृत्वा ? तं अङ्कं आरोप्य । तं किं कुर्वन्तमिव ? शरीरयोगजैः सुखैः त्वचि अमृतं निषिञ्चन्तमिव ॥३०॥

३१. अमंस्तेति ।

स दिलीपः परार्ध्यजन्मना अनेन आत्मनः अन्वयं स्थितिमन्तं अमंस्त । कः केन क इव ? प्रजानां पतिः गुणाग्रवर्तिना स्वमूर्तिभेदेन विष्णुना आत्मनः सर्गमिव ॥३१॥

३२. स इति ।

स रघुः लिपेर्यथावद्ग्रहणेन वाङ्मयं आविशत् । कथंभूतः ? चलकाकपक्षकैः स्ववयोभिः अमात्यपुत्रैः अन्वितः । केन कमिव ? नदीमुखेन समुद्रमिव ॥३२॥

३३. अथेति ।

अथानन्तरं विपश्चितो गुरवः एनं विनिन्यतुः । कथंभूतं एनम् ? शतं विधिवदुपनीतम् । पुनः कथंभूतम् ? गुरुप्रियं च । पुनः ते गुरवः अस्मिन् अर्भके बालके सफलप्रयासाः बभूवुः । अवन्ध्ययत्नाश्च बभूवुः । हि यस्मात् क्रिया वस्तूपहिता प्रसीदति ॥३३॥

३४. धिय इति ।

उदारधीः स रघुः धियः समग्रैः गुणैः चतस्रः विद्यास्ततार । कथंभूताः विद्याः ? चतुर्णवोपमाः । कः कैः का इव ? हरितां ईश्वरः पवनातिपातिभिर्हरिद्भिर्दिश इव ॥३४॥

३५. त्वचमिति ।

मंत्रवित् स रघुः पितुरेव अस्त्रं अशिक्षत । किं कृत्वा ? मेध्यां रौरवीं त्वचं परिधाय । केवलं तद्गुरुः क्षितौ एकपार्थिवो न, सदिलीपः एकधनुर्धरोऽपि अभूत् ॥३५॥

३६. महोक्ष[ता]मिति ।

क्रमाद् यौवनभिन्नशैशवो रघुः गाम्भीर्यमनोहरं वपुः पुपोष । क इव ? महोक्षतां स्पृशन् वत्सतर इव । पुनः क इव ? द्विपेन्द्रभावं श्रयन् कलभ इव ॥३६॥

३७. अथेति ।

अथानन्तरं गुरुः पिता गोदानविधेः अनन्तरं पश्चात् अस्य रघोः विवाहदीक्षां निरवर्तयत् । नरेन्द्रकन्याः तं सत्पतिं अवाप्य आबभुः शुशुभिरे । का कं इव ? वृ(द)क्षसुताः रोहिण्यादयः तमोपहमिव चन्द्रमिव ॥३७॥

३८. युवेति ।

रघुः वपुः प्रकर्षाद् गुरुं अजयत् । तथाऽपि विनयान्नीचैः अदृश्यत । कथंभूतो रघुः ? युवा तरुणः । पुनः कथंभूतः ? युगव्यायतबाहुः । पुनः कथंभूतः ? अंसलः । पुनः कीदृशः ? कपाटवक्षाः कपाटस्येव हृदयं यस्य सः । पुनः कथंभूतः ? परिणद्ध-कधरः ॥३८॥

३९. तत इति ।

ततोऽनन्तरं परिणयानन्तरं स रघुः नृपेण इति हेतोः युवराजशब्दभाक् चक्रे । इतीति किम् ? असौ रघुः निसर्गसंस्कारविनीतः स्वभावशिक्ष्यः । कथंभूतेन नृपेण ? प्रजानां चिरं आत्मना धृतां गुर्वीं धुरं लङ्घयिष्यता ॥३९॥

४०. नरेन्द्रेति ।

गुणाभिलाषिणी श्रीः नरेन्द्रमूलायतनात् अनन्तरं अंशेन तदास्पदं रघुस्थानं अगच्छत् । कथंभूतं तदास्पदम् ? युवराजसंज्ञितम् । कस्मात् ? किमिव ? कमलात् नवावतारं उत्पलमिव ॥४०॥

४१. विभावसुरिति ।

पार्थिवो दिलीपः तेन पुत्रेण अतितरां अत्यर्थं सुदुःसहो बभूव । केन क इव ? वायुना सारथिना विभावसुरिव । पुनः केन क इव ? दिनव्यपायेन गभस्तिमानिव । पुनः केन क इव ? कटप्रभेदेन करीव ॥४१॥

४२. नियुज्येति ।

शतक्रतूपमः स राजा एकेण(न) अपूर्णं क्रतूनां यज्ञानां शतं अपविघ्नमाप । किं कृत्वा ? होमतुरङ्गरक्षणे तं धनुर्धरं नियुज्य । कथंभूतम् ? राजसुतैः अनुद्ग्रु(द्रु)-तम् ॥४२॥

४३. अ(त)त इति ।

किलेति कथाप्रसङ्गे । गूढविग्रहः शक्रः तुरङ्गं जहार । कथंभूतं तुरङ्गम् ? अनर्गलम् । पुनः कथंभूतं तुरङ्गम् ? अतः परं तेने यज्वना मखाय उत्सृष्टम् । क्व ? रक्षतां धनुर्भृतां अग्रत एव ॥४३॥

४४. विषादलुप्तेति ।

तत्कुमारसैन्यं रघुकटकं च सपदि विस्मितं स्थितम् । कथंभूतं कुमारसैन्यम् ? विषादलुप्तप्रतिपत्ति । अथ नन्दिनी वसिष्ठधेनुश्च ददृशे, अद्राक्षीत् । कथंभूता नन्दिनी ? श्रुतप्रभावाद्यदृच्छया आगता ॥४४॥

४५. तदङ्गनिस्यन्देति ।

दिलीपनन्दनः अतीन्द्रियेष्वपि भावेषु उपपन्नदर्शनो बभूव । किं कृत्वा ? पुण्येन तदङ्गनिष्यन्दजलेन लोचने प्रमृज्य । कथंभूतः ? सतां पुरस्कृतः अग्रेसरः ॥४५॥

४६. स इति ।

स नरदेवसम्भवः पूर्वतः पर्वतपक्षशातनं देवं ददर्श । कथंभूतं देवम् ? अश्वं हरन्तम् । कथंभूतं अश्वम् ? पुनः पुनः सूतनिषिद्धचापलम् । पुनः कथंभूतं अश्वम् ? रथरश्मिसंयतम् ॥४६॥

४७. शतैरिति ।

रघुः गगनस्पृशा धीरेण स्वरेण एनं अवोचत् । किं कुर्वन्निव ? किं कृत्वा ? अनिमेषवृत्तिभिः निश्चलवृत्तिभिः अक्ष्णां शतैः तं हरिं इन्द्रं विदित्वा ज्ञात्वा । पुनः कैः ? हरिभिः स्वर्णैश्च वाजिभिः अश्वैः ॥४७॥

४८. मखांशभाजामिति ।

भो देवेन्द्र, यतः यस्मात्कारणात् मनीषिभिः मखांशभाजां प्रथमः आद्यः त्वमेव निगद्यते । अतः कारणात् अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥४८॥

४९. त्रिलोकनाथेति ।

ननु अहो त्रिलोकनाथेन सता त्वया मखद्विषः नियम्याः । कथंभूतेन त्वया ? दिव्यचक्षुषा । चेत् यदि । स्वयं स त्वं धर्मचारिणां कर्मसु अंतरायो भवसि, तर्हि विधिः च्युतः ॥४९॥

५०. तदङ्गमग्र्यमिति ।

ततस्मात्कारण[त्] भो मघवन् ! महाक्रतोः अग्र्यं अमुं तुरङ्गं प्रतिमोक्तुमर्हसि । शुचेः पथः दर्शयितारः ईश्वराः मलीमसां पद्धतिं मार्गं न आददते, न आश्रयन्ति ॥५०॥

५१. इतीति ।

सविस्मयः दिवौकसां अधिपतिः रथं निवर्तयामास । उत्तरं प्रवक्तुं प्रचक्रमे च । किं कृत्वा ? इति प्रगल्भं रघुणा समीरितं वचः निशम्य ॥५१॥

५२. यदात्थेति ।

हे राजन्यकुमार, यत् आत्थ तत् य(त)था । तु पुनः यशोधनैः परतः यशो ल(र)क्ष्यम् । जगत्प्रकाशं तत् अशेषं मम यशः इज्यया यागेन भवद्गुरुः लङ्घयितुं उद्यतः ॥५२॥

५३. हरिरिति ।

हरिः यथा एषः पुरुषोत्तमः स्मृतः तथा अपरः न, त्र्यम्बकः एव महेश्वरः । तथा मुनयो मां शतक्रतुं विदुः । हि यस्मात् कारणात् शतक्रतुरूपः शब्दः नः अस्माकम्। द्वितीयगामी न । अस्माकं एषः शब्दः द्वितीयगामी न ॥५३॥

५४. अत इति ।

अतः कारणात् कपिलानुसारिणा मया त्वदीयपितुः अश्वः अपहारितः । अत्र अश्वे तव प्रयत्नेन अलं कुर्यताम् । [illegible] संततेः पदव्याः(व्यां) पदं मा कृथाः ॥५४॥

५५. तत इति ।

ततस्तदनन्तरं व्यपेतभीः भूमिपुरन्दरात्मजः प्रहस्य पुरन्दरं आह । भो इन्द्र ! यदि एष ते तव सर्गः स्वभावः तर्हि शस्त्रं गृहाण । खलु निश्चितम् । रघुं अनिर्जित्य भवान् कृती न ।।५५।।

५६. स इति ।

स रघुः कुमारः उन्मुखः अतिष्ठत् । किं कृत्वा ? मघवंतं इन्द्रं एवं उक्त्वा, प्रतिपाद्य । किं कुर्वाणः ? सशरं शरासनं करिष्यमाणः । पुनः कथंभूतः ? आलीढविशेषशोभिना वपुः प्रकर्षेण विडम्बितेश्वरः ।।५६।।

५७. रघोरिति ।

अमर्षणः गोत्रभिदपि धनुषि अमोघं मार्गणं समधत्त । कथंभूते धनुषि ? नवाम्बुदानीकमुहूर्तलाञ्छने । कथंभूतः गोत्रभित् ? अवष्टम्भमयेन[1] लोहमयेन पत्रिणा हृदि क्षतः ।।५७।।

५८. नरेन्द्रसूनोरिति ।

स आशुगः कुतूहलेनेव मनुष्यशोणितं पपौ । कथंभूतं मनुष्यशोणितम् ? अनास्वादितपूर्वम् । किं कृत्वा ? नरेन्द्रसूनोः बृहद्भुजान्तरं प्रविश्य । कथंभूतः आशुगः ? भीमासुरशोणितोचितः ।।५८।।

५९. हरेरिति ।

हरेः भुजे सायकं निचखान । कथंभूते भुजे ? शचीपत्रविशेषकाङ्किते । इन्द्राणीपत्रावलीतिलकचिह्निते । पुनः कथंभूते भुजे ? सुरद्विपास्फालनकर्कशाङ्गुलौ । कथंभूतं सायकम् ? स्वनामचिह्नम् । किं विशिष्टः कुमारः ? कुमारविक्रमः । कार्तिकेयवत् विक्रम पराक्रमं यस्य स कुमारविक्रमः ।।५९।।

६०. जहारेति ।

अन्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं च जहार । स इन्द्रस्तस्मै भृशं चुकोप । कस्मादिव ? सुरश्रियः देवलक्ष्म्याः प्रसह्य बलात्कारेण केशव्यपरोपणादिव, केशाकर्षणादिव ।।६०।।

---

1 'लोहमयेन' seems to be a wrong explanation. Malli० has स्तम्भरूपेण. Malli० quotes विश्व—अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि । (p. 67, ibid)

६१. तयोरिति ।

जयैषिणोस्तयोः अधोमुखैरुर्ध्वमुखैश्च पत्रिभिः तुमुलं युद्धं बभूव । कथंभूतं युद्धम् ? उपान्तस्थितसिद्धसैनिकाम् । कथंभूतैः सायकैः ? गरुत्मदाशीविषभीमदर्शनैः ॥६१॥

६२. अतिप्रबन्धेति ।

वासवः इन्द्रः अतिप्रबन्धप्रहितास्त्रवृष्टिभिः तं निर्वापयितुं न शशाक । कथंभूतं तम् ? दुष्प्रसहस्य तेजसः आश्रयम् । कः काभिः कमिव ? अम्बुदः अद्भिः स्वतच्युतं वह्निरि(मि)व ॥६२॥

६३. तत इति ।

ततोऽनन्तरं रघुः शशांकादर्धमुखेन पत्रिणा बाणेन बिडौजसः प्रकोष्टे शरासनज्यां प्रत्यञ्चां अलुनात् । कथंभूते प्रकोष्टे ? हरिचन्दनाङ्किते । कथंभूतां शरासनज्याम् ? प्रमथ्यमानार्णवभीम(धीर)नादिनीम् ॥६३॥

६४. स इति ।

स इन्द्रः प्रबलस्य विद्विषः शत्रोः प्रणाशाय स्फुरत्प्रभामण्डलं अस्त्रं वज्रं आददे । कथंभूतं अस्त्रम् । महीध्रपक्षव्यपरोपणोद्धतम् । किं कृत्वा ? चापं उद्धृत्य मुक्त्वा । किं विशिष्ट इन्द्रः ? विवृद्धमत्सरः विवृद्धः वृद्धिं गतो मत्सरः कोपः यस्य सः, विवृद्धमत्सरः ॥६४॥

६५. रघुरिति ।

तेन वक्षसि ताडितो रघुः सैनिकाश्रुभिः सह भूमौ पपात । निमेषमात्रात् व्यथां चावधूय सैनिकहर्षनिःस्वनैः सह उत्थितः ॥६५॥

६६. तथापीति ।

वृत्रहा इन्द्रः अस्य वीर्यातिशयेन तुतोष । कथंभूतस्य अस्य ? तथाऽपि शस्त्रव्यवहारनिष्ठुरे विपक्षभावेऽपि चिरं तस्थुषः । हि निश्चितं, गुणैः सर्वत्र पदं धीयते ॥६६॥

६७. असह्येति ।

भो कुमार ! सारवत्तया अद्रिष्वपि असह्यं मे ममायुधं त्वदन्येन [न] [वि]सोढुं(ढम्) । मां तुरङ्गमात् ऋते प्रीतं अवेहि, जानीहि । वरं वृणीष्व । वासवः इन्द्रः तं कुमारं इत्यवादीत् । इतीति किम् ? हे कुमारेत्यादि इति रघुमाह ॥६७॥

६८. तत इति ।

ततोऽनन्तरं प्रियंवदो नरेन्द्रसूनुः सुरेश्वरं प्रत्यवादीत् । किं कुर्वन् ? इषुं प्रतिसंहरन् । कथंभूतमिषुम् ? निषङ्गादसमग्रमुद्धृतम् । पुनः कथंभूतमिषुम् ? सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ॥६८॥

६९. अमोच्य[मि]ति ।

भो प्रभो ! यदि अश्वं अमोच्यं मन्यसे ततः विधिना कर्मणि समाप्ते सति अजस्रदीक्षाप्रयतः मे मम गुरुः क्रतोरशेषेण फलेन युज्यतां, दीयताम् ॥६९॥

७०. यथा चेति ।

भो देवेश ! यथा सदोगतो विशांपतिः सदै(तवै)व संदेशहरात् इमं वृत्तान्तं शृणोति तथा विधीयताम् । कथंभूतो विशांपतिः ? त्रिलोचनैकांशतया दुरासवः(दः) ॥७०॥

७१. तथेति ।

मातलिसारथिः यथागतं ययौ । कथंभूतः मातलिसारथिः । तथेति रघोः कामं प्रतिशुश्रुवान् । यद्भणति तथा करोति इत्यङ्गीकारं कुर्वन् नातिप्रमनाः सुदक्षिणासूनुरपि नृपस्य सदोगृहं न्यवर्तत ॥७१॥

७२. तमभ्यनन्ददिति ।

हरेः शासनहारिणा प्रथमं प्रबोधितः प्रजेश्वरः तमभ्यनन्दत् । कथंभूतः प्रजेश्वरः ? हरेः शासनहारिणा प्रथमं प्रबोधितः । किं कुर्वन् ? हर्षचलेन पाणिना । कुलिशव्रणाङ्कितं तदीयमङ्गं परामृशन् ॥७२॥

७३. इतीति ।

क्षितिशो दिलीपः इति पूर्वोक्तप्रकारेण महाक्रतूनां यज्ञानां नवाधिक्ये नवतिं ततान । नवतिं कामिव ? सोपानपरम्परामिव । किं कर्तुमिच्छुः ? आयुषः क्षयो(ये) दिवं स्वर्गं समारुरुक्षः(क्षुः) । कथंभूतः क्षितीशः ? महनीयशासनः ॥७३॥

७४. अथेति ।

अथानन्तरं विषयव्यावृत्तात्मा स राजा तया देव्या सह मुनिवनतरुच्छायां शिश्रिये । किं कृत्वा ? यूने सूनवे नृपतिककुदं राज्यचिह्नं सितातपवारणं दत्वा । हि निश्चितं, गलितवयसामिक्ष्वाकूणां इदं कुलव्रतम् ॥७८॥

इति जिनसमुद्रविरचिते रघुकाव्यटीकान्वयमात्रे आश्रमप्रवेशो राज्यलाभो नाम तृतीयस्सर्गो[ऽ]लमिति ॥ श्रीरस्तु ॥

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

चतुर्थः सर्गः ॥

१. स राज्यमिति ।

स रघुः गुरुणा दत्तं राज्यं प्रतिपद्य अधिकं बभौ । क इव ? दिनान्ते सवित्रा निहितं तेजः प्रतिपद्य हुताशन इव ॥१॥

२. [स] न्यस्तशस्त्रमिति ।

राज्ञां हृदि शल्यमिव अर्पितम् । कथंभूते हृहि ? उद्धृतनाराचे लोहबाणे । कथंभूतानां राज्ञाम् ? न्यस्तशस्त्रे(स्त्रं) च पुनस्तं पतिं शुश्रुवुषां आकर्णयताम् ॥२॥

३. पुरुहूतध्वजस्येति ।

सुप्रजाः प्रजाः ननन्दुः प्रहृषुः । कथंभूताः प्रजाः ? तस्य रघोः नवाभ्युत्थान-दर्शिन्यः पश्यन्त्यः । पुनः कथंभूताः प्रजाः ? उन्नयनपङ्क्तयः । ऊर्ध्वा नयनपङ्क्तिर्यासां तास्तस्य । कस्येव ? पुरुहूतध्वजस्येव ॥३॥

४. सममेवेति ।

द्विरदगामिना तेन सममेव युगपदेव द्वयं समाक्रान्तम् । किं तद् द्वयम् ? एकं पित्र्यं सिंहासनं अखिलं अरिमण्डलं च ॥४॥

५. छायामण्डलेति ।

किलेति सत्ये । स्वयं आत्मना । अलक्ष्या सती अदृश्या सती पद्मा लक्ष्मीः पद्मातपत्रेण तं रघुं साम्राज्यदीक्षितं राज्यप्रतिष्ठितं भेजे । कथंभूतेन पद्मातपत्रेण ? छाया-मण्डललक्ष्येण । कथंभूता पद्मा ? स्वयं किल अदृश्या ॥५॥

६. परिकल्पितेति ।

सरस्वती अर्घ्याभिः स्तुतिभिः स्तुत्यं तं उपतस्थे । कथंभूता सरस्वती ? काले काले च बन्दिषु परिकल्पितसान्निध्या ॥६॥

७. मनुप्रभृतिभिरिति ।

वसुन्धरा मनुप्रभृतिभिः मान्यैः राजा(ज)भिः यद्यपि भुक्ता तथाऽपि तस्मिन् राजनि रघौ अनन्यपूर्वेव आसीत् ॥७॥

८. स इति ।

स राजा युक्तदण्डतया सर्वस्य लोकस्य मनः आददे । कमिव ? नातिशीतोष्णः दक्षिणः नभस्वानिव ॥८॥

९. दिलीपानन्तरमिति ।

राज्ञां हृदये अग्निरिव उत्थितः । किंभूते हृदये ? पूर्वं प्रधूमिते । किं कृत्वा ? दिलीपानन्तरं राज्ये तं प्रतिष्ठितं निशम्य ॥९॥

१०. काममिति ।

कामं निश्चितं तस्य लोचने कर्णान्तविश्रान्ते आस्ते । कथंभूते लोचने ? विशाले । तु पुनः तस्य चतु(क्षु)ष्मता(त्ता) श(शा)स्त्रेण । कथंभूतस्य तस्य ? सूक्ष्मकार्यार्थ–दर्शिनः ॥१०॥

११. यथेति ।

यथा प्रह्लादनाच्चन्द्रः अन्वर्थः अभूत् । तथा प्रतापात्तपनः अन्वर्थः अभूत् । तथैव स राजा प्रजारञ्जनात् अन्वर्थोऽभूत् ॥११॥

१२. नयविद्भिरिति ।

नयविद्भिर्मन्त्रिभिर्नवे राज्ञि सच्च असच्च उपदर्शितम् । तस्मिन् राजनि पूर्व एव पक्षः अभूत् उत्तरो न ॥१२॥

१३. मन्दोत्कण्ठाविति ।

तेन राज्ञा गुणाधिकतया गुरौ प्रज्ञाः(जाः) मन्दोत्कण्ठाः कृताः । केन ? कस्मिन्निव ? सहकारस्य फलेन पुष्पोद्गम इव ॥१३॥

१४. पञ्चानामिति ।

पञ्चानामपि भूतानां गुणाः उत्कर्षं पुपुषुः ।[1] लब्धप्रशमनं लब्धसुखम् । पुनः कथंभूतम् ? स्वस्थं, अनाकुलम् । तस्मिन्नवे महीपाले सर्वं नवमिव अभूत् ॥१४॥

---

1 "लब्धप्रशमनं लब्धसुखम् । पुनः कथंभूतम् ? स्वस्थं, अनाकुलम् ॥ "-should be read under IV. 15 (i.e. the next verse).

१५. लब्धप्रशमनेति ।

अथानन्तरं शरत् एनं उपस्थिता । कथंभूता शरत् ? पङ्कजलक्षणा । शरत् केव ? द्वितीया पार्थिवश्रीरिव ॥१५॥

१६. निर्वृष्टि(ष्ट)लघुभिरिति ।

सवितुः सूर्यस्य च पुनस्तस्य रघोः उभयोः दिशां भागाः मेघैः रो(रे)चिताः । किंभूतैः मेघैः ? निर्वृष्टि(ष्ट)लघुभिः । किंभूताः दिशां भागाः ? वर्धिष्णवः । कस्मै प्रयोजनायेव ? प्रतापायेव ॥१६॥

१७. [निर्वृष्टेति ।]

निर्वृष्टलघुभिः तस्य रघोः च पुनः भानोः प्रतापः युगपत् दिशः व्यानशे । किंभूतः प्रतापः ? मेघैर्मुक्तवर्त्मा । पुनः कीदृशः प्रतापः ? सुदुःसहः । किंभूतैः मेघैः ? निर्वष्टि(ष्ट)लघुभिः ॥१७॥

१८. अधिज्येति ।

शतमन्युना इन्द्रेण स्वं धनुः इति संजह्रे । केनेव ? शङ्कितेनेव । भययुक्तेनेव । किं कर्तुम् ? अयं समयः रघोः आयुधं अधिज्यं कर्तुम् ॥१८॥

१९. पुण्डरीकातपत्रेति ।

पुण्डरीकातपत्रः पुनः ऋतुः तच्छ्रियं तस्य रघोः श्रियं न प्राप ॥१९॥

२०. वार्षिकमिति ।

इन्द्रः वार्षिकं धनुः संजहार । रघुः जैत्रं जयनशीलं धनुः दधौ । हि निश्चितम् । तौ रघुमहेन्द्रौ प्रजार्थसाधने पर्यायोद्यतकार्मुकौ वर्तेते ॥२०॥

२१. प्रसादेति ।

तदा तस्मिन् राजनि च पुनश्चन्द्रे चक्षुष्मतां प्राणिनां प्रीतिः । द्वयोः राजचन्द्रयोः विषये समरसा आसीत् । किंभूते राजनि ? प्रसादसुमुखे । किंभूते चन्द्रे ? प्रसादसुमुखे । पुनः किंभूते राजनि चन्द्रे च ? विशदप्रभे ॥२१॥

२२. हंसश्रेणीष्विति ।

तदीयानां तस्य रघोः संबंधिनां यशसां विभूतयः एतेषु स्थानेषु पर्यस्ता इव, प्रसारिता इव । कासु ? हंसश्रेणीषु । पुनः कासु ? तारासु । केषु ? कुमुद्वत्सु । पुनः केषु ? वारिषु ॥२२॥

२३-२४. इक्षुछा(च्छा)येति । [प्रससादेति ।]

शालिगोप्यः शालिरक्षिका स्त्रियः तस्य रघोः यशः जगुः । किंभूतस्य रघोः ? गोप्तुः, रक्षकस्य । किंभूतं यशः ? गुणोदयम् । पुनः किंभूतं यशः ? आकुमारकथोद्भूतम् । किंभूताः शालिगोप्यः ? इक्षुछा(च्छा)यानिषादिन्यः प्रसादोदयात् कुम्भयोनेः अगस्त्यस्य उदायात् अंभः पानीयं प्रससाद निर्मलं बभूव । तु पुनः । द्विषतां शत्रूणां, मनः चित्तं, चुक्षुभे कलुषं बभूब । किंभूतं द्विषतां मनः ? रघोः अभिभवात् आशङ्कि । किंभूतस्य रघोः ? महौजसः । किंभूतस्य कुम्भयोनेः ? महौजसः ॥२३॥२४॥

२५. मदोदग्रेति (ग्रा इति) ।

महोक्षाः महावृषाः तस्य रघोः विक्रममनुप्रापुः अनुश्रिताः । किंभूताः महोक्षाः ? मदोदग्राः मदोत्कटाः । पुनः किंभूताः ? ककुद्मन्तः । पुनः किंभूताः सरितः कूलमुद्रुजाः । किंभूतं विक्रमम् ? लीलाखेलम् ॥२५॥

२६. प्रसवैः[इति] ।

प्रसवैः तन्नागाः गजाः सप्तधैव मदं प्रसुस्रुवुः । कयेव ? असूययेव ईर्ष्ययेव । किंभूताः नागाः ? सप्तपर्णानां प्रसवैः पुष्पैः आहताः ताडिताः । किंभूतैः प्रसवैः ? मदगन्धिभिः ॥२६॥

२७. सरित इति ।

शरत्श(च्छ)क्तिः(क्तेः) प्रथमं तं रघुं नोदयामास । शरत् किं कुर्वती ? सरितः नद्यः गाधा कुर्वतीव । पुनः पथः आश्यानकर्दमान् कुर्वती ॥२७॥

२८. तस्मै[इति] ।

वाजिनीराजनाविधौ विषये सम्यक् हुतः वह्निः प्रदक्षिणार्चिर्व्याजेन तस्मै रघवे जयं ददौ । केनेव ? हस्तेनेव ॥२८॥

२९. स इति ।

स रघुः दिग्विजिगीषया प्रतस्थे । किं कृत्वा ? षड्विधं बलं आदाय । किंभूतो रघुः ? गुप्तमूलपर्यंतः । पुनः किंभूतः ? शुद्धि(द्ध)पार्ष्णिरयान्वितः ॥२९॥

३०. अवाकिरन्निति ।

पौरयोषितः स्त्रियः लाजैः अक्षतैः कृत्वा तं रघुं अवाकिरन् वर्धयामासुः । किंभूताः पौरयोषितः ? वयोवृद्धाः । काः कैः कामिव ? क्षीरोर्मयः क्षीरसागरलहर्यः । पृषतैः जलकणैः अच्युतं श्रीकृष्णमिव । किंभूतैः पृषतैः ? मन्दरोद्धूतैः ॥३०॥

३१. स इति ।

स रघुः प्रथमं प्राचीं पूर्वदिशं ययौ । किंभूतो रघुः ? प्राचीनबर्हिषा इन्द्रेण तुल्यः । किं कुर्वन्निव ? केतुभिः ध्वजैः अहितान् शत्रून् जर्जयन्निव । किंविशिष्टैः केतुभिः ? अनिलोद्धूतैः ॥३१॥

३२. रजोभिरिति ।

धूलिभिः च पुनः गजैः कृत्वा व्योम आकाशं तुवत्तस(भुवस्थ)लं महीतलमिव । किं कुर्वन् ययौ ? भूतलं व्योम आकाशमिव कुर्वन् ययौ । किंभूतैः रजोभिः ? स्यन्दनोद्धूतैः । किंभूतैः गजैः ? घनसन्निभैः ॥३२॥

३३. प्रतापो[ऽ]ग्रे[इ]ति ।

सा चमूः ययौ । केव ? चतुष्कन्धेव । कथम् ? अग्रे प्रतापः, ततः शब्दः सैन्यकलकलनिःस्वनादिः । तदनन्तरं पुरोगाः पदातयः अग्रेसराः पुरुषाः ययुः । पश्चात् रथानीकं ययौ ॥३३॥

३४. पुरोगैरिति ।

तस्य रघोः पुरोगैः अग्रेसरैः [मार्गनिम्नगाः] कलुषा मलिनजलाः चक्रिरे । तस्य रघोः सह प्रस्थायिभिः सहगमनपरैः कृशाः दुर्बलाश्चक्रिरे । पश्चात् प्रजा(स्था)यिभिः पश्चाद्गमनपरैः पङ्काश्चक्रिरे ॥३४॥

३५. मरुपृष्टेति ।

स शक्तिमान् रघुः मरुपृष्टानि मरुस्थलभूभागानि उदम्भांसि उद्गतजलानि, उद्गतं अम्भो येषु तानि चकार । नाव्याः नावतार्या नदीः सुप्रतराः चकार । विपिनानि वनानि गह्वराणि प्रकाशानि प्रपाट(प्रकाश?)मध्यानि चकार ॥३५॥

३६. स इति ।

स रघुः बभौ, शुशुभे । किं कुर्वन् ? महतीं गरिष्टां सेनां कर्षन् वहन् । किंभूतां सेनाम् ? पूर्वसागरगामिनीम् । पूर्वं समुद्रं गच्छतीति । कः ? कामिव ? भगीरथः गङ्गामिव । किंभूतां गङ्गाम् ? हरजटाभ्रष्टाम् । यथा भगीरथो राजा हरजटाभ्रष्टां ईश्वरजटापतितां गङ्गां कर्षत् सन् बभौ । तथा राजा शुशुभे ॥३६॥

३७. त्याजितैः इति ।

तस्य रघोः मार्गः नृपैः उत्खातैः स्तब्धत्वात् उन्मूलितैः उल्वण आसीत् । किंभूतैर्नृपैः ? फलं त्याजितैः । च पुनः बहुधा भग्नैः । कैः ? के इव ? पादपैः वंदि(दंति)न इव ॥३७॥

३८. पौरस्त्यानेवेति ।

जयी रघुः महोदधेः उपकण्ठं समीपं प्राप । किंभूतं उपकण्ठम् ? तालीवनश्यामम् । किं कुर्वन् ? तांस्तान् प्रसिद्धान् पूर्वदिग्भवान् जनपदान् देशान् आक्रामन् चंपयन् (कंपयन् ?) ॥३८॥

३९. अनम्राणामिति ।

सुह्मैः सुह्माख्यैर्जनपदैस्तस्मात् रघोः आत्मा{नं}रक्ष(क्ष्य)ते । किं कृत्वा ? वैतसीं वृत्तिमाश्रित्य । कस्मादिव ? सिन्धुरयादिव । किंभूताद्रघोः ? आनम्राणां समुद्धर्तुः ॥३९॥

४०. वङ्गानिति ।

स नेता नायको रघुः गङ्गाश्रो(स्रो)तान्तरेषु यज(जय)स्तंभान् विचखान निहतवान् । किं कृत्वा ? तरसा वेगेन वङ्गान् उत्खाय । कथंभूतान् वङ्गान् ? नौसाधनोद्धतान् ॥४०॥

४१. अ(आ)पात(द्)पद्मेति ।

ते वङ्गाः फलैः रघुं संवर्धयामासुः । के इव ? कलसा(मा)इव । यथा कलसा-(माः) शालयः फलैः कर्षुकं(?) संवर्धयन्ति । किंभूताः वङ्गाः ? आपादपद्मप्रणताः । पुनः किंभूताः वङ्गाः ? उत्खातप्रतिरोपिताः ॥४१॥

४२. स इति ।

स रघुः कलिङ्गाभिमुखं ययौ । किं कृत्वा ? सैन्यैः कपिशां नदीं तीर्त्वा । किंभूतैः सैन्यैः ? बद्धद्विरदसेतुभिः । किंभूतो रघुः ? उत्कलादर्शितपथः ॥४२॥

४३. स इति ।

स रघुः महेन्द्रस्य पर्वतस्य मूर्ध्नि तीक्ष्णं प्रतापं न्यवेशयत् आरोपयामास । कः, कस्य, कस्मिन् किमिव ? यन्ता हस्तिपकः गम्भीरवेदिनः द्विरदस्य गजस्य मूर्ध्नि तीक्ष्णं अंकुशं निवेशयति ॥४३॥

४४. प्रतिजग्राहेति।

कालिङ्गः कलिङ्गदेशीयो राजा । अस्त्रैः कृपाणैः तं रघुं प्रतिजग्राह प्रत्यग्रहीत् । किंभूतः कालिङ्गः ? गजसाधनः । कः ? कैः ? कमिव ? शिलावर्षी पर्वतः अस्त्रैः कृत्वा शक्रमिव ! किंभूतं शक्रम् ? पक्षच्छेदोद्यतं, पक्षाणां छेदो(दे) उद्यतम् । यथा पर्वतः शिलावर्षी सन् शक्रमिन्द्रं प्रतिगृह्णाति ॥४४॥

४५. द्विषामिति ।

काकुत्स्थः रघुः तत्र कालिङ्गदेशे जयश्रियं प्रतिपेदे । किं कृत्वा ? द्विषां शत्रूणां नाराचदुर्दिनं विषह्य सहित्वा । क इव ? सन्मङ्गलस्नातः इव । सति शोभने मङ्गलस्नातः सन्मङ्गलस्नातः ॥४५॥

४६. वायव्यास्त्रेति ।

स रघुः गजानीकान् कालिङ्गं आददे जग्राह । कः, कस्मात् कमिव ? तार्क्ष्यः गरुडः महोदधेः सद्यः सर्पमिव । यथा तार्क्ष्य गरुडः महोदधेः समुद्रात् सर्पं आदत्ते । किंभूतात् महोदधेः ? पक्षविद्धात् । किंभूतात् गजानीकात् ? वायव्यास्त्रविनिर्धूतात् चालितात् ॥४६॥

४७. ताम्बूलीति ।

तस्य रघोः योधाः नालिकेरासवं पपुः । कासु ? ताम्बुलीनां दलैः रचिता[सु] पानभूमिषु शात्रवं शत्रुसंबंधि यश इव । चकारः उपमायामिति कश्चित् ॥४७॥

४८. गृहीतेति।

स धर्मविजयी नृपः रघुः महेन्द्रनाथस्य श्रियं जहार । तु पुनः मेदिनीं न जहार । अहो किंभूतस्य महेन्द्रनाथस्य ? गृहीतप्रतिमुक्तस्य ॥४८॥

४९. तत इति ।

ततस्तदनन्तरं अनाशास्यजयो रघुः अगस्त्यचरितां दक्षिणां आशां दिशं ययौ जगाम । केनेव ? वेलातटेनेव ? किंभूतेन वेलातटेन ? फलवत्पूगमालिना ॥४९॥

५०. स इति ।

स रघुः सैन्यपरिभागेन कौबेरीं सरितां पत्युः समुद्रस्य शङ्कनीयामिव कुलटामिव अकरोत् । किंभूतेन सैन्यपरिभोगेन ? गजदानसुगन्धिना ॥५०॥

५१. भयोत्सृष्टेति ।

तेन रघुणा चमूरेणुः सैन्यरजः केरलयोषितां अलकेषु चूर्णप्रतिनिधि(धी)कृतः, सुगन्धद्रव्यसमलङ्कृतः । कथंभूतानां केरलयोषिताम् ? भयोत्सृष्टविभूषणानाम् ॥५१॥

५२. बलैरिति ।

तस्य रघोः बलैः सैन्यैः मलयाचलस्य उ[प]त्यकाः अधोभूमिकाः अध्युषिता आश्रिताः । किंभूतस्य तस्य ? रघोः विजिगीषोः जयनशीलस्य । पुनः किंभूतस्य रघोः ? गताध्वनः उल्लङ्घितपथस्य । किंभूताः उ[प]त्यकाभूमिकाः ? गन्धर्वमिथुनैरुद्भ्रान्ताः, मारीचोद्भ्रान्तहारीताः ॥५२॥

५३. ससञ्जुरिति ।

एलानां फलरेणवः मत्तेभकटेषु ससञ्जुः संयोगं प्रापुः । कथभूंतानां एलानाम् ? अश्वक्षुण्णानाम् । किंभूताः फलरेणवः ? फलधूलयः उत्पतिष्णवः, उत्पतनशीलाः । किंभूतेषु मत्तेभकटेषु ? तुल्यगन्धिषु ॥५३॥

५४. आजानेयेति ।

सपदि तत्कालं रजोधूलिः व्योम आकाशं व्यानशे व्यापयामास । किंभूतं रजः ? पक्वैलाक्षेत्रसंभवम् । पुनः किंभूतं रजः ? कीटकोशाविलं अथवा व्योमविशेषितम् ॥५४॥

५५. भोगेति ।

अपि निश्चितम् । करिणां हस्तिनाम् । ग्रैवं, ग्रीवायां भवं ग्रैवं बन्धनं शृङ्खलादि अस्रंसत् । किंभूतं ग्रैवम् ? चन्द्रनानां भोगिवेष्टनमार्गेषु समर्पितं दत्तम् । किंभूतानां करिणाम् ? त्रिपदीछेदिनां, त्रिपदी पाद[बन्ध]नं छेत्तुं शीलं येषां ते, तेषाम् ॥५५॥

५६. दिशीति ।

दक्षिणस्यां दिशि रवेरपि तेजः मन्दायते, मन्दीभवति । पाण्ड्याः तस्यां एव दक्षिणस्यां दिशि एव रघोः प्रतापं न विषेहिरे ॥५६॥

५७. ताम्रवर्णीति ।

ते पाण्ड्याः निपत्य नमस्कृत्य तस्मै रघवे ताम्रपर्णीसमेतस्य महोदधेः समुद्रस्य मुक्तासारं ददुः । किमिव ? सञ्चितं स्वं यश इव ॥५७॥

५८. स इति ।

स रघुः सह्यं पर्वतं अलङ्घयत् । किंभूतः रघुः ? असह्यविक्रमः । किंभूतं सह्यं पर्वतम् ? उदन्वता समुद्रेण दूरमुक्तं सह्यम् । किमिव ? स्रस्तांशुकं गलितवस्त्रं, मेदिन्याः नितम्बमिव । किं कृत्वा ? मलयदर्दुरौ शैलौ पर्वतं(तौ) यथाकामं स्वेच्छया निर्विश्य उपभुज्य । किंभूतौ मलयदर्दुरौ ! तटस्वाधीनचंदनौ । तौ काविव ? तस्याः दक्षिणस्याः दिशस्तनाविव ॥५८॥युग्मम्॥

५९. तस्येति ।

तस्य रघोः अनीकैः सैन्यैः अर्णवः समुद्रः सह्यलग्न इव आसीद् बभूव । किंभूतैः अनीकैः ? विसर्पद्भिः प्रसरणशीलैः । पुनः किंभूतैः सैन्यैः ? अपरान्तजयोद्यतैः । किंभूतः समुद्रः ? रामेषूत्सारितः ॥५९॥

६०. मुरु(र)लेति ।

कैतकं रजः तद्योधवारणानां कवचा(च्चुका)नां अयत्नपटलवाससां सुगन्धवर्णतां अगमत् । किंभूतं रजः ? मुरलामरितोद्धूतम् ॥६०॥

६१. खर्जूरीति ।

शिलीमुखाः भ्रमराः पुन्नागेभ्यः वृक्षकेभ्यः करिणां गजानां कटेषु कपोलेषु पेतुः । किंभूतानां करिणाम् ? खर्जूरीस्कन्धबद्धानाम् । किंभूतेषु कटेषु ? मदोद्गारसुगन्धिषु॥६१॥

६२. अभ्यभूये(य)[ते]ति ।

वाहानां अश्वानां मञ्जुसिञ्जितैः मधुरध्वनितैः मर्मरः शुष्कपत्रध्वनिः अभ्यभूयत पराभूयत । कथंभूतानां वाहानाम् ? चरि(र)तां भक्षतां वा गच्छताम् । किंभूतो मर्मरः ? पवनोद्धूतराजतालीवनध्वनिः ॥६२॥

६३. अवकाशमिति ।

किल उदन्वान् समुद्रः अभ्यर्थितः सन् रामाय परशुरामाय अवकाशं ददौ, रघवे करं ददौ । केन ? अपरान्तमहीपालव्याजेन ॥६३॥

६४. मत्तेभे[ति]।

स रघुस्तत्र त्रिकूटं सुवेलगिरिमेव उच्चैर्जयस्तम्भं चकार । किंभूतं त्रिकूटम् ? मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ॥६४॥

६५. पारसीकानिति ।

ततस्तदनन्तरं स रघुः स्थलवर्त्मना पारसीकान् म्लेच्छान् जेतुं प्रतस्थे । कः केन, कमिव ? संयमी तत्त्वज्ञानेन इन्द्रियाख्यान् रिपूनिव । यथा संयमी मुनिः तत्त्वज्ञानेन इन्द्रियाख्यान् रिपून् जेतुं प्रतिष्ठते ॥६५॥

६६. यवनीति ।

स रघुः {स} यवनीमुखपद्मानां मधुमदं न सेहे । कः केषां, कमिव ? अकालजलोदयः अकालमेघोद्गमः अब्जानां कमलानां बालातपमिव । यथा अकालजलदोदयः कमलानां बालातपं न सहते ॥६६॥

६७. संग्रामेति ।

तस्य रघोः प(पा)श्चात्यैः म्लेच्छैः सह तुमुलः रौद्रः संग्रामः अभूत् । किंभूतैः पाश्चात्यैः ? अश्वसाधनैः । किंभूतः संग्रामः ? रजसि सैन्यरेणौ शार्ङ्गकूजितविज्ञेय-प्रतियोघे ॥६७॥

६८. भल्लापवर्जितैरिति ।

स रघुः तेषां म्लेच्छानां शिरोभिः महीं तस्तार । किंभूतैः शिरोभिः ? भल्लात-पवर्जितैः । पुनः किंभूतैः शिरोभिः ? श्मश्रुलैः सकूर्चैः शिरोभिः । कैरिव ? सरघा-व्याप्तैः क्षौद्रपटलैरिव मधुपा(भा ?)ण्डैरिव ॥६८॥

६९. अपनीतेति ।

शेषाः म्लेच्छाः तं रघुं शरणं ययुः । किंभूताः शेषाः म्लेच्छाः ? अपनीत-शिरस्त्राणाः । हि यतः, महात्मनां संरम्भः कोपः प्रणिपातप्रतीकारो वर्तते ॥६९॥

७०. विनयमिति । (विनयन्ते इति) ।

तद्योधाः तस्य रघोः योधा द्राक्षावलयभूमिषु मधुभिः कृत्वा विजयश्रियं(श्रमं) विनी(न)यन्ते स्म निर्ग[म]यामासुः । किंभूतासु द्राक्षावलयभूमिषु ? आस्तीर्णाजिन-रत्नासु ॥७०॥

७१. तत इति ।

स रघुः कौबेरीं उत्तरां दिशं प्रतस्थे, चचाल । रघुः क इव ? भास्वानिव । रघुः किं करिष्यन् ? शरैः उदीच्यान् उद्धरिष्यन्निव । कानिव ? रसानि[व] । यथा भास्वान् श्रीसूर्यः उष्णैः किरणैः कृत्वा रसान् भूमिजलान् उद्धरिष्यन् सन् कौबेरीं दिशं प्रतिष्ठते ॥७१॥

७२. जितानिति ।

अजय्यः जेतुमशक्यो रघुः उत्तरापथं प्रविवेश । कः कमिव ? उर्वाग्निः महार्णवमिव । यथा उर्वाग्निः वडवानलः महार्णवं प्रविशति । किं कृत्वा ? जितान् तानेव उदीच्यानेव रथपुरःसरान् रथाग्रेसरान् कृत्वा ।।७२।।

७३. विनीताध्वश्रमा इति ।

तस्य रघोः वाजिनः सिन्धुतीरविचेष्टितैः कृत्वा सिन्धुनदीपुलिनलोटनैः भग्नकुङ्कुमकेसरान् स्कन्धान् दुधुवुः धूतयामासुः । किंभूताः वाजिनः ? विनीता[ध्व]–श्रमाः ।।७३।।

७४. तत्रेति ।

तत्र उत्तरापथदेशे हूणावरोधानां रघुचेष्टितं बभूव । किंभूतं रघुचेष्टितम् ? कपोलपाटलादेशि गल्लविदारणनिवेदकम् । पुनः किंभूतं रघुचेष्टितम् ? भर्तृषु व्यक्तविक्रमम् ।।७४।।

७५. काम्बौजे म्बोजा)[इ]ति ।

क्षत्रियाः समरे सङ्ग्रामे तस्य रघोः वीर्यं पराक्रमं सोढुं {अनी}अनीश्वराः असमर्थाः । किंभूताः काम्बोजाः ? अक्षोडैः वृक्षैः सार्धं आनताः नम्रीकृताः । किंभूतैः अक्षोडैः ? गजालानपरिक्लिष्टैः ।।७५।।

७६. तेषामिति ।

तेषां काम्बोजानां सदश्वभूयिष्ठाः सजातितुरङ्गमप्रचुराः तुङ्गाः उच्चैस्त(?) द्रविणराशयः तं विशांनाथं रघुं विवशुः प्राविशन् । काः कमिव ? आपगाः उदन्वन्तमिव ।।७६।।

७७. तत इति ।

ततस्तदनन्तरं स रघुः गौरीगुरुं हिमाचलं शैलं आरुरोह आरूढवान् । किंभूतो रघुः ? अश्वसाधनः । किं कुर्वन्निव ? उद्धतैर्धातुरेणुभिः गैरिकादिधातुरजोभिः तत्कूटानि शृङ्गाणि वर्द्धयन्निव उच्चतराणि कुर्वन्निव ।।७७।।

७८. शशंसेति ।

स रघुः सिंहानां परिवृत्या पश्चादवलोकनेन अवलोकितं शशंस अभि(भ्य)नन्दत् । किंभूतानां सिंहानाम् ? गुहाश्र(श)यानां कन्दराश्रितानाम् । पुनः किंभूतानां सिंहानाम् ? तुल्यसत्त्वानां आत्मसदृशसत्त्वानाम् । पुनः किंभूतानां सिंहानाम् अवलोकितम् ? सैन्यघोषेऽपि असंभ्रम(मं), शङ्कारहितानाम् ।।७८।।

७९. भूर्जेष्विति ।

मरुतः वायवः मार्गे तं रघुं सिषेविरे । किंभूताः मरुतः ? कीचकध्वनिहेतवः । पुनः किंभूताः ? भूर्जेषु वृक्षेषु मर्मरीभूताः मर्मरध्वनियुक्ताः ॥७९॥

८०. सरलेति ।

ओषधयः नक्तं रात्रौ नेतुर्नायकस्य रघोः अस्नेहदीपकाः तैलरहितप्रदीपाः आसन् बभूवुः । किंभूताः ओषधयः ? सरलासक्तमातङ्गग्रैवेय{क}स्फुरितत्विषः; देवदारुबद्धद्विरद-ग्रीवाशृङ्खलास्फीता दीप्तयः । ग्रीवायां भवं ग्रैवेयं अलंकाराद्यम् ॥८०॥

८१. विशश्रमुरिति ।

सैन्य{का}काः सेनाचराः नमेरुणां वृक्षाणां छायासु दृषदः अध्यास्य आश्रित्य विशश्रमुः विश्रान्ताः । किंभूताः दृषदः ? निषण्णमृगनाभिभिः वासितोत्सङ्गाः, पूर्वं निषण्णा उपविष्टा ये कस्तूरिकाः मृगाः तेषां नाभिभिः ॥८१॥

८२. तस्येति ।

देवदारवस्तस्य रघोः उत्सृष्टनिवासेषु त्यक्तसेनानिवासेषु त्यक्तावस्थानेषु किरातेभ्यः गजवर्ष्म, गजानां हस्तिनां वर्ष्मप्रमाणं शरीरोच्छ्रायं शशंसुः । किंभूता देवदारवः ? कण्ठरज्जुक्षतत्वचः कण्ठानां रज्जुभिः बंधनैः क्षताः पाटिता त्वग्येषाम् ॥८२॥

८३. तत्रेति ।

तत्र रघोः पार्वतीयैः गणैः सह घोरं रौद्रं जन्यं संग्रामं अभूत् । किंभूतं जन्यम् ? नागचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥८३॥

८४. शरैरिति ।

स रघुः किन्नरान् बाह्वोर्भुजयोः जयोदाहरं गापयामास । कि कृत्वा ? शरैरुच्छिन्न-सङ्केतान् भग्नग्रहान् कृत्वा । किंभूतान् किन्नरान् ? विरतोत्सवान् गतहर्षान् ॥८४॥

८५. परस्परस्येति ।

केन कस्य सारो विज्ञातः ? राज्ञा रघुणा हिमवतः हिमाचलस्य सारः विज्ञातः, हिमाद्रिणा राज्ञः सारः परस्परस्य विज्ञातः । केषु सत्सु ? पार्वतीयेषु उपायनपाणिषु सत्सु ॥८५॥

८६. तत्राक्षोभ्यमिति ।

स रघुस्तत्र अक्षोभ्यं जयो(यशो)राशिं निवेश्य अवरुरोह अवततार । किं कुर्वाण इव ? पौलस्त्यतुलितस्य अद्रेः पर्वतस्य श्रियं आददान इव गृह्णन् इव ॥८६॥

८७. चकम्पे तीर्णेति ।

प्राक्ज्योतिषेश्वरः राजा चकम्पे । कस्मिन्सति ? तस्मिन् रघौ तीर्णलौहित्ये सति । लौहित्याभिधाना(नां) नदीं तीर्णे सति । कैः सह ? कालागुरुदु(द्रु)मैः सह, तद्गजालानतां प्राप्तैः ॥८७॥

८८. न प्रसेहे [इ]ति ।

स प्राग्ज्योतिषेश्वरः कामरूपाधिपतिः अस्य रघोः रथवर्त्मरजः रथमार्गरेणुं न प्रसेहे, न सोढवान् । पताकिनीं चतुरङ्गिणीसेनां कुत एव ? कथंभूतं रथवर्त्मरजः ? रुद्धार्कं स्थगितरविम् । पुनः कथंभूतम् ? अधारावर्षिं दुर्दिनम् । धारावर्षं विना अंधकारम् ॥८८॥

८९. तमीशे(श) [इ]ति ।

कामरूपाणां ईशः नागैः कृत्वा तं रघुं भेजे । तैरिति कैः ? यैः कृत्वा अन्यान् शत्रून् उपरुरोध । किंभूतैर्नागैः ? भिन्नकटैः । किंभूतं रघुम् ? अत्याखण्डलविक्रमम् । अतिक्रान्तः आखण्डलस्य इन्द्रस्य विक्रमः येन सः, तम् ॥८९॥

९०. उपपन्नसुखेति ।[1]

कामरूपाणां ईशः रत्नपुष्पोपहारेण अस्य रघोः पादयोः छायां आनर्च अपूजयत् । {किंभूतस्य ?}उपपन्नसुखस्य(०सुखस्तस्य) । किंभूतां छायाम् ? हेमपीठाधिदेवताम् ॥९०॥

९१. इति जित्वेति ।

जिष्णुः रघुः न्यवर्तत । किं कृत्वा ? इति अमुना प्रकारेण दिशं जित्वा । किं कुर्वन् ? राज्ञां मौलिषु रजो विश्रमयन् स्थापयन् । किंभूतेषु मौलिषु ? च्छ(छ)त्रशून्येषु ॥९१॥

---

1. This is Malli- IV ८४, but in place of 'कामरूपेश्वरस्तस्य' Jina. seems to have 'उपपन्नसुखस्तस्य.' In the comm. Jina. has 'उपपन्नसुखस्य' which seems to be faulty. Again Jina. has 'कामरूपाणां ईशः' in the beginning. 'किंभूतस्य' before उपपन्न० is also out of place.

९२. स विश्वजिते(तमि)ति ।

स राजा विश्वजितं यज्ञं आरेभे । किंभूतम् ? सर्वस्वदक्षिणम् । हि यतः सतां सत्पुरुषाणां आदानं ग्रहणं नि(वि)सर्गाय भवति । दानाय भवति । केषामिव ? वारिमुचामिव ॥९२॥

९३. सत्रान्ते[इति] ।

सचिवसखः काकुत्स्थः रघुः सत्रान्ते यज्ञान्ते गुर्वीभिः गरिष्ठाभिः पुरस्त्रि(स्क्रि)याभिः {राजाभिः} राजन्यान् अनुमेने । कस्मै प्रयोजनाय ? स्वपुरनिवृत्तये । किंभूतः काकुत्स्थः । सचिवसखः, अमात्यसहितः । किंभूतान् राजन्यान् ? चिरविरहोत्सुकावरोधान् । किंभूतान् राजन्यान् ? शमितपराजयव्यलीकान् ॥९३॥

९४. ते रेखाध्वजकल(कुलि)शेति ।

ते राजानः प्रस्थानप्रणि(ण)तिभिः प्रयाणनमस्कारैः सम्राजः रघोः चरणयुगं अङ्गुलीषु मौलिस्रक्च्युतमकरन्दरेणुगौरं चक्रुः । किंभूतं चरणयुगम् ? रेखाध्वजकल(कुलि)शातपत्रचिह्नम् । पुनः कथंभूतं चरणयुगम् ? प्रसादलभ्यम् ॥९४॥

इति जिनसमुद्रसूरिविरचिते(तायां) रघुकाव्यटीकायां चतुर्थः सर्गो[ऽ]लम् ॥

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

पञ्चमः सर्गः ॥

१. तमध्वरे [इ]ति ।

वरतन्तुश(शि)ष्यः कौत्सः तं क्षितीशं रघुं प्रपेदे । किंभूतं क्षितीशम् ? निःशेष-विश्राणितकोशजातम् । क्व ? अध्वरे ज[1](य)ज्ञे । किंभूते अध्वरे ? विश्वजिति । किंभूतः कौत्सः ? उपात्तविद्यः । पुनः कथंभूतः कौत्सः ? गुरुदक्षिणार्थी ॥१॥

२. स मृन्म(ण्म)येति ।

स रघुः अतिथिं कौत्सं प्रत्युज्जगाम सन्मुखमभिजगाम । किं कृत्वा ? वीतहिरण्म-यत्वात् मृण्मये पात्रे अर्घं निधाय । किंभूतो रघुः ? अनर्घ्यशीलः, अनर्घ्यं अनुपमं शीलं यस्य सः । पुनः किंभूतो रघुः ? यशशा(सा) प्रकाशः । पुनः कथंभूतः रघुः ? आतिथेयः अतिथिपूजाकरणचतुरः । किंभूतं कौत्सम् ? श्रुतिप्रकाशम् ॥२॥

३. तमर्चयित्वा [इति] ।

विशांपतिः नराणां पतिः रघुः विष्टरभाजं आसनस्थं तं कौत्सं आह । किं कृत्वा ? विध(धि)वत् वेदोक्तप्रकारेण तपोधनं अर्चयित्वा । किंभूतः विशांपतिः ? विधिज्ञः । पुनः किंभूतो विशांपतिः ? मानधनाग्रयाजी(यी)[2] । पुनः किंभूतः ? कृताञ्जलिः । पुनः किंभूतः ? कृत्यविचारदक्षः ॥३॥

४. अप्यग्रणी[रि]ति ।

अपि इति कोमलामन्त्रणे । हे कुशाग्रबुद्धे ! तीक्ष्णमते ! ते तव गुरुः मन्त्रकृतां ऋषीणां अग्रणीर्यतस्त्वया अशेषं ज्ञानं आप्तम् । केन कस्मात् कमिव ? दीक्षितेन गृहीतव्रतेन उग्रात् हरात् चैतन्यं ज्ञानमिव ॥४॥

५. कायेनेति ।

क्वचित् इति इष्टप्रश्ने । भो महर्षे तत् त्रिविधं तपः अन्तरायैः कृत्वा व्ययं न आपद्यते । तत् किं यत्तपः वज्रिणो धैर्यविलोपि धैर्यविध्वंसनाय कायेन वाचा मनसाऽपि शश्वत् तप्तम् ॥५॥

---

1 The scribe seems to write 'ज' for 'य.'

2 The scribe seems to write 'ज' for 'य.'

६. आधारबन्धेति ।

क्वचित् भो मुने ! वः युष्माकं आश्रमपादपानां वाय्वादिरुपप्लवः न वर्तते । किंभूतानां आश्रमपादपानाम् ? सुतनिर्विशेषं यथा भवति तथा संवर्द्धितानाम् । कैः ? आधारबन्धप्रमुखैः प्रज[1](य)त्नैः ॥६॥

७. क्रियानिमित्तेष्विति ।

भो मुने, कच्चिन्मृगीणां प्रसूतिः अनघा व्याधा(ला ?)दिकदोषरहिता वर्तते । किंभूता प्रसूतिः ? तदङ्कशय्याच्युतनाभिनाला । तेषां ऋषीणां [अङ्क]शय्यासु च्युत्पतनं च्युतं पतितं नाभिनालं यस्याः सा । पुनः किंभूता प्रसूतिः ? क्रियानिमित्तेषु देवपूजातर्पणादि-कर्तव्येषु कुशेषु वत्सलत्वात् मुनिभिः अभग्नकामा अभग्नमनोरथा ॥७॥

८. निवर्त्यते [इ]ति ।

कश्चित् वः युष्माकं तानि तीर्थजलानि शिवानि कल्याणकारीणि वर्तन्ते । किंभूतानि तीर्थजलानि ? उञ्छषष्ठाङ्कितसैकतानि । यैस्तीर्थजलैर्नियमाभिषेको निर्वर्त्यते, परिपूर्णः क्रियते । येभ्यस्तीर्थजलेभ्यः पितृणां निवापाञ्जलयः । निवापः पितृतर्पणं भवति ॥८॥

९. निवारपाकादीति ।

भो मुने ! कच्चिज्जानपदैः देशसंबंधी(धि)[भिः] कडंगरीयैः बुशाद्यानायकैः (बुसार्हैः ?) नीवारपाकादि अरण्यधान्यादि न आमु(मृ)श्यते न विनाश्यते । वन्यं तत् अरण्यधान्यादि वः युष्माकं शरीरस्थितिसाधनं वर्तते । किंभूतं वन्यम् ? कालोप[प]न्ना-तिथिकल्पभागम् ॥९॥

१०. अयि प्रसन्ने[ने]ति ।

अयि भो मुने, महर्षिणा वरतन्तुना त्वं गृहाय अनुमतः अनुज्ञातः । किं कृत्वा ? सम्यक् विनीय अध्याप्य । किंभूतेन महर्षिणा ? प्रसन्नेन प्रसादयुक्तेन । हि यतः अयं कालस्ते तव द्वितीयं आश्रमं संक्रमितुं वर्तते । किंभूतं आश्रमम् ? ग्र(गृ)हस्थाश्रमं सर्वोपकारक्षमम् ॥१०॥

११. तवार्हतो ।

भो मुने ! अर्हतः पूज्यस्य तव अभिगमनेन आगमनेन नियोगक्रियया आदेशक्रियया उत्सुकं मे मम मनः न तृप्तं [इति न ?], अपि तु तृप्तम् । अयि इति कोमलामन्त्रणे । शासितुः गुरोः आज्ञया वा अथवा आत्मना वनात् मां संभावयितुं मान्यं दातुं प्राप्तोऽसि ॥११॥

---

1 Again 'ज' for 'य.'

१२. इत्यर्घ्यपात्रानुमितेति ।

वरतन्तुशिष्यस्तं रघुं प्रत्यवोचत् । किं कृत्वा ? इति रघोः गां बा[1](वा)र्णी निशम्य श्रुत्वा । किंभूतां गाम् ? उदाग(रा)म् । किंभूतस्य रघोः ? अर्घ्यपात्रानुमितव्ययस्य । किंभूतः वरतन्तुशिष्यः ? स्वार्थोपपत्तिं प्रतिदुर्बलाशः निराशः ॥१२॥

१३. सर्वत्र नो[1]बा(वा)र्त्तेति ।

हे राजन् । नो अस्माकं सर्वत्र वार्तं कुशलं अवैहि जानीहि । त्वयि नाथ सति प्रजानां अशुभं कुतः वर्तते ? अपि तु न । कुत्राऽपि तमिस्रा रात्रिः सूर्ये तपति सति लोकस्य दृष्टेः आवरणाय । कथम् । कल्पेत लभ्येत ॥१३॥

१४. भक्तिः प्रतीक्ष्येषु० । [इति]

हे राजन् ! ते तव प्रतीक्षे(क्ष्ये)षु प्रपद्येषु (?) भक्तिः कुलोचिता कुलानुरूपा वर्तते । महाभागतया विपुलाशयत्वेन पूर्वान् आदिरूपान् अतिशेषे, विजयसे अधिको भवसि । तु पुनः अतिक्रान्तावसरः व्यतीतकालः अहं अर्थिभावात् याचकत्वेन त्वां प्रति अभ्युपेतः आगतः इति मे मम विषादः वर्तते ॥१४॥

१५. शरीरमात्रेणेति ।

भो नरेन्द्र ! शरीरमात्रेण सत्पात्रवितीर्णाखिलविभवत्वात् देहमात्रेण तिष्ठन् त्वं आभासि, शोभसे । किंभूतस्त्वम् ? तीर्थप्रतिपादितर्द्धिः । क इव ? स्तंबेन काण्डमात्रेण अवशिष्टः उद्धरितः नीवार इव । किंभूतः नीवारः ? आरण्यकोपात्तफलप्रसूतिः मुनिगृहीत-शिखाप्रसवः ॥१५॥

१६. स्थाने भवेति।

भो राजन् भवान् एकनराधिपस्सन् स्थाने युक्तं मखजं यज्ञभवं अकिञ्चनत्वं निर्धनत्वं व्यनक्ति प्रकटयति । हि निश्चितम् । हिमांशोश्चन्द्रस्य कलाक्षयः वृद्धेः श्लाघ्यतरः प्रशस्यतरो भवति । किंभूतस्य हिमांशोः ? सुरैः देवैः पर्यायपीतस्य ॥१६॥

१७. त्वदन्यत इति ।

अनन्यकार्यः न अन्यं कार्यं व्यापारो यस्य असौ अहं, तावत् त्वदन्यतः गुर्वर्थं गुरोः अर्थं आहर्तुं आनेतुं यतिष्ये यत्नं करिष्ये । ते तव स्वस्ति अस्तु । चातको [ऽ]पि शरद्घनं शरन्मेघं न अर्हति न याचि(च)ते । किंभूतं शरद्घनम् ? निर्गलिताम्बुगर्भम् ॥१७॥

---

1 At times the scribe writes 'ब' for 'व'.

१८. एतावदुक्त्वेति ।

नृपतिः रघुः इति सं(तं) कौत्सं अन्वयुङ्क्त पप्रच्छ । इतीति किम् ? भो विद्वन् त्वया गुरवे प्रदेयम् । किं वस्तु अथवा कियद्वा पर(रि)माणम् ? किं कृत्वा ? महर्षेः शिष्यं निषिध्य निवार्य । किंभूतं शिष्यम् ? कौत्सं, एतावदुक्त्वा प्रतियातुकामं, प्रतिगन्तुकामम् ॥१८॥

१९. ततो यथा वेति ।

ततस्तदनन्तरं स वर्णी ऋषिस्तस्मै रघवे प्रस्तुतं वृत्तं आचचक्षे आख्यातवान् । किंभूताय तस्मै ? यथावत् वेदोक्तप्रकारेण विहिताध्वराय सम्पादितयज्ञाय । पुनः किंभूताय तस्मै ? स्मयावेशविवर्जिताय । पुनः कथंभूताय तस्मै ? वर्णाश्रमाणां गुरवे ॥१९॥

२०. समाप्तविद्येनेति ।

मया महर्षिः गुरुदक्षिणायै विज्ञापितः । किंभूतेन मया ? समाप्तविद्येन । मे मम गुरुः चिरायतां भक्तिमेव पुरस्तात् पूर्वं अगणयत् । किंभूतां भक्तिम् ? अस्खलितोपचारां अविच्छिन्नशुश्रूषाम् ॥२०॥

२१. निर्बंधसंजातेति ।

गुरुणा अहं इति उक्तः । इतीति किम् ? हे कौत्स, त्वं मे विद्यापरिसंख्यया वित्तस्य द्रव्यस्य दशचतस्रः च पुनः कोटीः आहर आनय । किं कृत्वा ? अर्थकार्श्यं धनाभावं अचिन्तयित्वा अविचिन्त्य । किंभूतेन गुरुणा ? निर्बंधसञ्जातरुषा ॥२१॥

२२. सो[ऽ]हं [स]पर्ययेति ।

सः अहं संप्रति भवन्तं त्वां सपर्याविधिभाजनेन प्रभुशब्दशेषं मत्वा ज्ञात्वा च्छु–(श्रु)[त]निक्र(ष्क्र)यस्य अध्ययनमूलस्य अल्पेतरत्वात् बाहुल्यात् उपरोद्धुं प्रार्थयितुं न अभ्युत्सहे न उत्साहं करोमि ॥२२॥

२३. इत्थं द्विजेनेति ।

जगदेकनाथः राजा इत्थं भूयः पुनरपि एनं कौत्सं जगाद । किंभूतः जगदेकनाथ ? द्विजराजकान्तिः चन्द्रदीप्तिः । किं [भूतः] राजा द्विजेनावेदितः ? एनोनिवृत्तेन्द्रियवृत्तिः । किं[भूतेन] द्विजेन ? वेदविदां वरेण ॥२३॥

२४. गुर्वर्थमर्थीति ।

श्रुतपारदृश्वा ब्राह्मणः गुर्वर्थं अर्थी सन् रघोः सकाशात् अनवाप्तकामः अपूर्णा-भिलाषः वदान्यान्तरं दानशीलान्तरं गतः प्राप्तः सन् , हे कौत्स, मे मम इति अयं परीवादनवावतारः लोकापवादः मा भूत् , न अपवादमकार्षीत् भवान् ॥२४॥

२५. स त्वं प्रशस्तेति ।

हे अर्हन् स त्वं मदीये अग्न्यगारे प्रशस्ते महिते अग्निहोत्रशालायां वसन् द्वित्राणि अहानि दिनानि सोढुं अर्हसि । क इव ? चतुर्थः अग्निरिव । यावत् त्वदर्थं साधयितुं यते, यत्नं करोमि ॥२५॥

२६. तथेति तस्या० ।

अग्रजन्मा शिष्यः तथेति तस्य रघोः तां गिरं प्रत्यग्रहीत् प्रतिजग्राह । किंभूतः अग्रजन्मा ? प्रतीतः हृष्टचित्तः । किंभूतां गिरम् ! अवितथां सत्याम् । रघुरपि कुबेरात् अर्थं निक्र(ष्क्र)ष्टुं आक्रष्टुं चकमे अभिललाष । किं कृत्वा ? आत्तसारां गृहीतद्रव्यां गां पृथ्वीं निरीक्ष(क्ष्य) ॥२६॥

२७. वसिष्ठमन्त्रोक्षणेति ।

हि निश्चितम् । तद्रथस्य गतः(तिः) न विजघ्ने । केषु ? उदन्वदाकाशमहीधरेषु । कस्मात् ? वसिष्ठमन्त्रोक्षणजातः(त्), वसिष्ठमहर्षेः मन्त्रेण उक्षणं अभिषिञ्चनं, तस्माज्जातः वसिष्ठमन्त्रोक्षणजः, तस्मात् प्रभावात् । {कस्य} कस्येव ? बलाहकस्येव । यथा मह(रु)-त्सखस्य वायुसहितस्य बलाहकस्य मेघस्य गतिर्न हन्यते ॥२७॥

२८. अथाधिशिश्ये ।

अथानन्तरं धीरः स रघुः प्रयतः सावधानः उद्यतः सन् प्रदोषे रथं अधिशिश्ये । किं[भूतं] रथम् ? कल्पितशस्त्रगर्भम् । पुनः किंभूतः रघुः ? तरसा बलेन कैलासनाथं जिगीषुः जेतुमिच्छुः । किं[भूतः] रघुः ? धीरः । कयेव ? सामन्तसम्भावनयेव ॥२८॥

२९. प्रातः प्रयाणाभिमुखायेति ।

तत्र पदे भाण्डागारपदे नियुक्ताः व्यापारिताः, प्रातः प्रभातस्य समये, तस्मै रघवे कोशगृहस्य मध्ये हिरण्मयीं वृष्टिं शशंसुः, कथयामासुः । किंभूताः पदे नियुक्ताः ? सविस्मयाः विस्मयसहिताः । किंभूताय तस्मै ? प्रयाणाभिमुखाय । किंभूतां वृष्टिम् ? नभस्तः आकाशात्पतिताम् ॥२९॥

३०. तं भूपतिरिति ।

भूपतिः रघुः तं भासुरहेमराशिं कौत्साय समस्तमेव दिदेश ददौ । कथंभूतं हेम-राशिम् ? कुबेरात् लब्धम् । किंभूतात् कुबेरात् ! अभियास्यमानात् आस्कन्द्यमानात्, अभिगम्यमानात् । कमिव ? सुमेरोः पादमिव । पादाः प्रत्यंतपर्वताः । किंभूतस्य सुमेरोः ? स्वर्णाचलस्य । किंभूतं पादम् ? वज्रभिन्नम् ॥३०॥

३१. जनस्य साकेतेति ।

अर्थी मुनिः च पुनः नृपः तौ द्वावपि साकेतनिवासिनः अयोध्यानिवासिनः जनस्य अभिनन्द(न्द्य)सत्त्वौ अभूतां, आस्ताम् । किंभूतं(तः) अर्थी ? गुरुप्रदेयाधिकनिस्पृहः । किंभूतः नृपः ? अधिकप्रदः । कस्मात् ? अर्थिकामात् याचि(च)काभिलाषात् ॥३१॥

३२ अथोष्ट्रवामीति ।

अथानन्तरं कौत्सः सम्प्रस्थितः प्रचलितः सन् प्रजेश्वरं वाक्यं उवाच । किंभूतः कौत्सः ? मनीषी, पण्डितः । पुनः किंभूतः कौत्सः ? प्रीतमनाः, प्रमुदितमानसः । किंभूतं प्रजेश्वरम् ? ओ(उ)ष्ट्रवामीशतवाहितार्थम् । उष्ट्रः करमेलकः वाम्यो वेमयस्तासां शतैर्वाहितो गुरुसमीपं प्रापितः अर्थो येन स तम् । पुनः किं कुर्वन् कौत्सः ? आनतपूर्वकायं, आनतो नम्रः पूर्वकायः यस्य सः, तं प्रजेश्वरं करेण स्पृशन् ॥३२॥

३३. किमत्र चित्रमिति ।

अत्र किं चित्रं आश्चर्यम् ? यदि प्रजानां अधिपतेः राज्ञः वृत्ते स्थितस्य सन्मार्गस्थस्य, भूः पृथ्वी कामसूः कामदु[घा] । हे राजन्, तु पुनस्तव प्रभावः अचिन्तनीयः वर्तते । येन त्वया द्यौरपि मा(म)नीषितं वाञ्छितं दुग्धा ॥३३॥

३४. आशास्यमन्थे(न्य)[दि]ति ।

भो राजन् ! अन्यत् आशास्यं आशीर्वादवचनं, ते तव पुनरुक्तभूतं पुनरुक्तमिव । किंभूतस्य ते ? सर्वाणि श्रेयांसि कल्याणानि अधिजग्मुषः । भो नृप ! त्वं आत्मगुणानुरूपं पुत्रं लभस्व, प्राप्नुहि । कः कमिव ? भवतः पिता ईड्यं स्तुत्यं भवन्तमिव ॥३४॥

३५. इत्थं प्रयुज्ये[ति] ।

अग्रजन्मा कौत्सः गुरोः सकाशं प्रतीयाय जगाम । किं कृत्वा ? राज्ञे इत्थं आशिष्यं(षं) प्रयुज्य । राजाऽपि आशु शीघ्रं तस्मात् कौत्सात् सुतं लेभे । कः कस्मात् कमिव ? जीवलोकः जगत् अर्कात् आलोकं प्रकाशमिव ॥३५॥

३६. ब्राह्मे मुहूर्तेति ।

किल तस्य रघोः देवी पट्टराज्ञी ब्राह्मे मुहूर्ते पुत्रं सुषुवे । किंभूतं कुमारम् ? कुमारकल्पं, [कार्तिकेयसमानम् । अतः पिता ब्रा(ब्र)ह्मण एव नाम्ना तं पुत्रं अजं चकार । किंभूतं तं पुत्रम् ? अग्रजन्मानं श्रेष्ठजन्मानम् ॥३६॥

३७. रूपं तदोजस्वि(स्वी)ति ।

तत् ओजस्वि युक्तं रूपं वर्तते । तदेव वीर्यं वर्तते, तथैव नैसर्गिकं स्वाभाविकं उन्नतत्वं वर्तते । कुमारः स्वात् कारणात् पितुः न विति(भि)दे न ते(भे)दे ययौ । कस्मात् क इव ? प्रदीपात् प्रवर्तितः जनितः प्रदीपवत् ॥३७॥

३८. उपात्तविद्यमिति ।

श्रीः लक्ष्मीः तं अजं कामायमानाऽपि अभिलषन्त्यपि गुरोः रघोः अनुज्ञां आचकाङ्क्ष । ईहामासे (?) । का कस्येव ? धीरा कन्या पितुरिव । यथा धीरा कन्या पितुः अनुज्ञां काङ्क्षति ॥३८॥

३९. अथेश्वरेणेति ।

अथ अथानन्तरं क्रथकैशिकानां देशानां ईश्वरेण राज्ञा भोजेन रघवे दूतः विसृष्टः प्रेषितः । किमर्थम् ? इन्दुमत्याः स्वसुः स्वयंवरार्थम् । किंभूतेन भोजेन ? आप्तः कुमारानयनोत्सुकेन ॥३९॥

४०. तं श्लाध्यसंबंधमिति ।

असौ रघुः ऋद्धां समृद्धां विदर्भाधिपराजधानीं भोजपुरं प्रति प्रस्थापयामास । किं कृत्वा ? तं भोजं श्लाध्यसंबंधं विचिन्त्य विमृश्य । च पुनः दारक्रियायोग्यदशं विवाह-करणयोग्यावस्थं पुत्रं विचिन्त्य । किंभूतं एनं अजम् ? ससैन्यं सकटकम् ॥४०॥

४१. तस्योपकार्यारचि[तोपचारे]ति ।

तस्य भुवनेन्द्रसूनोः अजस्य मार्गे निवेशा(वासा) उद्यानविहारकल्पा उद्यानक्रीडा-तुल्या बभूवुः अभुवन् । किंभूताः निवेशाः(वासाः)? उपकार्यारचितोपचाराः, भु(भू)-पटकुटीषु रचितः उपचारः पुष्पप्रकारो यत्र । पुनः किंभूताः निवेशाः ? जानपदोपदाभिः जानपदानां उपदाभिः ढौकनिकाभिः बं(वं)ध्येतराः सफलाः ॥४१॥

४२. स नर्मदेति ।

स अजः नर्मदारोधसि रेवातटे सैन्यं निवेस(श)यामास स्थापयामास । किंभूते नर्मदारोधसि ? मरुद्भिः वातैः आनर्तितनक्तमाले, आनर्तितः कम्पितः नक्तमालो वृक्षविशेषः यत्र । किंभूतैः मरुद्भिः ? सीकरार्द्रैः जलकणार्द्रैः । किंभूतः अजः ? विलङ्घिताध्वा उल्लंघितमार्गः । किंभूतं सैन्यम् ? क्लान्तं, श्रान्तम् । पुनः किंभूतं सैन्यम् ? रजोधूसर-केतु रजसा धूसरा केतवः ध्वजा यस्य तत् ॥४२॥

४३. अथोपरि[ष्टादि]ति ।

वन्यः वनेभवः वन्यः, भवार्थे यः, वन्यः गजः । सरितः नर्मदायाः उन्ममज्ज निस्ससार । किंभूतः गजः प्राक्सूचितान्तःसलिलप्रवेशः । प्राक् पूर्वं सूचितो ज्ञापितोऽन्तः

सलिले सलिलमध्ये प्रवेशो यस्य सः । कैः ? उपरिष्टात् उपरिभागे भ्रमद्भिर्भ्रमरैः । पुनः । किंभूतः गजः ? निधूतदानामलगण्डभित्तिः ॥४३॥

४४. निःशेषविक्षालितेति ।

किं कुर्वन् ? ममज्ज दन्तद्वयेन ऋक्षवतः पर्वतस्य तटेषु द(व)प्रक्रियां तटाघात-क्रीडाम् । संशन् कथयन् । किंभूतेन दन्तद्वयेन ? निःशेषविक्षालितगैरिकेण ? निःशेषं समस्तं, विक्षालितं धौतं गैरिकं यत्र तेन । पुनः किंभूतेन दन्तद्वयेन ? नीलोर्ध्वरेखा-शवलेन । प्रकटाभिः नीलाभिः ऊर्ध्वरेखाभिः शबलो धूसरस्तेन । पुनः किंभूतेन दन्त-द्वयेन ? अस्य(श्म) विकुण्ठितेन ॥४४॥

४५. स भोगिभोगाधिकेति ।

तीराभिमुखः स गजः हस्तेन शुण्डादण्डेन सशब्दं यथा भवति तथा उर्मीन् कल्लोलान् चिक्षेप अक्षिपत् । उर्मीन् कानिव ? वारिपरिघान् नवगजग्रहणस्थानार्गलानिव । किंभूतेन हस्तेन ? भोगिभोगाधिकपीवरेण भोगिनः शेषराजस्य भोगः शरीरं, भोगि-भोगादधिकं पीवरं(रः)स्थूलं(लः)हस्तं(स्तः) यस्य सः, तेन । किंभूतेन हस्तेन ? संवेष्टितार्ध-ग्रहितेन । किंभूतान् उर्वीन् ? दीर्घान् ॥४५॥

४६. संहारविक्षेपेति ।

तीराभिमुखः स गजः हस्तेन सशब्दं यदा भवति तथा बभौ । किं कुर्वन् ? सहसा बृहतः तरङ्गान् भिन्दन् । क इव ? वार्यर्गलाभङ्गे प्रवृत्त इव । किंभूतेन हस्तेन ? संहारविक्षेपलघुक्रियेण । संहारः संकोचो, विक्षेपः प्रसारणम् । तत्र लघुक्रियेण चतुरेण ॥४६॥

४७. पाठान्तरम् । कारण्डवोच्छिष्टेति ।

स नदीष्णः नद्यां स्नानकुशलः गजः तटं उत्ससर्प, प्राप । किं कुर्वन् ? सैवाललताः कर्षन् आकर्षन् । किंभूताः सैवाललताः ? कारण्डवोच्छिष्टमृदुप्रवालाः, कारण्डवाख्यैः पक्षिभिरुत्सृष्टाः अर्धभक्षिता मृदुप्रतानाः कोमलाङ्कुराः यासां ताः । पुनः किंभूता सैवालि(ल)लताः ? ॥४७॥

४८. (see notes on V. 47, in Appendix II)

पुलिन्द्रयोषांबुविहारकाञ्चीः । पुलिन्द्रयोषाणां अम्बुविहारो जलकेलिस्तत्र काञ्च्यः कट्याभरणानि श्रोणीतटसंबंधात् । पुनः किंभूताः शैवाललताः ? प्रोहावलग्नाः, प्रोहे जंघापश्चाद्भागे लग्नाः श्लिष्टाः ॥४८॥

४९. शैलोपम इति ।

सरित्प्रवाहः पूर्व तटं उत्ससर्प तत्याज । किंभूतः सरित्प्रवाहः ? तदुत्पीडितवारि-राशिः । तेन जगे(गजे)न उत्पीडितो वारिराशिर्यस्व सः । किं कुर्वन् ? शिलोपमः पर्वतोपमः स गजः पश्चात् शैवलमञ्जरीणां लाजा(जाला)नि तरसा बलेन कर्षन् ॥४९॥

५०. तस्यैकनागस्येति ।

तस्य एकनागस्य मददुर्दिनश्रीः पुनः पुनरपि दिदीपे अदीप्यत । केन ? वन्येत-रान्ये(ने)कपदर्शनेन सेनाद्रिपालोकनेन । कयोः ? कपोलभित्योः किंभूता मददुर्दिनश्रीः ? ह्रदावगाहक्षणमात्रशान्ता । स्रोतोमज्जनेन मुहूर्तमात्रं निर्वृत्ता [अ]पि, अथवा जलावगाह० इति पाठान्तरम् ।।५०।।

५१. सप्तच्छदक्षीरेति ।

सेनागजेन्द्राः तदीयं मदं आघ्राय विमुखीवभूवुः । पराङ्मुखाः अभवन् । किंभूतं मदम् ? असह्यं, दुःसहम् । पुनः किंभूतं मदम् ? सप्तच्छदक्षीरकटुप्रवाहम् । सप्तच्छदानां वृक्षाणां क्षीरवत् कटुप्रवाहो यस्य सः, तम् । किंभूताः सेनागजेन्द्राः ? विलङ्घिताधोरण-तीव्रयत्नाः, विलङ्घितः अगणितः आधोरणस्य हस्तिपकस्य तीव्रः स्वरोऽप्यंकुशाघातादिको यैः ।।५१।।

५२. स च्छिन्नबन्धेति ।

स गजः क्षणेन सेनानिवेशं चपलं चकार । किंभूतं सेनानिवेशम् ? छिन्नबन्धुद्रुत-युग्यं, छिन्नबन्धाः क्षतप्रग्रहा द्रुताः पलायिता युग्या उष्ट्रादयो यानास्तैः शून्यं वर्जितम् । पुनः किंभूतं सेनानिवेशम् ? भग्नाक्षपर्यस्तरथम् भग्नाक्षत्वात् पर्यस्ताः पतिताः स्यन्दना रथा यत्र । पुनः किंभूतं सेनानिवेशम् ? रामापरित्राणविहस्तयोधम् । रामापरित्राणे नारीरक्षणे विहस्ता व्यग्रा योधा सुभटा यत्र ।।५२।।

५३. स विद्धमात्रः[इति] ।

किलेति । किल स गजः विद्धमात्रः सन् व्योमचरं दैवतं प्रपेदे प्राप । किंभूतं वपुः ? कान्तं, रमणीयम् । पुनः किंभूतं वपुः ? स्फुरत्प्रभामण्डलमध्यवर्ति भास्वत्कान्ति-वलयमध्यस्थम् । किंभूतः गजः ? तद्विस्मितसैन्यदृष्टः । तस्य अजस्य विस्मितं च तत् सैन्यं, तद्विस्मितसैन्यं, तेन दृष्टः ।।५३।।

५४. तमापतन्तमिति ।

नात्यायतकृष्टशार्ङ्गः कुमारः विशेषण(विशिखेन) तं कुम्भे जघान । किं करिष्यन् ? निवर्तयिष्यन् । किंभूतः कुमारः ? इति श्रुतवान् । इतीति किम् ? वन्यः करी नृपतेः अवध्यः । किंभूतं तं गजम् ? आपतन्तं आगच्छन्तम् ।।५४।।

५५. अथ प्रभावोपनति(तै)रिति ।

अथ अथानन्तरं वाग्मी वचनज्ञः स गजः कुमारं अजं बभाषे उवाच । किं कृत्वा ? पुष्पैः अवकीर्य वर्षित्वा । किंभूतैः पुष्पैः ? प्रभावोपनतैः । दिव्यमहिमा-

सम्पन्नैः । किंभूतो वाग्मी ? संवर्धितोरःस्थलतारहारः । संवर्धितो घनीकृतो वक्षःस्थले देदीप्यमानो हारो यस्य सः । काभिः ? दशनप्रभाभिः, दन्तजो(ज्यो)त्स्नाभिः ॥५५॥

५६. मतङ्गशापे(पा)[दि]ति ।

भो राजन् ! मतङ्गशापात् अहं मतङ्गजत्वं प्राप्तवान् अस्मि । किंभूतात् । मतङ्गशापात् ? अवलेपमूलात् अहंकारजात् । मां प्रियदर्शनस्य गन्धर्वपतेः प्रियंवदं नाम सुनुजं (सूनुं) पुत्रं त्वं अवेहि जानीहि ॥५६॥

५७. स चानुनीत इति ।

च पुनः, स महर्षिः मया अनुनीतः प्रसादितः सन् पश्चात् मृदुतां अगच्छत् अगमत् । किंभूतेन मया ? प्रणतेन नम्रेण । हि यस्मात् कारणात् यत् य(ज)लस्य अग्न्यातपसंप्रयोगात् उष्णत्वं भवति, यत् शैत्यं शीतत्वं सा प्रकृतिः ॥५७॥

५८. इक्ष्वाकुवंशप्रभवेति(व इति) ।

अतः अयोमुखेन बाणेन यदा ते तव कुंभं कुम्भस्थलं भेत्यस्यति विदारयिष्यति तदा स्वेन वपुर्महिम्ना संयोक्ष्यसे संयोगमेष्यति(सि) । स तपोनिधिर्मां इति अवोचत् । किंभूतः अजः ? इक्ष्वाकुवंशप्रभवः ॥५८॥

५९. स(सं)मोचितः सेति(सत्त्वेति) ।

स अहं त्वया शापात् मोचितः । किंभूतेन त्वया ? सत्त्ववता सात्त्विकेन । पुनः किंभूतेन त्वया ? चिरप्रार्थितदर्शनेन । चिरं प्रार्थितं दर्शनं यस्य सः । चेत् अहं भवतः प्रतिप्रियं प्रत्युपकारं न कर्यां न कुर्वे, हि स्फुटं, मे मम पदोपलब्धिर्निजस्थानावाप्तिः वृथा निष्फलं स्यात् भवेत् ॥५९॥

६०. संमोहनं नामेति ।

हे सखे ! संमोहनं नाम ममास्त्रं महाशस्त्रं आदत्स्व गृहाण । किंभूतं अस्त्रम् ? प्रयोगसंहारविभक्तमन्त्रम् । प्रयोगे संहारे च विभक्तो मन्त्रो यस्य तत् । पुनः किंभूतं अस्त्रम् ? गान्धर्वं, गन्धर्वसम्बन्धिनम् । यतः अस्मात् प्रयोक्तुः प्रहर्तुः अरिहिंसा अरिवधः, च पुनः स्वहते विजयो भवति ॥६९॥

६१. अलं ह्रियेति ।

भो राजन् ! ह्रिया लज्जया अलं पर्याप्तम् । यत् त्वं प्रहरन्नपि मुहूर्तं प्रहारसमये मां प्रति दयापरः अभूत् अभवत् । तस्मात् कारणात् त्वया मयि प्रतिषेधरौख्यं-(क्ष्यं) न गृहीष्ये इति निषेधरौख्यं(क्ष्यं) निरोधकत्वं न प्रयोज्यं, न कार्यम् । किंभूते मयि ? उपच्छन्दयति प्रार्थयमाने, प्रत्युपकारं कुर्वति ॥६१॥

६२. तथेत्युपस्पृश्य पय इति ।

स नृसोमः नृचन्द्रः उदङ्मुखः सन् उत्तराभिमुखः सन् तस्मात् अस्त्रमन्त्रं जग्राह । किंभूतः नृसोमः ? अस्त्रवित् । किंभूतात् तस्मात् ? निगृहीतशापात् दूरीकृतशापात् । किं कृत्वा ? सोमोद्भवायाः नर्मदायाः सरितः नद्याः पवित्रं पयः जलं तथेति उपस्पृश्य स्पृष्ट्वा आचमनं कृत्वा ॥६२॥

६३. एवं तयोरध्वनीति ।

एवं तयोः प्रियंवदकुमारयोः एकः गन्धर्वः चैत्ररथप्रदेशान् यक्षोद्यानप्रदेशान् ययौ । अपरः अजः विदर्भान् जनपदान् ययौ । किंभूतान् विदर्भान् ? सौराज्यरम्यान् । सौराज्येन राजगुणसम्पत्त्या रम्यान् सुखेदान् । कथंभूतयोस्तयोः ? दैवयोगात् अध्वनि मार्गे अचिन्त्यहेतुसख्यं आसेदुषोः ॥६३॥

६४. तं तस्थिवांसमिति ।

क्रथकैशिकेन्द्रः भोजः तं अजं प्रत्युज्जगाम सन्मुखं ययौ । कः कमिव ? उर्म्मं-(र्मि)माली चन्द्रमिव । यथा उर्मिमाली समुद्रः प्रवृद्धोर्मिः प्रवृद्धकल्लो(ल्लो)लः सन् चन्द्रं प्रत्युद्गच्छति । किंभूतं अजम् ? नगरोपकण्ठे तस्थिवांसम् । किंभूतः क्रथकैशि-केन्द्रः ? तदागमारूढगुरुप्रहर्षः ॥६४॥

६५. प्रवेश्य चैनमिति ।

अग्रजा(या)यी पुरोगामी भोजः एनं अजं पुरं प्रवेश्य उच्चैः विनयेन तथा उपाचरन् तथा समग्रः समस्तः तत्र जनः वैदर्भराजं भोजराजं आगन्तुं प्राघूर्णिकं अजं गृहेशं प्रभुं मेने अमंस्त । किंभूतः अग्रजा(या)यी ? अर्पितश्रीः, अर्पिता निवेदिता श्रीर्येनाऽसौ ॥६५॥

६६. तस्याधिकारपुरुषैरिति ।

स रघुप्रतिनिधिः अजः रम्यां नवोपकार्यां नवपटीमण्डपं (?) अध्युवास । कः कामिव ? मदनः बाल्यात्परां दशामिव । यथा मदनः कंदर्पः बाल्यात्परां दशां यौवनस्थां अधिवसति । किंभूतां नवोपकार्याम् ? तस्य भोजस्य अधिकारपुरुषैः नियोगजनैः प्रदिष्टां कथिताम् । किंभूतैः अधिकारपुरुषैः ? प्रणतैः निम्नैः (?—नमद्भिः ?) । किंभूतां नवोपकार्याम् ? प्राग्द्वारवेदिनिवेशितपूर्णकुम्भां, प्राग्द्वारवेद्यां निवेशिताः पूर्णकुम्भाः पूर्णकलशाः यस्यां सा, ताम् ॥६६॥

६७. तत्र स्वयंवरेति ।

निद्रा चिरेण अजस्य त(न)यनाभिमुखी बभूव । क्व ? रात्रौ । केव ? भापा-(वा)वबोधकलुषा दयितेव । किंभूतस्य अजस्य ? तत्र स्वयंवरे कमनीयं कन्याललाम कन्यारत्नं लिप्सोः अभिलाषुकस्य । किंभूतं कन्याललाम ? स्वयंवरसमाहृतराजलोकम् ॥६७॥

६८. तं कर्णभूषणेति ।

सवयसः समानवयसः सूतात्मजाः वैतालिकाः उषसि प्रभाते ललितबन्धमनोहराभिः वाग्भिः तं अजं प्राबोधयन् अजागरयन् । किंभूताः सूतात्माजाः ? उदारवाचः उत्कृष्टगिरः । किंभूतं तं अजम् ? कर्णभूषणनिपीडितपीवरांसं, कुण्डलसंश्लेपावेदितपीनस्कन्धम् । पुनः किंभूतं अजम् ? शय्योत्तरच्छदविमर्दकृशाङ्गरागं शयनीयप्रच्छदपटसम्पेषविरलविलेपनम् । पुनः किंभूतं अजम् ? प्रथितप्रबोधं विक्षा(ख्या)तविवेकम् ॥६८॥

६९. रात्रिर्गतेति ।

हे मतिमतां वर ! हे प्राज्ञोत्तम, हे अज ! रात्रिर्गता जगाम । शय्यां मुञ्च, त्यज । ननु धाजा(त्रा) ब्रह्मणा जगतः विश्वस्य धुरा द्विधैव द्विप्रकारैव विभक्ता विभागी-कृता, यां धुरं एकतः एकस्यां दिशि विनिद्रः निरालस्यः सन् तव गुरुः पिता बिभर्ति धारयति । तस्या धुरः अपरधुर्यपदावलम्बी, अपरं अन्यं धूर्यं पदं धौरं यस्या अवलम्बित (येन अवलंबितं), इत्येवंशीलः अपरधूर्यपदावलम्बी वर्तते ॥६९॥

७०. निद्रावशेनेति ।

लक्ष्मीर्येन चन्द्रेण विनोदयति अभिवाहयति सो[ऽ]पि चन्द्रः त्वदाननरुचिं तव मुखकान्तिं विजहाति त्यजति । किंभूता लक्ष्मीः ? हि यतः भवता निद्रावशेन निद्राधीनेन अनवेक्षमाणा असेव्यमाना । का किमिव ? निशि रात्रौ खण्डिता अबला स्त्री पर्युत्सु-कत्वमिव ॥७०॥

७१. तद्वल्गुनेति ।

भो अज ! तत् तस्मात् कारणात् वल्गुना मनोज्ञेन युगपत्समकालं उन्मिष(षि)-तेन विकासेन सद्यः शीघ्रं तावत् द्वे उभे वस्तुनी परस्परतुलां परस्परसादृश्यं अधिरोहतां प्राप्नुताम् । के ते ? एकं अन्तः मध्ये प्रस्पन्दमानपरुषेतरतारं कम्पमानमधुरतारकं ते तव चक्षुः नेत्रं, प्रचलितभ्रमरं पद्मं च अन्तर्भ्रममान(?)भृङ्गं च ॥७१॥

७२. वृन्तश्लथमिति ।

विभाति(त)वायुः प्रभातवायुः वृन्तश्लथं बन्धनशिथिलं अनोकु(क)हानां वृक्षाणां पुष्पं हरति, मुष्णाति । अरुणांश(शु)भिन्नैः सूर्यकिरणविकसितैः सरसिजैः कमलैः संसृज्यते

संबध्यते । किं कर्तुमिच्छुरिव ? परगुणेन ते भवतः मुखमारुतस्य उच्छ्वासानिलस्य स्वाभाविकं सहजं सौरभ्यं सौगन्धि(न्ध्यं) ईप्सुरिव लिप्सुरिव ॥७२॥

७३. ताम्रोदरेष्विति ।[1]

हिमाम्भः अवश्यायजलं आभाति, शोभते । किमिव ? त्वदीयं लीलास्मितमिव, लीलाहसितमिव । किंभूतः(तं) हिमाम्भः ? ताम्रोदरेषु द्रुमपल्लवेषु पतितम् । पुनः किंभूतः(तं) हिमाम्भः ? निर्धूतहारगुलिकाविशदं निर्धूता{नि} प्रक्षालिता{नि}हारगुलिका मौक्तिकानि तद्वद्विशदं निर्मलं यत् तत् । सुस्पष्टप्रालम्बमुक्ताफलनिर्मलम् । किंभूतं लीलास्मितम् ? सदशनार्चिः, सह दशनार्चि[षा] दशनकान्त्या वर्तते [स]दशनार्चिः । कया ? अधरोष्ठे लब्धपरभागतया प्रात(प्त)गुणोत्कर्षतया ॥७३॥

७४. ताम्रोदरेष्विति ।[1]

हिमाम्भः ते तव स्मितमिव संलक्षते । किंभूतं स्मितम् ? दशनचन्द्रिकया अनुविद्धम् । पुनः कथंभूतम् ? बिंबोष्ठलब्धपरभोगम् । कथंभूतं हिमाम्भः ? ताम्रोदरेषु द्रुमपल्लवेषु पतितम् । पुनः कथंभूतम् ? निर्धूतहारगुलिकाविशदम् । इति पाठान्तरम् ॥७४॥

७५. यावत्प्रतापनिधिरिति ।

प्रतापनिधिर्भानुः [यावत्] न आक्रमते नोद्गच्छति तावत् अह्नाय झटिति अरुणेन तमः अंधकारं(रः) निरस्तं नाशितम् । भो वीर ! त्वयि आयोधनाग्रसरतां समरपुरोयायिनां याते प्राप्ते सति तव गुरुः पिता रिपून् शत्रुन् किं स्वयं उच्छिनत्ति, क्षिपति ? अपि तु स्वयं न ॥७५॥

७६. शय्यां जहत्युभयेति ।

भों कुमार ! ते तव स्तंबेरमाः गजाः शय्यां स्वापस्थानं जहति त्यजंति । कथंभूताः स्तंबेरमाः गजाः ? उभयपक्षविनीतनिद्राः । उभयाभ्यां पक्षाभ्यां पार्श्ववर्तनेन विनीता अपगता निद्रा येषां ते, उभयम् । पुनः किंभूताः गजाः ? मुखरशृङ्खलकर्षिणः, मुखरान्(णि) शब्दायमानान्(नि) श्रृङ्खलान्(नि) कर्षंति एवंशीलास्ते मुखराः । येषां दन्तकोषाः दशनभागाः तरुणारुणरागयोगात् भिन्नाद्रिगैरिकतटा इव विदारिताद्रिगैरिकस्थला इव विभान्ति ॥७६॥

---

1 Jina. V. 73, 74 are equivalent to Malli. V. 70. Jina. has unnecessarily commented twice on one and the same verse and has wrongly given separate numbers to them.

७७. दीर्घेष्वमे(मी)ति ।

भो वनजाक्ष ! वनजं कमलं तद्वत् ईक्षणे लोचने यस्य स तस्य सम्बोधनं क्रियते । हे वनजेक्षण ! भो कुमार, अमी ते वाहाः अश्वाः पुरोगतानि पुरस्थानानि लेह्यानि श्लेष्मानिवृत्तये लेहितव्यानि सैन्धवशिलाशकलानि सैन्धवदृषत्खण्डानि वक्त्रोष्मणा मुखबाष्पेण मलिनयन्ति धूसरयन्ति । कथंभूताः वाहाः ? दीर्घेषु पटमण्डलेषु नियम(मि)ता बद्धाः । किं कृत्वा ? निद्रां विहाय परित्यज्य । किंभूताः अमी अश्वाः ? वाह्लिलदेश्याः वाह्लीकदेश्याः ॥७७॥

७८. भवति विरलेति ।

म्लानपुष्पोपहारः पुष्पप्रत्युपकारः विरलभक्तिः{विंच्छति(?)} भवति । स्वकिरणपरिवेषोन्मेषशून्याः प्रदीपा भवन्ति । अयं शुको[ऽ]पि नः अस्माकं गिरं अनुवदति अनुकरोति । किंभूतां गिरम् ? त्वत्प्रबोधप्रयुक्तां, त्वत्प्रबोधार्थं प्रयुक्तां उदीरिताम् । कथंभूतः शुकः ? मञ्जुवाक् मधुरगीः । पुनः किंभूतः शुकः ? पञ्जरस्थः ॥७८॥

७९. इति स विगतेति ।

स अजः तल्पं शयनीयं मुमोच तत्याज । कः किमिव ? सुप्रतीकः सुरगजः गाङ्गं सैकतमिव । किंभूतः अजः ? इति विहृतनिद्रः[1] विहृता अपगता निद्रा यस्य सः । पुनः कथंभूतः ? अल्पेतरांसः{अल्पेतरा} अल्पेतरौ विशालौ अंसौ स्कंधौ यस्य सः । किंभूतम् तल्पम् ? पादयोश्चरणयोर्विषयभूतयोः व्यापृतानां संवाहनयुक्तानां परिजनवनितानां सेवकजनस्त्रीणां वलयमणिविदिष्टं प्रच्छदान्तं, वलयमणिषु कंकणरत्नेषु विदिष्टः संलग्नः प्रच्छदान्तः पटपल्लवान्तो यत्र तत् ॥७९॥

८०. इति विरचितेति ।

स कुमारः सपदि शीघ्रं तल्पं शयनीयं उज्झांचकार (?) तत्याज । कथंभूतः कुमारः ? इति पूर्वोक्तप्रकारेण विरचितवाग्भिः, विरचिताः प्रस्तुताः वाग् वाणी यैस्ते तैर्बंदिपुत्रैर्मागधैः विगतनिद्रः । कः कमिवः ? सुप्रतीकः सुरगजः गाङ्गसैकतमिव । कथंभूतः सुरगजः ? राजहंसैः बोधितः जागरितः(?) । किंभूतैः राजहंसैः ? कलपटुनिनदि्भः, कलं मनोज्ञं पटु स्पष्टं यथा भवत्येवं निनद्भिः शब्दायमानैः ॥८०॥पाठान्तरम्॥

---

1 Jina. offers two variants viz. विगत. (as read in the श्लोकप्रतीक) and विहृत.

८१. अथ विधि[मिति]।

अथ विधि(धिं) [अवसाय्य] अञ्चिताक्षिपक्ष्मा अञ्चितानि प्रशस्तानि अक्ष्णोर्नेत्रयोः पक्ष्माणि लोमानि यस्य सः तथा अजः क्षितिपसमाजं नृपपरिषदं अगात् जगाम। किंविशिष्टं क्षितिपसमाजम्? स्वयंवरस्थं, स्वयंवराय तिष्ठति स्वयंवरस्थः, तम्। स्वयंवरस्थम्। किंभूतः अजः? कुशलविरचितानुरूपवेषः, कुशलैर्निपुणप्रसाधकैः विरचितो [ऽ]नुरूपो विवाहयोग्यो वेषः आकल्पो यस्य सः। {कुशलम्}। किं कृत्वा? दिवसमुखोचितं दिनारंभानुरूपं [शास्त्र] दृष्टं शास्त्रोक्तविधिं सन्ध्यावन्दनादिकं, अवसाय समाप्य ॥८१॥

इति जिनसमुद्रसूरिविरचितो(त)रघुकाव्यान्वयटीकायां स्वयंवरगमनो नाम पञ्चमः सर्गः ॥

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

षष्ठः सर्गः ॥

१. स तत्र मञ्चेषु ।[1]

स कुमारः अज इति तत्र राजसभायां मञ्चेषु पर्यंकेषु नृपतीन् अपश्यत् । कानिव ? हेमवेदीन्, हेम्नः सुवर्णस्य वेदिर्येषां तान् हेम{सुवर्ण}वेदीन् । प्रशस्तान् मनोज्ञान् यूपानिव यज्ञस्तम्भानिव । किंभूतेषु मञ्चेषु ? विमानकल्पेषु, विमानसदृशेषु । किंभूतान् नृपतीन् ? सिंहासनस्थान् । पुनः किंभूतान् नृपतीन् ? आकल्पसंमूर्च्छितरूपशोभान् । आकल्पेन वेषेण संमूर्च्छिता घनीकृता रूपशोभा येषां ते, तान् ॥१॥

२. स तत्रेति ।

स अजः तत्र राजसभायां मञ्चेषु नरलोकपालान् अपश्यत् । किंभूतान् नरलोकपालान् ? मनोज्ञवेषान् । पुनः किंभूतान् ? मरुतां देवानां आकृष्टलीलान्, आकृष्टा लीला विलासो यैस्ते तान् । किंभूतानां मरुताम् ? वैमानिकानां, विमानस्थितानाम् । किंभूतेषु मञ्चेषु ? उपचारवत्सु, उपचारो वस्त्राद्यास्तरणास्तेषु (०स्तरणं, [येषु] तेषु) ॥२॥

३. रतेर्गृहीताननु(नुन)[येनेति] ।

नृपाणां मनः इन्दुमतीनिराशं इन्दुमत्यां विषये निराशं, इन्दुमतीनिराशं बभूव, आसीत् । किंभूतानां नृपाणाम् ? काकुत्स्थमालोकयताम् । कमिव का[म]मिव ? कथंभूतं कामम् ? ईश्वरेण प्रत्यर्पितस्वाङ्गं, प्रत्यर्पितं परिणमितं स्वाङ्गं निजशरीरं यस्य सः, तम् । कथंभूतेन ईश्वरेण ? रतेः भार्यायाः गृहीतानुनयेन, विहितप्रसादेन ॥३॥

४. वैदर्भेति ।

अथानन्तरं कुमारः वैदर्भनिर्दिष्टं मञ्चमारुरोह आरूढवान् । केन ? कतृ(क्लृप्ते)न रचितेन सोपानपथेन । कः कैः कामिव ? मृगराजशावः सिंहशिशुः शिलाभङ्गैः शिलाविभागैः तुङ्गमुच्चैस्तरं नगोत्सङ्गमिव अद्रिपृष्ठमिव ॥४॥

---

1 Jina. seems to read VI. I quite differently, but the N.S. edn. 1882, does not show anything in the foot-notes. (Jina.) VI. 2. is Malli. VI. I. So, Jina. VI. 1. seems to be extra.

५. परार्ध्यवर्णा इति ।

स अजः मयूरपृष्ठाश्रयिणा गुहेन भूयिष्ठं सुष्ठु अतिशयेन उपमेयकान्तिः आसीत् । कथंभूतः अजः ? परार्ध्यवर्णास्तरणोपपन्नम् । रत्नवत् रत्नजटितं आसनमासेदिवान् । परार्ध्यं उत्कृष्टं पञ्चवर्ण भद्रास्तरणं उत्तरच्छदः तेनोपपन्नं संयुक्तम् ।।५।।

६. तासु श्रिया[इति] ।

तासु राजपरंपरासु नृपश्रेणिषु श्रिया विभक्तिः(क्तः) विभागीकृतः आत्मा चा-(व्य)रुचत् शुशुते(भे) । कथंभूतः आत्मा ? प्रभाविशेषोदयदुर्निरीक्ष्यः, संयोगात् सर्वे राजानः दुर्निरीक्ष्यशोभायुक्ताः बभूवुः । का कयेव ? पयोमुचां पङ्क्तिषु विद्युतेव । विद्युत्संयोगात् यथा मेघाः शोभन्ते, मेघमाला सु(स)तडिता । यथा विभक्तः आत्मा रोचते तथा सर्वेऽपि राजानः सश्रीकाः आसन् इति वाक्यार्थः ।।६।।

७. तेषां महार्हासनेति ।

स एक रघुसूनुः रघुपुत्रः धाम्ना तेजसा तेषां राज्ञां मध्ये रराज शुशुभे । किंभूतानां तेषाम् ! महार्हासनसंश्रियाणां, महार्हेषु आसनेषु आश्रयः अवस्थानं येषां ते तेषाम् । पुनः किंभूतानां तेषाम् ? उदारनेपथ्यभृतां, उदारं उद्भटं नेपथ्यं वैवाहिकवेषं विभूतिं धारयन्तीति, तेषाम् । तेषां मध्ये क इव ? कल्पद्रुमाणां पारिजात इव यथा कल्पद्रुमाणां मध्ये एकः पारिजातो राजते ।।७।।

८. नेत्रव्रजाः[इति] ।

पौरजनस्य नागरिकलोकस्य नेत्रव्रजा नयनसमूहाः सर्वान् नृपतीन् विहाय परित्यज्य तस्मिन् अजे निपेतुर्निपतिताः । के कस्मिन्निव ? द्विरेफाः भ्रमराः मदोत्कटे वन्ये गन्धद्विपे इव । कथंभूता द्विरेफाः ? रेचितपुष्पवृक्षाः रेचितास्त्यक्ताः पुष्पवृक्षा यैस्ते तथा ।।८।।

९–१०. अथ स्तुते बन्दि[भिरिति] ।[1] [मनुष्यवाह्यमिति]

अथानन्तरं पतिंवरा स कन्या मञ्चान्तरराजमार्गं विवेश अविशत् । मञ्चाना-मन्तरे मध्ये राजमार्गो यः सः, तं प्र(प्रा)विशत् । किं कृत्वा ? मनुवाह्यं सुखासनं चतुरङ्ग(स्र यानमध्यास्यारुह्य । कथंभूतं चतुरङ्ग(स्र)यानम् ? परिवारशोभि कन्यापरिवारशोभनम् । किं [भूता] कन्या ? कृत (क्लृप्त)विवाहवेषा रचितविवाहनेपथ्या । कस्मिन्सति ? अन्वयज्ञैः कुलवेदभिः बन्दिभिः मागधे सोमार्कवंश्ये इन्दुरविकुलजे नर-

---

1 Jina VI 9, 10 = Malli. VI. 8, 10.

देवकुलजे नरदेवलोके स्तुते अभिनु(स्तु)ते सति । पुनः कस्मिन्सति ? अगुरुसारयोनौ अगुरुसारात् योनिरुत्पत्तिर्यस्य संचारिते निक्षिप्ते धूपे वैजयन्तीः पताकाः समुत्सर्पति सति ॥९/१०॥

११. [पुरोपकण्ठेति ।]

पुनः कस्मिन्सति ? परितो समन्तात् दिगन्तान् दिग्भागान् तूर्यस्वने ढक्कबुक्कादि शब्दे मूर्च्छति प्रसरति सति । कथंभूते तूर्यस्वने ? प्रध्मातशङ्खे पूरितशङ्खे । पुनः कथंभूते तूर्यस्वने ? मङ्गलार्थे । पुनः कथंभूते तूर्यस्वने ? पुरोपकण्ठोपवनश्रयाणां नगरनिकटोद्यानवासिनां शिखण्डिनां मयूराणां उन्मदनृत(त्य)हेतौ ताण्डवनिदाने ॥११॥ त्रिभिर्विशेषकम् ॥

१२. तस्मिन्विधाना० ।

तस्मिन्निति नरेन्द्राः नृपाः तस्मिन् कन्यामये कन्यारूपे विधातुः ब्रह्मणः विधानातिशये निर्माणातिशये अंतःकरणैर्मनोभिः निपेतुः अपतन् । कथंभूते विधानातिशये ? नेत्रशतैकलक्षे(क्ष्ये) {सख्यये} केवलं देहैः शरीरमात्रेण आसनेषु स्थिताः दर्शनमात्रेण तेषां ममोखेति[1] (?) वाक्यार्थः ॥१२॥

१३. तां प्रत्यभि० ।

महीपतीनां राज्ञां श्रृङ्गारचेष्टाः विविधा बभूव अभुवन् । कथंभूतानां महीपतीनाम् ? तां प्रति अभिव्यक्तमनोरथानां प्रकटमनोरथानाम् । कथंभूताः श्रृङ्गारचेष्टाः ? प्रणयाग्रदूत्यः प्रणयस्य प्रेम्णः अग्रदूत्यः । केषां का इव ? पादपानां प्रवालशोभा इव ॥१३॥

१४. कश्चित्क० ।

कश्चिद्युवा कराभ्यां लीलारविन्दं भ्रमयांचकार भ्रमयामास । कथंभूतं लीलारविन्दम् ? उपगूढनालं, आश्लिष्टनालम् । पुनः कथंभूतम् ? आलोलपत्राभिहत[द्वि]रेफं, चटुल[पत्र]-ताडितभ्रमरम् । पुनः कथंभूतम् ? रजोभिः केसररेणुभिः अन्तःपरिवेषबन्धि, अन्तः मध्ये परिवेषं मण्डलं बध्नाति ॥१४॥

१५. विस्रस्त० ।

अपरः विलासी प्रावारं उत्तरीवस्त्रं उत्कृष्य उद्धृत्य यथावकाशं यथाप्रदेशं स्वस्थानं निनाय अनैषीत् । किंभूतः अपरः ? साचीकृतचारुवक्त्रः, साचीकृतं चारु-मनोहरं वक्त्रं येन सः । किंभूतं प्रावारम् ? अंसात् स्कन्धात् विस्(स्र)स्तं पतितम् । पुनः किंभूतं प्रावारम् ? रत्नानुविद्धाङ्गदकोटिलग्नं, रत्नजडितकेयूराग्रलग्नम् ॥१५॥

---

1. Not clear.

१६. आकुञ्चिताग्रां० ।

ततः अन्यः युवा पादेन हैमं सौवर्णपीठं विलिलेखालिखत् । किंभूतः अन्यः ? किञ्चित्समावर्जितनेत्रशोभः किञ्चित्समावर्जिता अधःपापिता किंचिच्च इन्दुमत्यां निहिता नेत्रशोभा येनासौ । किंभूतेन पादेन ? आकुञ्चिताग्राङ्गुलिना, आकुञ्चिता कुटिलीकृता अग्राङ्गल्यो यस्य, तेन । पुनः किंभूतेन ? तिर्यक् विसंसर्पिनखप्रभेण, तिर्यक् विसंसर्पती नखप्रभा प्रसरन्ती यस्य स तेन ॥१६॥

१७. निवेश्य वामं[इति] ।

कश्चिद्युवा सुहृत्समाभाषणतत्परः अभूत्, सुहृदा समं मित्रेण सह यत् आभाषणं तत्र तत्परस्तन्निष्ठः । किं कृत्वा ? वामं भुजं आसनान्ते आसनसमीपे निवेश्य नियोज्य । किंभूतः कश्चिद्युवा ? अधिकोन्नतांसः, अधिकं उन्नतौ उच्चावंसौ स्कन्धौ यस्य सः । कस्मात् ? तत्संनिवेशात् वामभुजसंयोजनात् । पुनः किंभूतोऽन्यः युवा ? ॥१७॥

१८. [विलासिनीति ।]

नखाग्रैः केतकपत्रं विपाटयामास अपाटयत् । किंभूतैः नखाग्रैः ? प्रियानितम्बे उचितः योग्यः सन्निवेशः प्रसंसे(?) विपाटनं येषां ते तैः । किंभूतं केतकपत्रम् ? आपाण्डुरं प्रकृतिधवलम् । पुनः किंभूतम् ? विलासिनीविभ्रमदन्तपत्रं, विलासिनीनां विभ्रमार्थं विलासार्थं दन्तपत्रं कर्णाभरणम् ॥ १८॥

१९. कुशेशया० ।

कश्चित् युवा करेण सलीलं यथा भवति तथा अक्षान् पास(श)कान् उदीरयामास पातयामास । किंभूतेन करेण ? कुशेशयाताम्रतलेन कुशेशयं रक्तोत्पलं तद्वदाताम्रं तलं यस्य स तेन । पुनः किंभूतेन ले(रे)खाध्वजलाञ्छनेन । किंभूतान् अक्षान् ? रत्नाङ्गुलीय-प्रभया उदाररत्नकान्त्या अनुविद्धान् विच्छुरितान् ॥१९॥

२०. [कश्चिद्यथा० ।]

कश्चिद्युवा एकं करं किरीटे मुकुटे व्यापारयामास योजयामास । किरीटे कस्मिन्निव ? स्वसंनिवेशाद्व्यतिलङ्घिनीव, स्वसंनिवेषः स्थानं, अतिलङ्घति अतिक्रामत्ये-वंशीलो[किरीटः]तस्मिन् निजस्थानातिक्रामिणि । पुनः किंभूते किरीटे ? यथाभागमवस्थिते [ऽ]पि स्वस्थानेऽपि । किंविशिष्टं करम् ? वज्रांशुगर्भाङ्गुलिरन्ध्रं वज्राणां हीरकाणां अंशुगर्भाणि किरणयुक्तानि अङ्गुलीनां रंध्राणि यस्य स, तम् ॥२०॥

२१. ततो नृपाणां[इति] ।

ततस्तदनन्तरं प्रतिहाररक्षी प्रतिहारी सुनन्दा कुमारीं इन्दुमतीं अवदत् बभाषे । किं कृत्वा ? प्राक् पूर्वं मगधेश्वरस्य सन्निकर्षं समीपं नीत्वा उपनीय । कथंभूता सुनन्दा ? नृपाणां राज्ञां श्रुतवृत्तवंशा आकर्णितशीलकुला । पुनः किंभूता ? पुंवत्प्रगल्भा पुरुषवत् चतुरा ॥२१॥

२२. असौ शरण्यः० ।

हे इन्दुमति । असौ परंतपो नाम राजा वर्तते । किंभूतः परंतपः ? शरणोन्मुखानां शरणागतानां शरण्यः त्राता । पुनः किंभूतः ? अगाधसत्त्वः महासत्त्वः । पुनः किंभूतः ? मग[ध]प्रतिष्ठः मगधेषु देशेषु प्रतिष्ठा पट्टाभिषेको यस्य सः । पुनः किंभूतः ? प्रजारञ्जनलब्धवर्णः प्रजारञ्जनेन लब्धः वर्णो यशो येन सः, अथवा प्रजारञ्जनेन लब्धवर्णः पण्डितः । पुनः किंभूतः ? यथार्थनामा, परान् शत्रून् तापयतीति परंतपः ॥२२॥

२३. कामं नृपाः० ।

कामं अतिशयेन सहस्रसंख्याः अनन्ता नृपाः सन्ति । अनेन राज्ञा परंतपेन भूमिं राजवन्तीं आहुः कथयन्ति । राजन्वान्सौराज्ये इत्यनेन राजत्वं, स इति निपातः, प्रकृष्ट-राजयुक्ताम् । रात्रिः नक्षत्रताराग्रहसङ्कुलाऽपि चन्द्रमसैव चन्द्रेणैव ज्योतिष्मती{तेजो} ज्योत्स्नावती वर्तते ॥२३॥

२४. क्रियाप्रबन्धा० ।

अयं परंतपो राजा चिरं चिरकालपर्यन्तं शच्याः इन्द्राण्याः अलकान् ललाटकेशान् पाण्डुकपोललम्बान् चकार । किंभूतान् अलकान् ? मन्दारशून्यान् मन्दारकुसुमरहितान् । किंभूतः अयम् ? अध्वराणां यज्ञानां क्रियाप्रबन्धात् क्रियानुष्ठानात् अजस्रं निरन्तरं आहूतः सहस्रनेत्रः आकारितः सहस्रनेत्रः शक्रो येन सः ॥२४॥

२५. अनेन चेदिच्छसि० ।

हे इन्दुमति ! चेद्यदि त्वं अनेन परंतपेन पाणिं हस्तं गृह्यमाणं इच्छसि । किंभूतेन अनेन ? वरेण्येन श्रेष्ठेन । हे इन्दुमति ! प्रवेशे प्रवेशावसरे पुष्पपुराङ्गनानां प्रासादवातायनसंश्रितानां प्रासादानां धवलगृहाणां वातायनेषु गवाक्षेषु संश्रिताः यास्तासां, प्रासादवातायनसंश्रितानाम् ॥२५॥

२६. एवं तयोक्ते[इति] ।

तन्वी इन्दुमती अभाषमाणा अब्रुवाणा सती ऋजुप्रणामक्रिययैव, ऋज्वा स्पष्टया निर्विलासया प्रणामरचनया एव एनं परंतपं प्रत्यादिदेश, तत्याज । कस्मिन्सति ? एवं

प्रकारेण तया सुनन्दया उक्ते सति, कथिते सति । किं कृत्वा ? तं परंतपं अवलोक्य, आलोक्य । किंभूता तन्वी ? विस्रंसिदूर्वाङ्कमधूकमाला विस्रंसिनी चलन्ती सदूर्वाङ्का मधूककुसुममाला यस्याः सा ॥२६॥

२७. तां साधवे(सैव)० ।

सा सुनन्दा एवं निश्चितं वेत्रग्रहणे नियुक्ता अधिकृता सुवर्णदण्डग्रहणाधिकारिणी प्रतीहारी तां राजसुतां इन्दुमतीं राजान्तरं निनाय अनैषीत् । का कां कमिव ? समीरणोत्था समीरणात् वातात् उत्थानं यस्यास्तरङ्गलेखा मानसराजहंसीं मानसस्य मानसरोवरस्य राजहंसीं पद्मान्तरमिव । यथा तरङ्गलेखा मानसराजहंसीं पद्मान्तरं कमलान्तरं नयति ॥२७॥

२८. जगाद चैनां० ।

सा सुनन्दा एनां इन्दुमतीं जगाद, बभाषे । च पुनः किलेत्यागमे । अयमङ्गनाथः भूमिगतोऽपि स नृपेन्द्रपदं महेन्द्रपदं भुङ्क्ते अनुभवति । किंभूतः अङ्गनाथः ? सुराङ्गनाप्रार्थितयौवनश्रीः । दिवा(व्या)ङ्गनाभिः अभिलखि(षि)ता यौवनश्रीर्यस्यासौ । पुनः किंभूतः ? सत्रकारैः याज्ञिकैः विनीतभागः, विनीतो दत्तो यस्य भागो यस्मै वास[व]-कल्पितयज्ञभागः ॥२८॥

२९. अनेनेति ।

हे इन्दुमति ! अनेन अङ्गनाथेन शत्रुविलास(सि)नीनां अरिस्त्रीणां स्तनेषु उन्मुच्यते आकृष्यते अनेनेति, उन्मुच्य, {स चासौ सूत्रश्रुतेन (?)} एके इति ब्रुवते, उन्मुच्य उत्थाप्य सूत्रेण विनैव हाराः प्रत्यर्पिताः प्रतीपं दत्ताः । किंभूतेन अनेन ? अश्रुबिन्दून् पर्यासयता । किंभूतान् अश्रुबिन्दून् ? मुक्ताफलस्थूलतमान् ॥२९ ॥

३०. निसर्गभिन्ना० ।

हे इन्दुमती ! अस्मिन् अङ्गनाथे द्वयं एकसंस्थं सहस्थितं वर्तते । कया ? कान्त्या दीप्त्या श्रीश्च सूनृतया प्रियसत्यया गिरा सरस्वती च । पुनः हे कल्याणि ! लक्ष्मीसरस्वत्योर्मध्ये तृतीया त्वमेव योग्या भव । किंभूतं द्वयम् ? निसर्गभिन्नास्पदं निसर्गेण स्वभावेन भिन्नं पृथग्भूतं आस्पदं स्थानं यस्य तद् ॥३०॥

३१. अथाङ्गराजा० ।

अथ अथानन्तर कुमारी इन्दुमती यान्यान् वाहनधूर्यान् इति अवदत्, इतीति क्रियान्तं व्रजत । किं कृत्वा ? अङ्गराजात् अङ्गेश्वरात् चक्षुः अवतार्य उतार्य[1] ।

1 'उतार्य' = 'ઉતારીને', a Gujarati usage.

असौ काम्यो, न न मनोज्ञः, अपि तु मनोज्ञ एव, च पुनः सा इन्दुमती सम्यक् दृष्टुं सम्यक् अवलोकयितुं न वेद न जानाति[इति न]। हि निश्चितं लोकः भिन्नरुचिर्भवति ॥३१॥

३२. ततः परं० ।

ततस्तदनन्तरं प्रतिहारभूमौ नियुक्ता सुनन्दा इन्दुमत्यै परं अन्यं नृपं निदर्शयामास अदर्शयत्, अथवा वर्णयामास। किंभूतं अन्यं नृपम् ? द्विषद्भिः शत्रुभिः दुःप्रसह्यं दुर्जयम्। पुनः किंभूतम् ? विशेषदृश्यं विशेषरम्यम्। कमिव विशेषदृश्यम् ? नवोत्थानं नवोदितं इन्दुं चन्द्रमिव ॥३२॥

३३. अवन्तीनाथः० ।

अयं अवंतीनाथः विभाति। क इव ? उष्णतेजाः मार्तंड इव। किंविशिष्टः उष्णतेजाः ? त्वष्ट्रा विश्वकर्मणा यंत्रोल्लिखितः सा(शा)णोल्लीढः। किं कृत्वा ? चक्रभ्रमं चक्ररूपं चक्रभूमं (भुवं ?)आरोप्य। किंभूतः अवन्तीनाथः ? उदग्रबाहुः उन्नतभुजः। पुनः किंभूतः ? विशालवक्षाः विस्तीर्णवक्षस्थलः। पुनः किंभूतः ? तनुवृत्य(त्त)मध्यः तनुं कृशं वृत्तं परिमण्डलं मध्यं उदरं यस्यासौ ॥३३॥

३४. अस्य प्र० ।

अस्य अवन्तीनाथस्य प्रयाणेषु रजांसि रेणवः सामन्तशिखामणीनां मण्डलेश्वरचूडामणीनां प्रभाप्ररोहास्तमयं तेजाङ्कुरविनाशं कुर्वन्ति। किंभूतस्य अस्य ? समग्रशक्तेः प्रभु–उत्साह–मंत्रत्रययुक्तस्य। किंभूतानि रजांसि ? वाजिभिः अश्वैः उद्धृतानि उत्थापितानि। किंविशिष्टैः वाजिभिः ? अग्रेसरैः पुरोयायिभिः ॥३४॥

३५. असौ महा० ।

असौ अवन्तीशः प्रियाभिः वल्लाभाभिः सह तमिस्रपक्षेऽपि अंधकारपक्षेऽपि ज्योतिष्मतः ज्योत्स्नावतः प्रदोषान् समयान् निर्विशति भुङ्क्ते। किं कुर्वन् ? किलेत्याभिमुख्ये चन्द्रमौलेः ईश्वरस्य अदूरे वसन्। किंभूतस्य चन्द्रमौलेः ? महाकालनिकेतनस्य महाकालं बलं(महाकालस्य स्थानं ?) निकेतनं यस्य सः तस्य ॥३५॥

३६. अनेन यूना ।

हे रंभोरु। इन्दुमति। रंभाया इव जङ्घे यस्यास्तस्याः संबोधनं क्रियते, हे रंभोरु, कदलीस्तंभोरु, कच्चित् इष्टप्रश्ने, अनेन अवन्तीनाथेन पार्थिवेन राज्ञा सह उद्यानपरम्परासु वनश्रेणिषु विहर्तुं क्रीडितुं, ते तव मनसः रुचिः अभिलाषेति। किंभूतासु उद्यानपरम्परासु ? सिप्रातरङ्गानिलकम्पितासु सिप्रासरित्कल्लोलवातनर्तितासु ॥३६॥

३७. तस्मिन्नभि० ।

सा उत्तमसौकुमार्या, उत्तमं सौकुमार्यं यस्याः सा, तस्मिन् अवन्तिनाथे भावं अभिप्रायं न बबन्ध नाकार्षीत् । का कस्मिन्निव ? कुमुद्वती कुमुदिनी भानुमति सूर्ये इव । भानवः किरणा विद्यन्ते यस्यासौ भानुमान् तस्मिन् भानुमति । यथा कुमुद्वती कैरविणी भानुमति भावं न बध्नाति । किंविशिष्टे तस्मिन् ? अभिद्योतितबन्धुपद्मे, अभिद्योतितानि विकासितानि बन्धुपद्मानि स्वजनकमलानि येन स तस्मिन् । पुनः किंविशिष्टे ? प्रतापसंशोषितशत्रुपङ्के । प्रतापेन संशोषितः शत्रुः एवं पङ्कः येन सः, तस्मिन् । ॥३७॥

३८. ताम० ।

तामग्रतः सुनन्दा भूयः पुनरपि तां सुदन्तीं इन्दुमतीं, शोभना दन्ती यस्याः सा तां जगाद । किं कृत्वा ? अनूपराजस्य अनूपाख्यो जनपदस्तत्प्रभोः प्रतीपनाम्नः अग्रतः विधाय कृत्वा । किंभूतां सुदन्तीम् ? तामरसान्तराभाम् । तामरसस्य कमलस्य अन्तरा कर्णिका तद्वत् आभा वर्णो यस्याः सा ताम् । पुनः किंभूताम् ? गुणैर्विनयलावण्यादिभिः अनूनां संपूर्णाम् । पुनः किंभूताम् ? विधातुः ब्रह्मणः ललितां रम्यां सृष्टिं निर्माणम् ॥३८॥

३९. सङ्ग्राम० ।

किलेत्यागमे । कार्तवीर्यः नृपः योगी बभूव । कथंभूतः कार्तवीर्यः ? संग्रामनिर्विष्टसहस्रबाहुः । संग्रामे निर्विष्टाः स्वस्थिताः श्रमरहिताः सहस्रबाहवो यस्य सः । संग्रामे निर्विष्टा उपपन्ना सहस्रबाहवो यस्यासौ । पुनः कथंभूतः ? अष्टादशद्वीपनिखा[त]यूपः । अष्टादशद्वीपेषु निखाताः रोपिताः यूपा येनासौ । पुनः किंभूतः ? अनन्यसाधारणराजशब्दः ॥३९॥

४०. अकार्यचिन्ता० ।

यः राजा विनेता शिष्य(क्ष)कः सहस्रार्जुनः प्रजानां लोकानां अन्तःशरीरेष्वपि अविनयं दुर्विनीतत्वं प्रत्यादिदेश निराचक्रे । किं कुर्वन् ? अकार्यचिन्तासमकालमेव अकार्यस्य चिन्तायाः समकालं तत्कालं यत्तत् अकृत्यचिन्तासमकालं चापधरः पुरस्तात् अग्रे प्रादुर्भवन् प्रकटीभवन् ॥४०॥

४१. ज्याबंध० ।

लङ्केश्वरेण रावणेन यस्य सहस्रार्जुनस्य कारागृहे आप्रसादात् प्रसादं यावत् उषितं स्थितम् । किंभूतेन लङ्केश्वरेण ? ज्याबन्धनिष्पन्दभुजेन ज्याबन्धनेन प्रत्यञ्चाबन्धनेन निष्पन्दाः निश्चलाः भुजा यस्य सस्तेन । पुनः किंभूतेन लङ्केश्वरेण ? विनिःश्वसद्वक्त्रपरम्परेण,

विनिःश्वसन्ती उच्छ्वसन्ती { वक्त्रपरम्परेण विनिःश्वसन्ती उच्छ्वसन्ती } वक्त्रपरम्परा यस्य सः तेन ॥४१॥

४२. तस्यान्वये० ।

तस्य सहस्रार्जुनस्य अन्वये वंशे एष प्रतीप इति भूपतिर्जातः उत्पन्नः । येन राज्ञा श्रियो लक्ष्म्याः स्वभावलोला प्रकृतिचपला इति अयशः प्रमृष्टं मार्जितम् । किंभूतं अयशः ? संश्रयदोषरूढं संश्रयदोषात् आश्रयदोषात् प्रसिद्धम् । किंभूतः प्रतीपः ? आगमवृद्धसेवी आगमवृद्धान् बहुशास्त्रज्ञातान् सेवते इत्येवंशीलो यः सः ॥४२॥ त्रिभिर्विशेषकम् ॥४२॥

४३. अजो(आयो)धने० ।

यः प्रतीपो राजा आयोधने संग्रामे रामपरश्वायुधस्य परशुरामकुठारस्य शीतां तीक्ष्णां धारां उत्पलपत्रसारां कुवलयकोमलावयवां संभाव[य]ति जानाति । किं कृत्वा ? कृष्णं असि खड्गं अवाप्य प्राप्य । किंभूतं असिम् ? क्षत्रियकालरात्रि, क्षत्रियनाशकरणशीलम् । धारायाः विशेषणं क्रियते वा । क्षत्रियकालरात्रिं राजन्यनाशकरणशीलां पर्यायः । एकं-(वं) वदन्ति–कृष्णगतिं वैश्वानरं अवाप्य तं न वाच्यम् । अयमर्थः । न संयाघटीमि (संघट्टयामि ।) ॥४३॥

४४. अस्याङ्क० ।

हे इन्दुमति ! अस्य प्रतीपस्य अङ्कलक्ष्मीः उत्सङ्गश्रीर्भार्यत्वात् भव । किम्भूत-स्यास्य ? दीर्घबाहोः महाभुजस्य । यदि प्रासादजालैः सौधगवाक्षविवरैः रेवां नर्मदां प्रेक्षितुं अवलोकयितुं कामः अभिलाषोऽस्ति । किंभूतां रेवाम् ? जलवेणिरम्याम् । जलवेण्या जलप्रवाहेण रम्या मनोहरा या सा, ताम् । पुनः किंभूतां रेवाम् ? माहिष्म-तीवप्रनितम्बकाञ्ची माहिष्मतीनगरीवप्रं प्राकारस्तदेव नितम्बः कटीप्रदेशस्तत्र काञ्चीं मेखलां; परिवेष्ट्य स्थितत्वात् ॥४४॥

४५. तस्याः प्रका० ।

स क्षितीशः प्रतीपः प्रकामं अतिशयेन तस्याः इन्दुमत्याः रुचये प्रीत्यै न बभूव न अभूत् । कस्याः क इव ? नलिन्याः कमलिन्याः शशी चन्द्र इव । किंभूतः शशी ? पर्याप्तकालः । यथा शशी पर्याप्तकालः सन् नलिन्याः कमलिन्याः रुचये प्रीत्यै न भवति । पुनः कथंभूतः शशी ? शरत्प्रमृष्टांबुधरोपरोधः शरदा ऋतुना प्रमृष्टो आ[व]-र्जितः अम्बुधराणां मेघानां उपरोधो मालिन्यं यस्य सः । किंभूतो[ऽ]पि प्रतीपः ? प्रियदर्शनो[ऽ]पि मनोरमो[ऽ]पि ॥४५॥

४६. सा शूरसेना० ।

शुद्धान्तरक्षा(क्ष्या) प्रतीहार्या सुनन्दया सा कुमारी जगदे बभाषे । किं कृत्वा ? सुषेणं राजानं उद्दिश्य लक्ष्मी(क्ष्यी)कृत्य । किंभूतं सुषेणम् ? शूरसेनाधिपतिम् । पुनः कथंभूतम् ? देशान्तरगीतकीर्तिम् । पुनः कथंभूतम् ? आचारशुद्धोभयवंशदीपम् । आचारेण शुद्धः उभयवंशस्य दीपो यः सस्तम् ॥४६॥

४७. नीपान्वय० ।

एष नीपान्वयः कदम्बकुलजः पार्थिवः राजा वर्तते । किंविशिष्टः पार्थिवः ? यज्वा याज्ञिकः । गुणैः क्षमासौ(शौ)र्यादिभिः यं राजानं आश्रित्य प्राप्य परस्परेण अन्योन्यं नैसर्गिकोऽपि स्वाभाविकोऽपि विरोधः उत्ससृजे तत्यजे । कमेत्य कैरिव ? शान्तं सिद्धाश्रमं एत्य प्राप्य सत्त्वैरिव । यथा सत्त्वैः दुष्टजीवैः शान्तं सिद्धाश्रमं एत्य नैसर्गिकोऽपि विरोधः उत्सृज्यते त्यज्यते ॥४७॥

४८. यस्यात्म० ।

यस्य राज्ञः आत्मदेहे शरीरे कान्तिः शोभा सन्निविष्टा स्थिता वर्तते । कस्येव ? चन्द्रस्येव तेजः प्रतापम् । रिपुमन्द(न्दि)रेषु अरिवेश्मसु अविषह्यं दुस्सहं जातम् । किंभूतेषु रिपुमन्द(न्दि)रेषु ? हर्म्याग्रसंरूढतृणाङ्कुरेषु सौधसि(शि)खरसंजातशष्पप्ररोहेषु॥५८॥

४९. यस्यावरोध० ।

यस्य राज्ञः वारिविहारकाले जलकेलिसमये अवरोधस्तनचन्दनानां अन्तःपुरपयोधर-श्रीखण्डानां प्रक्षालनात् कलिन्दकन्या यमुना मथुरां नगरीं गताऽपि प्राप्ताऽपि गङ्गोर्मि-संपृक्तजलेव गङ्गाकल्लोलमिलितजलेव भाति शोभते ॥४९॥

५०. त्रस्तेन ता० ।

किल निश्चितम् । यः राजा सकौस्तुभं कृष्णं ह्रेपयतीव लज्जयतीव । । कथंभूतः स राजा ? रत्नमणिं दधानः धारयन् । किंभूतं मणिम् ? वक्षःस्थलव्यापिरुचं वक्षःस्थले व्यापिता रुक् कान्तिर्यस्य सस्तम् । पुनः किंभूतं मणिम् ? कालियेन नागेन प्रदिष्टं दत्तम् । किंभूतेन कालियेन ? यमुनौकसा यमुनाभवनवासिना । पुनः किंभूतेन ? तार्क्ष्यात् गरुडात् त्रस्तेन रक्षितेन ॥५०॥

५१. सम्भाव्य० ।

हे सुन्दरि ! इन्दुमति ! वृन्दानवे(वने) अमुं सुषेणं भर्तारं पतिं संभाव्य प्राप्य यौवनश्रीः तारुन्य(ण्य)लक्ष्मीः निर्विश्यतां उपभुज्यताम् । किंभूतं अमुम् ? युवानं तरुणम् ।

किंभूते वृन्दावने ? मृदुप्रवालोत्त[र]पुष्पशय्ये मृदुप्रवालोत्तरकोमला किलश(शल)याधिका पुष्पशय्या यत्र तस्मिन् ।।५१।।

५२. अध्यास्य० ।

हे इन्दुमति ! प्रावृषकाले कान्तासु रमणीयासु गोवर्धनकन्दरासु गोवर्धनाद्रिगुहासु कलापिनां मयूराणां वृत्तं ताण्डवत्वं पश्य ईक्षस्व । किं कृत्वा ? शिलातलानि अध्यास्य आस्र(श्रि)त्य । किंभूतानि शिलातलानि ? अम्भःपृषतो क्षितानि जलकणसंशि(सि)क्तानि । पुनः किंभूतानि ? शैलेयनद्धानि, शिलाकुसुमव्याप्तानि अथवा शैलेयं शिलाजित् तेन नद्धानि व्याप्तानि ।।५२।।

५३. नृपं० ।

सा इन्दुमती नृपं व्यत्यगात् अतिचक्राम । का कमिव ? यथा सागरगामिनी स्त्रोतोवहा नदी मार्गवशात् उपेतं प्राप्तं महीधरं व्यतेति व्यतिक्रामति । किंभूता सा इन्दुमती ? आवर्तमनोज्ञनाभिः आवर्तवन्मनोज्ञा गभीरा नाभिर्यस्याः सा । पुनः किंभूता ? अन्यवधूभ(र्भ)वित्री अन्यभार्या भविष्यन्ती ।।५३।।

५४. अथाङ्ग० ।

अथ अथानन्तरम् । भुजिष्या प्रतीहारी सुनन्दा बालां इन्दुमतीं बभाषे । कथंभूतां बालाम् ? हेमाङ्गदं नाम कलिङ्गनाथं आसेदुषीं प्राप्तवतीम् । किंभूतं हेमाङ्गदम् ? अङ्गदश्लि(क्लि)ष्टभुजं अङ्गदैः केयूरैः क्लिष्टौ भुजौ यस्य तम् । पुनः किंभूतम् ? सादितशत्रुपक्षं क्षपितरिपुवर्गम् । किंभूतां बालाम् ? अब्रालेन्दुमुखीं पूर्णचन्द्रवदनाम् ।।५४।।

५५. असौ महेन्द्रा० ।

असौ राजा महेन्द्रस्य पर्वतस्य महोदधेश्च समुद्रस्य पतिः स्वामी वर्तते । किंभूतः असौ राजा ? महेन्द्राद्रिसमानसारः महेन्द्राद्रितुल्यबलः । यस्य राज्ञः क्षरत्सैन्यगजच्छलेन क्षरन्तो मदाम्बुस्त्राविणो ये सैन्यगजाः तेषां छलेन तद्व्याजेन प्रयाणेसु परः अग्रे महेन्द्रः यातीव गच्छतीव ।।५५।।

५६. ज्याघातले(रे)खे० ।

यः राजा भुजाभ्यां हस्ताभ्यां ज्याघातले(रे)खे प्रत्यञ्चाप्रहारनिकषौ–एतेन उभय-हस्तचातुर्यकथनं—विभर्ति धारयति । ज्याघातले(रे)खे क इव ? बन्दीकृतानां रिपुश्रियां रिपुलक्ष्मीणां साञ्जनो बाष्पसेकः, साञ्जनः अञ्जकसहितः बाष्पसेको ययोस्ते द्वे पद्धतीव मार्गद्वयमिव । किंभूतः ? यः राजा सुभुजः सुबाहुः । पुनः किंभूतः ? चापभृतां धनुर्धराणां मध्ये पुरोगः आद्यः ।।५६।।

५७. यथा(मा)त्मनः० ।

अर्णवः समुद्रः यं राजानं प्रबोधयति जागरयति । किंभूतं यं राजानम् ? आत्मनः स्वस्य सद्मनि गृहे सुप्तं शयितम् । पुनः किंभूतम् ? मन्द्रध्वनित्याजितयामतूर्यं, मन्द्रेण मधुरेण ध्वनिना{गः} [त्याजितं यामस्य तूर्यं येन] ॥५७॥

५८. अनेन सार्द्धम्० ।

हे इन्दुमति ! अनेन राज्ञा सार्द्धं अम्बुराशेः समुद्रस्य तीरेषु तटेषु त्वं विहर क्रीड । किंभूतेषु तटेषु ? तालीवनमर्मरेषु ध्वनिविशेषयुक्तेषु । कथंभूता त्वम् ? मरुद्भिः वातैः अपाकृतस्वेदलवा । किंभूतैः मरुद्भिः ? द्वीपान्तरानीतलवङ्गपुष्पैः । द्वीपान्तरादानीतानि लवङ्गपुष्पाणि यैः वातैः ॥५८॥

५९. प्रलोभिता० ।

विदर्भराजावरजा इन्दुमती तस्मात् नृपात् अपावर्तते व्यावर्तते । किंभूता राजावरजा ? तया सुनन्दया एवमपि प्रलोभिता विप्रतारिता । पुनः किंभूता ? आकृतिलोभनीया आकृत्या रूपेण प्रतारणीया स्वसौन्दर्येण जनचित्तहारिणी । सा केव ? प्रतिकूलदैवाद्विपरीतविधेः नीत्या न्यायेन दूराकृष्टा दूरानीता लक्ष्मीरिव । यथा लक्ष्मीर्न्यायेन दूराकृष्टा सती प्रतिकूलदैवात् व्यावर्तते ॥५९॥

६०. अथोरगा० ।

अथ अथानन्तरम् । दौवार(रि)की भोज्यां इन्दुमतीं इति जगाद । इतीति किम् ? हे चकोराक्षि ! चकोराख्यपक्षीतुल्ये रक्तत्वादक्षिणी यस्याः सा चकोराक्षी । तस्याः संबोधनं क्रियते, हे चकोराक्षि ! इतः विलोक्य पश्य । किं कृत्वा ? उरगाख्यस्य नागपुरस्य नाथं एत्य आगत्य । किंभूतं उरगाख्यस्य नाथम् ? देवसमानम् । किंभूतां भोज्याम् ? पूर्वानू(नु)शिष्टां प्राक् शिक्षिताम् ॥६०॥

६१. पाण्ड्यो[ऽ]यमंसा० ।

अयं पाण्ड्यः पाण्ड्याख्यो राजा आभाति । क इव ? बालातपरक्तसानुः । बालातपो(प)लोहितशिखरः सनिर्झरोद्गारः सनिर्झरप्रवाहेण वर्तते सनिर्झरोद्गारः अद्रिराजः इव हिमवानिव । किंभूतः पाण्ड्यः ? अंसार्पितलम्बहारः । अंसयोः स्कन्धोः अर्पितो न्यस्तः लम्बः प्रलम्बः हारो मुक्ताकलापो यस्य सः । पुनः कथंभूतः ? हरिचन्दनेन दिव्यश्रीखण्डेन क्लृप्ताङ्गरागः कृतविलेपनः ॥६१॥

६२. विन्ध्यस्य सं० ।

अगस्त्यः प्रीत्या प्रेम्ला(म्णा) यस्य राज्ञः सौस्नातं कृच्छतीति सौस्नातिको–ह्रीतादे ह्रीकण्[1] भवति वर्तते । किंभूतो अगस्तिः ? निःशेषपीतोज्झितसिन्धुनाथः(राजः) समुद्रो येनासौ । किं तस्य ? यस्य अश्वमेधावभृथार्द्रमूर्तेः अश्वमेधस्नानसरसवपुषः । पुनः किंभूतः ? विंध(ध्य)स्य विन्ध्यनाम्नः [पर्वतस्य] संस्तम्भयिता । किंभूतस्य विन्ध(न्ध्य)स्य ? महाद्रेः ॥६२॥

६३. अस्त्रं० ।

लङ्काधिपतिः रावणः पुरा पूर्वम् । जनन्नृपेण(?) पाण्ड्येन सह सन्धाय सन्धि कृत्वा इन्द्रलोकविजयाय स्वर्गलोकजयाय प्रतस्थे चचाल । किंभूतः रावणः ? जनस्थान-विमर्दशङ्की जनस्थानाख्यो दण्डकेषु देशो रावणस्य भुक्तिः । अथवा जनस्थानस्य विमर्दं विनाशं सङ्केत (शङ्कते) इत्येवंशीलो यः सः । पुनः किंभूतो रावणः ? दृप्त-शत्रुजयोद्यतो गर्वितो वा । किंभूतेन येन ? हरात् ईश्वरात् अस्त्रं शस्त्रं यासुपा(पाशुप)-ताख्यं आप्तवता प्राप्तवता । किंभूतं अस्त्रम् ? दुरापं दुर्लभम् ॥६३॥

६४. अनेन पाणौ० ।

हे इन्दुमति ! दक्षिणस्याः दिशः सपत्नी भव । किंभूतायाः दिशः ? रत्नानु-विद्धार्णवमेखलायाः । रत्नैरनुविद्धो युक्तोऽर्णवः समुद्रो मेखला यस्याः सा तस्याः । किंभूता त्वम् ? गुर्वी गरिष्ठा । केव ? महीव । कस्मिन्सति ? तेन नृपेण पाणो(णौ) विधिवत् वेदोक्तप्रकारेण गृहीते सति । किंभूतेन अनेन ? महाकुलीनेन ॥६४॥

६५. ताम्बु(म्बू)लवल्ली० ।

हे इन्दुमति । शश्वत् निरन्तरं मलयस्थलीषु रन्तुं क्रीडितुं प्रसीद संमुखी भव । किंभूतासु मलयस्थलीषु ? ताम्बूलवल्लीपरिणद्धपूगासु ताम्बूलवल्लीभिः नागवल्लीभिः परिणद्धपूगासु, पूगवृक्षा यत्र । पुनः किंभूतासु ? एलालतालिङ्गितचन्दनासु एलालताभिः आलिङ्गिताश्चन्दनवृक्षा यत्र । पुनः किंभूतासु ? तमालपत्रास्तरणासु तमालपत्राणां आस्तरणं शयनं यासु ॥६५॥

६६. इन्दीवर० ।

असौ नृपः इन्दीवरश्यामतनुः कुवलयकान्तिकायः । त्वं गोरोचनागौरशरीरयष्टिः वर्तसे । वां युवयोः संयोगः अन्योन्यशोभापरिवृद्धये इतरेतरकान्तिपरिपोषाय अस्तु भवतु । का(क)योरिव ? तडित्तोयदयोरिव । यथा तडित्तोयदयोः विद्युन्मेघयोर्योगः अन्योन्यपरिशोभापरिवृद्धये भवति ॥६६॥

---

1 Jina. discusses vyākaraṇa.

६७. स्वसुर्विद० ।

तदीयः प्रतीहारीकृतः उपदेशः विदर्भाधिपतेः भोजराजस्य स्वसुः इन्दुमत्याः चेतसि अन्तरं अवकाशं न लेभे न प्राप । कस्मिन् क इव ? अरि(र)विन्दे नक्षत्रनाथांशुरिव । किंभूते अरविन्दे ? दिनकरादर्शनबद्धकोशे । यथा नक्षत्रनाथांशुश्चन्द्रकिरणः अरविन्दे कमले अन्तरं न लभते ॥६७॥

६८. संचारिणी० ।

सा इन्दुमती पतिंवरा यं यं नरेन्द्रं व्यतीयाय अतिक्राम (अतिचक्राम)? स स भूमिपालः विवर्णभावं कान्तिभ्रंशं प्रपेदे । सा इन्दुमती केव ? संचारिणी दीपशिखेव । यथा रात्रौ संचारिणी दीपशिखा यं यं नरेन्द्रमार्गाट्टं हट्टं च्युतेति अतिक्रामति नरेन्द्रमार्गाट्टः विवर्णभावं प्राप्नोति । स स भूमिपालः क इव ? नरेन्द्रमार्गाट्ट इव । अनेन श्लोकेन दीपकालंकारः कथ्यते[1] ॥६८॥

६९. तस्यां रघोः० ।

रघोः सूनुः अजः तस्यां इन्दुमत्यां उपस्थितायां निकटमुपगतायां इति समाकुलो[ऽ]-भूत् । इतीति किम् ? मां वृणीत । अस्य अजस्य वामेतरः दक्षिणबाहुः भुजः केयूर-बन्धोच्छ्वसितैः केयूरबन्धमात्रकम्पैः संशयं सन्देहं नुनोद स्फेटयामास ॥६९॥

७०. तं प्राप्येति० ।

कुमारी इन्दुमती तं अजं प्राप्य अन्योपगमात् राजान्तरसमीपगमनात् व्यावर्तत न्यवर्तत । किंभूतं तम् ? सर्वावयवानवद्यं सर्वावय[व]सुन्दरम् । षट्पदाली सहकारं एत्य प्राप्य वृक्षान्तरं न काङ्क्षति नाभिलषति । मा माऽनन न हि नो न वि(वे)ति विप्रतिषेधे एते अव्ययाः । किंभूतं सहकारम् ? प्रफुल्लं पुष्पितम् ॥७०॥

७१. तस्मिन्स० ।

अनुक्रमज्ञा अनुक्रमं परिपाटीं जानातीति सुनन्दा प्रतीहारी सविस्तरं इं(इ)दं वाक्यं वक्तुं प्रचक्रमे प्रारेभे । किं कृत्वा ? इन्दुमतीं तस्मिन्नजे समावेशितचित्तवृ(वृ)त्तिं बद्धानुरागां अवेत्य ज्ञात्वा । किंभूतां इन्दुमतीम् ? इन्दुप्रभां चन्द्रसमानकान्तिम् ॥७१॥

---

1 Jina. takes note of alamkara.

७२. इक्ष्वाकु० ।

इक्ष्वाकुवंश्यः इक्ष्वाकुकुलजः नृपाणां ककुदं चिह्नं, काकुत्स्थनाम नृपः इति आहितलक्षणः गुणसंपदा[1] विक्षा(ख्या)तः अभूत् बभूव । उत्तरकोशलेन्द्रीः उत्तरकोशलेश्वराः दिलीपादयः यतः यस्मात् काकुत्स्थात् काकुत्स्थ शब्दं दधति धारयति । किंभूतं काकुत्स्थं शब्दम् ? श्लाघ्यं प्रशस्यम् । किंभूताः उत्तरकोशलेद्राः(न्द्राः) । उन्नतेच्छाः विपुलमानसाः ॥७२।

७३. महेन्द्रमास्थाय० ।

यः काकुत्स्थः संयति संग्रामे बाणैः कृत्वा असुराङ्गनानां दैत्यस्त्रीणां गण्डस्थलीः प्रोषितपत्रलेखाः अपगतपत्रलताः चकार, व्यधात् । किं कृत्वा ? महोक्षरूपं वृषभरूपं महेन्द्रं आस्थाय, आरुह्य । किंभूतः काकुत्स्थः ? प्राप्तपिनाकलीलः आपादितहर-शोभः ॥७३॥

७४. ऐरावता० ।

यः काकुत्स्थः गोत्रभिदः इन्द्रस्य अर्द्धासनं अधितस्थौ अध्यतिष्ठत् । किं कुर्वन् ? अङ्गदेन केयूरं संघट्टयन् आकर्षन् । किंभूतं अङ्गदम् ? ऐरावणास्फालनविश्लथं ऐरावणाघातशिथिलम् । किंभूतस्य इन्द्रस्य ? स्वामपि निजामपि अग्र्यां प्रधानां मूर्तिरूपं उपेयुषः प्राप्तवतः ॥७४॥

७५. जातः कुलो(ले)० ।

तस्य काकुत्स्थस्य कुले दिलीपनृपतिर्जातः बभूव । किंभूतस्य तस्य ? ऊरुकीर्तेः प्रथितयशसः । किंभूतः दिलीपः ? कुलदीपः कुलप्रकाशकः । यः दिलीपः शक्राभ्यसूया-विनिवृत्त्यै शतक्रतुकोपप्रशमाय एकोनशतक्रतुत्वे अतिष्ठत् तस्थौ । एकोनं शतक्रतोर्यस्यासौ एको[न]शतक्रतुः । एकोनशतक्रतोर्भावः एकोनशतक्रतुत्वं, तस्मिन् ॥७५॥

७६. यस्मिन्महीं० ।

यस्मिन् दिलीपे महीं पृथ्वीं शासति रक्षति सति । वातोऽपि अनिलोऽपि वाणि(हि)नीनां विहारादर्धपथे उद्यानार्धमार्गे निद्रागतानां प्राप्तानाम् ...[2] ॥७६॥

1 The scribe seems to write 'क्षा' for 'ख्या'.

2 At times Jina. seems fo leave the comm. half way, or the scribe seems to be careless.

७७. पुत्रो रघुस्तस्य० ।

तस्य दिलीपस्य पुत्रो रघुः पदं राज्यं प्रशास्त(स्ति) पालयति । किंभूतो रघुः ? महाक्रतोर्विश्वजितः महायज्ञाश्वमेधस्य प्रयोक्ता{य} यष्टा य रघुर्मृत्पात्रशेषां मृत्पात्रभाजनावशिष्टां विभूतिं ऋद्धिं अकरोत् चकार । किंभूतां विभूतिम् ? चतुर्दिगावर्जित(र्जन)-संभृतां निखिलाशाविजयार्जितां चतसृभ्यः दिग्भ्यः आवर्जनात् आनयनात् सम्भृता परिपुष्टा या सा ताम् ॥७७॥

७८. आरूढमद्रीन्० ।

यस्य रघोर्यशो अनुबन्धादव(वि)च्छिन्नप्रवाहात् [इ]यत्तया एतावदिति परिमाणे परिच्छेतुं नियमेतुं संख्यां कर्तुं न अलं न पर्याप्तं न समर्थम् । किंभूतं यशः ? ऊर्ध्वं स्वर्लोकं गतं उत्पतितम् । उदधीन् प्रतीर्णम् । पुनः भुजङ्गमानां वसतिं प्रविष्टम् ॥७८॥

७९. असौ कुमारो० ।

असौ कुमारः अजः तं रघुं अनुजातः तस्माद्रघोरुत्पन्नः । किं क इव ? त्रिविष्टपस्य स्वर्गस्य पतिं स्वामिनं जयन्त इव । यथा जयन्तः पुत्रः त्रिविष्टपस्य स्वर्गस्य पतिं अनुलक्षीकृत्य जातः । यः अजः दम्यः वत्सतरः पत्न्या इति पाठः अस्ति । पित्रा इत्यपि भवति द्विपाठः ॥७९॥

८०. कुलेन कान्त्या० ।

हे इन्दुमति ! त्वं आत्मनः स्वस्य तुल्यं सदृशं अमुं अजं वृणीष्व । काञ्चनेन रत्नं समागच्छतु संयुज्यताम् । केन तुल्यम् ? कुलेन तुल्यम् । पुनः कया ? कान्त्या । पुनः केन ? नवेन वयसा । च पुनस्तैर्विनयप्रधानैस्तैस्तैर्गुणैः तुल्यम् ॥८०॥

८१. ततः सुनन्दा० ।

ततस्तदनन्तरं नरेन्द्रकन्या इन्दुमती सुनन्दावचनावसाने(ने) प्रतीहारीवाक्यान्ते लज्जां त्रपां मृद्कन्य (तनूकृत्य ?) ईषद्विहाय दृष्ट्या प्रसादामलया प्रसादेन अमला निर्मला या सा तया वरमाल[या] संवरणस्रजा इव कुमारं प्रत्यग्रहीत् । विशेषणमपि क्रियते॥८१॥

८२. सा यूनि० ।

सा इन्दुमती शालीनतया{स}लज्जया तस्मिन्जने यूनि तरुणे अभिलाषबन्धं रुचिप्रसरं वक्तुं भाषितुं न शशाक न सेहे । स अभिलाषबन्धः रोमाञ्चलक्षे(क्ष्ये)ण रोमाञ्चच्छलेन अरालकेश्याः कुटिलकेश्याः गात्रयष्टिं तनुलतां भित्त्वा निराक्रामत् ॥८२॥

८३. तथागतायां० ।

वेत्रधरा सखी सुनन्दा सख्यां इन्दुमत्यां तथागतायां तामवस्थां{यां} प्राप्तायां परिहासपूर्वं यथा भवति इति बभाषे । इतीति किम् ? हे आर्ये ! अन्यतः अन्यत्र व्रजामः गच्छामः । अथ अथानन्तरं वधू इन्दुमती एनां प्रतीहारीं अभू(सू)याकुटिलं ईर्ष्या-कुटिलं ददर्श ॥८३॥

८४. सा चूर्णगौरं० ।

सा करभोपमोरुः, करभस्य करस्य बहिर्भागस्तेनोपमे ऊरू यस्याः सा, इन्दुमती धात्रीकराभ्यां प्रतीहारीहस्ताभ्यां रघुनन्दनस्य अजस्य कण्ठे गुणं वरमालां यथाप्रदेशं आसञ्जयामास । गुणं कमिव ? मूर्तं मूर्तिमत् अनुरागमिव स्नेहमिव । किंभूतं गुणम् ? चूर्णगौरं कुंकुमाद्रिक्षोदपीतम् ॥८४॥

८५. तया स्रजा० ।

वरेण्यः उत्कृष्टः स अजः तया स्रजा वरमालया कण्ठार्पितबाहुपाशां विदर्भराजा-वरजां इन्दुमतीं अमंस्त अज्ञासीत् । किंभूतया स्रजा ? मङ्गलपुष्पमय्या मङ्गलपुष्पाणि मधूकादीनि प्रकृतानि यस्याः सा मङ्गलपुष्पमयी तया । पुनः किंभूतया स्रजा ? विशाल-वक्षःस्थललम्बया विपुलोरस्तटस्थया ॥८५॥

८६. शशिन० ।

तत्र तस्मिन् स्वयंवरमण्डपे पौराः नागराः नृपाणां श्रवणकटु कर्णशूलकारि इति एकवाक्यं विवव्रुः प्रकटीचक्रुः । किंभूताः पौराः ? समगुणयोगप्रती(प्रीत)यः । समगुणयोः राजेन्दुमत[यो]र्योगेन संबंधेन प्रीतिर्येषां ते तथा । इतीति किम् ? इयं कौमुदी चन्द्रजो–(ज्यो)त्स्ना शशिनं चन्द्रं उपगता प्राप्ता । किंभूतं शशिनम् ? मेघमुक्तं निर्मलम् । जह्नुकन्या जाह्नवी । अनुरूपं योग्यम् । जलनिधिं समुद्रम् । अवतीर्णा प्रविष्टा ॥८६॥

८७. प्रमुदित० ।

तत्क्षितिपतिमण्डलं उषसि सर इव आसीत् । कथंभूतं सरः ? प्रफुल्लपद्मं विकसित-कमलम् । पुनः कथंभूतं कुमुदवनप्रतिपन्ननिद्रम् । कथंभूतं क्षितिपतिमण्डलम् ? एकतः एकस्मिन् प्रमुदितवरपक्षं, प्रमुदितो हर्षितो वरपक्षो या(जा)[1]मातृवर्गो यत्र । पुनः कथं-भूतम् ? अन्यतः अन्यस्मिन् भागे वितानं सङ्कुचितम् ॥८७॥

इति श्रीभट्टारक श्रीजिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रसूरिविरचिते रघुकाव्यान्वयमात्र स्वयंवरप्रदानो नाम षष्ठः सर्गः ॥

---

1 The scribe uses ‘य’ for ‘ज’.

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

सप्तमः सर्गः ।

१. अथोपयं० ।

अथानन्तरं विदर्भनाथः क्रथकैशिकेशः पुरप्रवेशाभिमुखो बभूव । किं कृत्वा ? स्वसारं इन्दुमतीं आदाय, गृहीत्वा । किंभूतां स्वसारम् ? सदृशेन तुल्येन उपयन्त्रा, भर्त्रा, उपस्थेन स्वीकरोतीत्युपयन्ता भर्ता, तेन भर्त्रा युक्ताम् । केन कामिव ? स्कन्देन कार्तिकेयेन साक्षात् मूर्तिमतीं देवसेनानाम्नीं कं(क)न्यामिव ॥१॥

२. सेनानिवेशान्० ।

अन्ये नृपाः सेनानिवेशान् स्कन्दा(न्धा)चा(वा)रान् जग्मुः । कथंभूताः पृथिवीक्षितः ? विभातग्रहमन्दभासः प्रत्यूषतारकविच्छायाः । पुनः कथंभूताः ? भोज्यां इन्दुमतीं इ(प्र)ति व्यर्थमनोरथत्वात् रूपेषु वेशेषु साभ्यसूयाः ईर्ष्यासहिताः ॥२॥

३. सा(सां)निध्ययो० ।

तत्र स्वयंवरे काकुत्स्थं उद्दिश्य समत्सरोऽपि क्षितिपाललोकस्तेन कारणेन शशाम । तेनेति केन ? किलेति सत्यं शच्याः इन्द्राण्याः सा(सां)निध्ययोगात् स्वयंवरक्षोभकृतां स्वयंवरविघ्नविधायिनां अभावो नाशो भवति ॥३॥

४. तावत्स(त्प्र)० ।

स वरः वध्वा इन्दुमत्या सह राजमार्गं प्राप । कथंभूतं राजमार्गम् ? ध्वजच्छाय-निवारितोष्म(ष्ण)म् । ध्वजानां छायया निवारितः उष्मः(ष्णः) घर्मः यत्र । पुनः कथंभूतम् ? प्रकीर्णाभिनवोपचारं, प्रकीर्णो विक्षिप्तोऽभिनवोपचारः पुष्पप्रकरो यत्र, तम् । पुनः कथंभूतम् ? इन्द्रायुधद्योतिततोरणाङ्कम् । इन्द्रायुधवत् द्योतयन्तं दीप्यमानं तोरणमेव अङ्कं चिह्नं यत्र, तम् ॥८॥

५. ततस्तदा० ।

ततोऽनन्तरं, तदालोकेनतत्पराणां पुरसुन्दरीणां इत्थं वक्ष्यमाणप्रकारेण मुक्तान्यकार्याणि विचेष्टितानि बभूवुः । सौधेषु हर्म्येषु, कथंभूतेषु ? चामीकरजालवत्सु कनकगवाक्ष-युक्तेषु ॥५॥

६. आलो० ।

कयाचित्कामिन्या करेण रुद्धो[ऽ]पि केशपाशः तावत् बन्धुं न संभावित एक(व), न शक्तः । कथंभूतया कयाचित् ? आलोकमार्गं गवाक्षपथं सहसा व्रजंत्या । कथंभूतः केशपाशः ? उद्वेष्टनवान्तमाल्यः उ(औ)त्सुक्यवशात् उद्वेष्टनेन वान्तं उन्मुक्तं माल्यं यस्य सः ॥६॥

७. प्रसाधिका० ।

उत्सृष्टलीलागतिः, त्वरावशात् उत्सृष्टलीलागतिर्विलासगमनं यसा(स्याः)सा । काचिद् गवाक्षादलक्तकाङ्क्षां पदवीं अलक्तकाङ्क्षितं मार्गं ततान अकरोत् । किं कृत्वा ? प्रसाधिकालम्बितं सौरन्ध्या गृहीतं, द्रवरागमेव आर्द्ररागं अग्रप(पा)दं आक्षिप्यापहृत्य ॥७॥

८. विलोचनं० ।

शलाकां वहन्ती । अपरा काचित् तथैव वातायनसन्निकर्षं गवाक्षसमीपं ययौ, जगाम । किं कृत्वा ? अञ्जनेन दक्षिणं विलोचनं नेत्रं संभाव्य आवर्ज्य अलंकृत्य । कथंभूता अपरा ? तद्वञ्चितवामनेत्रा । ततो तेन कज्जलेन वञ्चितं वामनेत्रं यया सा अकज्जलवामलोचना ॥८॥

९. जालान्तरप्रे० ।

अन्या काचित् नीवीं प्रस्थानभिन्नां गमनत्रूटितां न बबन्ध । जालान्तरप्रेषितदृष्टिः गवाक्षविवरक्षित्र(प्त)नेत्रा । हस्तेन वासः अञ्चलं व्य[व]धारयन्ती तस्थौ । किंभूतेन हस्तेन ? नाभिप्रविष्टाभरणप्रभेण । नाभौ प्रविष्टा आभरणानां प्रभा यस्य सः तेन ॥९॥

१०. अर्द्धांचि(र्धाश्चि)ता० ।

कस्याश्चित् रस(श)ना मेखला तदानीं तस्मिन् काले अङ्गुष्टमूलार्पितसूत्रशेखा[1]-(षा) आसीत् । कथंभूतायाः कस्याश्चित् ? सत्वरं उच्छि(त्थि)तायाः शीघ्रमुच्छि(त्थि)-तायाः । कथंभूता रस(श)ना ? दुर्निमित्ता(ते), दुष्टं निमितं निधानं क्षेपो वा यस्य, चलने दुःखेन आरोपिते पदे पदे जगन्ती गलन्ती वा ॥१०॥

११. तासां मुखैः० ।

तासां वनितानां मुखैः व्याप्तान्तराः व्याप्तमध्याः गवाक्षाः सहस्रपत्राभरणा इव पुण्डरीकभूषणा इव आसन् बभूवुः । किंभूतैर्मुखैः ? आसवगन्धगर्भैः । आसवस्य गन्धः सौरभं गर्भे येषां, तानि । कथंभूतानां तासाम् ? सान्द्रकुतूहलानां घनकौतुकानाम् । कथंभूतैर्मुखैः ? विलोलनेत्रभ्रमरैः, विलोलानि चपलानि नेत्राण्येव भ्रमराः येषु, तैः ॥११॥

---

1 The scribe writes 'ख' for 'ष'.

१२. ता राघवं० ।

ता नार्यः विषयान्तराणि शब्दादीनि न जग्मुः । न बुबुधिरे । किंभूताः नार्य्यः-(र्यः) ? दृष्टिभिर्नेत्रैः राघवं अजं आपिबन्त्यः, साभिलाषं पश्यन्त्यः । तथा हि इति दृष्यन्ते आसां योषितां शेषेन्द्रियवृत्तिः, शेषाणां श्रवणादीणां(नां) इन्द्रियाणां वृत्तिः आकर्णनादि यो व्यापारः सर्वात्मना चक्षुरिव प्रविष्टा ॥१२॥

१३. स्थाने वृता० ।

भोज्या परोक्षैः असंख्यैः अदृष्टैः भूपतिभिः वृत्ता(ता) याचिता, एतत् स्थाने युक्तम् । भोज्या इन्दुमती स(स्व)यंवरं साधुं असौ इन्दुमती आत्मानुरूपं कान्ति(न्तं) पतिं कथं लभेत प्राप्नुयात् । का कमिव ? पद्मा नारायणमिव ॥१३॥

१४. परस्परेण० ।

अन्योन्यस्पृहणीयशोभं अभिलषनी(णी)यशोभं इदं द्वन्द्वं चेद् यदि न अजो(यो)-जयिष्यत् नामेलयिष्यत् तदा अस्मिन् द्वये प्रजानां पत्युः ब्रह्मणः रूपविधानयत्नः रूप-निर्म्मा(र्मा)णप्रयासः वितथो निष्फलः अभविष्यत् ॥१४॥

१५. रतिस्मरौ० ।

नूनं निश्चितम् । इमौ वधूवरौ रतिमन्मथौ अन्यजन्मनि अभूतां आस्ताम् । तथा हीति दृष्टान्ते । इयं बाला इन्दुमती राज्ञां सहश्रे(स्रे)षु सहश्र(स्र)राजमध्ये आत्म-प्रतिरूपमेव आत्मानुरूपमेव तया(याता) गता । हि यतः {अ}निश्चितं [मनश्चित्तं] जन्मान्तरसंगतिज्ञं मैत्र(त्र्य)ज्ञम् ॥१५॥

१६. इत्युद्गताः० ।

कुमारः अजः सम्बन्धिनः भोजस्य सद्म धवलग्र(गृ)हं आससाद प्राप । किंभूतः कुमारः ? इति पौरवधूमुखेभ्यः नागरिकवधूवदनेभ्यः उद्गताः निःस्पृ(सृ)ताः वार्ताः कथाः श्रृण्वन् । किंभूताः कथाः ? श्रोत्रसुखाः, श्रवणसुखकारिण्यः । किंभूतं सद्म ? मङ्गलसंविधाभिः कौतुकसंविधानैः उद्भासितं शोभमानम् ॥१६॥

१७. ततो[ऽ]वती० ।

अथानन्तरं स कुमारोऽजः अंतर्मध्ये चतुष्कं चतुश्शालां विवेश प्राविशत् । चतुष्कं कानीव ? नारीमनांसीव स्त्रीचित्तां(चेतां)सीव किं कृत्वा ? ततस्तस्याः [क]रेणु-कायाः आशु शीघ्रं अवतीर्य्य(र्य) । किंभूतः अजः ? कामरूपेश्वरदत्तहस्तः । काम-

रूपस्य देशस्य ईश्वरेण राज्ञा दत्तो हस्तो यस्य सः। किंभूतं चतुष्कम् ? वैदर्भनिर्दिष्टं; वैदर्भेण भोजेन निर्दिष्टं कथितं वैदर्भनिर्दिष्टम् ॥१७॥

१८. महार्हसिंहासन० ।

असौ कुमारः अजः भोजोपनीतं भोजढौकितं अर्घ्यं पूजां जग्राह अग्र(गृ)हीत्। न केवलं अर्घ्यं जग्राह, वनिताकटाक्षैः सह सार्द्धं दुकूलयुग्मं जग्राह। किंभूतः अजः ? महार्हसिंहासनसंस्थितः। महार्हे अनुपमे सिंहासने संस्थितः उपविष्टो यः सः ॥१८॥

१९. दुकूलवासाः० ।

स अजः विनीतैः सक्तैः अवरोधरक्षैः अन्तःपुररक्षकैर्निन्ये अनीयत। कः कौ कामिव। स्फुटफेनराजिः प्रकटडिंडीरश्रेणिः उदन्वान् समुद्रो नवैश्चन्द्रपादैः चन्द्रकिरणैर्वेला-सकाशं वेलानिकटमिव। यथा उदन्वान् समुद्रः नवैश्चन्द्रपादैर्वेलासमीपं नीयते। किंभूतः अजः ? दुकूलवासाः पट्टवसनः। स्फुटफेनराजि [इति] समुद्रविशेषणम् ॥१९॥

२०. तत्रार्च्चि(र्चि)तो० ।

तत्र अग्निकल्पस्तेजस्वी भोजपतेः पुरोधा पुरोहितः वधूवरौ संगमयांचकार समयो-जयत्। किं कृत्वा ? आज्यादिभिः घृतसमीप(मित्)पल्लवादिभिः अग्निं संतर्प्य। पुनः किं कृत्वा ? विवाहसाक्षे(क्ष्ये) उद्वाहसाक्षित्वे तमेव अग्निं आधाय परिकल्प(ल्प्य)। किंभूतः पुरोधाः ? अर्च्चि(र्चि)तः दानमानादि[भिः] पूजितः ॥२०॥

२१. हस्तेन हस्तं० ।

स राजसूनुः सुतरां अतिशयेन बभासे शुशुभे। किं कृत्वा ? हस्तेन वद्धवा, इन्दुमत्या हस्तं परिगृह्य। राजसूनुः क इव शुशुभे ? अनन्तराशोकलताप्रवालं न्या(प्रा)-प्येव, पल्लवेन नू(चू)तः इव अनन्तराशोकलताप्रवालं अन्यस्याः अशोकलतायाः पल्लवं प्राप्य शोभते ॥२१॥

२२. आसीद्वरः० ।

कण्टकितप्रकोष्टः पुलकितभुजः वरः अजः आसीद्बभूव। कुमारी इन्दुमती स्विन्नाङ्गुलिः स(सं)वव्रृते। तत्क्षणं तत्कालम्। मनोभवेन अस्मिन् द्वये आत्मवृत्तिः निजधर्म्मः(र्मः) समं सामान्येन विभक्तेव विभागीकृता ॥२२॥

२३. तयोरपां० ।

तयोर्वधूवरयोर्विलोचनानि नेत्राणि मनोज्ञां रम्यां ह्रीयन्त्रणां लज्जाकृतं संकोचं आन-शिरे प्रापुः। किंभूतानि विलोचनानि ? अपाङ्गप्रतित्या(सा)रितानि। अपाङ्गेषु पर्यन्तेषु

प्रसारितानि क्षिप्तानि । पुनः किंभूतानि ? क्रियासमाप्ति(पत्ति)निवर्तितानि । क्रियासमाप्तौ निवर्तितानि, संकुचितानि । पुनः किंभूतानि लोचनानि ? अन्योन्यदर्शनलंपटानि ॥२३॥

२४. प्रदक्ष(क्षि)णप्र० ।

तन्मिथुनं युग्मं चकासे । कस्मात् उदर्च्चि(र्चि)षः उद्गतजालस्य कृशानोः अग्नेः प्रक्रमणात् परिणयनप्रारम्भात् । किमिव ? मेरोः उपान्तेषु समीपेषु वर्तमानं पर्यटत् अन्योन्यसंसक्तं इतरेतरसंश्लिष्टं अहस्त्रियाममिव । अहश्च त्रियामा च अहस्त्रियामम् ॥२४॥

२५. नितम्बगुर्वी० ।

सा वधू अग्नौ वह्नौ लज्जाविमोक्षं चकार, अकरोत् । किंभूता वधूः ? गुरुणा प्रेरिता, पुरोहितेन । किभूतेन गुरुणा ? विधातृप(प्र)तिमेन ब्रह्मतुल्येन । पुनः किंभूता वधूः ? नितम्बगुर्वी विपुलजघना । पुनः किंभूता वधूः ? लज्जावती मत्तचकोरनेत्रा ॥२५॥

२६. हविःशमीपल्लव० ।

कृशानोर्वैश्वानरस्य धूमः पुण्यः पवित्रः उदियाय, उत्तस्थौ उज्जगाम । किंभूतः धूमः ? हविः शमीपल्लवलाजगन्धी हवींष(षि) चि(च) शमीपल्लवाश्च लाजास्तद्गन्धो विद्यते यस्य सः । कपोलसंस्प(स)र्पिनी एवंविधा शिखा यस्य स धूमस्तस्याः वध्वाः म(मु)हूर्तक{र}णो(र्णो)त्पलतां क्षणमात्रश्रवणेन्दीवरत्वं प्रपेदे प्राप ॥२६॥

२७. तदञ्जन० ।

तत् वधूमुखं आचारधूमग्रहणात् पाटलगण्डलेखं बभूव । पाटला लोहिता गण्डलेखा कपोल्पाली यत्र । अञ्जलिना गृहीत्वा धूममाजिघ्रेदिति लोकाचारः । किंभूतं मुखम् ? अञ्जनक्लेदसमाकुलाक्षं, अञ्जनक्लेदेन अश्रुक्षरणेन समाकुले अक्षिणी यस्य तत् । पुनः किंभूतं मुखम् ? प्रम्लानबीजाङ्कुरकर्णपु(पू)रं, प्रम्लानो {विद्राण} बीजाङ्कुर एव यवप्ररोह एव कर्णपूरः कर्णाभरणं यत्र तत्तथा ॥२७॥

२८. तौ सा(स्ना)तकैः० ।

तौ कन्याकुमारौ आर्द्राक्षतारोपणं सर्यस(र्षप ?)यवाक्षतारोपणं अन्वभूताम् । किंभूतं अ(आ)र्द्राक्षतारोपणम् ? स्नातकैः वेदव्रतस्नातकैः बन्धुमा(म)ता बान्धवसहितेन राज्ञा च पुरंध्रिभिः अविधवानायिकाभिः क्रमशः क्रमेण प्रयुक्तं क्षेपितम् । कथंभूतौ कन्याकुमारौ ? कनकासनस्थौ ॥२८॥

२९. इति स्वसुः० ।

स भोजकुलप्रदीपः राजा महीपतीनां अर्हना(णा)र्थं पृथक् प्रत्येकं अधिकृतान् अधिकारिणः समादिदेश समादिशत् । किंभूतः सः ? अधिश्रीः अधिगता श्रीः प्राप्ता श्रीर्येन, समृद्धः । किं कृत्वा ? अमुना प्रकारेण स्वसुः भगिन्याः पाणिग्रहणं समाप्य ॥२॥

३०. लिङ्गैर्मुदः० ।

ते राजानः वैदर्भं भोजं आमन्त्र्य आपृच्छय ययुः । किं कृत्वा ? उप्र(प)दाच्छलेन ढौकनिकाच्छलेन तदीयां भोजसम्बन्धिनीं वस्त्रादिकां पूजां प्रत्यर्प्य दत्वा । किंभूताः राजानः ? मुदः हर्षस्य लिङ्गैश्चिह्नैः संवृतविक्रियाः आच्छादितविकाराः । क इव ? गूढनक्राः गुप्तमकरादयः प्रसन्ना निर्म्म(र्म)ला ह(ह्र)दा इव ॥३०॥

३१. स राज० ।

स राजलोकः अजस्य पन्थानं आवृत्य रुद्ध्वा तस्थौ अतिष्ठत् । किंभूतः राजलोकः ? तत् प्रमदामिषं कन्यारत्नं आदास्यमानः ग्र(ग्र)हीतुकामः । किंभूतं प्रमदामिषम् ? आरम्भसिद्धौ कार्यारम्भसिद्धौ समरो(यो)पलभ्यं सङ्ग्रामप्राप्यम् । किंभूतः राजलोकः ? कृतपूर्वसन्धिः कृतप्रथममन्त्रः ॥३१॥

३२. भर्तापि ताव० ।

तावत् क्रथकैशिकानां देशानां भर्ताऽपि भोजः राघवं अजं प्रास्थापयत् व्यसर्ज्ज(र्ज)यत् । च पुनः राघवं अन्वगात् अनुययौ । किंभूतो भोजः ? अनुष्ठितानन्तरजाविवाहः विहितभग्नी(गिनी)विवाहः । पुनः किंभूतो भोजः ? सत्त्वानुरूपाभरणीकृतश्रीः सामर्थ्यानुसारेण दत्तलक्ष्मीकः ॥३२॥

३३. तिस्रस्त्रिलोकप्रति(थि)० ।

कुण्डिनेशः भोजस्तस्मात् अजात् अपावर्तत । किं कृत्वा ? त्रिलोकप्रथितेन त्रिलोकविक्षा(ख्या)तेन अजेन सार्धं मार्गे तिश्रः(स्रः) वसतीः निशाः प्रयाणान्(? त्रियामाः) उषित्वा स्थित्वा । कस्मात्क इव ? पर्व्वा(र्वा)त्यये आ(अ)मावास्या[याः] अतिक्रमे उश्न(ष्ण)रश्मेः सोम इव । यथा सोमश्चन्द्रः पर्व्वा(र्वा)त्यये अमावास्याप्रान्ते उश्न(ष्ण)-रश्मेः श्रीसूर्यात् अपावर्तते पश्चाद्व्यावर्तते ॥३३॥

३४. प्रमवन्य(न्यवः)० ।

कोसलेन्द्रे रघौ आत्तस्वतया गृहीतवसुतया प्रागपि आदावेव प्रमन्यवः सरोषाः बभूवुः । अतः कारणात् समेताः मिभि(लि)ताः नृपाः अजस्य रघुपुत्रस्य स्त्रीरत्नलाभं न चक्षमिरे, न सेहिरे ॥३४॥

३५. तमुद्वहन्तं० ।

वृ(दृ)प्तः दर्प्प(र्प)युक्तः स राजन्यगणः राजलोकस्तं अजं रुरोध अरौत्सीत् । किंभूतं तं अजम् ? पथि मार्गे भोजकन्यां इन्दुमतीं उद्वहन्तं धारयन्तम् । कः कमिव ? इन्द्रशत्रुः वृत्रासुरस्त्रैविक्रमं विश्नु(ष्णु)सम्बन्धिनं पादमिव । यथा इन्द्रशत्रुः नमुचिस्त्रैविक्रमं पादं रुरोध । कथंभूतं पादम् ? श्रियं आददानं, गृह्णन्तम् । किंभूतां श्रियम् ? बलिप्रवि(ति)ष्ठां, बलिः प्रतिष्ठा आश्रयो यस्याः सा ॥३५॥

३६. तस्याः स रक्षार्थं० ।

सः कुमारस्तां पार्थिववाहिनीं राजसेनां प्रत्यगृ(ग्र)हीत् प्रत्यैच्छत् प्रतिजग्राह । किं कृत्वा ? पित्र्यं पितुः सम्बन्धिनं सचिवं मन्त्रिणं रक्षार्थं आदिश्य ति(नि)युज्य । किंभूतं सचिवम् ? अनल्पयोधं बहुसुभटम् । उत्प्रेक्षते । कः कामिव ? यथा उत्तरङ्गः शोणभद्रः जो(ज्यो)तीरथां नदीं गृह्णाति ॥३६॥

३७. पत्तिः पदातिं० ।

[पत्तिः पदातिं] अभ्यपतत्, रथेशः रथिनं अभ्यु(भ्य)पतत्, तुरङ्गमा(सा)दी तुरङ्गाधिरूढं अभ्यपतत् । गजस्य यन्ता हस्तिपकः गजस्थं अभ्यपतत् संमुखं ययौ । तुल्यप्रतिद्वन्द्वि सदृशपक्षं युद्धं बभूव ॥३७॥

३८. नदत्सु० ।

चापभृतः धनुर्धराः । परस्परं अन्योन्यं उर्ज्जि(र्जि)तं नाम बाणाक्षरैरेव शशंशुः(सुः) । कुलोपदेशान् प्रतिष्ठालब्धानि नामानि कुलाख्यानानि न उदीरयन्ति स्म, न उच्चारयामासुः । केषु सत्सु ? रणतूर्येषु नदत्सु वाद्यमानेषु सत्सु । किंभूताश्चापभृतः ? अविभाव्यवाचः अलक्षितगिरः ॥३८॥

३९. उत्थापित० ।

रेणुः अनुक्रमेण सूर्यं उपरुरोध आच्छादयामास । किंभूतः रेणुः ? संयति सङ्ग्रामे अश्वैः उत्थापितः उत्खातः । पुनः किंभूतः ? कुञ्जरकर्णतालैः विस्तारितः । पुनः किं[भूतः] ? स्यन्दनवंशचक्रैः ॥३९॥[1]

४०. मत्स्यध्वजाः० ।

मत्स्याकारा ध्वजाः मत्स्यध्वजाः बभुः शुशुभिरे । कथंभूताः मत्स्यध्वजाः ? वायुवशात् विदीर्णैः प्रसारितैर्मुखैः प्रवृद्धध्वज(जि)नीरजांसि रेणून् पिबन्तः । के इव ?

---

1 [सान्द्रीकृतः] has to be added. The comm. is not complete here.

पर्याविलानि कलुषानि नवोदकानि वर्षातोयानि पिबन्तः । परमार्थमत्स्याः सत्यार्थमत्या इव ॥४०॥

४१. रथो रथां० ।

रथाङ्गध्वनिना चक्रची(चि)त्कारेण रथः विजि(ज)ज्ञे विज्ञातः । विलोलघण्टाक्वणितेन चटुलकिङ्किणीटङ्कारेण नागः गजः विजि(ज)ज्ञे । सान्द्रे घने रजां(ज)सि रेणौ स्वभर्तृनामग्रहणात् आत्मपरावरो(बो)ध आत्मीयपरकीयविज्ञानं बभूव अभूत् ॥४१॥

४२. आवृण्वतो लो० ।

विजृम्भितस्य प्रवृद्धस्य रजो[ऽ]न्धकारस्य रज एव अन्धकारः तस्य, बालारुणः बालारुणतुल्यः तद्विनाशकत्वात् रुधिरप्रवाहः असृक्पूरोऽभूत् । कथंभूतः रुधिरप्रवाहः ? शस्त्रक्षताश्वद्विपवीरजन्मा आयुधहततुरगकरिसुभटसमुत्थः । किंभूतस्य रजोऽन्धकारस्य ? आजौ सङ्ग्रामे लोचनमार्गं नेत्रमार्गं आवृण्वतः आच्छादयतः ॥४२॥

४३. सं(स) च्छिन्नमू० ।

क्षतजेन रुधिरेण स च्छिन्नमूलस्सन् स रेणुः आबभासे शुशुभे । क इव ? अङ्गारशेषस्य अङ्गारोद्धरितस्य हुतास(श)नस्य पूर्व्वो(र्वो)त्थितः प्राग् उत्पन्नः धूम इव । किंभूतो रेणुः ? तस्य सैन्यस्य उपरिष्टात् पवनावधूतः वातप्रसारितः ॥४३॥

४४. प्रहारमूर्च्छा० ।

यैः सुभटैः रथस्थाः पूर्वर्णादि(निहृ)ताः आहताः लक्षितपूर्व्व(र्व)[1] केतून् परिज्ञातपूर्व्व-(र्व)चिह्नान् सामर्षतया सरोषतया तानेव सुभटान् निजघ्नुः अताडयन् । किं कृत्वा ? रथस्थाः रथारूढाः यन्तॄन् सारथीन् उपालभ्य निर्भर्त्स्य । किंभूतान् यन्तॄन् ? विवर्तिताश्वान् । क्व ? प्रहारमूर्च्छापगमे शस्त्रघातमोहविनाशे सति ॥४४॥

४५. अप्यर्धमा० ।

हस्तवतां शीघ्रवेदिनां धनुर्भृतां धनुर्धराणां पृषत्काः बाणाः आत्मजवानुवृत्त्या आत्मवेगानुसारेण पूर्वार्धभागैः पूर्वभागार्धैः फलभिः(लैः) सफलैः स(श)रव्यं वेध्यं लक्षं(क्ष्यं) संप्रापुरेव संप्राप्तवन्तः । किंभूताः पृषत्काः ? अप्यर्धमार्गो(र्गे) परबाणु(ण)लूनाः ॥४५॥

४६. आधोरणानां० ।

गजसंनिपाते गजसंमिलने आधोरणानां हस्तिपकानां शिरांसि चिरेणु(ण) पेतुः अपतन् । किंभूतानि शिरांसि ? निशिताग्रधारैस्तीक्ष्णधारैश्चक्रैः हतानि छिन्नानि । पुनः कथंभूतानि ?

1 The scribe very often writes a double letter when there is रेफ over it.

श्येननखाग्रकोटिव्यासक्तकेशानि{लग्नानि}श्येनानां पक्षिविशेषाणां नखाग्रकोट्यो नखाग्र-भागास्तासु व्यासक्तानि लग्नानि केशानि येषाम् ॥४६॥

४७. पूर्वं प्रह० ।

पूर्वं प्रथमं प्रहर्ता प्रहारकर्ता अश्ववारः प्रतिप्रहाराक्षमं गतचैतन्यत्वात् प्रतीपघात-असमर्थ(प्रतिघातासमर्थः ?) भूयः पुनरपि न जघान, [न] आहतवान् । प्रत्याश्वसन्तं जीवन्तं रिपुं आचकांक्ष अभिललाष । किंभूतं रिपुम् ? तुरङ्गमस्कन्धनिषक्तदेहं, तुरङ्ग-मस्कन्धनिषक्तः स्थापितः देहः शरीरं येन सः ॥४७॥

४८. तनुत्यजां० ।

गजाः हस्तिनः करसीकरेण शुण्डादण्डाम्बुना अग्निं शमयांबभूवुः शमयामासुः । किंभूताः गजाः ? विविग्नाः विभीताः । किंभूतं अग्निम् ? बृहत्सु दन्तेषु पतद्भिः असिभिः खड्गैः उद्यन्तं उत्थितम् । किंभूतैः खड्गैः ? विकोशैः कोशरहितैः । केषां वर्म्म(र्म)भृतां कवचधराणां तनुत्यजां शरीरमुचाम् ॥४८॥

४९. शिलीमु० ।

रणक्षितिः रणभूमिः रराज । का इव ? मृत्योः यमस्य पानभूमिरिव । किंभूता पानभूमिः ? शिलो(ली)मुखोत्कृत्तशिरःफलाढ्या शिलीमुखोत्कृत्तैः शरलूनैः शिरोभिः एव फलैः बीजपुरादिभिः आढ्या स्फीता । पुनः किंभूता ? च्युतैः पतितैः शिरस्त्रैः मूर्धत्राणैः चषकोत्तरेव मद्यपानपात्रेव । पुनः कथंभूता ? शोणितमद्यकुल्या शोणितमेव मद्यं तत्कृता कुल्या यत्र ॥४९॥

५०. उपान्तयो० ।

पिशितप्रियाऽपि मांसप्रियाऽपि शिवा शृगाली भुजच्छेदं अपाचकार तत्याज । किंभूता शिवा ? केयूरकोटिक्षततालुदेशा अङ्गदाग्रविद्धतालुदेशा । किंभूतं भुजच्छेदम् ? उपान्तयोः प्रान्तयोर्विहंगैः पक्षिभिः निकु(ष्कु)षितं निःसारीकृतम् । किं कृत्वा ? तेभ्यः पक्षेभ्यः आक्षिप्य अपहृत्य ॥५०॥

५१. कश्चिद्द्विष० ।

कश्चित्सुभटः समरे सङ्ग्रामे नृत्यत् कबन्धं ददर्श अद्राक्षीत् । किं कृत्वा ? सद्यः शीघ्रं विमानप्रभुतां देवत्वं प्राप्य । किंभूतः कश्चित् ? द्विषत्खड्गहतोत्तमाङ्गः रिपु-खड्गच्छिन्नमस्तकः । पुनः किंभूतः ? वामाङ्गसंसक्तसुराङ्गनः । वामाङ्गे संसक्ताः सुराङ्गनाः अप्सराः(रसः) यस्य सः ॥५१॥

५२. अन्योन्य० ।

कौचित् रथिनौ च रथस्थौ अन्योन्यसूतोन्मथनात् अन्योन्यं परस्परं सूतयोः सारथ्योः उन्मथनं विनाशस्तस्मात् तावेव सूतौ सारथिनौ बभूवतुः । कथंभूतौ कौचित् ? व्यश्वौ हततुरगौ । पुनः कथंभूतौ ? गदाव्यायतसंप्रहारौ, गदाभ्यां व्यायतौ अतिदीर्घसंप्रहारौ सङ्ग्रामे ययोस्तौ । तथा पुनः किंभूतौ ? भग्नायुधौ, चूर्णितगदाशस्त्रौ । पुनः किंभूतौ ? बाहू(हु)विमर्दनष्टौ भुजयुद्धपरायणौ ॥५२॥

५३. परस्परेण० ।

कयोश्चित् सुभटयोः अमर्त्यभावे[ऽ]पि देवत्वे[ऽ]पि विवादः युद्धं आसीत् । किंभूतयोः कयोश्चित्सुभटयोः ? एकास्प(प्स)रा(रः) प्रार्थितयोः एकदेवाङ्गनाप्रार्थितयोः । पुनः किंभूतयोः ? प्रहर्त्रोर्युध्यमानयोः । पुनः किंभूतयोः ? परस्परेण अन्योन्यं क्षतयो र्हतयोः(?) । पुनः किंभूतयोः ? तत्कालमेव युगपत् उत्क्रान्तवाय्वोः गतप्राणयोः ॥५३॥

५४. व्यूहावुभौ० ।

तौ उभौ व्यूहौ सेनानिवासौ इतरेतरस्मात् परस्परेण अव्यवस्थं अनियतं, एकेन जितं एकेन हारितं(?)इति नियमरहितं भङ्गं जयं च आपतुः प्रापतुः । तौ कौ इव ? पश्चात्पुरोमारुतयोः पाश्चात्पौरस्त्यवातयोः पर्यायवृत्त्या अनुक्रमव्यापारेण भङ्गं च जयं च अव्यवस्थं प्राप्नुतः ॥५४॥[1]

५५. परेणभग्नेति(ऽपि)० ।

महौजाः महान् तेजस्वी अजः प्रत्यरिसैन्यं रिपुसेनासन्मुखं ययौ जगाम । कस्मिन्सति ? बले निजसैन्ये भग्नेऽपि सति । केन ? परेण, शत्रुसैन्येन । यतः हि निश्चितं धूमः समीरणेन निवर्त्येत निवारयितुं शक्येत । यत्रैव कक्षस्तत्रैव वह्निः ॥५५॥

५६. रथं(थी)निषङ्गी० ।

स एकवीरः अजः राजन्यकं राजचक्रं विलोडयामास अमथ्नात् । किंभूतं राजन्य[क]म् ? दृप्तं, दर्प्प(र्प)[युक्त]म् । किंभूतः अजः ? रथी, रथस्थः । पुनः किंभूतः[अजः] ? कवची । पुनः किंभूतः अजः ? धनुष्मान् धनुर्द्धरः । किमिव ? महावराहः कल्पक्षयोद्वृत्तं कल्पान्तोल्लसितं अर्णवाम्भ इव, समुद्रजलमिव । यथा महावराहः आदिशूकरः कल्पक्षयोद्वृत्तं प्रलयसमयोत्कल्लोलं अर्णवाम्भः विलोडयति ॥५६॥

---

1 महार्णवोर्मी is left out. So the comm. here seems to be incomplete.

५७. स दक्षिणमिति ।

स अजः तूणमुखे[न] निषङ्गवदनेन दक्षिणं वामं हस्तं व्यापारयन् सन् आजौ सङ्ग्रामे{न} अलक्ष्यत{न}अदृश्यत । अस्य योद्धुः योधनशीलस्य आकर्णकृष्टा मौर्वी प्रत्यञ्चा असकृत् वारंवारं रिपुघ्नान् सुषुवे इव, असूत इव ॥५७॥

५८. स शेषद० ।

स अजः द्विषतां शत्रूणां शिरोभिरुत्तमाङ्गैः गां पृथिवीं तस्तार आच्छादयामास । किंभूतैः शिरोभिः ? शेषद्द(द)ष्टाधिकलोहितोष्टैः रोषेण दष्टः अति(त) एव लोहित ओष्ठो येषां ते तैः । व्यक्तोर्द्व(र्ध्व)रेखाः यासां ताः भ्रूकुटीर्वहद्भिः । पुनः कथंभूतैः ? निकृत्तकण्ठैः भल्लच्छेदितगलैः । पुनः कथंभूतैः ? हुंकारगर्भैः, सशब्दैः ॥५८॥

५९. सर्वैर्व(र्ब)लाङ्गैः० ।

सर्वे एव भूमिपालाः सर्वप्रयत्नेन च सर्वोद्यमेन च युधि सङ्ग्रामे तस्मिन् अजे प्रजह्रुः(ह्रुः), प्रहारं चक्रुः । कैः ? सर्वैः चतुर्भिः बलाङ्गैः सैन्यैः । किंभूतैः बलाङ्गैः ? द्विरदप्रधानैः करिमुख्यैः । पुनः कैः ? सर्वायुधैः खड्गतोमरादिभिः सर्वास्त्रैः । किंभूतैः सर्वायुधैः ? कंठक(ङ्कट)भेदिभिः सन्नाहभेदिभिः ॥५९॥

६०. सो[ऽ]स्त्रव्रजैरिति ।

स अजः ध्वजापताकाग्रमात्रेण लक्ष्यः दृश्यो बभूव । किंभूतः अजः ? परेषां शत्रूणां अस्त्रव्रजैः आयुधसमूहैः छन्नरथः । केन क इव ? किञ्चित्प्रकाशेन विवस्वता श्रीसूर्येण दिनपूर्वभाग इव । किंभूतो दिनपूर्वभागः दिवसोदयसमयः ? नीहारमग्नः धूमरी[1]-जालमग्नः सन् किञ्चित्प्रकाशेन किञ्चित्प्रकटे(टि)[ते]न विवस्वता श्रीसूर्येण लक्ष(क्ष्यः)दृश्यो भवति ॥६०॥

६१. प्रियंवदा० ।

अथ अथानन्तरं अधिराजसूनुः अजः राजसु नृपेषु प्रस्वापनं गान्धर्वं अस्त्रं प्रायुङ्क्त, प्रयुञ्जयामास । किंभूतं अस्त्रम् ? प्रियंवदात् गन्धर्वात् प्राप्तम् । किंभूतः अजः ? प्रियार्हः प्रियवस्तुयोग्यः । पुनः किंभूतः अजः ? कुसुमास्त्रकान्तः । {मनाथ}-[मन्मथ]मनोज्ञः । [पुनः] किंभूतः ? स्वप्ननिवृत्तलौल्यः स्वप्नः शयनं, [तस्मात्] निवृत्तं लौल्यं लाम्पट्य यस्य सः ॥६१॥

---

1 A local touch.

६२. ततो धनुरिति ।

ततस्तदनन्तरम् । नरदेवसैन्यं नृपबलम् । निद्राविधेयं निद्रायत्तं तस्थौ अतिष्ठत् । किंभूतं नरदेवसैन्यम् ? धनुष्कर्षणमूढहस्तं, धनुष्कर्षणे मूढं(ढ)हस्तं जडकरम् । पुनः किंभूतम् ? एकांश(स)पर्यस्तशिरस्त्रजालं, एकस्मिन्नंशे(से) स्कंधे पर्यस्तं पतितं शिरस्त्रजालं मूर्द्धत्राणं यस्य स (तत्), तम् । ध्वजस्तम्भनिषि(ष)न्न(ण्ण)देहं ध्वजदण्डस्थापित-शरीरम् ॥६२॥

६३. ततः प्रिये०(यो०) ।

ततस्तदनन्तरम् । कुमारः जलजं शङ्खं दध्मौ, वादयाभास । किं कृत्वा ? अध-राष्ठे निवेश्य किंभूते अधरोष्ठे ? प्रियोपात्तरसे वल्लभागृहीतरसे । तेन जलजेन एकवीरः स्वहस्तार्जितं निजपुरुषार्जितं मूर्तं मूर्तिमत् यशः पिबन्निव आबभासे ॥६३॥

६४. शङ्खस्वनाभिन्ने(ज्ञे)ति ।

सु(स्व)योधाः निजसुभटाः तं अजं ददृशुः ऐक्षत । किंभूताः स्वयोधाः ? शङ्ख-स्वनाभिज्ञतया शङ्खध्वनिज्ञातृत्वेन निवृत्ताः व्याघटिताः । केषां मध्ये क इव ? निमीलितानां संकुचितानां पङ्कजानां कमलानां मध्ये स्फुरन्तं उल्लसन्तं प्रतिमाशशाङ्कं प्रतिबिंबित—चन्द्रमिव ॥६४॥

६५. सशोणितेति(तैः इति) ।

तेन अजेन सशोणितैः रुधिरलुप्तैः(युक्तैः ?)शिला(ली)मुखाग्रैर्बाणाग्रैः पार्थिवानां राज्ञां केतुषु ध्वजासु इति वर्णा अक्षराणि क्षेपिता लिखिताः । इतीति किम् ? राघवेन अजेन संयति संग्रामे वो युष्माकं यशो हृतं, कृपया जीवितं न ॥६५॥

६६. स चापेति ।

स अजः प्रियां एत्य आगत्य, वचः बभाषे उवाच । किंभूतां प्रियाम् ? भीतां त्रस्ताम् । किंभूतः अजः ? चापकोटौ निहितैकबाहुः चापकोटौ कार्मुकप्रान्ते निक्षिप्तो निहितः एको{वा} बाहुः वामभुजः येन सः । शिरस्त्रसंकर्षणभिन्नमौलिः, शिरस्त्रस्य संकर्षणं उद्धरणम् । तेन भिन्नमौलिः लुलितलोमा । पुनः किंभूतः ? ललाटबद्धश्रमवारि-बिन्दुः । ललाटे भाले लग्ना श्रमवारिबिन्दवो प्रस्वेदजन(ल)कणका यस्य सः ॥६६॥

६७. इतः परेति ।

हे वैदर्भि इतः प्रदेशात् अर्भकहार्यशस्त्रान् बालग्रहणयोग्य(ग्या)यो(यु)धान् परान् शत्रून् पश्य, अवलोकय । मया त्वं अनुमताऽसि, एवं प्रकारेण आह्वचेष्टितेन रण-पौरुषेण मम हस्तगता सती त्वं एभिः नृपैः प्रार्थ्यसे, अभिलष्यसे ॥६७॥

६८. तस्या[ः]प्रति० ।

सद्यस्तत्कालम् । तस्याः इन्दुमत्याः मुखं आबभासे, शुशुभे । किंभूतं मुखम् ? विषादात् शोकाद्विमुक्तं त्यक्तम् । किंभूतात् विषादात् । प्रतिद्विन्द्विभवात् शत्रूत्पन्नात् । क इव ? निस्वा(श्वा)सबाष्पा[प]गमने निश्वा[स]धूमाभावे । आत्मीयं निजम् । प्रसादं नैर्मल्यं प्रपन्नः आदर्श इव, दर्पण इव ।।६७[६८]।।

६९. हृष्टेति ।

इन्दुमती हृष्टा सती, अपि निश्चितं सखीनां वाग्भिः प्रियं अभ्यनन्दत् अस्तौषीत् । साक्षात् न प्रत्यक्षं न । किंभूता सा इन्दुमती ? ह्रीविजिता लज्जाक्रान्ता । कुलस्त्रियो लज्जावन्त्यो भवन्तीति उत्प्रेक्ष(क्ष्य)ते । का काभिः कमिव ? नवाम्भः पृषती(ता)भि- वृष्ट्या नवजलकणकासंसिक्ता स्थली मयूरकेकाभि; अभ्रकालं वर्षाकालमिव । यथा स्थली भूमिका नवाम्भः पृषक्ती(ता)भिः संसिक्ता नवजलकणसंसिक्ता सती मयूरकेकाभिः अभ्रकालं वर्षाकालं अभिनन्दति ।।६९।।

७०. इतीति ।

अजः स, इति अमुना प्रकारेण तां इन्दुमतीं उदवहत् उपयेमे । किं कृत्वा ? राज्ञां शिरसि वामं पादं निधाय दत्वा । किंभूतां ताम् ? योग्याम् । किंभूतः अजः ? अवद्यात् पापात् अपेतः बर्हि(हि)र्भूतः । तस्य अजस्य मूर्ता मूर्तिमती समरविजयलक्ष्मीः संग्रामजयश्रीः बभूव । किंभूता सा ? रथतुरगरजोभिः रूक्षालकाग्रा धूसरितालकाग्रा ।।७०।।

७१. प्रथमपरीति ।

रघुः शान्तमार्गोत्सुकः शान्तमार्गेषु वनवासेषु उत्सुकः अभूत् बभूव । किं कृत्वा ? विजयिनं जयशीलं तं अजं अभिनन्द्य प्रशस्य । किंभूतं अजम् ? संनिवृत्तं प्रत्यागतम् । पुनः किंभूतं अजम् ? श्लाघ्यजायासमेतं श्लाघ्या वर्णनीया जाया इन्दुमती, तया समेत सहितो यः सः, तम् । तस्मिन् अजे उपहितं न्यस्तं कुटुम्बं स्वजनभारो येन सः । हि निश्चितम् । कुलधुर्ये सति सूर्यवंश्याः राजानः गृहाय गृहनिमित्तं न भवन्ति ।।७१।।

इति श्री रघुवंशे भट्टारकश्रीजिनचन्द्रसूरिशिष्यजिनसमुद्राचार्यविरचिते रघुकाव्यान्वयमात्रे अजस्य कन्यालाभो नाम सप्तमः सर्गः समाप्तः । श्रीः ।

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

अष्टमः सर्गः ॥

श्रीमद्वामेयं नमः ॥[1]

१. अथ तस्येति ।

अथ अथानन्तरम् । पार्थिवो रघुस्तस्य वसुधामपि पृथ्वीमपि हस्तगामिनीं आयतां(त्तां) अकरोत् । वसुधां कामिव ? अपरां इन्दुमतीं इव । किंभूतस्य तस्य ? ललितं मनोहरं विवाहकौतुकं पाणिग्रहणमङ्गलं कंकणादिकं बिभ्रतः धारयत एव ॥१॥

२. दुरितैरपि० ।

नृपसूनवः राजपुत्रा दुरितैरपि पितृमरणादिभिः यत् राज्यं आत्मसात् स्वात्माधीनं कर्तुं प्रयतन्ते प्रयत्नं कुर्वन्ति । हि यतः अजः तदुपस्थितं राज्यं प्राप्तं पितुः आज्ञेति अग्रहीत् । भोगतृष्णया विषयाभिलाषेण न ॥२॥

३. अन्विति ।

मेदिनी विशदोच्छ्वसितेन प्रकटोच्छ्वासेन कृतार्थतामिव कृतकृत्यतामिव कथयामास अवदत् । किं कृत्वा ? वशि(सि)ष्ठसंभृतैः वशि(सि)ष्ठानीतैः सलिलैः तेन अजेन सह अभिषेचनं राज्याभिषेकं अनुभूय उपलभ्य ।[2] एके इदं वदन्ति । सलिलैस्तस्य महाभिषेचनं राज्याभिषेकम् ।

४. स इति ।

स अजः परैः शत्रुभिः कृत्वा दुरासदः दुरभिभवो बभूव । किंभूतो[ऽ]जः ? अथर्वविदा अथर्वमन्त्रज्ञेन गु[रु]णा वशि(सि)ष्ठेन कृप्तक्रियः (कृतक्रियः) विहितो[ऽ]भिषेकसंस्कारः । हि निश्चितम् । अस्त्रतेजसा क्षात्रतेजसा सहितं यत् ब्रह्म वेदज्ञानं, अयं पवनाग्निसमागमः पवनाग्निसंयोगः ॥४॥

५. रघुमेवेति ।

प्रजाः लोकाः रघुमेव निवृत्तयौवनं प्रत्यागततारुण्यं अमन्यन्त । हि यस्मात् कारणात् स अजः तस्य रघोः केवलां श्रियं राजलक्ष्मीं न प्रतिपेदे, सकलान् गुणानपि प्रपेदे ।

---

1 A note not observed elsewhere.

2 The remark is not clear.

[1]अधिकं शुशुभे । शुभं युना । द्वितयेन संगतं मि(मी)लितम् । द्वयमेव अधिक शुशुभे रराज । किं तत् द्वयम् ? अजेन सङ्गतं रु(ऋ)द्धं समृद्धं पित्र्यपदं शुशुभे । विनयेन सङ्गतं अस्य अजस्य नवयौवनं च शुशुभे ॥५॥

६. सदयमिति ।

महाभुजः महाबाहुः स अजः अचिरोपनतां तत्कालघटितां मेदिनीं वसुधां इति सदयं बु(बु)भुजे भुक्तवान् । इतीति किम् ? सहसा वेगेन इयं उद्वेगं व्रजेत् । मेदिनीं कामिव ? नवपाणिग्रहणां अचिरोढां वधूमिव ॥६॥

७. अहमेव इति ।

अस्य भूपतेः अहमेव मतः वल्लभः इति प्रकृतिषु प्रजासु सर्वजनोऽचिन्तयत् । अस्य राज्ञः अवमानना क्वचित् क्वचिदपि विषये न अभवत् न बभूव । केषु कस्येव ? निम्नगाशतेषु नदीशतेषु उदधेरिव समुद्रस्येव ॥७॥

८. न खर इति ।

स अजः भूयसा बाहुल्येन न ख[रः]तीक्ष्णः {न}अभवत् । मृदुः कोमलश्च न अभवत् । स अजः अनन्तरान् अन्यान् नमयामास अनीनमत् । कः कामिव ? [पव]मानः पृथ्वीसहान् वृक्षानिव । किंभूतः अजः ? पुरस्कृतमध्यमक्रियः, पुरस्कृता मध्यता(मा) मध्यस्वभावा क्रिया येन स पुरस्कृतमध्यमक्रियः । पवनस्यापि विशेषणं क्रियते ॥८॥

९. अथेति ।

अथ अथानन्तरम् । रघुः त्रिदिवस्थेष्वपि स्वर्गस्थेष्वपि विषयेषु निस्पृहः निरभिलाषोऽभवत् । किं कृत्वा ? प्रकृतिषु प्रजासु मन्त्रिषु आत्मवत्तया आत्मतुल्यतया आत्मजं पुत्रं प्रतिष्ठितं वीक्ष्य, दृष्ट्वा । किंभूतेषु विषयेषु ? विनाशधर्मिषु ॥९॥

---

1 From 'अधिकं शुशुभे'–actually a new verse begins which is Malli. VIII 6. The scribe seems to have taken VIII 5 & 6 together, without giving separate numbers. The numbering therefore, also differ from the next verse.

It seems that in the comm. portion of this eighth सर्ग, many irregularities on the part of the scribe have crept in.

१०. गुणवत्सु० ।

हि निश्चितम् । दिलीपवंशजाः काकुत्स्थकुलोद्भवाः । परिणामे वार्द्धके (र्धक्ये) संयमिनां यति(ती)नां पदवीं मार्गं प्रपेदिरे प्रापुः । किंभूतानां संयमिनाम् ? तरुवल्कल— वाससां तरुवल्कलानि वृक्षवल्कलानि वासः परिधानं येषां ते तेषाम् । किंभूताः दिलीप- वंशजाः ? गुणवत्सु[त]रोपितश्रियः, गुणवत्सुतेषु रोपिता श्रीर्यैः । पुनः किंभूताः ? संयमिनः नियमवन्तः ॥१०॥

११. तमरण्येति ।

सुतो यः आत्मनः स्वस्य अपरित्यागं अविस्मारणं अयाचत प्रार्थयामास । किं कृत्वा ? शिरसा मस्तकेन तं पितरं रघुं पादयोः प्रणिपत्य नमस्कृत्य । किंभूतेन शिरसा ? वेष्टनशालिना पट्टबन्धरम्येण । वेष्टनं मौलिबन्धनं, शोभितं यत् तत्, तेन । किंभूतं रघुम् ? अरण्यसमाश्रयोन्मुखं{च} नमनाभिमुखम् ॥११॥

१२. रघुरिति ।

आत्मजप्रियः पुत्रवल्लभो रघुस्तस्य अजस्य ईप्सितं वाञ्छितं कृतवान् । किंभूतस्य तस्य अश्रुमुखस्य ≪वाश्रायमाणस्य(?)≫[1] । तु पुनः व्यपवर्चिं(र्जि)तां परित्यक्तां श्रियं न प्रतिपेदे न भूयो जग्राह । कां का(क) इव ? यथा सर्पः व्यपवर्जितां त्यक्तां त्वचं कञ्ज(ञ्चु)कां न गृह्णाति ॥१२॥

१३. स इति ।

किल इत्यागमे । स रघुः श्रिया लक्ष्म्या समुपास्यत । श्रिया कयेव ? स्नुषयेय(व) पुत्रवध्वा इव । किंभूतया ? पुत्रयोग्यया । किंभूतः स रघुः ? अच(वि)कृतेन्द्रियः निर्विकारेन्द्रियः । अन्त्यमं(अन्त्यं) भिक्षुव्रतं आश्रमं आश्रितः ! किं कुर्वन् ? अवसथे यज्ञगृहे पुरात् नगरात् बहिः निर्व(व)सन् तिष्ट(ष्ठ)न् ॥१३॥

१४. प्रस(श)मेति ।

तत् कुलं नभसा आकाशेन तुल्यं(लां) साम्यं [समा]रुरोघ(ह) । किंभूतं कुलम् ? प्रशमस्थितपूर्वपार्थिवं, प्रशमस्थितः यत्रासावस्थितः पूर्वश्चिरंतनः पार्थिवो, रघुर्यत्र तत् । पुनः किंभूतं कुलम् ? अभ्युद्यतनूतनेश्वरं, अभ्युद्यतः अभ्युदयवान् नूतनो नव ईश्वरो यत्र तत् । किंभूतेन नभसा ? निभृतेन्दुना, निभृतः अस्तं यियासुरिन्दुश्चन्द्रो यत्र तत्, तेन । पुनः किंभूतेन नभसा ? उदितार्केण उदितसूर्येण ॥१४॥

---

1 Not clear

१५. यतीति ।

जनैः पुरुषैः रघुराघवौ ददृशाते । किंभूतौ रघुराघवौ ? यतिपार्थिवलिङ्गधारिणौ, मुनिराजचिह्नधारिणौ । तौ काविव ? अपवर्ग[1]महोद[यार्थ]योः अपवर्गः[1] मोक्षो महोदयं(यः) सकलपृथ्वीराज्यं, तौ अर्थः प्रयोजनं ययोः धर्म्म[1]योः । भुवं पृथ्वीं गतौ प्राप्तौ । अंशाविव भागाविव ॥१५॥

१६. अजिताधिगेति ।

अजौ(जः) अजिताधिगमाय अलब्धलाभार्थं मंत्रिभिर्युयुजे संयुक्तो बभूव मिलितः । किंभूतैर्मंत्रिभिः ? नीतिविसा(शा)रदैः मत्र(न्त्र)कुशलैः । रघुः योगिभिः यतिभिः सम(मि)—याय, मैत्रीं भेजे । किंभूतैः योगिभिः ? आप्तैस्तत्त्वज्ञैः । कस्मै प्रयोजनाय ? अनपायिपदोपलब्धये जरामरणबाधाविवर्जितस्थानप्राप्तये ॥१६॥

१७. नृपति[ः]प्रकृती ।

युवा नृपतिः अजः प्रकृती[ः] पौरजनान् अवेक्षितुं द्रष्टुं व्यवहारासनं आददे जग्राह । प्रवयाः वृद्धो राजा रघुः विष्टरं सुखासनं जग्राह । किं कर्तुम् ? उपांशु एकान्ते धारणां एकादशबन्धयि(यु)तस्य धारणाम् । किं कर्तुम् ? परिचेतुं अभ्यसितुम् । एके इद वदन्ति । दर्भनिरोधिविष्टरं, दर्भः स्थिरो धार्यते आछा(च्छा)द्यते इति, दर्भनिरोधि आसनम् ॥१७॥

[2]१८. समपृच्छयतेति ।

युवा तरुणः भूपतिः अजः प्रत्यहं निरन्तरं अर्थसिद्धये कार्यसिद्धिनिमित्तं, सचिवैः मन्त्रिभिः सह(म)पृच्छय(च्छ्य)त । सम्बन्धो(द्धो) बभूव, संयुयुजे । प्रवयाः वृद्धो नृपः अपुनर्जननोपपत्तये अपुनर्भवप्राप्तये संयमिभिस्सह समपृच्छयत । किंभूतैः यतिभिः ? विनीतैः ॥१८॥

[2]१९. अन्विति ।

नवस्तरुणः प्रभुः प्रजाः अनुरञ्जयितुं लोकानुरागार्थं व्यवहारार्थ समानं (आसनं ?) आददे । प्रथमः रघुः धारणां परिचेतुं अभ्यसितुं यतं(त)ते स्म, यत्नं चक्रे । किंभूतो रघुः ? शुचिविश्रयः पवित्रासनस्थितः ॥१९॥

---

1 Duplication of letter by the scribe.

2. Jina VIII 18, 19 seem to be extra verses not read anywhere in Malli. They are read in Jina. only.

२०. अनयदिति ।

एको(कः) अजः प्रभुशक्तिसंपत् (दा) तथा अनन्तरान् पार्ष्णिग्राहादीन् नृपती-[न्] वशं संगतं (?) अनयत् (अनैषीत्)। अपरः रघुः प्रा(प्र)णिधानयोग्यया एकाग्र-ध्यानाभ्यासेन शरीरगोचरान् देहान्त(न्तः){र}स्थान् पञ्चमरुतः पवनान् वशं [अ]-नयत् ॥२०॥

[1]२१. नयनचक्षुरिति ।

अजः पररन्ध्रस्य परच्छिद्रस्य दिदृक्षया द्रष्टुमिच्छया मण्डले राजचक्रे नयचक्षुः नयलोचनं ततान विस्तारयामास । रघुः परं ज्योतिः आत्माख्यं ज्योतिः अवेक्षितुं द्रष्टुं हृदये वक्षःस्थले मनश्चित्तं समरोपयत्, निश्चलं चक्रे ॥२१॥

२२. अकरोदिति ।

क्षितेः(तौ) पृथिव्याः अधिरेश्वरः अजः द्विषदारम्भफलानि अरिकार्यारम्भफलानि भस्मसात् भस्मीभूतानि अकरोत् चकार। इतरो राजा ज्ञानमयेन चक्षुषा वह्निना अग्निना स्वकर्मणां दहने भस्मीकरणे ववृते प्रवृ[त्तः] ॥२२॥

२३. पणबन्धेति ।

अजः पणबन्धमुखान् पणबन्धः सन्धिः 'यदि त्वमिदं करोषि तदा[ऽ]हमपि तवाभिमतं सम्पादयामीति'। तत्र पणस्य बन्धत्वात् षट् गुणान् सन्धिविग्रहयानासनसंशय-द्वैधीभावान् उपायुङ्क्त, प्रयोजयामास । किं कृत्वा ? तत्फलं, तेषां गुणानां फलं समीक्ष्य, विलोक्य । रघुरपि गुणत्रयं सत्त्वरजस्तमोलक्षणं प्रकृतिस्थं मध्यमस्थमगमत्। समलौ(लो)-ष्ट(ष्टा)[श्म]काञ्चनः तुल्यदृषत्काञ्चनः ॥२३॥

२४. न नवेति (नव इति) ॥

नवः प्रभुः अजः आफलोदयात् कार्यसिद्धेर्यावत् कर्मणः क्रियायाः न विरराम न नि(न्य)वर्तते(त) । किंभूतः नव[ः] प्रभुः ? स्थिरकर्मा स्थिरकार्यः । च पुनः, नवेतरो रघुः परमात्मदर्शनात् परमज्योतिदर्शनात् योगविधेः षष्टांगयोगात् न विरराम । किंभूतो रघुः ? स्थिरधीः स्थिरप्रज्ञः ॥२४॥

---

1. Jina. VIII 21, is noted as a क्षेपक—Interpolated verse on pp, १६२, Edn. N. S. Bombay 1882, between Malli. VIII 19 & 20.

२५. इति शत्रुष्विति ।

उभौ नवपुराणौ नृपौ उभयां सिद्धिं अभ्युदयमोक्षलक्षणां अवापतुः प्रापतुः । किंभूतौ उभौ ? उदयापवर्गयोः राज्यमोक्षयोः प्रसृतौ प्रसक्तौ । पुनः किंभूतौ ? इति पूर्वोक्त-प्रकारेण प्रतिषिद्धप्रसरेषु निवारितदेशाक्रमणविजयासङ्गप्रवृत्तिषु निवारितप्रसरेषु शत्रुषु इन्द्रियेषु च जाग्रतौ सावधानौ ॥२५॥

२६. [अथेति] ।

अथानन्तरं रघुः योगसमाधिना तमसः अज्ञानात् परं दूरं अव्ययं अक्षयं पुरुषं आपत् प्रापत् । किं कृत्वा ? अजव्यपेक्षया पुत्रोपरोधेन काश्चित् कतिचित् समाः वर्षाणि गमयित्वा अतिवाह्य । किंभूतो रघुः ? समदर्शनः शत्रुमित्रयोः मानापमानयोः सुखदुःखयोश्च [सम]दृष्टिः ॥२६॥

२७. श्रुतदेहेति ।

अग्निवित् याज्ञिकः राघवः अजः यतिभिः सार्द्धं अस्य रघोः नैष्ठिकं अन्तः-(न्ते?) क्रियं(या)विधिं विदधे । किं कृत्वा ? चिरं अश्रूणि विसृज्य विमुच्य । किंभूतो राघवः ? पितुर्जनकस्य श्रुतदेहविसर्जनः, श्रुतं आकर्णितं देहस्य विसर्जनं त्यागो येन ॥२७॥

२८. अकरोदिति ।

च पुनः पितृकार्यकल्पवित् पितृकार्यविधिज्ञः स अजः पितृभक्त्या तदौर्द्ध्वदैहिकं द्वादशाहाधिकं श्राद्धं अकरोत् । हि निश्चितम् । तेन यथा योगविधिना तनुत्यजः प्राणिनः तनयावर्जितपिण्डकाङ्क्षिणः न भवन्ति । तनयेन आवर्जितं दत्तं पिण्डं काङ्क्षन्ति अभिलषन्ति एवंशीलास्तान् ॥२८॥

२९. स परार्ध्य० इति ।

स अजः जगति(त्) अप्रतिशासनं, न विद्यते प्रतिशासनं {न विद्यते प्रतिशासनं} [द्वितीया आज्ञा यत्र,] एकच्छत्रमित्यर्थः, कृतवान् । किंभूतः अजः ? शमिताधिः निवर्तितमनःपीडः । पुनः किंभूतः ? अजो[ऽ]धिज्यकार्मुकः आरोपितधनुः । किं कृत्वा ? सदर्थवेदिभिः परमार्थज्ञैः परार्ध्यगतेः पितुः मोक्षगामित्वात् उत्कृष्टगतेः पितुः अशोच्यतां । अशोचनीयतां उद्दिश्य आलोच्य ॥२९॥

३०. क्षितिरिन्दुरिति(मती०) ।

प्रथमा क्षितिः बहुरत्नसूः बहुरत्नप्रसविनी अभूत्, च पुनः, अपरा इन्दुमती वीरं सुतं अजीजनत् जनयामास । किं कृत्वा ? तं अग्र्यपा(पौ)रुषं अग्र्यं प्रधानं उत्कृष्टं पौरुषं यस्य स तं, पतिं आसाद्य । किंभूता इन्दुमती ? भामिनी मानिनी ॥३०॥

३१. दशरश्मीति ।

बुधाः पण्डिताः यं पुत्रं विदुः ब्रुवन्ति । किंभूतम् ? दशरश्मिशतोपमद्युतिं, दशरश्मीनां शतानि यस्य स दशरश्मिशतः । सूर्यः उपमा यस्य सः, एवं विधा द्युतिर्यस्य सः तम् । पुनः किंभूतम् ? यं दशस्वपि दिक्षु दिशासु यशसा कृत्वा विश्रुतं विख्यातम् । पुनः किंभूतम् ? आख्यया नाम्ना दशपूर्वरथं दश इति पदं पूर्वं यस्य स एवंविधो रथः दशपूर्वरथः । पुनः किं विशिष्टं यम् ? दशकण्ठारिगुरुं रामजनकम् ॥३१॥

३२. ऋषिदेवेति ।

स पार्थिवो बभौ शुशुभे । कैः ? श्रुतयागप्रसवैः स्वाध्याययज्ञसन्तानैः । किंभूतः पार्थिवः ? ऋषिदेवगणस्वधाभुजां मुनिसुरपितॄणां अनृणत्वं अ(आ)नृण्यं उपेयिवान् आप्तवान् । उत्प्रेक्ष(क्ष्य)ते—क इव ? परिधेः परिवेषात् मुक्ता(क्तः) उष्णदीधितिः ॥३२॥

३३. बलमा० ।

अस्याजस्य बलं शक्तिः आर्तत(भ)योपशान्तये आर्तत्रास{न}निवृत्त्यर्थं बभूव । तस्य बहुश्रुतं विद्यागमः विदुषां सन्नतये प्रणतये जातम् । तस्य विभोः अजस्य वसु द्रव्यं परप्रयोजनं बभूव । न केवलं वसु गुणवत्ताऽपि, गुणः अपि परप्रयोजनं(नः) बभूव ॥३३॥

३४. स कदाचिदिति ।

स सुप्रजाः कदाचित्कस्मिंश्चित्प्रस्तावे देव्या इन्दुमत्या सह नगरोपवने पुरोद्याने विजहार चिक्रीड । कस्मिन् क इव ? नन्दने मेरुवने मरुतां देवानां पालयिता पालक इव । किंभूतः मरुतो(तां) पालयिता ? स(श)चीसखः इन्द्राणीसहितः । किंभूतः अजः ? [अ]वि(वे)क्षितप्रजः [अ]वि(वे)क्षितो(ता) विलोकित(ता) प्रजा येन सः ॥३४॥

३५. अथेति ।

अथानन्तरम् । नारदो मुनिः रवेः सूर्यस्य उदयवृत्तिपथेन आकाशमार्गेण ईश्वरं उपवीणयितुं ययौ । किंभूतमीश्वरम् ? दक्षिणोदधेः दक्षिणसमुद्र[स्य] रोधसि तटे श्रितगोकर्णनिकेतं श्रितः आश्रितो गोकर्णाख्यो निकेतः आस्पदं {मूर्तिः ?} येन, श्रितगोकर्णेश्वरस्तम् ॥३५॥

३६. अहेति । [कुसुमैः०] ।[1]

किलेत्यागमे । वेगवान् वेगवाही मारुतः पवनस्तस्य नारदस्य स्रजं मालां

1 This is Malli. VIII. 34; but there seems to be चरणव्यत्यय. अहरत् किल० etc. which is read as the second half of the verse in Malli., is read here as first half, in Jina. VIII. 36.

अहरत् । किंभूतां स्रजम् ? अपार्थिवैः दिव्यैः कुसुमैः प्रसूनैः ग्रथितां रचिताम् । पुनः किंभूतां स्रजम् ? अ(आ)तोव्य(द्य) शिरोनिवेशितां वीणामूर्धनिबद्धाम् । उत्प्रेक्ष(क्ष्य)ते कयेव ? अधिवासस्पृहयेव सौरभलोभेन(ने)व ।।३६।।

३७. भ्रमे०(मरैः०) ।

मुनेर्नारदस्य पर(रि)वादिनी वीणा ददृशे । किंभूता परिवादिनी वीणा ? भ्रमरैः विनिकीर्णा व्याप्ता । किंभूतैर्भ्रमरैः ? सुमनोनुसारिभिः । वीणा किं कुर्वतीव ? बाष्पं अश्रु(श्रु) सृजतीव, मुञ्चतीव । किंभूतं बाष्पम् ? पवनावलेपजम् । पवनस्यावलेपो(ऽ)—पराधस्तस्माज्जातं पवनावलेपजं वातपरिभवम् । परिभवा(भूता) नारी रोदिति । पुनः किंभूतां ? अञ्जनाविलम्, कज्जलकालाम् (?)

३८. अभिभूयेति ।

अमरस्रज(ग्) देवमाला । नृपतेरजस्य दयितोर(रु)स्थलकोटिषु वल्लभावक्षःस्थलाग्रभागेषु । स्थितिं स्थानम् । आप प्राप । किं कृत्वा ? मधुगंध्य(धा)तिशयेन मकरन्द—सौरभविशेषेण वीरुधां लतानां आर्तवीं ऋतुसम्बन्धिनीं विभूतिं सौरभसम्पदं अभिभूय पराभूय ।।३८।।

३९. क्षणमात्रेति ।

क्षितिपालसुन्दरी इन्दुमती । पुनरप्रतिबोधलब्धये अपुनरावृत्तये निमिमील अमूर्च्छत् । न प्रतिबोधः अजागरणं अप्रतिबोधोऽप्रतिबोधस्य लब्धिः प्राप्तिः, तस्यै । किंभूता क्षितिपालसुन्दरी ? सुजातयोः पीवरस्तनयोः क्षणमात्रसखीं वयस्यां कुचालिङ्गात् तां मालां अवलोक्य विह्वला आकुला ।।३९।।

४०. सममेव० ।

सा इन्दुमती नराधिपेन अजेन सममेव क्षितेस्तलं पृथ्वीतलं अगमत् । किंभूतेन नराधिपेन ? गुरुसम्मोहविलुप्तचेतसा, गुरुणा संमोहेन नष्टं चेतो यस्य सः, तेन । केन सह केव ? तैलबिन्दुना सह नवदीपार्चिरिव । नवस्य तत्कालदत्तस्य दीप्तिरर्चिः ज्वाला ।।४०।।

४१. पाठान्तरम् । वपुषेति ।

सा इन्दुमती वपुषा शरीरेण निष्पतन्ती । पतिं अजमपि अपतत् (अपातयत्), पातयामास । किंभूतेन वपुषा ? करणोज्झितेन इन्द्रियत्यक्तेन । केन सह केव ? ननु निश्चितम् । तैलनिषेकबिन्दुना सह नवदीपार्चिः नवदीपकान्तिः, मेदिनीं पृथ्वीं, उपैति प्राप्नोति । यथा नवदीपार्चिः तैलबिन्दुना सह क्षितेर्मूलं पृथ्वीतलं गच्छति ।।४१।।

४२. उभयोरपीति ।

विहगाः पक्षिणस्तत्र वने समदुःखा इव समानशोका इव चुक्रुशुः अरुदन् । किंभूताः विहगाः ? कमलाकराश्रयाः पद्मखण्डशायिनः । किंभूताः पक्षिणः ? उभयोरजइन्दुमत्योः {परि}पार्श्ववर्तिनां दासदासीनां तुमुलेन संकुलेन, आर्तरवे(वो)[ऽ]थ रुदितः(त)—ध्वनिना वेजितास्त्रासिताः ॥४१॥

४३. नृपते[रि]ति ।

नृपतेरजस्य तमो मूर्च्छा व्यजनादिभिस्तालवृन्तहिमतोयादिभिर्नुनुदे निराकृता । तु पुनः । सा इन्दुमती तथैव संस्थिता तस्थौ । हि निश्चितम् । आयुषः शेषे अवशिष्टे सति प्रतिकारविधानं व्याधिप्रतिक्रियाकरणं फलाय कल्पते, सफलं भवतीत्यर्थः ॥४३॥

[1]४४. स निनाय० ।

स अजः दयितां इन्दुमतीं अङ्कमुत्सङ्गं निनाय, अनैषीत् । किंभूतो[ऽ]जः ? नितान्तवत्सलः अतिवात्सल्ययुक्तः । पुनः किंभूतो[ऽ]जः ? उदश्रुलोचनो बाष्पाविलनेत्रः । किंभूतां दयितां इन्दुमतीं अङ्कमुत्सङ्गं निनाय, अनैषीत् ? [2]{किंभूतो[ऽ]जः नितान्तवत्सलः, अतिवात्सल्ययुक्तः । पुनः किंभूतो[ऽ]जः ? उदश्रुलोचनो बाष्पाविलनेत्रः । किंभूतां दायिताम् ?} {द}क्षणात्क्षणमात्रं पर(रि)वृत्तप्रथमच्छविः, परिवृत्ता चलिता प्रथमा—[ऽऽ]द्याच्छविः कान्तिर्यस्याः सा ताम् । पुनः किंभूताम् ? सलिलोद्धृतपद्मिनीनिभाम् । विच्छायत्वाच्च सलिलोद्धृतायाः पद्मिन्याः निभां तुलां [यस्याः सा ?](or, निभा, ताम्) ॥४४॥

४५. प्रतीति ।

अथानन्तरं स राजा अजः अङ्गनां भार्यां परिगृह्य, गृहीत्वा, उचितं योग्यं अङ्कं उत्सङ्गं निनाय । कस्मात् ? सत्त्वविप्लवात् चैतन्याभावात् । किंभूतो राजा ? नितान्तवत्सलः । किंभूतां अङ्गनाम् ? प्रतियोजयितव्यवल्लकीसमवस्थाम् । प्रतियोजयितव्या [3]≮संस्काराया विस्तारा≯ (संस्कार्या ?) वीणा, तत्तुल्यावस्थाम् ॥४५॥

४६. पतीति (पतिरिति ।)

पतिः तया इन्दुमत्या सह उषसि प्रभाते आविलां कलुषां मृगलेखां कलङ्कलेखां विभ्रत् (न्) धारयत् (न्) चन्द्रमा इव अजायत । किंभूतया ? अङ्ग(ङ्क)निषन्ने(ण्ण)या

1 Jina. splits the verse. viz. Malli. VIII. 41 into two independent verses.

2 {..} repeated, through scribe's mistake.

3 Not clear.

उत्सङ्गोपविष्टया । पुनः किंभूतया तया ? करणापायविभिन्नवर्णया । करणानां इन्द्रियाणां अपायो विनाशः, तेन विभिन्नवर्णया विच्छायया ॥४६॥

४७. विललापेति ।

स अजः बाष्पगद्गदं यथा भवति तथा विललाप अशों(शो)चत । किं कृत्वा ? सहजामपि धीरतां धैर्यं अपहाय त्यक्त्वा । अभितप्तं अभितः समन्तात् तप्तं अयोऽपि लोहमपि मार्दवं भजते आश्रयते । शरी[रि]षु का इव [कथा] ? सहृदयेषु प्राणिषु के(कै)व कया(था) ? अवश्यमेव चलन्तीत्यर्थः ॥४७॥

४८. कुसुमा० ।

यदि कुसुमान्यपि गात्रसङ्गमात् आयुः अपोहितुं प्रभवन्ति समर्थानि भवन्ति, हन्ति(न्त) ! खेदे । विधेः दैवस्य अन्यत् किमिव साधनं, कार्यसाधनं [न]भविष्यति । किंभूतस्य विधेः ? प्रहरिष्यतः प्रहर्तुकामस्य ॥४८॥

४९. स इति ।

प्रजान्ति(न्त)कः यमराजः मृदुनैव कोमलवस्तुना{मृदु[ना]कोमलवस्तुना} मृदु कोमलं वस्तु हिंसितुं क्षपयितुमारभते । अत्र मे मम नलिनी पूर्वनिदर्शनं प्रथमदृष्टान्तं मता योग्या । किंभूता नलिनी ? हिमसेकविपत्तिः । हिमसेकेन तुषारपातेन विपत्तिर्विनाशो यस्याः ताम् ॥४९॥

५०. अथवेति ।

अथवा कर्मणा दैवेन एष सुरमाल्यरूप(पः){ता} दिव्यमालाकुसुम (दिव्यकुसुममाला)-वेशधारी अशनिः निर्मितः सृष्टः । यत् अनेन अशनिना तरुः वृक्षः [न] पातितः । तद्विटपाश्रया तत्काण्डश्रिता लता वल्ली क्षपिता विनाशिता ॥५०॥

५१. स्रगिति ।

यदि(दी)यं स्रग् माला जीवितापहा जीवितहन्त्री भवति तदा हृदये निहिता स्थापिता सति(ती) मां किं न हन्ति, किं न विनाशयति । विषमपि क्वचिद् अमृतं भवेत् वा अथवा क्वचिदमृतं विषं भवेत् । कया ? ईश्वरेच्छया ॥५१॥

५२. कृतवत्ये(ती)ति ।

हे प्रिये यदा मयि विषये, चिरं चिरकालं यावत् अपरेद्धेपि (अपराद्धेऽपि) अवधीरणां अवगणनां त्वं न कृतवती, [न] अभिभवसि । एकपदे सहसकारेण (सहसा ?) इमं मल्लक्षणं जनं कथं [न] मन्यसे न मानयसि ? किंभूतं माम् ? निरागसं निरा(र)-

पराधिनम् । पुनः किं विशिष्टं मल्लक्षणं जनम् ? आभाष्यं आलापयोग्यम् । इत्थं प्रलपतो मम{न ददासीत्यर्थः ।} कथं प्रतिवचनं न ददासीत्यर्थः ।।५२।।

५३. ध्रुवेति । (ध्रुवमिति) ।

हे शुचिस्मिते ! हे निर्मलहसिते । कथं निश्चितं अहं शठो धूर्तो[ऽ]स्मि । तव कैतववत्सलः, कैतवेन व्याजेन वत्सलो[ऽ]नुरक्तः विदितः ज्ञातः । यदितोऽस्मात्कारणात् असन्निवृत्तये अपुनरागमनाय परलोकं गताऽसि प्रय(या)ताऽसि किं कृत्य(त्वा) ? मां अनामन्त्र्य अनापृच्छ्य ।।५३।।

५४. दयितामिति ।

यदि तावत् इदं मम हतजीवितं दयितां अन्वगात् तया विना किं विनिवृत्तं, तु पुनः ? प्रबलां गुर्वीं आत्मकृतां वेदनां सहताम् ।।५४।।[1]

५५. सुरतेति ।

तु पुनः । तावत्ते तव मुखे सुरतश्रव(म)वारिबिन्दवः निधुवनजनिताः श्रमकणाः न विरमन्ति । अथवा त्वं आत्मना अस्तमिता अस्तं गता । देहभृतां प्राणिनां इमां असारतां निस्सारतां धिग् ।।५५।।

५६. मनसेति ।

हे प्रिये ! तव मनसा[ऽ]पि मया विप्रियं व्यलीकं न कृतपूर्वं, न विदधे । मां किं जहासि, किं त्यजसि ? ननु अहो अहं क्षितेः पृथिव्याः शब्दपतिः शब्दमात्रेण पतिः । अनुरागेण मे मम रतिः चित्तप्रीतिः त्वयि भावनिबन्धना{त्}, सद्भाव-कारणम् ।।५६।।

५७. कुसुमेति ।

हे करभोरु ! मारुतो वायुः मे मनः त्वदुपवर्तनशङ्कि{तं} {च उपावर्तनं शङ्कितं} इत्येवंशीलं तत् तथा करोति । पवनः किं कुर्वन् ? तव अलकान् ललाटकेशान् चलयन् कम्पयन् । किंभूतान् अलकान् ? भृङ्गरुचः भ्रमरच्छवीन् । पुनः किंभूतान् अलकान् ? वलीभृतः कुटिलान् । पुनः किंभूतान् ? कुसुमोत्खचितान् पुष्पालङ्-कृतान् ।।५७।।

५८. तदिति ।

हे प्रिये ! तस्मात्कारणात् प्रतिबोधनसंज्ञालाभेन आशु शीघ्रं मे मम विषाद-मपोहितुं विनाशितुं अर्हसि योग्या भवसि । केन कस्य किमिव ? औषधिः(धेः) ज्वलि-

1. The commentary is either too brief, or incomplete.

तेन नक्तं तुहिनाद्रेः गुहागतं तम इव । यथा औषधिज्वलितेन नक्तं रात्रौ तुहिनाद्रेः हिमाचलस्य गुहागतं तमोऽपोहितुं...निराकर्तुं अर्हसि ॥५८॥

५९. इदमिति ।

इदं तव मुखं मां दुनोति । किंभूतं मुखम् ? उच्छ्वसितालकं, उच्छ्वसिताश्चलिता अलका ललाटकेशाः यत्र तत् । पुनः किंभूतं मुखम् ? विश्रान्तकथं निवृत्तवचनम् । {न} मुखं किमिव ? निशि सुप्तं एकपङ्कजमिव । किंभूतं एकपङ्कजम् ? विरताभ्यन्तरषट्पदस्वनम् । विरतो निवृत्तोऽभ्यन्तरे मध्ये षट्पदस्वनो भ्रमररवो यस्य ॥५९॥

६०. [श]शिनमिति ।

[शर्वरी] पुनः शशिनं चन्द्रं एति आगच्छति । दयिता चक्रवाकी द्वन्द्वचरं पतत्रिणं चक्रवाकं एति । इति अनेन प्रकारेण तौ स्त्रीपुमांसौ विरहान्तरक्षतौ(मौ) विरहसहनसमर्थौ वर्तेते । अभ्य(त्य)न्त{र}गता मृता त्वं मां कथं न दहेः ॥६०॥

६१. नवपल्लवेति ।

हे इन्दुमति ! नवपल्लवसंस्तरेऽपि सरसकिशलयशयनेऽपि अर्पितं स्थापितं ते तव यत् अङ्गं दूयेत विषद्येत । हे वामोरु ! तदिदं अङ्गं चितारोहणं [कथं] विषहिष्यते सहिष्यते ।[1] तत् वद{इयं मे प्रति} इदं रस(श)ना मेखला त्वां अनुवृ(मृ)ता इव न लक्ष्यसे(ते) ? अपि तु लक्ष्यते ज्ञायते । कया ? शुचा शोकेन कृत्वा । किंभूतां त्वाम् ? अप्रतिबोधशायिनिं(नीं), अपुनरावृत्तिस्थापनशीलाम् । किंभूता रस(श)ना ? प्रथमा रहः सखी, एकान्तसखी । पुनः किंभूता सखी रशना ? गतिविभ्रमसादि(द)नीरवा गमनविलासनिवृत्तिनिःशब्दा ॥६१॥

६२. कलमन्येति ।

हे इन्दुमति ! एतानि वस्तूनि एतेषु स्थानेषु त्वया स्थापितानि । तेषां स्थितिमाह–अन्यभृतासु कोकिलासु विषये कलं मधुरभाषितं जल्पितं त्वयि(या) निहितं धृतम् । कलहंसि(सी)षु मदालसं मन्थरगतं गमनं धृतम् । पृषतीषु हरिणीषु विलोलं चटुलं ईक्षितं विलोकितम् । पवनाधृ(धू)तलतासु मारुतकम्पितासु शाखासु विभ्रमाः विलासाः धृताः ॥६२॥

६३. त्रिदिवोत्सुकेति ।

त्रिदिवोत्सुकया स्वर्गोन्मुखया[ऽ]पि त्वया मां अवेक्ष्य विलोक्य, सत्यं निश्चितं अमी पूर्वोक्ताः गुणाः निहिताः निक्षिप्ताः(प्ताः) । तु पुनः तव विरहे गुरुव्यथं अत्य-

1, Jina. has here mixed up the next verse. i.e. Mall!. VIII. ५८, P. १७२ (ibid.) also.

स्वस्थं मे मम हृदयं अवि(व)लम्बितं(तुं) आश्वासयितं(तुं) अमी गुणाः न क्षमाः न समर्थाः ॥६३॥ युग्मम् ॥

६४. मिथुनं(न)मिति ।

मिथुनं निश्चितं, इमौ एतौ सहकारः आम्रः फलिनी च प्रियङ्गुलता, त्वया मिथुनं परिकल्पितं दम्पतीत्वेन विकीर्यितम् (?) (निश्चितम् ?)। अनयोः एतयोः सहकार-फलिन्योः विवाहसत्क्रियां पर(रि)णयविधिं अविधाय अकृत्वा त्वया गम्यते चल्यते इति असाम्प्रतं अ{प्र}युक्तम् ॥६४॥

६५. कुसुममिति ।

हे इन्दुमति ! अयं अशोकः यस्मात्कारणात् कुसुमं उदीरयिष्यति जनयिष्यति। किंभूतो[ऽ]शोकः ? त्वया कृतदोहदः {कृतशोकः} । नु इति वितर्के । तत्कुसुमं{व} निवापमाल्यतां ऊर्ध्वदैहिकदानत्वं कथं नेष्यामि, प्रापयिष्यामि ? किंभूतं कुसुमम् ? अलकाभरणं ललाटकेशाभरणम् ॥६५॥

६६. स्मरतेति ।

हे सुगात्रि ! अमुना अशोकेन त्वं मो(शो)च्यसे । किंभूतेनाशोकेन ? कुसुमाश्रु-वर्षिणा पुष्पबाष्पवर्षिणा । अशोकेन केनेव ? अन्यदुर्लभं अन्येषां वृक्षाणां दुर्लभं सशब्दनूपुरं यत्र त्वच्चरणानुग्रहं, चरणेनानुग्रहः प्रहारस्तं, स्मरता इव ॥६६॥

६७. तवेति ।

हे किन्नरकण्ठि ! इदं किं सुप्यते ? शैय्यते ? किं कृत्वा ? विलासमेखलाम समाप्य अनिष्पाद्य । किंभूता विलासमेखला ? मया समं सह बकुलैः कुसुमैः अर्ध-चितां अर्धगुंथि(फि)ताम् । किंभूतैर्बकुलैः ? तव निःश्वसितानुवादिभिः । सुगन्धित्वात् त्वदीयनिःश्वासानुकारिभिः ॥६७॥

६८. समेति । [गृहिणीति ।][1]

हे इन्दुमति ! त्वां हरता करुणाविमुखेन वि(नि)र्दयेन मृत्युना यमेन, मम किं न

---

1. Jina. has given 'समेति' as the प्रतीक of this verse, which is Malli. VIII. 65. But actually he has commented on Malli. VIII. 67 here, viz. गृहिणी सचिवः॰ etc. which is not mentioned separately in Jina. So, we have supplied the प्रतीक viz. [गृहिणीति ॥]. Actually समदुःखसुखः॰ etc. which is Malli. VIII 65 is either not commented upon by Jina. or the scribe has missed it.

हृतम् ? तद्वद कथय । किं किं न हृतम् ? गृहिणी, भार्या, हला सचिवः हृतः हृतः । मिथः परस्परं सखा[1] मित्रं हृतः । ललिते सुरतादि{क}कलाविधौ प्रियशिष्या वल्लभशिष्या हृता ॥६८॥

६९. धृतिरिति ।

हे इन्दुमति ! अद्य मे मम द्युतिः सुखं, अस्तमिता । न केवलं द्युतिः अस्तमिता, रतिः रमणं श्रुता गता । गेयं गीतवाद्यादिकं विरतं समाप्तम् । ऋतुर्वसन्तादिकः निरुत्सवः निर्महोत्सवः जातः । आभरणप्रयोजनं अलङ्कारकार्यं गतम् । अद्य मे मम शयनीयं शय्या चिरशून्यं चिरकालशून्यं जातम् ॥६९॥ युग्मम् ॥

७०. मदिरेति ।

हे मदिराक्षि ! मदालसलोचने ! परलोकोपनतं दत्तं जलाञ्जलिं कथं नु अनुपास्यसि धयिष्यसि(?) (ग्रहिष्यसि ?) । किंभूतं जलाञ्जलिम् ? मे मम बाष्पदूषितम् । किं कृत्वा ? मदानन{ना}धृतं अस्मद्वदननिक्षिप्तं रसवत्सुस्वादं मधु मद्यं पीत्वा ॥७०॥

७१. विभवे[ऽ]पीति ।

हे इन्दुमति । विभवे[ऽ]पि समृद्धावपि सति त्वया विना अस्य अजस्य एतावत् त्वज्जीवितावधि सुखं गण्यतां जायताम् । विलोभनान्तरैः अन्याभिर्वनिताभि(भी) रहितस्य अनाक्रान्तस्य मम सर्वे विषया स्रक्चन्दनवनितादयः त्वदाश्रयास्त्वदधीनाः ॥७१॥

७२. विलपी(प)[न्नि]ति ।

कोशलाधिपोऽजः पृथ्वीरुहानपि वृक्षानपि स्रुतशाखारसबाष्पदुर्दिनान् श्रु(स्रु)तशाखारस एव बाष्पदुर्दिनं अश्रुवर्षो येषां तान् अकरोत् । किं कुर्वन् ? प्रियां प्रति पूर्वोक्तप्रकारेण विलपन् । {किंभूतां प्रियाम् ?} [किंभूतम् ?] करुणार्थग्रथितां(तं) कृपा(?)रससंबद्धा(द्ध)म् ॥७२॥

७३. अथेति ।

अथानन्तरम् । स्वजनः बान्धवः लोकस्त्वां(स्तां) सुन्दरीं प्रियां अनि(न)लाय अग्नये विससर्ज प्रो(प्रा)हिणोत् । किं कृत्वा ? तस्य अजस्य अङ्कतः उत्सङ्गात् कथंचित् महता कष्टेन अपनीय अपहृत्य । किंभूतां ताम् ? तदन्त्यमण्डनां तदेव कृतं अन्त्यं मण्डनं यस्यास्ताम् । किंभूताय अनि(न)लाय ? अगुरुचन्दनैधसे अगुरुचन्दनकाष्ठयुक्ताय ॥७३॥

---

1. Dr. Rewaprasad supports 'सखा' in favour of 'सखी'. Jina. also has 'सखा'.

७४. प्रमदेति । (प्रमदामिति ।)

नृपतिः शुचा शोकेन प्रमदां अनुसंस्थितः अनु मृत इति वाच्यदर्शनात् निन्दा-[ऽ]पवादात् देव्याः सह शरीरं अग्निसात् अग्न्यायत्तं न चकार । तु पुनः [न] जीविताशया, न तु जीविततृष्णया ।।७४।।

७५. अथेति । [स विवेश० ।][1]

अथानन्तरम् । तेन अजेन विदुषा स्थितिज्ञेन पुर एवोपवने नगर्य्याः उद्याने विधयः श्राद्धादिकाः वितेनिरे चक्रिरे । किंभूता विधयः ? महर्द्धयः महारम्भाः । किंभूतेन अजेन ? विदुषा स्थितिज्ञेन । किं कृत्वा ? गुणशेषां गेहिनीं प्रियामपि अपि-(प)दिश्य उद्दिश्य । क्व ? दशाहतः परो(रे) । दशाहोत्रः विधिविशेषः उच्यते । न तु दशदिनानि । क्षत्रियस्य द्वादशान्ये(ह्ने)न शौचः शुद्धिः । स अजः तया इन्दुमत्या विना पुरीं नगरीं विवेश प्राविशत् । किंभूतः सः ? क्षणदापायशशाङ्कदर्शनः । निशावज्ञात-(सान)शशिनि[भः] । किं कुर्वन् ? पौरवधूमुखाश्रुषु नगरनाय(यि)का{नगर}बाष्पेषु मूसुचः(स्वशुचः) निजपरिवाहमिव अवलोकयन् पश्यन् ।।७५।।

७६. [अथ] तमिति ।

आश्रमाश्रयः {निराश्रमं अत्यजत् ?} गुरुः वशि(सि)ष्ठः शिष्येण क्षा(छा)त्रेण कृत्वा तं अजं अन्वबोधयत् प्राबोधयत् । {किल}किं कृत्वा ? अभिषङ्गिणं दुःखितं विशामीश्वरं प्रजापतिं इत्यवेक्ष्य आलोक्य । किंभूतो गुरुः ? मखाय दीक्षितः ।।७६।।[2]

७७. असमाप्तेति ।

यतो मुनिः ऋषिः भवतापकारणं शोकहेतुं विद्वन्नपि जानन्नपि स्वयमात्मना भवन्तं त्वां न उपस्थितः नागच्छत् । किं कर्तुम् ? प्रकृतं(तौ) स्वभावे स्थापयितुम् । किंभूतं भवन्तम् ? स्वतश्च्युतं स्वतः आत्मनः च्युतं पतितम् । किंभूतो मुनिः ? असमाप्तव्रत-विधिः ।।७७।।

७८. मयीति ।

हे सुव्रत ! समाचार ! अज ! तस्य मुनेः सरस्वती वाणी मयि वर्तते । किंभूता सरस्वती ? लघुसन्देशपदा लघूनि अल्पानि सन्देशपदानि यस्याः सा । लघुसन्देशपदा ।

---

1 Under VIII 75, Jina, covers Malli, VIII 73 and VIII 74.

2 The number should be (७६). There is a mistake in the ms, which continues till the end of the सर्ग. We will read the corrected number only.

{हे} विश्रुतसत्त्वसारां विख्यातसत्त्वोत्कर्षां तां सरस्वतीं श्रृणु । च पुनः एनां वाणीं हि उपधातुं स्थापयितुं अर्हसि, योग्यो भवसि ॥७८॥

७९. पुरुषस्येति ।

हि निश्चितम् । स मुनिः ज्ञानमयेन चक्षुषा त्रितयं पश्यति । किंभूतेन चक्षुषा ? निष्प्रति{वि}घेन निरावरणेन । किं तत् त्रितयम् ? समतीतं च अतीतं [च] । भवच्च वर्तमानं भावि चानागतम् । केषु ? अजन्मनः अजरामरणस्य पुरुषस्य विष्णोः पदेषु भूर्भुवःस्वर्लक्षणेषु ॥७९॥

८०. चरत इति ।

किलेत्यागमे । हरिरिन्द्रः अस्मै तृणबिन्दुमुनये हरिणीं सुराङ्गनां अप्सरसं प्रजिघाय प्राहिणोत् प्रेषयामास । किं व(वि)शिष्टां तां हरिणीम् ? समाधिभेदिनीं ध्याननाशिनीम् । किंभूतो हरिः ? पूर्वापरं(पुरा ?) दुश्चरं दुष्करं तपः कुर्वतः तृणबिन्दोः राजर्षेः परिशङ्कितः इन्द्रपदहरणभयात् त्रस्तः ॥८०॥

८१. स इति ।

स मुनिः तृणबिन्दुः तां हरिणीं तपःप्रतिघातमन्युना तपोविघ्नरूपेण इति शशाप अशपत् । इतीति किम् ? मानुषी भव । किंभूतां ताम् ? प्रमुखाविष्कृतचारुविभ्रमाम् । प्रमुखं सन्मुखमाविष्कृतं तः) प्रकटितं(तः) चारु(रुः) प्रधानं(नः) विभ्रमं(मः) यया सा ताम् । पूर्वदर्शितचारुतरु(र)विलासाम् । किंभूतेन प्रतिघातमन्युना ? स(श)मवेलाप्रलयोर्मिणा । स(श)म एव उपशम एव वेला तस्याः प्रलयोर्मिणा कल्पान्ततरङ्गनिभेन ॥८१॥

८२. भगवन्निति ।

हे भगवन् मल्लक्षणो जनः परवान् परायत्तः । मे मम प्रतिकूलचरितं विरूपाचरितं क्षमस्व इति च उपनतां अनुनयवतीं अ(आ)सुरमाल्यदर्शनात् दिव्यकुसुमावलोकनावधिः क्षितिस्पृशं मानुषीं कृतवान् विदधे ॥८२॥

८३. क्रथकैशिकेति ।

विवशा परायत्ता सा हरिणी शापनिर्वृति(वृत्ति)कारणं शरपुष्पेण लक्षणं (शरपुष्पलक्षणं) उपलब्धवती प्राप । किं कृत्वा ? क्रथकैशिकवंशसंभवां चिराय चिरकालपर्यन्तं । तव महिषी भूत्वा । किंभूतं शापनिवृत्तिकारणम् ? दिव्यश्च्युतं दिवः स्वर्गात् पतितम् ॥८३॥

८४. तदलमिति ।

तत्तस्मात्कारणात् तदपायचिन्तया तद्विनाशशो(शो)केन अलं पू(कु)र्यताम् । उत्पत्तिग(म)तां संसारिणां विपद्विनाशलक्षणो...विपत् आपत् अव(उप)स्थिता नित्या । भो

राजन्! त्वया इयं वसुधा अवेक्ष्यतां पाल्यताम्। हि यतः नृपाः पार्थिवाः [व]सुमत्या पृथिव्या कृत्वा कलत्रिणः सदाराः भवन्ति ॥८४॥

८५. उदयेति।

भो अज! यत् त्वया आत्मना स्वस्य उदये अभ्युदयकाले श्रुतं शास्त्रं, आविष्कृतं प्रकटीकृतम्। किंभूतेन त्वया? अकार्यमुज्झता त्यजता तत्श्रुतम्। पुनः पुनरपि अक्लीबतया अदैन्येन प्रकाश्यतां प्रकटीक्रियताम्। कस्मिन् सति? मनसश्चित्तस्य ज्वरसंतापे{न} उपस्थिते समुत्पन्ने सति ॥८५॥

८६. रुदिताश्रु(रुदता कुत)इति।

अनुमृतेनानुमरणेन भवता राज्ञी पुनर्न लक्ष्य(भ्य)ते न प्राप्यते। ह्(रु)दता रोदा(द)नं कुर्वता, कुत एव कस्मात् लभ्यते? हि निश्चितं, परलोकजुषां परलोकगामिनां देहिनां प्राणिनां स्वकर्मभिः निजकर्मशुभाशुभैः गतयः सुरनरतिर्यक्लक्षणाः भिन्नपथाः भवन्ति ॥८६॥

८७. अपेति।

सोऽजः अपशोकमनाः शोकरहितचेताः त्वं निपावर्तिभिः (निवापदत्तिभिः) श्राद्धदानैः कृत्वा कुद्ध[म्बि]नीं भार्यां अनुगृह्णीष्व प्रसादय। किल इति प्रसिद्धौ। अतिसंततं अतिप्रबन्धप्रवृत्तं स्वजनाश्रु बान्धवाश्रुपातं(तः) प्रेतं मृतं दहति, भस्मीकरोति इति कथ्यते। यदुक्तम्–"प्रेष्या(श्लेष्मा)श्रुबांधवैस्त्यक्तं प्रेतो भुङ्क्ते यतोऽत्र सः। तस्मान्न रा(रो)दितव्यं हि क्रिया कार्या प्रयत्नतः[1] ॥८७॥

८८. मरणमिति।

शरीरिणां प्राणिनां मरणं प्रकृतिः स्वभावो बुधैः पण्डितैः, जीवितं विकृतिः विकारः उच्यते कथ्यते। यदि जन्तुः क्षणमपि मुहूर्तमपि श्वसन् जीवन्नवतिष्ठते नन्वसौ लाभवान् सौम्यलाभः ॥८८॥

८९. अवगच्छतीति।

मूढचेतनः मूढबुद्धिः प्रियनाशं वल्लभविनाशं अर्पितं शल्यं अवगच्छति अवबुध्यते। तु पुनः स्थीरधीः प्राज्ञस्तदेव शल्यं कुशलद्वारतया मोक्षोपायत्वेन समुद्धृतं समुत्पादितं मन्यते ॥८९॥

---

1 This verse is perhaps from याज्ञवल्क्यस्मृति as suggested by मल्लिनाथ (N. S Edn. 1882, P. 179. Some difference is noted in readings).

९०. स्वशरीरमिति ।

यदा स्वशरीरशरीरिणावपि निजदेहे(ह)निजदेहेश्वरौ स्मृतसंयोगवियोगविपर्ययौ भवतः । स्मृतौ कथितौ संयोगवियोगौ ययोस्तौ । विरहः बाह्यैर्बहिरङ्गैः विषयैः कलत्रादिभिः विपश्चितं पण्डितं किमिव अनुला(ता)पयेत् संतापयेत्, वद कथय ॥९०॥

९१. न पृथगिति ।

हे वशीनां जितेन्द्रियाणां उत्तम ! प्रधान ! पृथक्जनवत् पामरजनवत् शुचः शोकस्य वशं अधीनत्वं गन्तुं यातुं [न] अर्हसि, [न] योग्यो भवसि । द्रुमसानुमतां तरुपर्वतानां किमन्तरम् ? का व (को वि)शेषः यदि वायौ वाति सति ते द्वितये[ऽ]पि उभये[ऽ]पि चलाः प्रचलाः भवन्ति ॥९१॥

९२. स तथेति ।

स अजः मुनिं वामदेवं विससर्ज व्यसर्जयत् । किं कृत्वा ? तथेति तथास्तु[इति] विनेतुः गुरोः वचः वचनं प्रतिगृह्य अङ्गीकृत्य । किंभूतस्य गुरोः ? उदारमतेः उत्कृष्टबुद्धेः । किंभूतं वचः ? शोकघने शोकाक्रान्ते हृदि अलब्धपदं अप्राप्तावकाशम् । तद्वचनं अस्य गुरोः वसिष्ठस्य अन्तिकं समीपं प्रतियातमिव गतमिव ॥९२॥

९३. तेनेति ।

तेनाजेन अष्टौ समाः वर्षाणि कथञ्चित् महता कष्टेन परिगमिताः निर्गमिताः । केन ? सूनोः पुत्रस्य अवितथसंभृतेन । कस्मात् ? बाल्कत्वात् । अवितथं सफलम् । सूनृतं प्रियं वचनं यस्य सः, तेन । पुनः कैः ? स्वप्नेषु क्षणसमागमोत्सवैः क्षणिकमेलापकोत्सवैः ॥९३॥

९४. तस्येति ।

किलेति प्रसिद्धौ । शोकशङ्कुः शोककीलकं तस्याजस्य हृदयं प्रसह्य हृदयं बलात्कारेण विभेदे विदारयामास । कः कमिव ? प्लक्षप्ररोहः सौधतलमिव । यथा प्लक्षप्ररोहः न्यग्रोधाङ्कुरः सौधतलं धवलगृहतलम् {भिन्नम्} । स अजः प्राणान्तहेतुमपि जीवितान्तकरमपि वि(भि)षजां वैद्यानां असाध्यं अविचिकित्स्यं तं शोकशङ्कुं प्रियानुगमनत्वरया प्रियानुगमनो(नौ)त्सुक्येन लाभं मेने, अमंस्त ॥९४॥

९५. सम्यग्वि० ।

सम्यग्विनीतं कृतमेखलादिसंस्कारं वर्महरं कवचहरं कुमारं प्रजानां रक्षणविधौ राज्येऽभ्यषिञ्चदित्यर्थः । विधिवत् विधिपूर्वकमादिश्य आदेशं कृत्वा । किंभूतो नृपतिः ?

रागोपसृष्टतनुः पूर्वसति(दुर्वसतिं) मुमुक्षुः मोक्तुकामः । रोगेण वियोगदुःखभवेन व्याधी(धि)ना उपसृष्टा उपधृता या[ऽ]सौ तनुः सैव दुर्वसति(तिं) दुष्टस्थापनम् ॥९५॥

९६. तीर्थे इति ।

असौ अजः नन्दनाभ्यन्तरेषु नन्दनवनाभ्यंतरखचितेषु लीलागारेषु विलासवेश्मसु पुनः अरमत चिक्रीड । किंभूतो[ऽ]जः ? कान्तया इन्दुमत्या सङ्गतः मिलितः । किंभूतया कान्तया ? पूर्वाकाराधिकतररुचा । प्राक्तनरूपात् अधिकतरा मनोहरतरा कान्तिर्यस्याः सा, तया । किं कृत्वा ? जह्नुकन्यासरय्वोः गङ्गासरय्वोः तोयव्यतिकरभवे जलसम्पर्कजे तीर्थे देहत्यागात् शरीरपरित्यागात् सद्यः शीघ्रं अमर[ग]णनालेख्यं देवत्वं आसाद्य प्राप्य ॥९६॥ [1]अथानन्तरं नृपतिरजः प्रायोप्र(प)वेशनमतिर्बभूव । प्रायेण उपवेशने जलप्रवेशा(शे){ङ्गे} मतिर्यस्य सः । किं कृत्वा ? ॥

इति श्री भट्टारक० रघुकाव्यान्वयमात्रे प्रायोप्र(प)वेशनो नामाष्टमः सर्गः ॥

---

1 "अथानन्तरं... किं कृत्वा ?" is wrongly placed here by the scribe. Actually this should be read in the beginning of the commentary on VIII 96.

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

नवमः सर्गः ॥

१. पितुरिति ।

पितुः अनन्तरं उत्तरकोशलान् समधिगम्य प्राप्य, प्रशशास पालयामास । किंभूतो दशरथः ? समाधिजितेन्द्रियः । समाधीनां एकरूपतया संयमेन वा जितानीन्द्रियाणि येन सः । पुनः किंभूतो दशरथः ? महारथः । एको[ऽ]पि दशसहस्राणां योधा(द्धा) महारथी उच्यते । पुनः किंभूतो दशरथः ? अवतां भूपानां धुरि स्थितः अग्रणीः । किंभूतानां अवताम् ? यमवतां नियमवताम् । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः, विद्यन्ते येषां ते यमवन्तस्तेषाम् ॥१॥

२. अधिगतमिति ।

स दशरथः अधिगतं प्राप्तं यत् प्रकृतिमण्डलं [येन] । प्रकृतिशब्देन प्रधानाः मन्त्रिणः एवं एव उच्यन्ते । पुनर्नगरग्रहणात् विधिवत् अपालयत् । किंभूतं प्रकृतिमण्डलम् ? आत्मकुलोचितं निजवंशयोग्यम् । ततः तस्मात् हेतोः अस्य दशरथस्य गुणवत्तरं हितैकनिष्टं अभवत् । किंभूतं प्रकृतिमण्डलम् ? सनगरं, पुरसहितम् । किंभूतस्य दशरथस्य ? नगरन्ध्रकरो(रौ)जसः नगौ{क्रौञ्च}क्रौञ्चाख्यौ पर्वतौ तद्रन्ध्रकरौ विवरकरौ भार्गवकुमारौ परशुरामकार्तिकेयो(यौ) तयोरिव ओजस्तेजो यस्य सः, तस्य ॥२॥

३. उभयमिति ।

पण्डिताः कृतकर्मणां मध्ये कृतकार्याणां मध्ये समयवर्षितया, समये अवसरे वर्षतीति समयवर्षिणो भावः समयवर्षिता, तया । उभयमेव वदन्ति द्वयमेव कथयन्ति । किं तद् द्वयम् ? बलनिशू(ष)दनं इन्द्रं द्वितीयमर्थपतिं श्रमनुदं खेदहरम् । मुन(मनु)श्चासौ दण्डधरश्च राजा मनुदण्डधरः । स अन्वयो वंशो यस्य सः तम् ॥३॥

४. {अ}जनपदे० ।

गदो व्याधिः । जनपदे देशे, स्थानं नादधौ, न चक्रे । सपत्नजो रिपुजः अभिभवः कुत एव अजनन्दने पार्थिवे राजनि दशरथे सति ? [क्षितिः]फलवती सफला अभूत् बभूव । किंभूते अजनन्दने ? स(श)मरते प्रशान्ते । पुनः किंभूते ? अमरतेजसि सुरतुल्यतेजसि ॥४॥

५. दशदिगन्तेति ।

महीं पृथ्वी यथा रघुणा श्रियं अपुष्यत् पुपोष, ततस्तदनन्तरं मही तथा अजेन श्रियं अपुष्यत् । मही तं इनं स्वामिनं अधिगम्य प्राप्य, तथैव न बभौ इति न । अपि तु बभौ । किंभूतं तं दशरथम् ? अहीनपराक्रमं, [1]अहीनां इनः शेषः तस्य पराक्रम इव पराक्रमो यस्य सः, तम् ॥५॥

६. समतयेति ।

नराधिपः राजा दशरथः, समतया समवर्तितया, वसुवृष्टिसर्जनैः धनवर्षदानादिभिः असतां दुराचारिणां नियमनात् निग्रहात् यमपुण्यजनेश्वरौ कृतान्तधनदौ अनुययौ अनुचकार । किंभूतौ यमपुण्यजनेश्वरौ ? सवरुणौ वरुणसहितौ । रुच्या कान्त्या अरुणाग्रसरं रविं अनुययौ । दीप्त्या विसदृशः असतां नियमनाच्च वरुणतुल्यः । समवर्तित्वेन यमः दानेन धनदतुल्यः ॥६॥

७. न मृगयेति ।

मृगयाभिरतिः पापर्द्धिरतिः तं दशरथं [न] अपाहरत् न जहार । दुरोदरं द्यूतं ते (तं) न अपाहरत् मधु मद्यं ते(तं) न अपाहरत् । किंभूतं मधु ? शशी(शि)प्रतिमारम्भ-(भर)णं चन्द्रप्रतिबिम्बालंकरणम् । नवा नूतना प्रियतमा स्त्रीः तं च न अपाहरत् । किंभूता प्रियतमा ? नवयौवना । किंभूतं राजानम् ? उदयाय असु(भ्यु)दयाय यतमानं प्रयत्नं कुर्वन्तम् ॥७॥

८. न कृपणेति ।

तेन राज्ञा दशरथेन सपत्नजे शत्रुजनेऽपि परुषाक्षरं यथा भवति वाक् न च ईरिता ॥८॥[2]

९. उवेदेति । (उदयमिति ।)

वसुधाधिपाः राजानः रघूद्वहात् रघुधुरन्धरात् राज्ञः दशरथात् उदयं अभ्युदयं अस्तमयं नाशञ्च उभयं द्वयं आनसि(शि)रे, प्रापुः । हि यतः, स वसुधाधिपः दशरथ-(थो) निदेशं आज्ञां अलङ्घयतां कुर्वतां सुहृन्मित्रं अभूत्, प्रतिगर्जतां स्पर्द्धमानानां अयोहृदयः अभूत् ॥९॥

---

1 Clever and fresh explanation ! मल्लि० has—न हीनः पराक्रमः यस्य तमन्यूनपराक्रमं... (p. १८३, N. S. Edn. 1882)

2 At times the comm. is too brief.

१०. जघनैरिति[1] ।

स दशरथः रिपुदारगणान् शत्रुकलत्रसमूहान् बलान्(त्) हतान् अनलकान् अनुचितास्तु(श्रु)विलुप्तविशेषकान् [अकरोत्] । अनुचितास्तु(श्रु) अयोग्यास्तु(श्रु) [अ]-लक्षिततिलकान् [अकरोत्] । अत्र कपोलपत्रावली ज्ञेया । किंभूतान् रिपुदारगणान् ? निर्विषयीकृता निरास्पदीकृता मेखला येषां ते, तान् । श्रोणीपटपरित्यक्तरम्यान् । किंभूतो दशरथः ? अलकाधिपविक्रमः अलकाधिपो धनदः [तत्]तुल्यपराक्रमः ॥१०॥

११. अवनिमेकेति ।

अर्णवाः समुद्राः तस्य धनुर्भृतो दशरथस्य विजयदुंदुभितां विजयभूर्जत्वं (०मुरजत्वं) ययुः जग्मुः । किंभूता अर्णवाः ? घनरवाः । किल किंभूतस्य ? नरवाहनसम्पदः । नरवाहनो राजराजस्तस्येव सम्पदो यस्य सस्तस्य ॥११॥

१२. अजयदिति ।

स दशरथः एकरथेन मेदिनीं अजयत् जिगाय । किंभूतां मेदिनीम् ? उदधिनेमिं, समुद्रमेखलाम् । किंभूतो दशरथः ? अधिज्यशरासनः आरोपितधनुः । हि यतः, चमूः सेना अस्य राज्ञः केवलं जल(यं)अघोषयत् घोषयामास । किंभूता सेना ? गजवती हस्तिवती । पुनः किंभूताश्चमूः ? जवतीव्रहया, जवेन वेगेन तीव्रा उत्का हयाः यस्याः सा ॥१२॥

१३. क्षपितेति ।

पुरन्दराः(रः) इन्द्राः(न्द्रः) कुलिशेन वज्रेण शिखरिणां पर्वतानां क्षपितपक्षबलः छेदितपक्षबलः अभूत् । स राजा धनुषा चापेन द्विषां शत्रूणां क्षपितपक्षबलः छेदितपक्षबलः अभूत् । किंभूतेन धनुषा ? शरवृष्टिमुचा बाणवर्म(र्ष)मुचा । पुनः किंभूतेन धनुषा ? स्वनवता शब्दवता । कुलिशस्यापि विशेषणं क्रियते । किंभूतः स राजा ? नवतामरसाननः । नवकमलमुखः । इन्द्रस्यापि विशेषणम् ॥१३॥

१४. चरणयोरिति ।

शतशः शतसंख्या नृपतयः राजानः मुकुटरत्नमरीचिभिः मुकुटमणिमयूखैः कृत्वा चरणयोः पादयोः विषयभूतयोः तं दशरथं अस्पृशन् अस्प्राक्षुः । किंभूतं दशरथम् ? अखण्डविक्रमं अस्खलितपराक्रमम् । किंभूतैर्मुकुटमरीचिभिः ? नखरागसमृद्धिभिः नखानां रागो रक्तत्वं नखरागः समृद्धिः दीप्तिः सम्पद्येषां, तैः । यथा शब्द इवार्थे । कैः कमिव ? मरुतः देवाः शतमखं इन्द्रमिव ॥१४॥

---

1 १०–११श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । 'जघन...॥' pp. १८५. N. S. Edn., 1882, Bombay.

१५. निववृतेति ।

स राजा महार्णवरोधसः महोदधितटात् पुरीं नगरीं प्रतिनिववृते, प्रत्याययौ । किंभूतां पुरीम् ? अल्कानवमां अल्कावद् धनदपुरीवत् अनवमामुत्कृष्टाम् । अलकासमानाम् । किं कृत्वा ? सपत्नपरिग्रहान् रिपुदारान् समनुकम्प्य, अनुकम्पां कृत्वा । किंभूतान् सपत्नपरिग्रहान् ? अनलकान् न विद्यन्ते अलकाः ललाटकेशाः पतिवधात् येषां तान् । पुनः किंभूतान् ? सचिवकारितबालसुताञ्जलीन् । सचिवैः कारिताः बालसुता[नां]अञ्जलयो येषां तान् । शरणागतान्(नां)प्रणमतः(तां)शिशू(शू)नाम् {लोकेत्यर्थः} ॥१५॥

१६. उपगतो[ऽ]पीति ।

स राजा, अनलसः आलस्यरहितः अभूत् । किं कृत्वा ? श्रियं रन्ध्रचलां रन्ध्रेषु छिद्रेषु चलां अस्थिरां, तां अवेक्ष्य दृष्ट्वा । किंभूतो[ऽ]पि सः ? मण्डलनाभितां मण्ड[ल]स्य द्वादशराजचक्रस्य नाभितां {नाभीतां} नाभी(भि)स्थानीयत्वं उपगतो[ऽ]पि, प्राप्तो[ऽ]पि । पुनः किंभूतः सः ? अनुचितान्यसितातपवारणः । अनुचितं अयोग्यं, अन्यस्य सितातपवारणं श्वेतछत्रं यस्य सः । पुनः किंभूतः ? अनलसोमसमद्युतिः । अनलसोमसमा द्युतिः कान्तिर्यस्य सः । {असौ} रिपूणामसौ अग्निदीप्तिः अन्येषां तु शशिनिभः ॥१६॥

१७. तमिति ।

सकमला सह कमलेन पाणिपद्मेन वर्तते कमलदेवतालक्ष्मीः, अन्यं नृपतिं कं असेवत ? अपि तु कमपि न असेवत । किंभूतं नृपतिम् ? अर्थिषु याचकेषु अलाघवं सन्मानदातारं, अविद्यमानलघुत्वम् । किं कृत्वा ? ककुत्स्थकुलोद्भवं तं दशरथं च तं आत्मभुवं विष्णुपुरुषं अपहाय वर्जयित्वा । किंभूता लक्ष्मीः पतिव्रता सती ॥१७॥

१८. तमलं(ल)भन्त पतिमिति ।

पतिदेवता साध्व्यः मलयकोशलकेकयशासिनां मलयाख्योऽद्रिः, कोशलकेकयास्तु जनपदविशेषास्तदधिपतीनां दुहितारः पुत्र्यः, तं पतिं दशरथं अलभन्त, प्रापुः । केषां का कमिव ? शिखरिणां आपगाः सागरमिव । यथा शिखरिणां पर्वतानां आपगाः नद्यः सागरं पतिं लभन्ते । किंभूतं तम् ? अहितरोपितमार्गणं अहितानां शत्रूणां रोपिता निखाता मार्गणा बाणाः येन सस्तम् ॥१८॥

१९. प्रियतमेति ।

असौ राजा तिसृभिः प्रियतमाभिः वल्लभाभिः बभौ । तिसृभिरेव भ(श)क्तिभिः सह भुवमुपगतः प्राप्तः सन् भाति । किंभूतः असौ ? विनिषी(नी)षुः पालयितुमिच्छुः । असौ क इव ? हरिहयः इन्द्रं मि(इ)व । यथा हरिहयः इन्द्रः अरिहयो विचक्षणो भवति

अरिष्टेषु विपक्षक्षपकेषु योगेषु उपायेषु विचक्षणः प्रवीणः। दशरथस्यापि विशेषणं क्रियते ॥१९॥

२०. स इति।

किल निश्चितम्। स राजा दशरथः सुरवधूः देवाङ्गना स्वभुजवीर्यं निजदोर्बलं अगापयत् गापयामास। किं कृत्वा? संयुगमूर्ध्नि रणशिरसि मघवतः शक्रस्य सहायतां सहायकत्वं प्रतिपद्य प्राप्य। किंभूतः दशरथः? महारथः योद्धाः(धः)। किंभूतं स्वभुजवीर्यम्? उद्वृत्तं विस्तीर्णम्। किंभूताः सुरवधूः? शरैर्बाणैरवधूतभयाः अपनीतदैत्यत्रासाः ॥२०॥

२१. [असकृदेकेति।]

हि निश्चितम्। तरस्विना बलवता तेन राज्ञा असकृदेव निरन्तरमेव रणरेणवः सङ्ग्रामरजांसि, सुरद्विषां दैत्यानां, रुधिरेण रुरुधिरे रुद्धाः। किंभूताः रणरेणवः? दिनकराभिमुखाः सूर्याच्छादकाः। किंभूतेन तेन? धनुर्भृता धनुर्धरेण। पुनः किंभूतेन तेन? हरिहयाग्रसरेण इन्द्रपुरोयायिनः(ना) ॥२१॥

२२. क्रतुषु इति।

तेन राज्ञा तमसासरयु(यू)तटाः। तमसानदी सरयु(यू)नदी चे(चै)तयोस्तटाः, पुलिनानि यानि, कनकयु(यू)ष(प)समुच्छ्रयशोभिनो कृताः, कनकच्छुरितयूपोच्छ्रायरम्याः। कनकं हेम्नि। कनको नागकेसरे धत्तूरे चम्पके काञ्चनाङ्ककिंशुकयोरपि इति **हेमः**। अनेकार्थः। किंभूतेन तेन? क्रतुषु यज्ञेषु विसर्जितमौलिना विसर्जितो स(मु)क्तो मौलिः मुकुटं येना[ऽ]सौ। कल्पितकेशेन दीक्षितेन मुण्डिते[न] हि भाव्यम्। अथवा दूरीकृता किरीटिना। मौलिः किरीटे धम्मिल्ले इति **हेमः**। पुनः किंभूतेन तेन? भुजसमाहितदिग्वसुना, भुजाभ्यां समाहितं ढौकितं दिग्भ्यो वसु येन तेन। पुनः किंभूतेन? वितमसा, विगतं तमो मोहो यस्य सः, तेन ॥२२॥

२३. अजिनमिति। (अजिनेति।)

ईश्वरः दशरथः, तनुं शरीरं, अभासयत् अशोभयत्। किं कुर्वन्? अध्वरदीक्षितां अध्वराय यज्ञाय दीक्षितां अधिवसन् आश्रयन्। किंभूतां तनुम्? अजिनदण्डभृतम्। अजिनं मृगचर्म, दण्डः पलाशः। {दण्डः}तौ बिभर्तीति सा, ताम्। पुनः किंभूताम्? कुशमेखलां, दर्भमेखलाम्। पुनः किंभूताम्? यतगिरं, वाचंयमाम्। पुनः कथंभूताम्? मृगशृङ्गपरिग्रहाम्। मृगशृङ्गं परिग्रहो यत्र ताम्। पुनः किंभूतां तनुम्? असमभासां, उत्कृष्टकान्तिम् ॥२३॥

२४. अवभृथेति ।

स राजा केवलं नमूचेः दैत्यस्य अरये शक्राय शिरः उत्तमाङ्गं नमयति स्म । नमयामास । किंभूतं शिरः ? उन्नतं उच्चैस्तरम् । किंभूतः सः ? अवभृथप्रयतः, अवभृथे यज्ञान्तस्थाने प्रयतः प्रयत्नवान् । पुनः किंभूतः ? नियतेन्द्रियः । नियता[नि] नियमपराणि इन्द्रियाणि यस्यासौ जितेन्द्रियः । पुनः किंभूतः ? सुरसमाजसमाक्रमणोचितः, सुरसमाजे सुरसभायां आक्रमणोचितः आक्रमणयोग्यः । किंभूताय अरये ? वनमुचे जलवर्षिणे ॥२४॥

२५. अथ समेति ।

अथानन्तरं मधुर्वसन्तः समावृतः आजगाम । किं कर्तुमिव ? नवकुसुमैः तं एकनराधिपं दशरथं सेवितुमिव । किंभूतं एकनराधिपम् ? यमकुवेरजलेश्वरवज्रिणां समधुरं, समा धुः भारो यस्य सः, तं तुल्यभारम् । पुनः किंभूतम् ? अञ्चितविक्रमं प्रशस्यपौरुषम् ॥२५॥

२६. जिगमिषुरिति ।

रविः मलयं नगं अत्यजत् तत्याज । किं कुर्वन् ? हिमनिग्रहैः तुषारविनाशैः दिनमुखानि दिवसानि विमलयन् निर्मलीकुर्वन् । किंभूतो रविः ? रथयुजा सारथिना परिवर्तितवाहनः परिवर्तिताश्वः । रविः किं कर्तुमिच्छुः ? धनदाध्युसि(षि)तां उत्तरां दिशां जिगमिषुः ॥२६॥

२७. हिमविवेति[1] ।

रविः शनैः ययौ । किं कुर्वन् ? मलयाद्रिं मलयाचलं विरहयन् परित्यजन् । किंभूतं मलयाद्रिम् ? हिमविवर्णितचन्दनपल्लवं, हिमेन तुषारेण विवर्णिताः पाण्डुरीकृताः चन्दन-पल्लवा यत्र, तम् । किंभूतो रविः ? उदन्मुखः उत्तराभिमुखः । उत्प्रेक्ष(क्ष्य)ते । क इव ? विहगयोः चक्रवाकयोः कृपया इव, करुणया इव । किंभूतयोः विहगयोः ? अहर्विरहध्रुव-भेदयोः । अहर्विरहे दिनान्ते ध्रुवं अवश्यं {को} भेदो वियोगो ययोस्तयोः ॥२७॥

२८. कुसुमजन्म० ।

मधुर्वसन्तः इति अमुना प्रकारेण इति यथाक्रमं यथा परिपाटीं, वनस्थलीं वनभुवं, अवतीर्य आगत्य आविरभूत् प्रकटीबभूव । किंभूतां वनस्थलीम् ? द्रुमवतीं वृक्षवतीम् । प्रथमं कुसुमजन्म पुष्पोद्गमः । ततस्तदनन्तरं नवपल्लवाः नवकिश(स)लयाः । तदनु परं

1 २४–२५ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । 'हिमविवेति ।'
P. १८९, N. S. Edn. 1882, Bombay.

सुखमारुतं[1] सुखकारिपवनम् । कुसुमितद्रुमं पुष्पितवृक्षम् । उन्मदकोकिलं[2], तदुपभोगरसं उपभोगो रसो यत्र, तदुपभोगरसम् ॥२८॥

२९. व्रणेति ।

रविः सूर्यः तावत् विरलं अलं हिमं अशेषं अपोहितुं क्षपयितुं अलं, अत्यर्थं न कृतवान्, खलु न समर्थो बभूव । किंभूतं हिमम् ? व्रणगुरुप्रमदाधरदुस्सहम् । दशनगुरुव्रणत्वात् वनिताधरैः दुःसहम् । पुनः किंभूतं हिमम् ? जघननिर्विषयीकृतमेखलम् । जघनेषु निर्विषयीकृता त्याजिता मेखला रसना येन, आभरणानां अतिशीतलत्वात् ॥२९॥

३०. परभृते(तामि)ति[3] ।

परभृता कोकिला योषितां वनितानां कलहान्तरे रतिकलहमध्ये प्रियतमान् वल्लभान् अदुःखाप(प्त)समागमान् सुलभसङ्गमान् अकरोत् । किंभूता परि(र)भृता ? मृदुरवी(वा) कोमलध्वनिः । केव ? प्रियसखी अभिष्टसखी लघुवाक् मधुरवाक् इव । किंभूतानां योषिताम् ? वनितानां कलहान्तरे मदनक्षतचेतसां कामपीडितचेतसाम् ॥३०॥

३१. अभिनयादि(नि)ति ।

सहकारलता आम्रमञ्जरीकलीः[4] कामजितामपि नी(जि)[त]रागद्वेषि(षा)णामपि मनश्चेतः अमदयत् सविकारमकरोत् । किंभूता सहकारलता ? सकलिका सकुम्भिला । पुनः किंभूता सहकारलता ? मलयमारुतकम्पितपल्लवा । दक्ष(क्षि)णानिलघूर्णितपल्लवा ०किश(स)लयाः । पुनः किंभूताः ? परिन(ण)यात् अङ्गविक्षेपात् नृत्यविशेषात् परिचेतुमिव अभ्यसितुमिव उद्यता कृतप्रयत्ना ॥३१॥

३२. नयगुणेति ।

अलिनीरपतत्रिणा(णः) भ्रमरजलशकुन्तहंसाद्याः कमलिनीं पद्मिनीं तां अभिययुः । पुनः किंभूताम् ? सरसां सान्द्रां केकामिव । अर्थिनः याचकाः भूपतेः राज्ञः श्रियमिव ।

---

1. 2. 'सुखमारुतं' and 'उन्मदकोकिलं' are not read in Malli. (PP. 189, ibid). The N. S. Edn. does not take note of these even in the foot-note, nor can we place them in the verse, without disturbing the metre.

3. ३२–३३ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । P. १९१ N. S. Edn. 1882, Bombay.

4. ०'कलीः' is strange. Gujarati is 'कळी', meaning a bud. or, could it be '०कलिकाः' ?

किंभूतां श्रियम् ? नयगुणोपचितां नीतिगुणेन उपचितां वर्धिताम् । पुनः किंभूताम् ? सदुपकारफलां सज्जनोपकारफलाम् ॥३२॥

३३. कुसुममेवेति ।

अशोकतरोः अशोकवृक्षस्य कुसुममेव केवलं स्मरदीपनं बभूव । किसलयप्रसवो[ऽ]पि पल्लवोत्पत्तिरपि विलासिनां कामिनां मदयिता मदकृत् बभूव । किंभूतः किसलयप्रसवः ? दयिताश्रवणार्पितः । दयितया वल्लभया कर्णपूरीकृतः । किंभूतं कुसुमम् ? आर्तवं वसन्त-ऋतु-भवम् । पुनः किंभूतम् ? नवं प्रत्यग्रम् ॥३३॥

३४. विरचितामिति । (विरचिता इति) ।

कुरबकाः वृक्षाः मधुलिहां भ्रमराणां रवकरणं शब्दहेतुत्वं ययुः जग्मुः । किंभूताः कुरबकाः ? मकरन्ददानचतुराः । पुनः किंभूताः ? मधुना वसन्तेन रचिताः कृताः कुरबकाः । के इव ? उपवनश्रियां उद्यानलक्ष्मीणां अभिनवाः नव्याः पत्रविशेषकाः पद्मपल्लवा इव ॥३४॥

३५. दशनेति[1] ।

षट्पदैर्भ्रमरैः तिलकपुष्पं असेव्यत । तिलकपुष्पं किमिव ? मधोर्वसन्तस्य हसितमिव हास्यमिव। किंभूतं हसितम्? आसवगन्धी(न्धि)मद्यगन्धी(न्धि)। पुनः किंभूतम्? दशनचन्द्रिकया वा दन्तकान्त्या व्यवभासितं सुशोभितम् । किंभूतैः षट्पदैः ? सु(शु)चिरसं निर्मलमकरन्दं ईप्सुभिः पिपासुभिः इच्छद्भिः । किंभूतं शुचिरसम् ? निर्मलमकरन्दं चिरसञ्चितम् ॥३५॥

३६. अनलसेति ।[2]

अशोकलता अशोकमञ्जरी अध्वगयोषितां पथिकवनितानां मनश्चित्तं असमसो(शो)-कमकरोत् । किंभूता अशोकमञ्जरी ? अनला(ल)[सा]न्यभृता अनलसा पाने कूजिते चतुराः अन्यभृताः कोकिला यत्र । अनलसा आलस्यरहिता । अन्यभृता कोकिला यस्यां सा । पुनः किंभूता अन्यभृता ? कमलधूलीभृता कमलरेणुव्याप्ता । पुनः किंभूता ? मरुता वायुना ईरिता प्रेरिता । पुनः किंभूता ? कुसुमभारनता पुष्पभारनम्रा । किंभूतं मनः ? असमशोकं यतो विरहवशादसमशोकमतिदुःखितम् । कमलविकाशां(सं) मलयानिलवहन-पुष्पिताऽशोकलताश्च विरही(हि)न्यो(ण्यो) न सेहिरे ॥३६॥

---

1. २९–३० श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते ॥ "दशनेति ।"–P १९० N. S. Edn. 1882; Bombay.

2. '३५–३६ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते ॥ "अनलेति ॥" P. १९१, N. S. Edn. 1882, Bombay.

३७. लघयतीति ।[1]

सहकार[तरुः] तरुणि(णी)भिर्वह(र्वाहि)तां पत्यपराधजां प्रिय(या)पराधजनितां अविकरोषितां लघयति स्म । अपि तु न लता घटयति स्म । किंभूतः सहकारतरुः ? कुसुमितः पुष्पितः । पुनः किंभूतः ? उन्मदैः उन्मत्तैः अलिभिर्नमितः । पुनः किंभूतः ? सु(स्म)रसमाधिकरः, स्मरे कामे समाधिमेकाग्रतां करोतीति स्मरसमाधिकरः ॥३७॥

३८. सुवदनेति ।

कुसुमोद्गमः पुष्पाविर्भावः । मधुकरैः बकुलं केश(स)रतरुं आकुलं अकरोत् । किंभूतः कुसुमोद्गमः ? सुवदनावदनासव[सं]भृतः सुवदनानां सुमुखीनां वदनासवेन मुखगण्डुषेण सम्भृतः उत्पन्नः । पुनः किंभूतैः ? तदनुवादी(दि)गुणः तदनुवादिः मुखसौरभानुकारी गुणः सौरभं यस्य सः । किंभूतैः मधुकरैः ? मधुलोलुपैः रसलम्पटैः । पुनः किंभूतैः ? आत(य)तपङ्क्तिभिः ॥३८॥

३९. सुरभीति ।[2]

वनमालया काननश्रेण्या नवपलासं(शं) कुसुमं अधार्यत दध्रे । किंभूतं नवपलासं(शम्) ? सुरभिसङ्गमनं वसन्तसम्पर्कभवम् । पुनः किंभूतम् ? भङ्गुरम् । कया, कमिव ? अधिककुटिलं {कया किमिव} प्रमदया वनितया आर्द्रं नखक्षतं अभिनवकरजपदं रमणदत्तमिव । किंभूतया प्रमदया ? मदनेन यापिता निर्गामिता लज्जा यस्याः सा तया ॥३९॥

४०. उपहितमिति ।

किंशुके पलाशवृक्षे मुकुलजालं कुड्मलसमूहं अरोचत अशोभत । किंभूतं मुकुलजालं कुड्मलसमूहम् ? शिशिरापगमश्रिया वसन्तलक्ष्म्या उपहितं स्थापितम् । कया कस्मिन् किमिव ? प्रमदया नायिकया प्रणयिनि वल्लभे नखक्षता(त)मण्डलमिव । किंभूतया ? [या]पति(पित)लज्जया । मदगमितत्रपया ॥४०॥

४१. [प्रथममिति] ।[3]

प्रथममन्यभृताभिरुदीरिता गिरः वाचः कुसुमितासु सुरभिगन्धिषु वनराजिषु शुश्रुविरे । किंभूता गिरः ? मिताः । पुनः किंभूताः ? प्रथममन्यभृताभिरुदीरिताः, पूर्वं कोकिलाभिरुच्चरिताः गिरः । का इव ? प्रविरलाः अल्पाः मुग्धवधूकथा इव ॥४१॥

---

1 ३५–३६ श्लोकयोर्मध्ये क्षेपकः । P. १९१, N. S. Edn. 1882, Bombay.

2 This verse is read in Jina. only. The N. S. Edn. 1882, Bombay does not mention it anywhere. Dr. Rewaprasad in his कालिदासग्रन्थावली Edn.'76. takes note of it on p. १६८

3 The श्लोकप्रतीक is missing here But this is Malli. IX ३४, p. १९१, N, S. Edn. Bombay, 1882

४२. श्रुतिसुखेति ।

उपवनान्तलताः उद्यानशाखाः किशलयैः पल्लवैः बभुः शुशुभिरे । किंभूता उपवनान्तलताः ? श्रुतिसुखभ्रमरस्वरगीतयः । श्रुतिसुखं कर्णसुखदं भ्रमरस्वर एव गीतिर्गेयं यासाम् । पुनः किंभूताः ? कुसुमकोमलदन्तरुचः । कुसुमानि एव कोमला मनोज्ञाः दन्तरुचयो यासां ताः । किंभूतैः किशलयैः ? पवनाहतैः वायुचालितैः । किशलैः(लयैः) कैरिव ? सलयैः साभिनयैः नृत्यसहितैः पाणिभिः हस्तैरिव ॥४२॥

४३. ललितेति ।

अङ्गनाः नार्यः पतिषु मदं क्षीबत्वं निर्विव(वि)शुः अनुबभूवुः । किंभूतं मदम् ? ललितविभ्रमबन्धविचक्षणम् । ललितैर्मनोहरैः विभ्रमबन्धैर्विलासबन्धैः स्मितकटाक्षा(क्षैः) [परा]जितकेशरं, सौगन्ध्याविर्भूतबकुलम् । पुनः किंभूतम् ? स्मरसखं काममित्रम् । पुनः किंभूतम् ? रसखण्डनवर्जितं रसक्षेपरहितम् । रसखण्डनेन रसविघातेन वर्जितं रहितम् ॥४३॥

४४. शुशुभिरे [इ]ति ।

गृहदीर्घिकाः शुशुभिरे । का इव ? स्त्रिय इव । किंभूताः गृहदीर्घिकाः ? स्मितचारुतराननाः हसितरमणीयवदनाः । {पुनः किंभूताः ?} पुनः किंभूताः ? श्लथसिञ्जितमेखलाः । शिथिलितक्वणितमेखलाः । पुनः किंभूताः ? विकचतामरसाः विकसितकमलाः । पुनः किंभूताः ? मदकलोदकलोलविहंगमाः मदकलाः सोन्मदाः उदके लोलाश्च विहंगमाः पक्षिणो यासु ताः ॥४४॥

४५. उपययौ० ।

रजनीवधूः रात्रिवधूः वनितया नायिकया सदृशं यथा भवति तथा तनुतां उपययौ । किंभूता रजनीवधूः ? मधुखण्डिता मधुना वसन्तेन खण्डिता या सा । पुनः किंभूताः ? हिमकरोदयपाण्डुमुखच्छविः चन्द्रोदयविशदवदनदीप्तिः । किंभूतया वनितया ? इष्टसमागमनिर्वृत्तिं वल्लभसौख्यं अनि(नी)तया अप्राप्नुवत्या ॥४५॥

४६. अपी(पे)ति ।

हिमकरः चन्द्रः अंशुभिः कुसुमचापं कन्दर्पं अतेजयत् उद्दीपयत् । किंभूतैः अंशुभिः ? विशदप्रभैः निर्मलज्योत्स्नैः । अपि(प)तुषारतया हिमाभावतया । पुनः किंभूतैः ? सुरतरागपरिश्रमनोदिभिः निधुवनाभिषङ्गस्वेदविनाशकैः । किंभूतं कुसुमचापम् ? मकरोर्जितकेतनम् । मकर एक(व) ऊर्जितं तेजस्वि केतनं चिह्नं यस्य सः तम् ॥४६॥

४७. हुतहुताशनेति ।

युवतयः स्त्रियः आहितं उत्पन्नं तत्कुसुमं अलके दधुः । किंभूतं कुसुमम् ? दर(ल)केसरपेशलम् । दलैः पत्रैः केसरेण किञ्जल्केन पेशलं मनोज्ञं यत् तत् । तत्

किम्? यत् कुसुमवनश्रियः उद्यानलक्ष्म्यः कनकाभरणस्य प्रतिनिधिः, सदृशं, किंभूतम्? यत् कुसुमं हुतहुताशनदीप्ति आज्यादिसंधुक्षितवह्निभासुरम् ॥४७॥

४८. अलिभिरिति।

खलु तिलकः तिलकवृक्षः वनस्थलीं न शोभयति स्म [इति न]। अपि तु {न} शोभयति स्म। कः कामिव? तिलकः प्रमदामिव। किंभूतस्तिलकः? अलिभिः भ्रमरैः अङ्कितश्चिह्नितः। किंभूतैः अलिभिः? अञ्जनबिन्दुमनोहरैः कज्जलबिन्दुरम्यैः। पुनः किंभूतैः? कुसुमपङ्क्तिनिपातिभिः पुष्पविच्छिन्नगामी(मि)भिः ॥४८॥

४९. ध्वजपटमिति।

अलिव्रजाः भ्रमरसमूहाः कुसुमकेसररेणुं पुष्पकिञ्जल्करजः अन्वगुः अनुययुः। किंभूतं कुसुमकेसररेणुम्? धनुर्भृतः धनुर्धरस्य मदनस्य ध्वजपटं ध्वजवस्त्रं वशीकरणपटम्। पुनः किंभूतम्? छविकरं कान्तिकरं, पुनः किंभूतम्? ऋतुश्रियः वसन्तलक्ष्म्याः मुखचूर्णं मुखवासम्। पुनः किंभूतम्? सम(प)वनोत्थितं सम(प)वनं सवातं यत् उपवनं उद्यानं, तस्मादुत्थितम् ॥४९॥

५०. अनुभवन्निति।

पद्भरपि चतुरो[ऽ]पि आसनरज्जुपरिग्रहपातभयात् किल दृढं{र} रज्जुं गृहीत्वा प्रेङ्खा प्रेयत्(?) इति स्थितिः। भुजवल्लीं बाहुलतां मूर्खतां अनयत् निनाय। किं कुर्वन्? प्रियकण्ठजिघृक्षया कदाचित् पतन्ती वल्लभगले अवलम्बिक्ष्ये(ष्ये) इति बुद्ध्या। नवदोला प्रेङ्खा यत्र तं ऋतूत्सवं मदनोत्सवं अनुभवन् ॥५०॥

५१. त्यजतेति।

वधु(धू)जनः स्मरमते वसन्तसमये रम{य}ते स्म। अरमते(त)। कस्मिन्निव? परि(र)भृताभिः कोकिलाभिः निवेदिते कथिते इव। किम्? चतुरं वयः तारुण्यं वयः गतं पुनर्न एति न पुनर्व्यावर्तते। मानं अहङ्कारं त्यजत मुञ्चत। बत इति खेदे। विग्रहैः पर्याप्तम् ॥५१॥

५२. अमदयदिति।

वनमालिका वल्लिः तरुचारुविलासिना वृक्षर(रा)मणीयककौतुकिनां पुरुषाणां मनश्चितं अमदयत् सविकारं चकार। कया? स्मितरुचा विकाश(स)कान्त्या। किंभूता नवमालिका? कुसुमभारनता पुष्पभारनम्रा। किंभूतया स्मितरुचा? मधुगन्धसनाथया मकरन्दसौरभयुक्तया। पुनः किंभूतया? किश(स)लयाधरसङ्गतया किश(स)लयमेवाधरः तेन सङ्गतया

सहितया ।[1] एके तरु{रु}चारुविलासिनी तरोरालिङ्गनवशात् विसा(ला)लि(सि)नी । नवमालिकाया विशेषणं क्रियते ।।५२।।

५३. अरुणेति ।

एतै[ः] कामबलैः मन्मथसैन्यैः विलासिनः कामिन्यः(नः) अबलैकरसाः प्रियरागैः कनिष्ठाः कृताः । एतैः कैः ? अरुणरागनिशे(षे)विभिः । अरुणं रागं निशे(षे)वन्ते श्रियंतेः(यन्ते) अंशुकैः वस्त्रै[ः] । श्रवणलब्धपदैश्च कर्णप्राप्तस्थाने[ऽ]पि (०नैरपि) यवांकुरैः च पुनः परि(र)भृतां विरुतैः कोकिलाध्वनिभिः ।।५३।।

५४–५५. उपचितेति ।

तिलकजा{त}लकतरुसम्भवा मञ्जरी । अलकजाल[क]मौक्तिकैः ललाटकेशकलापमुक्ताफलैः सदृशकान्तिः तुल्यदीप्तिः अलक्ष(क्ष्य)त अज्ञायत । किंभूता मञ्जरी ? अलिकदम्बकयोगं भ्रमरसमूहसम्बन्धं उपेयुषी प्राप्तवती । पुनः किंभूता ? शुचिभिः कनैः(णैः) मकरन्दैरुपयुतावयवा वृद्धिंगता[ऽ]वयवा ।।५४–५५।।

५६. तिलकेति ।[2]

भृङ्गविलासिनां भ्रमरविलासिनां कामिनां अयुतैः दशसहस्त्रैः कलं मधुरं अगीयत । गानं चक्रे । किंभूतैः भृङ्गविलासिनां अयुतैः ? स्मरयुतैः सकामैः । पुनः किंभूतैः ? अबलासखैः स्त्रीसहितैः । तिलकमस्तकहर्म्यकृतास्पदैः तिलकतरुशिखरप्रासादं [आ]विष्टैः । पुनः किंभूतः ? कुसुममध्वनुषङ्गसुगन्धिभिः, कुसुमानां मकरन्दं तस्य अनुषङ्गः संपर्कस्तेन सुगन्धिभिः सुरभिभिः ।।५६।।

५७. गमयितुमिति[3]

बत इति खेदे । एषः पान्थवधूजनः महतीं मां सुखेन गमयितुं अतिवाहयितुं न प्रभुर्न समर्थः इति रजनी रात्रिः मधौ वसन्ते आयती महती न अभवत् । उत्प्रेक्ष्यते । कस्मादिव ? दयातः कृपातः इव । किंभूता रजनी ? रजनीशवती चन्द्रवती ।।५७।।

---

1 Jina. takes note of the variant viz. 'तरुचारुविलासिनी' as read in Malli. and also explains.

2 This verse is read only by Jina. It is not mentioned either as a क्षेपक or even as a variant in the N. S. Edn. 1882, Bombay.

3 ३०–३१ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । p. १९०, N. S. Edn. 1882 Malli.

५८. [अथेति ।]

अथा{था}नन्तरम् । नरपतिः दशरथः मृगयारतिः(तिं) पापर्द्धिसुखं चकमे अभिलाष । किं कृत्वा ? आर्तवं वसन्तोद्भवं महोत्सवं यथासुखं अनुभूय उपभुज्य । किंभूतो नरपतिः ? विलासवतीसखः कामिनीयुतः । पुनः किंभूतः ? {म}मधुमन्मधुमन्मथसन्निभः । मधु दैत्यं मथ्नाति इति मधुमत् नारायणः । मधुर्वसन्तः । मन्मथः कामः । तैः सन्निभः सदृशो यः{स्य} सः । एकस्मिन् पक्षे मधुमत् कुसुमं, मद्यसहितं उत्सवं महोत्सवं क्रियते । किंभूतः नृपतिः ? मधुमन्मथसन्निभः वसन्तकामसदृशः ॥५८॥

५९. परिचयमिति ।

अतः कारणात् स दशरथः सचिवैः मन्त्रिभिः अनुमतः अनुज्ञातः सन् ययौ जगाम । किंभूतः ? अनुमतः । भो राजन् मृगयाचललक्ष(क्ष्य)निपातने चलानां पक्षिप्रभृतीनां लक्ष्याणां निपातने वधे परिचल(यं) को(कौ)शलं करोति ॥५९॥[1]

६०. मृगवनेति ।

नृसविता पुरुषसूर्यः अश्वखू(खु)रोद्गतरेणुभिः अश्वखुरैः उद्धता उत्खाता ये रेणवस्तैः गम(ग)नं आकाशं सवितानमिव उल्लोचयुक्तमिव अकरोत् चकार । किंभूतो नृसविता ? मृगवनोपगमक्षमवेशभृत् । मृगप्रधानं वनं आखेटभूमिस्तदुपगमक्षमं तदुप[गम]-योग्यं वेशं लघुवस्त्रं बिभर्ति । पुनः कथंभूतः ? विपुलकण्ठनिषक्तशरासनः, विपुलकण्ठे निषक्तं लग्नं शरासनं धनुर्यस्य । वधकाले कल्ल(काल ?)क्षेपो मा भूदिति ॥६०॥

६१. ग्रथितेति ।

असौ राजा दशरथः रुरुवेष्टितभूमिषु मृगवनेषु मृगविशेषसेवितभूमिषु विरुरुचे शुशुभे । किंभूतः असौ ? वनमालया पुष्पपल्लवस्रजा ग्रथितमौलिः उद्बद्धकेशः । पुनः किंभूतः ? नवपलाश[स]वर्णतनुच्छदः नवपलाशपर्णनीलस्त(त)नुः तद्वलिका(?) यस्य सः । पुनः किंभूतः ? तुरगवल्गनचञ्चलकुण्डलः । तुरगवल्गनेन अश्वनर्तनेन चञ्चले कुण्डले यस्य सः ॥६१॥

६२. तन्विति ।

वनदेवता अध्वनि मार्गे तं दशरथं ददृशुः । किंभूतं तम् ? सुनयनं शोभननेत्रम् । पुनः किंभूतम् ? नयनंदितकोशलम् । नयेन न्यायेन नन्दिताः वर्धिताः कोशलाः येन सः तम् । किंभूताः वनदेवताः ? तनुलताविनिवेशितविग्रहाः ! तनुषु लतासु विनिवेशितः

1 The commentary on Vs. 59 seems to the incomplete.

आरोपितः विग्रहो देहो याभिस्ताः। पुनः किंभूताः ? भ्रमरसंक्रमितेक्षणाः, भ्रमरेषु संक्रमिताः न्यस्ताः ईक्षणवृत्तयो नयनव्यापाराः याभिस्ताः ।।६२।।

६३. श्वगणीति ।

स राजा दशरथः वनं नि(वि)वेश प्राविशत् । किंभूतं वनम् ? श्वगणिवागुरिकैः श्वगणाः विद्यन्ते येषां ते श्वगणाः(णि)[नः] चाण्डालाः, वागुराभिः पाशैः जीवितं चरन्ति वागुरिकास्तैः प्रथमास्थितं पूर्वाधिष्ठितम् । पुनः किंभूतम् ? व्यपगतानलदस्यु व्य[प] गता प्रशमिता अनला दावाग्नयो, दस्यवस्तस्करा यत्तत् (यस्मात्तत्) । पुनः किंभूतम् ? स्थिरतुरङ्ग[म]भूमि स्थिरा दृढा पादप्रहारक्षमा तुरङ्गमभूमिः यत्र तत् । किंभूतम् ? निपानवत् जलाशयवत् । पुनः किंभूतम् ? मृगवयोगवयोपचितं, मृगाः हरिणसिंहाद्याः वयांसि पक्षिणो, गवयाख्याः प्राणिनः तैः उपचितं स्फितम् ।।६३।।

६४. अथेति ।

अथानन्तरम् । नरवरो दशरथः अधिज्यं आरोपितगुणं धनुरुपाददे जग्राह । कः कमिव ? नभस्यः भाद्रपदमासः त्रिदशायुघः(धं) इन्द्रधनुरिव । किंभूतं धनुः ? कनक[पिङ्ग]-तडिद्गुणसङ्गतम् । कनकपिङ्गेण तडिद्गुणेन सङ्गतं युक्तम् । किंभूतः नरवरः ? अना-(न)विगतमानसव्यथः । पुनः किंभूतः ? [ख]रोषित केश(स)री खेण सिंहनादेन (? धनुष्टंकारेण) रोषिताः को(कुपिताः) केश(स)रिणः सिंहा येन सः ।।६४।।

६५. तस्येति ।

तस्य दशरथस्य पुरस्तात् मृगाणां यूथं स्तनप्रणयिभिः स्तनपानार्थिभिः एणसा(शा)-वैः मृगबालकैः व्याहन्यमानहरिणीगमनं कृतम् । व्याघातहरिणीगमनम् । पुनः किंभूतम् ? कुशगर्भमुखम् । पुनः किंभूतम् ? तदग्रसरगर्वितकृष्णसारम् । यूथस्य मार्गे(र्गो)पदेशत्वात् तदग्रेसरः अत एव गर्वितः कृष्णसारः कृष्णमृगो यत्र ।।६५।।

६६. तत्प्रार्थं(र्थि)तमिति ।

तत् मृगयूथं आकुलदृष्टिपातैः व्याकुलनिरीक्षणैः वनं श्यामीचकार कृष्णं चक्रे । कैः किमिव ? वातेरितोत्पलदलप्रकरैः पवनप्रेरितोत्पलदलप्रकरैः अन्तःपानीयैः । यथान्तः-पानीयं वायुना दोलितपत्रसमूहैः श्यामीक्रियते । किंभूतं मृगयूथम् ? जवना(न)-वाजिगतेन । {किंभूतं मृगयूथम् ? जवनवाजिगतेन} वेगवाहितुरङ्गस्थेन राज्ञा प्रार्थितम् । अभियुक्तं वेधीकृतम् । किंभूतेन राज्ञा ? तूणीमुखोद्धृतशरेण निशाङ्गवक्त्रानुगृहीतेषुणा । किंभूतं यूथम् ? विशीर्णपङ्क्ति विशस्तश्रेणि ।।६६।।

६७. लक्ष्मी(क्ष्यी)कृतस्येति ।

स धन्वी स दशरथः बाणं प्रतिसंजहार प्रतिसंजह्रे समवृणोत् । किंभूतः धन्वी ? कृपामृदुमनाः करुणार्द्रचित्तः । किंभूतं बाणम् ? आकृष्टकर्णी (आकर्णकृष्टम्) । कया ? कामितया मनोभिलाषया । किं कृत्वा ? लक्ष्मी(क्ष्यी)कृतस्य वध्यकृतस्य हरिणस्य देहं व्यवधाय आच्छाद्य स्थितां हरितां(णीं) सहचरीं मृगीं प्रेक्ष्य अवलोक्य । पुनः किंभूतो धन्वी ? हरिप्रभावः हरिरिन्द्रो विष्णुर्वा तत्तुल्यमाहात्म्यः ॥६७॥

६८. तस्यापरेष्वपि० ।

तस्य दशरथस्य निविडो[ऽ]पि दृढ(ढो)[ऽ]पि मुष्टिः कर्णान्तं एत्य आगत्य बिभिदे विवृतः । किंभूतस्य ? अपरेष्वपि मृगेषु शरान् बाणान् मुमुक्षोः मोक्तुकामस्य । किंभूतस्य तस्य ? त्रासातिमात्रचपलैः भयाधिकतरलैः सुनेत्रैः शोभननेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि चतुरवनितालोचनविलासव्यापारान् स्मरन्तः(तः) ॥६८॥

६९. उत्तस्थुषः० ।

स राजा द्रुतवराहकुलस्य पलायितशूकरयूथस्य मार्गं पंथानं जग्राह अग्रहीत् । किंभूतस्य द्रुतवराहकुलस्य ? शिशिरपल्वलपङ्कमध्यात् उत्तस्थुषः उत्थितस्य । किंभूतं मार्गम् ? मुस्त(स्ता)प्ररोहकवलावयवानुकीर्णम् । मुस्त(स्ता)प्ररोहाः मुस्तांकुराः एव कवला ग्रासास्तस्य(स्या)वयवैः खण्डैरवकीर्णं व्याप्तम् । पुनः किंभूतम् ? आयती(ता)भिर्दीर्घाभिः आर्द्रपदपङ्क्तिभिः आर्द्रचरणश्रेणिभिः सुव्यक्तं प्रकटम् ॥६९॥

७०. [तं] वाहनात्० ।

उद्धृतसटाः उर्ध्वीकृतस्कन्धदेशाः वराहास्तं दशरथं प्रतिहर्तुं प्रतिमारयितुं ईषुः अभिलिलेषुः । किंभूतां(तं) तम् ? वाहनात् अश्वात् अवनतोत्तरकायम् । < नमः नमः >[1] [नतः]उत्तरकायः पूर्वदेहभागो यस्य सस्तम् । पुनः किंभूतम् ? ईषद् विद्यतं(ध्यन्तं) प्रहारं कुर्वतम् । वराहाः सूकराः अस्य दशरथस्य ईषुभिः बाणैः कृत्वा जघनाश्रयेषु कटितटसम्बद्धेषु वृक्षेषु विद्धं आत्मानं स्वं, सहमा(सा) न विविदुः, न अज्ञासिषुः ॥७०॥

७१. तेनेति ।

पत्री बाणः तं महिषं प्रथमं घातयामास । स पत्री पश्चात् स्वयं पपात अपतत् । विग्रहं शरीरं निर्भिद्य । किंभूतः पत्री बाणः ? शोणितलिप्तपुङ्खः । {न} शोणितेन रक्तेन लिप्तः पुङ्खः यस्य सः । पुनः किंभूतः ? तेन राज्ञा निकृष्य आकृष्य वन्यस्य वनोद्भवस्य महिषस्य नेत्रविवरे चक्षुरन्ध्रे मुक्तः । किंभूतस्य महिषस्य ? अतिपातरभसस्य अतिपाते सन्मुखागमने रभसागमने रभसमुत्सु(मौत्सु)क्यं यस्य सस्तस्य ॥७१॥

---

1 < > – not clear.

७२. प्राय इति ।

नृपतिः दशरथः प्रायः प्रायेण निशितैः तीक्ष्णैः खु(क्षु)रप्रैः बाणैः खण्डान् गण्डकान् विषाणपरिमोक्षलघु(घू)त्तमाङ्गान् विषाणस्य श्रृङ्गस्य परिमोक्षश्छेदः तस्माल्लघून्युत्तमाङ्गानि शिरांसि येषां तान् चकार अकार्षीत् । स राजा परेषां शत्रूणां अभ्युच्छ्रितं उन्नतं श्रृङ्गं न ममृषे न सेहे । किंभूतः सः ? दृप्तविनयाधिकृतः । दृप्तानां सदर्पाणां विनये शिष्ये (?) (शिक्षायां ?) अधिकृतः नियुक्तः । च पुनः परेषां दीर्घमायुः न ममृषे [इति न ।] ॥७२॥

७३. व्याघ्रानिति ।

अभयः निर्भयः स राजा दशरथः गुहाभ्यः दरीभ्यः अभिमुखोत्पतितान् सन्मुखागतान् व्याघ्रान् निमेषात् क्षणात् तु(तू)णीचकार निषण्णीचकार । कया ? शिष्या(क्षा)विशेषलघुहस्ती(स्त)तया । किंभूतान् व्याघ्रान् ? शरपूरितवक्त्ररन्ध्रान् । शरैः पूरितं वक्त्ररन्ध्र मुखच्छिद्रं येषां तान् । व्याघ्रान् कानिव ? वातरुग्ला(ग्णा)न् वातभग्नान् । फुल्लासना[ग्र]विटपानिव फुल्लस्य आसनवृक्षस्य अग्रविटपान् प्रान्तशाखसञ्चयानिव ॥७३॥

७४. निर्घातेति ।

जिघांसुः हन्तुमिच्छन् स राजा ज्यानिर्घोषैः मौर्वीविस्फारैः सिंहान् क्षोभयामास अन्वक्षुभत् । किंभूतैः ज्यानिर्घोषैः ? निर्घातोग्रैः निर्घात्(तः) व्योम्नो(म्नि) यः शब्दः तद्वदुग्रैः । किंभूतान् सिंहान् ? कुञ्जलीनान् गुहास्थानात् (स्थितान्) । नूनं निश्चितम् । तेषां सिंहानां मृगाणां राजशब्दे अभ्यसूयपरः ईर्ष्यावान् अभूत् । किंभूते राजशब्दे ? वीर्योदग्रे बलोत्कृष्टे ॥७४॥

७५. तामि(नि)ति ।

काकुत्स्थो दशरथः मार्गणैः कृत्वा गजानां अ(आ)नृण्यं अनृणत्वं गतमिव प्राप्तमिव आत्मानं अमंस्त मेने । किं कृत्वा ? तान् सिंहान् हत्वा । किंभूतान् तान् ? रा(ग)जकुलतिलक(बद्धतीव्र)वैरान् हस्तीकेन सह बद्धं तीव्रवैरं यैस्ते तान् । पुनः किंभूतान् ? कुटिलनखाग्रलग्नमुक्तान् न(व)क्रनखरकोटिलग्नमुक्ताफलान् । किंभूतानां गजानाम् ? रणकृतकर्मणां समरोपयोगिनाम् ॥७५॥

७६. चमरेति ।

विवर्तिताश्वः विवर्तितो व्यावर्तितः अश्वो येन सः दशरथः क्वचित् प्रदेशे परितः समन्तात् चमरान् अरण्यवृषभान् सद्यः शीघ्रं शान्ति निनाय[1] अनैषीत् । किं कृत्वा ?

---

1 Jina. has aceepted the third and fourth चरण shown as variant चरण under Malli. ९।६६, P. २०१, N. S. Edn. Bombay, 1882.

सितबालव्यजनैः श्वेतचामरैः वियोज्य {जोटयित्वा[1] ?} त्रोटयित्वा । किंभूतो नृपतिः ? आकर्णविकृष्टभल्लवर्षी कर्णान्तं यावत् विकृष्टान् तीक्ष्णान् भल्लान् शरान् वर्षतीति सः । चमरान् कानिव ? नृपतीनिव । राजान्तरस्य असौ किल धवलं छत्रचामरं न सेहे । तथा तेषामपि चामराणि न सेहे ॥७६॥

७७. अपीति ।

स राजा दशरथः मयूरं बाणलक्षी(क्ष्यी) न चकार, न वेधयामास । किंभूतं मयूरम् ? अपि निश्चितं तुरङ्ग(ग)समीपात् तुरङ्गनिकटात् उत्पतन्तं पलायमानम् । पुनः किंभूतम् ? रुचिरकलापं, रम्यबर्हः (र्हम्) । किंभूतो दशरथः ? प्रियायाः केशपाशे केशकलापे सपदि शीघ्रं गतमनस्कः गतचित्तः । किंभूते केशपाशे ? चित्रमाला(ल्या)नुकीर्णे चित्रे पुष्पमाल्यानुकीर्णे व्याप्ते । पुनः किंभूते ? रतिविगलितबन्धे निधुवनलुलु(लि)तबन्दे ॥७७॥

७८. तस्येति ।

वनानिलः वनवातस्तस्य राज्ञः स्वेदं प्रस्वेदं आससाद नाशयामास । किंभूतं स्वेदम् ? कर्कशविहारसंभवं कठिनक्रीडसमुत्थम् । पुनः किंभूतम् ? आननविलग्नजालं-(ल)[कं] मुखश्लिष्टघर्मबिन्दुकः(कम्) । किंभूतः वनानी(नि)लः ? सतुषारशीकरः । शीतैः शीकरैः [सह] वर्तते इति सः । पुनः किंभूतः ? भिन्नपल्लवपुटः विस्तारितकिसलयपुटः ॥७८॥

७९. इतीति ।

मृगया पापर्द्धि प्रीतिः धराधिपं जहार वशीचकार । किंभूतं धराधिपम् ? इति विस्मृतान्यकरणीयम् । इत्थं विस्मृतकार्यान्तरम् । पुनः किंभूतम् ? आत्मनः स्वस्य सचिवावलम्बितधुरम् । सचिवैर्मन्त्रिभिरवलम्बिता धृता धुरा [रा]ज्यकर्मभारो यस्य तम् । पुनः किंभूतम् ? अनुबन्धसेवया अत्यासक्तिसेवया परिवृद्धरागम् । परिवृद्धो वृद्धिं गतो रागो रसो यस्य तम् ॥७९॥

८०. स ललितेति ।

स नरपतिः दशरथः क्वचित् प्रदेशे त्रियामां रात्रिं अतिवाहयांबभूव, अतिक्रमयामास । किंभूतां त्रियामाम् ? ललितकुसुमप्रवालशय्यां, ललिता मनोहरा कुसुमानां प्रवालानां पुष्पपल्लवानां शय्या शयनीयं यत्र, यस्यां सा, ताम् । पुनः किंभूताम् ? ज्वलितमहौषधिदीपिकासनाथाम् । ज्वलिताभिर्महौषधिभिरेव दीपिकाभिः सनाथां संयुक्ताम् । किंभूतो नरपतिः ? असमेतपरिच्छि(च्छ)दः असमेतः अमिलितः परिच्छदः पर(रि)वारो यस्य सः ॥८०॥

---

1 'जोटयित्वा'—Could this be a vernacular usage ?

८१. उषसीति ।

च पुनः स राजा उषसि प्रभाते चिक्रीड । किं कुर्वन् ? विहगविकूचि(जि)तबन्द्य-मङ्गलानि विहगविकूजितान्येव शकुनिविरतान्येव बन्द्यमङ्गलानि मधुरस्वराणि शृण्वन् आकर्णयन् । किंभूतः स राजा ? गजयूथकर्णतालैः हस्तिसमूहकर्णास्फालनैः विधूतनिद्रः अपगतनिद्रः । किंभूतैः गजयूथकर्णतालैः ? पटुपटहध्वनिभिः पटुप्रकटपटहवत् ध्वनिर्येषां ते, तैः ।।८१।।

८२. अथेति ।

अथानन्तरं स राजा कदाचित् विप(पि)ने गहने वने तुरङ्गमेण तमसां नदीं प्राप्य(प) । किंभूतां तमसां नदीम् ? तपस्विगाढां तपोधनव्याप्ताम् । किंभूतेन तुरङ्गमेण ? श्रमफेनमुचा, श्रमवशात् फेनं लालाजलं मुञ्चतीति श्रमफेनमुक्, तेन । किंभूतः स राजा ? पार्श्वचरैः अलक्ष(क्ष्य)माणः अदृश्यमानः । पुनः किंभूतः ? रुरोः मृगस्य गृहीतवर्त्मा गृहीतमार्गः ।।८२।।

८३. कुम्भपु(पू)रेति ।

तस्याः तमसायाः अम्भसि पानीये कुम्भपूरणभवः घटपूरणजः उच्चैः गम्भीरः पटुः{शब्दो}निना(न)दः शब्दः उच्चचार उदपादि । स राजा तत्र शब्दे शब्दपातिना शब्दानुस्वा(सा)रेण पतति व्रजतीति शब्दपाती, तं इषुं बाणं विससर्ज चिक्षेप । किंभूतः स राजा ? द्विरदबृंही(हि)तशङ्की गजध्वनितशङ्की ।।८३।।

८४. नृपतेः प्रतीति ।

नृपतेः राज्ञः यत् प्रतिषिद्धमेव प्रतिद्वन्द्वमेव तत् रभसकारित्वं पङ्क्तिरथः दशरथः अविशङ्क्य अविचार्य कृतवान् । हि यतः श्रुतवन्तो[ऽ]पि रजोनिमीलिताः रजोगुण-व्याप्ताः सन्तः अपथ्यमार्गे पदं स्थानं अर्पयन्ति स्थापयन्ति ।।८४।।

८५. हा तातेति ।

स क्षितिपो राजा दशरथोऽपि हा तातेति क्रंदितमाकर्ण्य तापात् पश्चात्तापात् अन्तर्मध्ये शल्य इव आसीत् बभूव । किं कृत्वा ? मुनिपुत्रं शल्यप्रोतं प्रेक्ष्य दृष्ट्वा । किंभूतं मुनिपुत्रम् । सकुम्भं, कुम्भयुक्तम् । राजा किं कुर्वन् ? तस्य क्रन्दितस्य प्रभवं स्थानं वेतसगूढं वृक्षविशेषछन्नं गुप्तं अन्विष(ष्य)न् गवेषयन् । किंभूतः क्षितिपः ? निषण्णः दुःखितः ।।८५।।

८६. तेनाववी(ती)र्य० ।

द्विजेतरतपस्विसुतः शूद्रः मुनिपुत्रः तस्मै राज्ञे स्खलितैः वेदनावशात् अक्षरपदैः आत्मानं कथयांबभूव कथयामास । किंभूतः द्विजेतरतपस्विसुतः ? सजलकुम्भनिषण्णदेहः सजलकुम्भं(म्भे) निषन्नं(ण्णः) स्थितं(तः) देहं(हः) शरीरं यस्य सः ॥८६॥

८७. तदिति(तच्चोदितेति) ।

च पुनः स राजा तं शूद्रं मुनिपुत्रं मातापित्रोः सकाशं समीपं निनाय अनैषीत् । किंभूतः स राजा ? तन्नो(च्चो)दितः प्रेरितः । किंभूतं तम् ? अनुद्धतशल्यं अनुत्खातशल्यम् । किंभूतयोः पित्रोः ? अवसन्नदृशोः अन्धयोः । च पुनः नृपः मातृपितृभ्यां ताभ्यां अजानतः अज्ञानात् स्वचरित्रं निजचरित्रं शशंस अकथयत् । किं कृत्वा ? तथागतं बाणाग(ह)तं एकपुत्रं ज्ञात्वा ॥८७

८८. ताविति ।

तौ दम्पती शिशोः ऋषिपुत्रस्य प्रहर्त्रा दशरथेन उरस्तः वक्षसः निखातं भग्नं शल्यं शरं उद(ज्ज)हार । [1] ≮उद्वीरवनितां≯ निष्कास(ष)यामास । किं कृत्वा ? बहु विलप्य । अथानन्तरं स मुनिपुत्रः परासुः गतः अभूत् बभूव । अथ पश्चात् वृद्धमुनिः नयनवारिभिः एकभूमिपतिं राजानं शशाप अशपत् । किंभूतैः नयनवारिभिः ? हस्तार्पितैः करनिहतैः ॥८८॥

८९. दिष्टान्तमिति ।

भवानपि अन्ते वयसि वार्धक्येन पुत्रशोकात् अहमिव दृ(दि)ष्टान्तं मरणं आप्स्यसि लप्स्यते इति उक्तवन्तं ऋषिं कोशलपतिः प्रोवाच इत्यवोचत् । किंभूतः कोशलपतिः ? प्रथमापराद्धः । तं कमिव ? आक्रान्तपूर्वं पादताडितं विषमुक्तं (मुक्तविषं) भुजंगं इव ॥८९॥

९०. आद्यो(शापो ऽ)पीति ।

हे मुने भगवता त्वया मयि विषये अयं शापः सानुग्रहः प्रसादरूपः पातितः दत्तः । किंभूते मयि ? अदृष्टतनयाननपद्मशोभे । अनीक्षितपुत्रवक्त्रांबुजशोभे । खलु निश्चितम् । इन्धनेद्धः दीप्तः । इन्धनपरिपुष्टः सन् ज्वलनः कृष्यां कृषियोग्यां क्षितिं पृथिवीं दहन्नपि भस्मीकुर्वन्नपि बीजप्ररोहजननीं करोति ॥९०॥

---

1 ≮ ≯ not clear.

९१. इत्थमिति ।

सभार्यः स मुनिः हुताशनवतः प्रज्वलितान् एधान् काष्टान् ययाचे याचितवान् । किंविशिष्टो मुनिः ? परासुं मृतं पुत्रं अनुगन्तुमनाः अनुयियासुः । भो मुने ! इत्थं पूर्वोक्तप्रकारेण गते सति भूते सति गतघृणः निर्लज्जः अयं मल्लक्षणो जनः किं विधत्ताम् ? किं कुरुताम् ? कथंभूतः अयं मल्लक्षणो जनः ? {त} तव वध्यः वधार्हः इति एवं प्रकारेण वसुधाधिपेन अभिहितः उक्तः ॥९१॥

९२. प्राप्तानुगेति (ग इति) ।

राजा सपदि शीघ्रं निवृत्तः पुरिं प्रत्याययौ । किं कृत्वा ? अस्य मुनेः शासनं आज्ञां संपाद्य विधाय । किं कुर्वन् ? शापं दधन् । कः कमिव ? अम्बुराशिः ज्वलनमौर्वमिव वडवानलमिव । किंभूतः राजा ? प्राप्तानुगः आगतानुचरः । पुनः किंभूतः ? पातकविलुप्तद्युतिः पातकेन विलुप्ता नाशिता द्युतिः समाधिर्यस्य सः । किंभूतं शापम् ? अन्तर्निविष्टपदं अन्तः हृदये निविष्टानि पदानि वाक्यं, "दिष्टान्तमाप्स्यति भवानपी"त्यादीन् यस्य तम् । पुनः किंभूतम् । आत्मविनाशहेतुम् ॥९२॥

इति श्री भट्टारक जिनचन्द्रसूरिशिष्याचार्य श्रीजिनसमुद्रविरचिते रघुवंशकाव्यान्वयमात्रे मृगयाप्रहारो नाम नवमः सर्गः ॥ श्री जिनाय नमः ॥[1]

---

1 "श्री जिनाय नमः" is not seen at other places in the colophones.

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

दशमः सर्गः॥

१. पृथिवीमिति ।

तस्य दशरथस्य पृथिवीं शासतः पालयतः किञ्चिन्न्यूनं शरदां वर्षाणां अयुतं दशसहस्राः ययौ । किंभूतस्य तस्य ? पाकशासनतेजसः । पाकशासनो(नः) इन्द्रः तस्य तेजा(ज) इव तेजो यस्य सस्तस्य । पुनः किंभूतस्य अनूनर्द्धिः अनूना महती ऋद्धिर्यस्य सः, तस्य ॥१॥

२. नेति ।

च पुनः स राजा सुताभिधानं पुत्राख्यं ज्योतिस्तेजः न उपलेभे न प्राप । किंभूतं ज्योतिः ? पूर्वेषां पितॄणां ऋणविमोक्षसाधनम् । ऋणस्य निर्मोक्षः आनृण्यं तस्य साधनं कारणम् । पुनः किंभूतः(तं) ज्योतिः ? सद्यः शीघ्रं शोकतमोपहम् ॥२॥

३. मनोर्वंश० ।[1]

मनोर्राज्ञः वंशस्तस्मिन् राज्ञी(ज्ञि) चिरं निमज्य [1]<ब्रूडित्वा>, पुनः पुनः अपि उत्थास्य(य) उत्था[तु]कामः शोणः नद इव अभवत् । यथा शोणो नदः अनार्यदेशेष्वन्तर्धाय पुनरुत्तिष्ठति इति । किंभूतः स मनोः वंशः ? अनभिव्यक्तसंततिः अप्रकट-सन्तानः ॥३॥

४. अतिष्ठत्प्रत्ययेति ।

स नृपः चिरं अतिष्ठत् । किंभूतः स नृपः ? प्रत्ययापेक्षसंततिः । प्रत्ययं कारणा{ता}न्तरमपेक्षत इति प्रत्ययापेक्ष(क्षा) संततिर्यस्य सः । क इव ? मन्थात् मथनात् । प्राक् पूर्वं, अनभिव्यक्तरत्नोत्पत्तिः अनभिव्यक्ता अप्रकटा रत्नोत्पत्तिरमृतशशिकौस्तुभादिका यस्य सः, तथा अर्णवः इव ॥४॥

५. ऋष्यं(श्य)शृं० ।

तस्य राज्ञः सन्ततिकाङ्क्षिणः सन्तानार्थिनः ऋष्यशृङ्गादयः ऋष्यशृङ्गवामदेव-जाबालिकात्यायनादयः ऋत्विजः याज्ञिकाः पुत्रीयां, पुत्राणां निमित्ता पुत्रीया, तां इष्टिं यज्ञं आरेभिरे प्रारब्धवन्तः । किंभूताः ऋत्विजः ? यतात्मानः यतेन्द्रियाः, सतं(संतः) साधवः ॥५॥

---

1. Read in Jina. only. Again, 'ब्रूडित्वा' is not clear.

६. तस्मिन्नवसरे० ।

तस्मिन्नवसरे पुत्रयज्ञप्रारम्भावसरे देवाः महेन्द्रादयः हरिं विष्णुं अभिजग्मुः शरणं गताः। किंभूताः देवाः ? पौलस्त्योपप्लुताः {रावणेन} रावणोपप्लुताः । के कमिव ? निदाघार्ताः घर्मपीडिताः अध्वगाः पथिकाः छायावृक्षमिव छायातरुमिव ॥६॥

७. ते च प्रापुरुद० ।

पुनः ते देवाः उदन्वन्तं समुद्रं प्रापुः प्राप्तवन्तः । आदिपु(पू)रुषः विष्णुः बुबुधे । हि यतः अत्या(व्या)क्षेपः अविलम्बिता भविष्यन्त्या भाविन्याः कार्यसिद्धेः लक्षणं चिह्नम् ॥७॥

८. भोगी भोगो० ।

दिवौकसः देवास्तं विष्णुं ददृशुः अद्राक्षुः। किंभूतं तम् ? तत्फणामण्डलोदर्चिर्मणि-द्योतितविग्रहम् ! शेषस्य यानि फणामण्डलानि तेषु उदर्चिषः देदीप्यमानाः ये मणयः तैर्द्योतितं(तः)प्रकटितं(तः) विग्रहः शरीरं यस्य तम् ॥८॥

९. श्रियः पद्म० ।

पुनः किंभूतं तं विष्णुं ददृशुः ? पद्मनिषन्ना(ण्णा)याः कमलोपविष्टायाः श्रियः लक्ष्म्याः अङ्के उत्सङ्गे वा निक्षिप्तं स्थापितं पदं [यस्य तम् ।] । किंभूते अङ्के ? क्षौमान्तरितमेखले । क्षौमेन पट्टांशुकेन अन्तरिता व्यवहिता मेखला यत्र । पुनः किंभूतः(ते)? आस्तीर्णकरपल्लवे। आस्तीर्णौ विस्तारितौ करपल्लवौ यत्र ॥९॥

१०. प्रबुद्धपुण्ड० ।

पुनः किंभूतं तं विष्णुम् ? प्रबुद्धपुण्डरीकाख्यं(क्षं), प्रबुद्धं विकसितं पुण्डरीकं कमलं, तत्तुल्ये अक्षिणी यस्य। पुनः किंभूतम् ? बालातपनिभांशुकम् । बालातपसदृशं वस्त्रं {बालातपसदृशं वस्त्रम्} । किमिव ? शारदं शरत्कालसंभवं दिवसमिव । किंभूतं दिवसम् ? प्रारम्भे उदयं(ये) सुखदर्शनम् ॥१०॥

११. प्रभानुलिप्त० ।

पुनः किंभूतं तं ददृशुः ? बृहता विस्तीर्णेन उरसा वक्षसा कौस्तुभाख्यं कौस्तुभरत्नं, अपां सारं मणिं विभूतं(भ्राणम्) । किंभूतं अपां सारम् ? प्रभानुलिप्तश्रीवत्सम् । प्रभया अनुलिप्तः आच्छादितः, श्रीवत्से(त्सं), उरसि लक्षणविशेषो, येन तम् । पुनः किंभूतं अपां सारम् ? लक्ष्मीविभ्रमदर्पणम् । लक्ष्मीविलासमुकुरं, सु(मु)खदर्शनात् ॥११॥

१२. बाहुभिर्विटपा० ।

पुनः किंभूतं तं ददृशुः ? बाहुभिर्भुजादण्डैः पयोमध्यात् आविर्भूतम् । कमिव ? अपरं द्वितीयं पारिजातमिव कल्पवृक्षमिव । किंभूतैर्बाहुभिर्भुजादण्डैः ? विटपाकारैः, विटपवत् आयतस्थूलैः । पुनः किंभूतैः ? हेमाभरणभूषितैः कनककटकालङ्कृतैः ॥१२॥

१३. दैत्यस्त्रीगण्डलेखानां [इति] ।

पुनः किंभूतं तं ददृशुः ? चेतनावद्भिः सजीवैः आयुधैश्चक्रादिभिरस्त्रैः उदीरितजयस्वनं उच्चारितजयशब्दम् । किंभूतैः आयुधैः ? दैत्यस्त्रीगण्डलेखानां असुरवनिताकपोलभित्तीनां मदरागविलोकि(पि)भिः क्षीवतालोहित्यभासिभिः (?), पतिवधात् ॥१३॥

१४. मुक्तशेष० ।

पुनः किंभूतं तं ददृशुः ? गरुत्मना गुरुडेन उपस्थितं सेवितम् । किंभूतेन गुरुत्मता ? विनीतेन विनयवता । पुनः किंभूतेन ? प्राञ्जलिना योजितकरेण । पुनः किंभूतेन ? मुक्तशेषविरोधेन, त्यक्तरोषा हि वैरेच्छा । पुनः किंभूतेन तेन ? कुलिशव्रणलक्ष्मणा वज्रक्षतचिह्नेन, अमृतहरणकाले शक्रेण सह युद्धत्वात् (?) ॥१४॥

१५. योगनिद्रान्तवि० ।

पुनः किंभूतं तं ददृशुः ? पावनैः पवित्रैः अवलोकितैः दृष्टिदानैः भग्वादि(दी)न् भगुमरिचिपुलस्त्यपुलहात्रिप्रभृतीन् ऋषीन् अनुगृह्णन्तं प्रसीदन्तम् । कथंभूतैः अवलोकितैः । योगनिद्रान्तनिर्मलैः । किंभूतान् ऋषीन् ? सौख्यशायि(य)निकान् सुखशयने ये पृच्छन्त सौख्यशायि(य)निकास्तान् ?।१५॥

अष्टभिरादिक्रियाकुलकम् ।

१६. प्रणिपत्येति ।

अथ अथानन्तरं सुरा देवास्तस्मै विष्णवे प्रणिपत्य प्रणम्य एनं नारायणं तुष्टुवुः अस्तुवन् । किंभूताय तस्मै ? सुरद्विषां दैत्यानां शमयित्रे विनाशयित्रे । किंभूतं एनम् ? स्तुत्यं स्तुतियोग्यम् । पुनः किंभूतम् ? आ(अ)वाङ्मनसगोचरम् वाक् च मनश्च वाङ्मनसी वाङ्मनसो[र]गोचरो विषयस्तम् । वाचो मनसश्च यावती तेषां शक्तिस्तत्पर्यन्तमित्यर्थः ॥१६॥

१७. नमो विश्व० ।

हे भगवन् ! तुभ्यं नमः । किंभूताय तुभ्यम् ? त्रिधा स्थितात्मने । त्रिधा त्रिभिः प्रकारैः हरिहरब्रह्मालक्षणैः स्थितः आत्मा यस्य सस्तस्मै । पुनः किंभूताय तुभ्यम् ? प्रथमं

विश्वसृजे । पुनः किंभूताय तुभ्यम् ? तदनु प्रश्चात् विश्वं जगत् बिभ्रते, विष्णुमूर्त्या पालयते । पुनः किंभूताय ? अथ पश्चात् विश्वस्य संहर्त्रे रुद्रात्मना क्षययित्रे ॥१७॥

१८. रसान्तराण्येक० ।

यथा दिव्यं मेघभवं एकरसं मधुरं पानीयं रसान्तरं < सदसद्भेदाल्लवणकटुकादीनि >[1] अश्नुते प्राप्नोति । क्व?देशे । गुणेषु सत्त्वरजस्तमोलक्षणेषु। एवं तव अवस्था(स्थाः) भवति(न्ति) । त्वं अविक्रियः विक्रियारहितः निर्विकारः ॥१८॥

१९. हृदयस्थमना० ।

भो भगवन् त्वां मनस्थं विदुः। भो भगवन् त्वां अकामं निरवि(भि)लासं(षं)-विदुः । त्वां तपस्विनं विदुः । त्वां दयालुं कृपालुं विदुः । त्वां हृदय(अनघ)स्पृष्टं पापाऽलिप्तं विदुः । पुराणं नित्यत्वात् विदुः । अजर(रं) जर(रा)रहितं विदुः ॥१९॥

२०. अमेयोमितलोक० ।

भो भगवन् ! अत्यन्तं अतिशयेन त्वं अमेयोऽपरिच्छेद्यः वर्तसे । त्वं मितलोकः परिमितलोकः ज्ञातलोकः वर्तसे । त्वं अव्यक्तः इन्द्रियागोचरः वर्तसे । त्वं व्यक्तकारणं व्यक्तस्य पृथिव्यादेः जगतः कारणं वर्तसे ॥२०॥

२१. एकः कारणतां[2] ० ।

एकः त्वं कारणतः कारणवशात् तां तां अवस्थां हरिहरब्रह्मालक्षणां प्रतिपद्यसे आश्रयसे । ते तव, नानात्वं अनेकप्रकारत्वं रागसंयोगात् मतं कथितम् । कस्येव ? स्फटिकस्येव यथा रागः स्फटिकस्य पञ्चप्रकारवर्णसंयोगात् नानात्वं भवसि (भजते) ॥२१॥

२२. सर्वज्ञस्त्वं० ।

भो भगवन् ! त्वं सर्वज्ञः वर्तसे । भो भगवन् त्वं अविज्ञातः, त्वां पुनः [न] कश्चिद्वेद । हे भगवन् त्वं सर्वयोनिः सर्वोत्प्रत्तिहेतुः । भो भगवन्, त्वं आत्मभूः स्वयंभूः, त्वं सर्वप्रभुः जगत्स्वामी ! भो भगवन् ! त्वं अनीशः, तव तु न कश्चिदीशः, भो भगवन् त्वं एकः । भो भगवन् त्वं सर्वरूपभाक् वर्तसे ॥२२॥

२३. सप्तसामोपगीतं० ।

भो भगवन् ! त्वां सप्तसामोपगीतं, सप्तभिर्नादस्वरसंख्यैः सामभिः सामवेदज्ञैः उपगीतः सप्तसामोपगीतस्त्वं, आचक्षुः कथयामासुः । त्वां सप्तार्णवजलेशयं, सप्तेषु अर्ण-

---

1 Not clear. Could it be (षड्रसान् लवण० ?)

2 १८–१९ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । p. २१०, N. S. Edn. Bombay, 1882.

वेषु जलेषु शेते यस्तं आचख्युः । भो भगवन्, त्वां सप्तार्चिर्मुखं, सप्तार्चिर्मुखं यस्य सस्तम् । अग्निमुखा वै देवाः आचख्युः । भो भगवन् ! त्वां सप्तलोकैकसंश्रयं, सप्तलोकाः एकः संश्रयः स्थानं यस्य, तम् ।[1] भुर्भुवःस्वस्तपोजनमहः सप्तानि सप्तलोकाः ।।२३।।

२४. चतुर्वर्ग{म}० ।

भो भगवन् ! त्वत्तः चतुर्मुखात् ब्रह्मस्वरूपात् त्वत्तः सर्वं जातम् । किं तत्सर्वम् ? चतुर्वर्गफलं, धर्मार्थकाममोक्षार्थफलं ज्ञानं भवति । भो भगवन् ! त्वत्तः चतुर्युगाः कालावस्थाः कृतयुगत्रेताद्वापरकलिलक्षणाः भवन्ति । त्वत्तः चतुर्वर्णमयो(याः) लोकाः ब्राह्मणक्षत्रियवैश्यशूद्ररूपा भवन्ति ।।२४।।

२५. अभ्यासनि० ।

योगिनः मुनयः मनसा त्वां हृदयाश्रमं(यं) हृदयमध्यस्थं विचिन्वन्ति ध्यायन्ति । कस्मै प्रयोजनाय ? विमुक्तये मोक्षाय । किंभूतेन मनसा ? अभ्यासनिगृहीतेन अभ्यासवशे अभ्यासे समीपे पुनरभ्यसने वा निगृहीतं निश्च{यं}येन । किंभूतं त्वाम् ? ज्योतिर्मयं, ज्योतिरूपम् ।।२५।।

२६. अजस्य० ।

भगवतः तव यथात्मं(याथात्म्यं), यथास्वरूपं त्वां को विदः ? (वेद ?), को जानाति । अपि तु न कोऽपि । किंभूतस्य तव ? अजस्य स्वयंभुवः । पुनः किंभूतस्य तव ? जन्म गृह्णतः दशावतारत्वात् । किंभूतस्य तव ? निरीहस्य निरभिलाषस्य । पुनः किंभूतस्य ? हतद्विषः हते(त)हिरण्यादिविपक्षस्य । पुनः किंभूतस्य ? स्वपतः योगनिद्रालोः । पुनः किंभूतस्य ? जागरूकस्य, जागरणशीलस्य ।।२६।।

२७. शब्दादीन्विषया० ।

भो भगवन् ! शब्दादीन्विषयान् भोक्तुं विलसितुं, दुश्चरस्तपश्चरितुं सेवितुं पर्याप्तोऽसि शक्तोऽसि । प्रजां पातुं रक्षितुं पर्याप्तोऽसि । औदासीन्येन निरपेक्षत्वेन वर्तितुं भवितुं पर्याप्तोऽसि ।।२७।।

२८. बहुधा० ।

अनेकधाऽपि आगमैः सिद्धान्तैः भिन्नाः पृथग्भूताः पन्थानः त्वयि एव निपतन्ति अनुप्रविशन्ति । किंभूताः पन्थानः ? सिद्धिहेतवः, मोक्षकारणानि । के कस्मिन्निव ? जाह्नी(ह्न)[वी]याः गङ्गासक्ताः नद्याः प्रवाहाः अर्णवे इव ।।२८।।

---

1 Malli. explains as – सप्तानां लोकानां भुर्भुवःस्वरादीनां एकसंश्रयम् । (p. २११, N. S. Edn. Bombay, 1881)–This is a better explanation.

२९. त्वदा(य्या)वेशित० ।

भो भगवन् ! त्वं अभूयः{सन्}सन्निवृत्तये अपुनरावृत्तये वीतरागाणां योगिनां त्वं गतिः, शरणं वर्तसे । किंभूतानां वीतरागाणाम् ? त्वदावेशितचित्तानो(नां), त्वय्यावेशितं निक्षिप्तं, त्वमेव सर्वमिति चित्तं यैस्ते तेषाम् । पुनः किंभूतानाम् ? त्वत्समर्पितकर्मणां, त्वयि समर्पितं न्यस्तं कर्म क्रियाफलं यैस्ते, तेषाम् ॥२९॥

३०. प्रत्यक्षो० ।

भो भगवन् ! तव मह्यादिः पृथ्वी-अप्-तेजो-वाय्वाकाशादिर्महिमा गरिमा, प्रत्यक्षोऽपि अपरिच्छेदः(द्यः), दुर्ज्ञेयः । आप्तवागनुमानाभ्यां आप्तवाग् आगमः, अनुमानं धूमवत्त्वादिति {ज्ञे} [अग्नि]हेतुरनुमानं, ताभ्यां साध्यं, साधयितुं, त्वां प्रति का कथा का वार्ता । यः प्रत्यक्षेण दुःसाध्यः स कथं प्रमाणान्तरैः साध्यः स्यात् ॥३०॥

३१. केवलं स्मर० ।

भो भगवन् ! {आ} ध्यानमात्रेणापि यदा पुरुषं पुनासि पवित्रीकरोषि, अनेन लिङ्गेन शेषाः अपरे वृत्तयः व्यापाराः त्वयि विषये निवेदितफलाः ज्ञातफलाः ॥३१॥

३२. उदधेरिव रत्नानि० ।

भो भगवन् ! ते तव चरितान्(नि) श्रुतिभ्यः दूरेण अतिशयेन व्यतिरिच्यन्ते पृथक् भवति(न्ति) अधिकीभवति(न्ति) । कस्मात् , कानीव ? विवस्वतः सूर्यात् तेजांसि इव । पुनः उदधेः समुद्रात् रत्नान्न(नी)व ॥३२॥

३३. अनवाप्त० ।

भो भगवन् ! ते तव अनवाप्तं अप्राप्तं अवाप्तव्यं प्राप्तव्यं किञ्चन वस्तु न विद्यते, न वर्तते । ते तव जन्मकर्मणोः जन्मकालयोः लोकानुग्रहः लोकप्रसाद एव हेतुः कारणम् ॥३३॥

३४. महिमानं० ।

भो भगवन् ! यत् यस्मात्कारणात् तव महिमानं गरी(रि)माणं [उ]त्कीर्त्यां(र्त्य) स्तुत्वा वचः संह्रीयते संक्षिप्यते तत् श्रमेण खेदेन वा विकल्पेन अशक्यात्(क्त्या) असमर्थतया, [न] गुणानां [इ]यत्तया, परिमितत्वेन ॥३४॥

३५. इति प्रसादयेति ।

ते सुराः इति तं अधोक्षजं विष्णुं प्रसादयामास अतोषयत् । हि यतः परमेष्ठिनः विष्णोः सा भूतार्थव्याहृतिः अवतीतार्थकथनं(?)[1] स्तुति र्न ॥३५॥

---

1 Not clear. Could it be 'अवस्थितार्थकथनं, ?

३६. तस्मै कुशलेति ।

सुराः देवास्तस्मै नारायणाय नैर्ऋतोदधेः राक्षससमुद्रात् भयं आचख्युः कथयामासुः । किंभूताः सुराः ? कुशलसंप्रश्नव्यञ्जितप्रीतयः । कुशलवार्तासंप्रश्ने व्यञ्जिता प्रकटिता प्रीतिः प्रसादः येषां (यस्य) ते (तस्मै) ॥ किंभूतान्(ताः) ? नैर्ऋतोदधेः, नैर्ऋतो राक्षसः, स एव महत्त्वादिभिः धर्मैः उदधिः समुद्रः तस्मात् [अ]प्रलयोद्वेलात्, प्रलयकालं विना उद्वेलो निर्मर्यादस्तस्मात् ॥३६॥

३७. अथ वेलासमासन्नेति ।

अथ अथानन्तरं भगवान् स्वरेण नादेन उवाच अब्रवीत् । किंभूतेन स्वरेण ? वेलासमासन्नशैलरन्ध्रानुनादिना । वेलायां समासन्नो निकटो यः शैलः पर्वतस्तस्य रन्ध्रेषु छिद्रेषु दरीषु अनु[व]दतीत्येवंशैलं(शील)स्तेन । किंभूतः भगवान् ? परिभूतार्णवध्वनिः, परिभूतः पराजितः अर्णवध्वनिः समुद्रगर्जितं येन सः ॥३७॥

३८. पुराणस्य० ।

तस्य पुराणस्य चिरन्तनस्य कवेः सर्वज्ञस्य भारती वाणी, पदसंस्कारात् चरितार्थ(र्था) इव कृतार्था इव, बभूव अभूत् । किंभूता सा भारती ? वर्णस्थानसमीरिता; वर्णानां अक्षराणां स्थानानि उरःकण्ठादीनि तेषु समीरिता उच्च(च्च)रिता । कविः किल संस्कृतपदं(दां) वाचमबि(भि)धत्ते ॥ तदा तस्याः चरितार्थता ॥३८॥

३९. बभासेदशनेति(बभौ सदशनेति ॥)

विभोः कृष्णस्य वदनोद्गता मुखनिःसृता सा दशनप्यो(ज्यो)त्स्ना दन्तकान्ति[ः] बभाषे शुशुभे । केव ? चरणात् विष्णुपदात् निर्यातशेषा निःसृतावशेषा ऊर्ध्वप्रवाहिनी ऊर्ध्ववर्तिनी गङ्गेव ॥३९॥

४० जाने वा(वो)० रक्षो(क्ष)[से]ति ।

वो युष्माकम् । अनुभावपराक्रमौ प्रभावपराक्रमौ रक्षसा रावणेन आक्र(क्रा)न्तौ ग्रस्तौ वर्तेते इत्यहं जाने । केषां, केन ? काविव ? अङ्गिनां प्राणिनां तमसा संहारगुणेन उभौ द्वौ प्रथममध्यमौ सत्त्वरजसि(सी) गुणाविव । यथाङ्गिनां प्राणिनां प्रथममध्यमौ सत्त्वरजसि(सी) गुणौ तमसा आक्रान्तौ वर्तेते ॥४०॥

४१. विदितं तप्येति ।

तेन रावणेन तप्यमानं भुवनत्रयं मे मम विदितं ज्ञातम् । केन, किमिव ? अकामोपनतेनेव निष्कारणोपस्थितेन एनसा पापेन साधोः सज्जनस्य हृदयं मनः इव ॥४१॥

४२. कार्येषु चैकेति ।

कार्येषु एककार्यत्वात् एकप्रयोजनं स्यात्, वज्रिणा इन्द्रेण, अहं [न] अभ्यर्थो(र्थ्योऽ)-स्मि अभ्यर्थनीयो नास्मि । हि यतः, वातः वायुः अग्नेः सारथ्यं स्वमेव सहायत्वं प्रतिपद्यसे(ते) आश्रयते ॥४२॥

४३. स्वासिधारेति ।

तेन राक्षसा रावणेन कामं निश्चितं दशमो मूर्धा, मे मम, चक्रस्य लव्यो लवनीयः, अंशः इव भाग इव स्थापितः अवशेषितः, यथा केनचित् पुरुषेण लव्यः छेदनीयः अंशः स्थाप्यते । किंभूतः मूर्धा ? स्वासिधारानपहृतः स्वखड्गधारया[ऽ]नपहृतः [अ]च्छिन्नः ॥४३॥

४४. स्रष्टुर्वराति० ।

तु पुनः, स्रष्टुः ब्रह्मणः वरातिसर्गात् वरदानात् तस्य दुरात्मनः रिपुः(पोः) रावणस्य मया अत्यारूढं अपराधं आक्रमणोत्कर्षं सोढं, सेहे । केन ? कस्येव ? चन्दनेन भोगिनः सर्पस्य इव ॥४४॥

४५. धातारं० ।

हि यस्मात्कारणात् स राक्षसः धातारं ब्रह्माणं, [दैव]सर्गात् [दैव]सृष्टेः अवध्यत्वं अविनाशकत्वं ययाचे प्रार्थयामास । किंभूतं धातारम् ? ब्रह्माणं तपसा प्रीतम् । किंभूतः राक्षसः ? मर्त्येषु मनुष्येषु आस्थापराङ्मुखः । कोऽर्थः ? आदरहीनः । किं {अ}-मर्त्याः वराकाः करिष्यन्तीति ॥४५॥

४६. सोऽहं दाशरथि० ।

सः अहं दाशरथिः दशरथतनयः भूत्वा तीक्ष्णैः शरैः तच्छिरकमलोच्चयं तस्य रावणस्य शिरांसि मस्तकानि तान्येव कमलानि तेषां उच्चयं समूहः(हं) रणभूमेः बलिक्षमं पूजायोग्यं करिष्यामि ॥४६॥

४७. अचिरा० ।

भो देवाः, अचिरात् शीघ्रं यज्वभिः याज्ञिकैः विधिवत् विधिपूर्वकं कल्पितं दत्तं भागं पुनः यूयं आदा{य}स्यध्वे प्राप्स्यतु । कथंभूतं भागम् ? मायाविभिः मायाशीलैः निशाचरैः राक्षसैः अनालीढं अनुच्छिष्टम् ॥४७॥

४८. वैमानिकाः० ।

वैमानिकाः विमानचारिणः पुष्पकालोकसंक्षोभं पुष्पकालोकनत्रासं त्यजन्तु मुञ्चन्तु । क्व ? मरुतां पथि, आकाशे । कथंभूताः वैमानिकाः ? पुण्यकृतः सुकृतिनः । पुनः किंभूताः ? मेघावरणतत्पराः मेघो(घे) रावण[भयादा]च्छादनं, तत्र तत्परास्तन्निष्ठाः ॥४८॥

४९. मोक्ष्यध्वे स्वर्ग० ।

स्वर्गबन्दि(न्दी)नां स्वर्गस्त्रीणां वेणीबन्धान् मोक्ष्यध्वे मोक्षय । किंभूतान् वेणीबन्धान् ? शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः अदूषितान् अविलुतान्(अविलुलितान् ?) अविकृतान् ?) । शापयन्त्रितेन बद्धेन पौलस्त्येन रावणेन बलात्कारात् हठात् कचग्रहाः केशकर्षणानि, तैः अनिच्छन्त्या नार्या विध्वंसनात् – तव शतधा मूर्धविशरणं स्यादिव(ति) स्वपितृव्याप्य(प)त्यनलकुबेरशापः ॥४९॥[1]

५०. रावणाव० ।

सः कृष्णमेघस्तिरोदधे । अदृश्यो बभूव । किं कृत्वा ? इति वागमृतेन जलेन मरुत्सस्यं दैवधान्य अभिवृष्य सिक्त्वा । किंभूतं मरुत्सस्यम् ? रावणावग्रहक्लान्तं, रावणावग्रहो अनावृष्टिस्तेन क्लान्तं अभिभूतम् ॥५०॥

५१. पुरुहूतेति ।

पुरुहूतप्रभृतयः इन्द्रादयः सुराः अंशैर्भागैः विष्णुं अनुययुः अनुजग्मुः । के, कैः, कमिव ? द्रुमाः पुष्पैः वायुमिव । यथा द्रुमाः वृक्षाः पुष्पैः वायुमनुगच्छन्ति । किंभूतं विष्णुम् ? सुरकार्योद्यतं देवकार्योद्यतम् ॥५१॥

५२. अथ तस्य० ।

अथ अथानन्तरं तस्य विशां पत्युः दशरथस्य काम्यस्य पुत्रेष्ट(ष्टि)लक्षणस्य कर्मणः यज्ञस्य अन्तो(न्ते) समाप्तौ अग्नेः अग्निमध्यतः पुरुषः दिव्यः प्रबभूव प्रकटीबभूव । केन सह ? ऋत्विजां याज्ञिकानां विस्मयेन आश्चर्येण सह ॥५२॥

५३. हेमपात्र० ।

पुनः किंभूतः पुरुषः ? हेमपात्रे कृतं स्थापितं पयश्चरुं{पयसापयश्चरुस्तम्}पयसा संभावितश्चरुरुपहारः दोर्भ्यां हस्ताभ्यां आददानः गृह्णन् । किंभूतं पयश्चरुम् ? आद्यस्य पुंसः विष्णोः अनुप्रवेशात् तेनापि दिव्यपुरुषेण दुर्वहं सोढुं अशक्यम् । अपि स्वस्याधिक्यद्योतनाय ॥५३॥ [युग्मम्]

---

1 The comm. does not make complete sense.

५४. प्रजापत्यो:० ।

नृपः दशरथः तत् अन्नं प्रत्यग्रहीत् प्रतिजग्राह । कः, कमिव ? वृषः पयसां अपां सारमिव । यथा वृषः इन्द्रः पयसां सारं रत्नं अमृतं प्रत्यग्रहीत् प्रतिजग्राह । किंभूतं रत्नम् । उदन्वता समुद्रेण आविष्कृतम् । किंभूतं अन्नम् ? प्रजापत्योपनीतम् । प्रजापतिः ब्रह्मा, तस्यायं प्राजापत्यस्तेनोपनीतं ढौकितम् । प्रजापतेरयं प्र(प्रा)जापत्यु-(त्यः),दिव्यः पुरुषः तेनोपनीतं ढौकितम् । प्राजापत्यशब्देनात्र वसिष्ठः ।।५४।।

५५. अनेन कथि० ।

अनेन हेतुना तस्य राज्ञः कथिता उक्ताः गुणाः अन्यदुर्लभां(भाः) अन्येषां नृपाणां दुर्लभाः{सापेक्षात् ?} आसन्, यत् यस्मात् कारणात् त्रैल्योक्यप्रभवो[ऽ]पि विष्णुरपि तस्मिन् दशरथे {निवृत्तं} प्रसूतिं चकमे अभिललाष ।।५५।।

५६. स तेजो वैष्ण० ।

स राजा चरुसंज्ञितं वैष्णवं विष्णुसक्तं तेजः पत्न्याः कौशल्यायाः कैकेय्याः विभेजे विभागपूर्वकं ददौ । कः, किं, कयोरिव ? अहर्पतिः प्रत्यग्रं नूतनं आतपं द्यावापृथित्र्योः रोदस्योरिव । यथा अहर्पतिः श्रीसूर्यः प्रत्यग्रं नवं आतपं द्यावापृथिव्योः भजते ।।५६।।

५७. अर्चिता त० ।

तस्य राज्ञः कौश(स)ल्या अर्चिता वर्तते । कैकेयी(केकय)वंशजाः{कैकेयी}प्रियाः प्रेमास्पदं विद्यंते अतः अस्मात्कारणात् ईश्वरः दशरथस्ताभ्यां कौसल्याकैकेयीभ्यां संभावितां कृतसंविभागां समभागीकृतां सुमित्रां अयोजयतां समैक्ष(च्छ)त ।{[1]एष ते प्रयच्छतां नित्यै दासीत्वमाललम्ब इत्यर्थः} ।।५७।।

५८. ते बहुज्ञस्य० ।

ते उभे पत्न्यौ चरोः भक्ष(क्ष्य ?)विशेषस्य अर्धार्धऽभागेन तां सुमित्रां मुदेक्षितां अयोजयतां संविभजेताम् । किंभूते उभे ? बहुज्ञस्य बहुविदः राज्ञः चित्तज्ञो(ज्ञे) ।।५८।।

५९. सा हि प्रणय० ।

हि स्फुटं निश्चितं, सा सुमित्रा उभयोरपि पत्न्योः कौसल्याकैकेय्योः, प्रणयवती स्नेहवती आसीत् । कस्य, कयोः, केव ? वारणस्य मदनिष्यन्दलेखयोः मदक्षरणराज्योः भ्रमरी इव, यथा वारणस्य गजस्य मदनिष्यन्दलेखयोः भ्रमरी प्रणयवती भवति ।।५९।।

---

1 {एष...} The words are not clear.

६०. ताभिर्गर्भः० ।

कौसल्यासुमित्राकैकेयीभिः गर्भः दध्रे धृतः । प्रजाभूत्यै लोकाभ्युदयाय । किंभूतः गर्भः ? देवांशसंभवः । [देवांशात्] उत्पत्तिर्यस्य सः । काभिः, क इव ? अमृताख्याभिः अमृतनाम्नीभिः सौरि(री)भिः, सूर्यसंबंधिनीभिः नाडीभिः किरणैः, अम्मयः अपां विकारोऽवयवो वा, अम्मयो जलमयः, यथा सौरि(री)भिः नाडीभिः किरणैः अम्मयः जलमयः गर्भः धृ(ध्रि)यते ॥६०॥

६१. सममाप० ।

समकालं आपन्नसत्त्वाः अंतर्वत्यः गर्भवत्यः प्राप्तगर्भास्ताः राज्ञः बभ्रुः(रेजुः)-शुशुभिरे । ताः । क इव ? सस्यानां धान्यानां सम्पदः इव । किंभूताः संपदः ? अंतर्गतफलारंभाः अंतर्गतो मध्यस्थः फलारंभो यासां ताः । पुनः किंभूताः संपदः ? अ(आ) पाण्डुरत्विषः, आ ईषत् पाण्डुराः शुभ्राः त्विट् कान्तिः यासां ताः । संपदः विशेषणमपि क्रियते ॥६१॥

६२. गुप्तं ददृशुः० ।

च पुनः सर्वा तिस्रः अपि पत्न्यः स्वप्ने दा(वा)मनैः वामरूपधारिभिः गुप्तं रक्षितुं(तं) आत्मानं ददृशुः आलोकयामासुः । किंभूतैः दा(वा)मनैः ? असिशङ्खगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः । असिशङ्खगदाशार्ङ्गचक्रैः लाञ्छिताऽङ्किता मूर्तिर्येषां, तेषाम् (ताभिः) ॥६२॥

६३. हेमप(पा)त्रप्र[भा]० ।

राज्ञः(ज्ञा) सुपर्णेन उह्यन्ते स्म धार्यन्ते स्म । गगने च शब्दात् भूमौ हेमपात्रप्रभाजालं स्वर्णपक्षप्रभावृन्दं वितन्वता प्रसारिता (प्रसारयता) । कथंभूतेन सुपर्णेन ? वेगाकृष्टपयोमुचा, वेगेन आकृष्टा अपवाहिताः पयोमुचो मेघाः ये[न] ॥६३॥

६४. बिभ्रत्या० ।

ताः स्वप्ने च लक्ष्म्या पर्युपास्यन्त असेव्यन्त {स्म} । किंभूतया ? स्तनान्तरविलंबिनं पयोधरमध्यकृतं कौस्तुभन्यासं कौस्तुभमणिनिक्षेपं बिभ्रत्या धारयन्त्या । किंभूतया ? पद्मव्यजनहस्तया, पद्ममेव तालवृन्तं व्यजनं, यस्याम् (यस्याः तया) ॥६४॥

६५. कृताभि० ।

सप्तभिः ब्रह्मर्षिभिः उपतस्थिरे अपूज्यन्त । किंभूतैः ब्रह्मर्षिभिः ? परं ब्रह्म, वेदरहस्यं गृणद्भिः स्तुवन्ति(द्भिः) । पुनः किंभूतैः ? दिव्यायां गङ्गायां ति(त्रि)स्रोतसि कृताभिषेकैः कृतस्नातैः(नैः) ॥६५॥

६६. ताभ्यस्तथा० ।

प्रीतो[ऽ]पि संतुष्टो[ऽ]पि पार्थिवः दशरथः राजा आत्मानं परार्द्धं(र्ध्यं){आत्मानं} उत्कृष्टं मेने अमंस्त । केन ? जगद्गुरोः विष्णोः गुरुत्वेन । किं कृत्वा ? ताभ्यः राज्ञीभ्यः तथाभि(वि)धान् तादृशान् स्वप्नान् श्रुत्वा, आकर्ण्य ॥६६॥

६७. विभक्तात्मा० ।

विभुः विष्णुः तासां दशरथपत्नीनां कुक्षिषु उदरेषु एकः अनेकधा अनेकप्रकारेण उवास । वस निवासे । उषितवान् । कासाम् ? क इव ? प्रसन्नानां निर्मलानां अपां प्रतिमाचन्द्र इव । यथा प्रतिमाचन्द्रः प्रतिबिम्बप्रसन्नानां अपां मध्ये एकस्मिन् (? एकः) अनेकधा वसति । किंभूतः विभुः ? विभक्तात्मा ॥६७॥

६८. अथाग्रमहिषी० ।

अथ अथानन्तरं राज्ञः अग्रमहिषी पट्टराज्ञी कौसल्या प्रसूतिसमये तमोपहं पुत्रं लेभे । का, कमिव ? औषधिः नक्तं रात्रौ ज्योतिरिव । यथा औषधिः नक्तं रात्रौ तमोपहं अंधकारघाति ज्योतिस्तेजो लभते । किंभूता सा ? अग्रमहिषी सती ॥६८॥

६९ राम इत्या(त्य)भि० ।

गुरुः दशरथस्तस्य पुत्रस्य राम इत्यभिधेयं चक्रे विदधे । किंभूतः गुरुः ? तस्य रामस्य गरिष्ठेन अभिरामेण वपुषा नोदितः प्रेरितः । किंभूतं नामधेयम् ? जगत्प्रथम-मङ्गलम् । जगतोः(तः) विश्वस्य प्रथमं आद्यं मङ्गलं यत्, तत् ॥६९॥

७०. रघुवंश० ।

तेन रामेण रक्षागृहगता गर्भवेश्मस्था दीपाः प्रत्यादिष्टा इव । निराकृता इव अभवत् (न्) बभूव(वुः) । किंभूतेन रामेण ? अप्रतिमतेजसा उत्कृष्टतेजसा । पुनः किंभूतेन ? रघुवंशप्रदीपेन ॥७०॥

७१. शय्याप(ग)तेन० ।

अनयेन(अनेन) न(त)नयेन माता बभौ । केन, केव ? सैकताम्भोजबलिना सैकते तटे अम्भोजं कमलं, तदेव बलिः पूजा, तेन शरत्कृता(शा) जाह्नवी इव यथा शरत्कृशा जाह्नवी सैकताम्भोजबलिना तटस्थकमलोपहारेणाभाति शोभते । किंभूतेनानेन रामेण ? शय्यागतेन । किंभूता माता ? क्षामोदरी कृशोदरी ॥७१॥

७२. कैकेय्याः० ।

कैकेय्या[ः] भरतो नाम तनयः जज्ञे । किंभूतः ? शीलवान् साध्वाचारः । यः भरतः जनयित्रीं मातरं अलंचक्रे, अभूषयत् । कः कामिव ? प्रश्रयः विनयः श्रियमिव ॥७२॥

७३. सुतौ लक्ष्मण० ।

सुमित्रा लक्ष्मणशत्रुघ्नौ यमौ यमलजातौ सुषुवे । का काविव ? सम्यक् परिशीलनेन आगमिता अभ्यस्ता विद्या प्रबोधविनयाविव । ज्ञानप्रश्रयौ इव । यथा सम्यक् आगमिता विद्या प्रबोधविनयौ प्रसूति(ते) ॥७३॥

७४. निर्दोषमभवत्स० ।

सर्वं जगत् निर्दोषं अभवत् । किंभूतं जगत् ? आविष्कृतगुणं प्रकटितगुणम् । जगत् किमिव ? हि यतः गां गतं पुरुषोत्तमं कृष्णं स्वर्गः अन्वगादिव अनुययौ ॥७४॥

७५. तस्योदये० ।

तस्य चतुर्मूर्तेः कृष्णस्य उदये दिशः उच्छ्वसिता इव बभूवुः । कैः ? विरजस्कैः नभस्वद्भिः रेणुरहितैः वायुभिः । कथंभूताः दिशः ? पौलस्त्यचकितेश्वराः रावणत्रासभीते-(ताः){न}, दिक्पतयः ॥७५॥

७६. कृशानुरप० ।

रक्षोविप्रकृतौ रावणपरिभूतौ अपविद्धशुचाविव आस्तां अभूताम् । कः कस्मात् ? कृशानुः अपधूमत्वात् । पुनः कः कस्मात् ? क्षपाकरः निर्दोषत्वात् निर्मली(ल){मस}-त्वात् ॥७६॥

७७. दशानन० ।

तत्क्षणे तस्मिन् प्रस्तावे दशाननकिरीटेभ्यः दशमुखमुकुटेभ्यः मणिव्याजेन राक्षसश्रियः राक्षसलक्ष्म्याः अश्रुबिन्दवः बाष्पकणाः पृथिव्यां भुवि पर्यस्ताः पतिताः ॥७७॥

७८. पुत्रजन्म० ।

पुत्री(त्रि)णः पुत्रवतः तस्य राज्ञः तु(तू)र्याणां प्रथमं देवदुन्दुभयः दिवि आकाशे, आरंभं चक्रुः विदधुः । किंभूतां(ता)[नां] तूर्याणाम् ? पुत्रजन्मोत्सवभवानाम् ॥७८॥

७९. संतानक० ।

अस्य राज्ञः दशरथस्य भवने गृहे पेतुषी पतन्ती संतानकमयी दिव्यपुष्पमयी वृष्टिः अभवत् । सा वृष्टिः [सन्] मङ्गलोपचाराणां शोभनमङ्गलप्रकाराणां आदिरचना जाता । सन्मङ्गलाचरणात् उत्सवमङ्गलाचरणात् प्रागेव पुष्पवृष्टिः पततीत्यर्थः । (पतितेत्यर्थः ?)॥७९॥

८०. कुमाराः० ।

ते कुमाराः पितुः दशरथस्य आनन्देन समं ववृधिरे । आनन्देन केनेव ? अग्रजेनेव ज्येष्टपुत्रेणेव अवर्धन्त । किंभूतास्ते ? कृतसंस्काराः कृतमा(जा)[त]करणादि-संस्काराः । पुनः किंभूताः ? धात्रीस्तनपायिनः धात्रि(त्री)णां पयोधपायिनः ॥८०॥

८१. स्वाभाविकं० ।

तेषां रामादीनां स्वाभाविकं सहजं विनीतत्वं विनयकर्मणा शिष्य(क्ष)या मुमूर्च्छे वष्टधिरे । केषां केनेव ? हविर्भुजां अग्नि(ग्नी)नां सहजं तेजः हविषा इव घृतेनेव । यथा हविर्भुजां हविषा घृतेन स्वाभाविकं तेजः वर्धते ॥८१॥

८२. परस्पर० ।

ते पुत्रास्तत् रघोः अनघं निष्पापं कुलं अत्यर्थं उद्योतयामासुः । अदिद्युतत् अशोभयत् । के, कामिव ? ऋतवः वसन्ताद्याः देवारण्यमिव । किंभूतास्ते पुत्राः ? परस्पराविरुद्धाः अन्योन्यं मैत्रीयुक्ताः ॥८२॥

८३. समाने० ।

हि निश्चितं समाने सौभ्रात्रे सुभ्रातुर्भावः सुभ्रात्रं तस्मिन् । यथा तौ रामलक्ष्मणौ प्रीत्या द्वन्द्वं बभु(भू)वतुः । तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभु(भू)वतुः ॥८३॥

८४. तेषां द्वयोः० ।

तेषां रामादीनां द्वयोर्द्वयोः ऐक्यं साहचर्यमेकयोगक्षेमत्वं कदाचन न विभिदे न विजघटे । कयोरिव ? वायुविभास्वोर्यथा । वायुवह्न्योः यथा ऐक्यं न भिनत्ति ॥८४॥

८५. ते[प्रजानां] प्रजानाथाः० ।

ते राजपुत्रास्तेजसा प्रतापेन, च पुनः प्रश्रयेन विनयेन, प्रजानां मनः जहुः आवर्जयन् । ते क इव ? निदाघान्ते ग्रीष्मान्ते श्यामाभ्राः दिवसा इव । यथा निदाघान्ते श्यामाभ्राः नीलमेघदिवसाः प्रजानां मनो हरन्ति ॥८५॥

८६. स चतुर्धा० ।

पृथिवीक्षितः(पतेः) दशरथस्य चतुर्धा व्यस्तः विभक्तः सन् प्रसवः प्रसूतिः बभौ शुशुभे । क इव ? धर्मार्थकाममोक्षाणां अङ्गवान् देहवान् [अवतारः इव] ॥८६॥

८७. गुणैराराध० ।

गुरुवत्सलाः गुरुप्रियास्ते रामादयः गुणैः गुरुं पितरं आराधयामासुः प्रसादयामासुः । के, कैः ? कमिव ? महार्णवाः समुद्राः रत्नैः तमेव दशरथमिव । किंभूतं दशरथम् ? चतुरन्तेशं, चत्वारो ये दिगङ्न्तास्तेषां ईशं, सार्वभौमम् ॥८७॥

८८. सुरगज० ।

अवनिपतीनां पतिः दशरथस्तैश्चतुर्भिः पुत्रैः चकाशे शुशुभे । किंभूतैश्चतुर्भिः ? तदीयैः तस्य हरेः इमे तदीयास्तैः अंशैर्भागैः । क इव ? भग्नदैत्यासिधारैस्त्रुटितासुर-खड्गधारैः । दन्तैः दशनैः सुरगजइव ऐरावण इव भग्नाः त्रोटिता दैत्यासीनां दैत्यखड्गानां धारा यैस्ते । पुनः कैः कमिव ? पणबन्धव्यक्तयोगैः पणबन्धसंधिस्तेन व्यक्तः प्रकटो योगो युक्तिर्येषां उपायैः, नय इव नीतिशास्त्रव्यवहार इव । पुनः कैः क इव ? युगदीर्घैः प्रलंबैः दोर्भिः भुजैः हरिरिव ॥८८॥

इति भट्टारकश्रीजिनचन्द्रसूरिशिष्य आचार्यश्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे देव(वा)वतारो[1] नाम दशमः सर्गः ॥१०॥

---

१. "रामावतारो" मल्लि॰ p २२५ ibid

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

एकादशः सर्गः ॥

१. कौशिकेन० ।

कौशिकेन एत्य आगत्य, सः क्षिति(ती)श्वरः समं याचितः प्रार्थितः किल । कस्मै प्रयोजनाय? अध्वरविधान(त)शान्तये यज्ञबाधानिवृत्तये । किंभूतं रामम्? काकपक्षी-(क्ष)धरम् । काकपक्षः बालानां व्रतार्थचूला पञ्चदशवर्षप्रायम् । हि यतः तेजसां प्रतापवतां वयः न समीक्षे(क्ष्य)ते न विचार्यते ॥१॥

२. कृच्छ्रलब्धा(ब्ध)० ।

लब्धवर्णभाक् लब्धवर्णान् पण्डितान् भजते पोषयतीति लब्धवर्णभाक् दशरथः । कृच्छ्रलब्धमपि दुःखप्राप्तमपि तं रामं मुनये दिदेश ददौ । किंभूतं रामम्? सलक्ष्मणं, लक्ष्मणसहितम् । रघोः कुले अक्षु(सु)प्रणयिनां प्राणार्थिनां अपि कदाचित् अर्थिता याच्ञा न व्यहन्यत न दूरीचकार ॥२॥

३. यावदादिशति ।

पार्थिवो दशरथः यावत् तयोः निर्गमाय प्रयाणार्थं पुरमार्गसत्क्रियां राजपथसंस्कारं आदिशति निरूपयति, या(ता)वत्मरुत्सखैः पवनहास(सहा)यैः घनैः मेघैः आशु शीघ्रं विहिता विदधे । किंभूतैः घनैः? सान्द्रपुष्पजलवर्षिभिः घनकुसुमसहिततोयकणवर्षिभिः ॥३॥

४. तौ निदेशकरणो० ।

तौ रामलक्ष्मणौ पितुश्चरणयोः विनिपेतुः । किंभूतौ तौ? निदेशकरणोद्यतौ आज्ञा-करणकृतप्रयत्नौ । पुनः किंभूतौ तौ? धन्विनौ धनुर्धरौ । नम्रयोः नमस्कारपरयोः तयोरुपरि भूपतेरपि बाष्पबिन्दवः निपेतुः । किंभूतयोः तयोः? प्रवत्स्यतोः प्रवासं गच्छतोः ॥४॥

५. लक्ष्मणानुचर० ।

ऋषिः राघवमेव नेतुं ऐच्छत् अभिललाष । किंभूतं राघवम्? लक्ष्मणानुचरं लक्ष्मण-सहायम् । इति असौ नृपः आशिषं प्रययुजे ददौ । वाहिनीं सेनां न, हि यतः तयोः रक्षणविधौ पालनविधौ सा सेना [न] क्षमा, समर्था न ॥५॥

६. तौ पितु० ।

तौ उभौ द्वौ रामलक्ष्मणौ तं ऋषिं अन्वगच्छतां अनुजग्मतुः । किंभूतौ तौ?

पितुः नयनजले[न] लोचनोत्थेन किञ्चित् उक्षितशिखण्डकौ उक्षितचूलौ । पुनः किंभूतौ ? धन्विनौ धनुर्द्धरौ । पुनः किंभूतौ तौ ? पौरदृष्टिकृतमार्गतोरणौ ॥६॥

७. मातृवर्ग० ।

तौ रामलक्ष्मणौ रेजतुः शुशुभाते । किं कृत्वा ? मुनेः पदवीं मार्गं प्रपद्य आसाद्य । किंभूतस्य मुनेः ? महौजसः गुरुतेजसः । किंभूतौ तौ ? मातृवर्गचरणस्पृशौ विहितजननीवर्गचरणवन्दनौ । तौ काविव ? भास्करस्य गतिवशवर्तिनौ, गतिवशात् गमनाय कृत्वा, प्रवर्तितौ मधुमाधी(ध)वाविव चैत्रवैशाखाविव ॥७॥

८. वीजि(चि)लोलभुजयोः० ।

गतं गमनं अशोभत [अ]राजत । किंभूतयोः तयोः ? वीचिलौलभुजयोः वीचिवत् कल्लोलवत् लोलौ चपलौ, भुजौ बाहू ययोस्तौ, तयोः । किंभूतमपि गतं गमनम् ? शैशवात् बाल्याद् चपलमपि । तयोः कयोरिव ? तोयदागमेन उद्ध्यभिद्ययोः ह्रद{य}योः इव उज्झितवेगेन उज्झि(?),भिनक्ति(त्ति) पातयति कुलानीति भिःद्य(भिद्यः) । तयोः रामलक्ष्मणयोः उद्ध्यभिद्य{द्य}योरिव । नामधेयसदृशं विचेष्टितं अभवत् ॥८॥

९. तौ बलातिबलयो...विद्ययोः० ।

बला(लं) च अतिबलं च, तयोः प्रभाविनः(वतः) पथि मार्गे न मड(म्ल)तुः न मलानिं(म्लानौ) । किंभूतयोः विद्ययोः ? तेन मुनिना उपदिष्टे(ष्ट)[योः] तदुपदिष्टे(ष्ट){त}-योः । किंभूतौ रामलक्ष्मणौ ? मणिकुट्टिमोचितौ मणिबद्धभूमिक्रीडायोग्यौ । तौ काविव ? मातृपार्श्वपरिविर्तिनाविव मातृनिकटस्थाविव ॥९॥

१०. पूर्ववृत्त० ।

राघवः पादचारगतमपि, पादयोः चारः गतिः पादचारः, तेन गतम् । पादाभ्यां गतमित्यर्थं(र्थः) । अध्वनः मार्गस्य अनन्तरं अन्तरालं न अलक्षयत् नाज्ञासीत् । किंभूतः राघवः ? सानुजः लक्ष्मणसहितः । कैः ? पितुसखस्य पितृमित्रस्य विश्वामित्रस्य पूर्ववृत्तान्तकथितैः । प्राच्यवृत्तान्तकथनैः । किंभूतस्य पितृसखस्य विश्वामित्रस्य ? पुराविदः । पुरा पूर्वं अतिक्रान्तं वेत्ति इति । रामः क इव ? उह्यमान इव । वाहनोचितः पादचारमपि न व्यभावयत् ॥१०॥

११. पाठान्तरं—तौ श(स)रांसि० ।

श(स)रांसि सरोवराणि, अम्बुभिः जलैः, तौ सिषेविरे । किंभूतैः अम्बुभिः ? स्वादवद्भिः । पतत्रिणः पक्षिणः श्रुतिसुखैः कूजितैः वासितैः तौ सिखे(षे)विरे । वायवः कैः ? सुरभिपुष्परेणुभिस्तैः सिषेविरे । जलदाः तौ रामलक्ष्मणौ छायया शि(सि)षेविरे ॥११॥

१२. नाम्भसां० ।

तपस्विनो मुनयः तयोः उभयोः द्वयोः रामलक्ष्मणयोः मनोज्ञेन दर्शनेन, यथा प्रीतिं आपुः प्रापुः । तथा विकस(च)पद्मशोभिनां फुल्लाब्जरम्याणां अम्भसां उदकानां, नवा(व)फलभृतां फलितानां वि(वी)रुधां वल्लीनां च दर्शनेनापि प्रीतिं नापुः ।।१२।।

१३. तौ सुकेतु० ।

तौ भ्रातरौ पथि मार्गो(र्गे) लीलयैव हेलयैव धनुषी चापौ अधिज्यतां आरोपितगुणतां निन्यतुः प्रापयतुः । किंभूते पथि ? {अ}खिलीकृते उज्झाटिते । कया ? सुकेतुतनयया-(०सुतया) राक्षसपुत्र्या । किंभूतया ? विदितशापया प्रापत(प्त)शापया । कस्मात् ? कौशिकात् । किंभूतौ रामलक्ष्मणौ ? स्थलनिवेसि(शि)ताटनी, स्थले निवेसि(शि)ता अटनिः याभ्यां इति ≼[1]रामलक्ष्मणविशेषत्वेन निर्वाहः (?) । धनुर्विशेषणम् । त्वत्र धनुषो नपुंसकवा(त्वा)त् अट{न}नी इति प्राप्ते अटनशब्दो नान्तः(?) इति कश्चित् तन्मनतो(?) धनुर्विशेषणम् ।।≽।।१३।।

१४. या(ज्या)निनाद० ।

अथ अथानन्तरं ताटिका(ताडका) प्रादुरास प्रकटीबभूव । किंभूता ताडि(ड)का ? तयोः भ्रात्रोः ज्यानिनादं शृण्वति(ती) । किंभूता ताडका ? बहुलक्षपाच्छविः कृष्णपक्ष-रात्रितुल्या । पुनः किंभूता ताडका ? चलकपालकुण्डला चञ्चलन्नृशिरःकुण्डला । सा केव ? निब(बि)डा दृढा बलाकिनी कालिकेव नीलमेघपङ्क्तिरिव ।।१४।।

१५. तीव्रवेग० ।

भरताग्रजः रामः तया ताडकया अभ्यभावि आचक्रमे पराभूतः । तया कयेव ? पितृकारिणोच्छया(पितृकाननोत्थया) वात्यया इव । वात्या मण्डली वातस्य मण्डलीत्यमरः । किंभूतया तया ? तीव्रवेगधुतमार्गवृक्षया, तीव्रवेगेन धुताः कम्पिताः मार्गवृक्षाः यया । पुनः किंभूतया तया ? प्रेतचीवरवसा स्वनोग्रया मृतकवसा शब्दैः उग्रया भीषणया ।।१५।।

१६. उद्यतैक० ।

राघवः तां ताडकां विलोक्य पत्रिणा बाणेन सह वनिधा(ता)वधे घृणां जुगुप्सां मुमोच । किंभूतां ताम् ? आयान्तु(न्तीं) आगच्छन्तीम् । पुनः कथंभूताम् ? उद्यतैकभुजयष्टिं उद्यता उत्क्षिप्ता उत्स्थापिता एका बाहुयष्टिर्यया सा, ताम् । पुनः किंभूताम् ? श्रोणि(णि)-लम्बिपुरुषांत्रमेखलां, श्रोणौ कट्यां लम्बानि पुरुषान्त्राण्येव मेखला यस्याः सा, ताम् ।।१६।।

---

1 ≼रामलक्ष्मणः......धनुर्विशेषणम् ।।≽ under vs. 13 is not clear.

१७. यच्चकार० ।

स रामशी(सा)यकः शिलाघने पाषाणवत्कठिने ताडकोरसि यत् विवरं छिद्रं यच्चकार तत् अन्तकस्य यमस्य द्वारतां अगमत् । किंभूतस्य अन्तकस्य ? राक्षसानां अप्रविष्टविषयस्य अप्राप्तगोचरस्य ॥१७॥

१८. बाणभिन्न० ।

सा राक्षसी निपेतुषी पतन्ती सति(ती), केवलं निजवनां वर्नि(र्नी) न व्यकम्पयत्, रावणं(ण)श्रू(श्रि)यमपि व्यकम्पयत् कम्पयामास । किंभूतां रावणश्रियम् ? विष्टपत्र(त्र)यं(य)-पराजयस्थिरां त्रिभुवनजयदृढाम् । किंभूता राक्षसी ? बाणभिन्नहृदया रामशि(श)-रभिन्नवक्षा ॥१८॥

१९. राममन्मथ० ।

सा निशाचरी राक्षसी जीवितेशवसतीं जगाम अगमत् । किंभूता ? गन्धवातवत्-रुधिरचन्दनोक्षिता । गन्धवता उत्कटगन्धेन रुधिररूपेण [चन्दनेन] उक्षिता सिक्ता या सा । पुनः किंभूता राक्षसी ? दुःसहेन अतिविषमेण राममन्मथशरेण राघवमनोभवेषुणा हृदये उरसि ताडिता विद्धा ॥१९॥

२०. नैर्ऋतघ्न० ।

अथ अथानन्तरं ताडकान्तकमुनेः विश्वामित्रात् मन्त्रवत् मन्त्रयुक्तं अस्त्रं प्रापत् लेभे । किंभूतात् मुनेः ? अवदानतोषितात् अद्भुतकर्मतोषितात् । किंभूतं अस्त्रम् । नैर्ऋतघ्नं राक्षसघ्नं । कः कस्मात् ? किमिव ? सूर्यकान्तमणिः भास्करात् इन्धनं कर्पासं इन्धननिपाति{पति}काष्ठदाहज्योतिरिव ॥२०॥

२१. स्थाणुदग्ध० ।

स दाशरथिः चारुणा विग्रहेन देहेन मदनस्य प्रतिनिधिः सदृशः अभवत् कर्मणा न । किंभूतस्य मदनस्य ? स्थाणुदग्धवपुषः हरप्लुष्टतनोः । किं कृत्वा ? तपोवनं प्राप्य अवाप्य । किंभूतः रामः ? आप्त(त्त)कार्मुकः गृहीतचापः ॥२१॥

२२. वामनाश्रम० ।

ततः परं राघवः वामनाश्रमपदं स्थानं उपेयिवान् प्राप्तवान् । किंभूतं वामना-श्रमपदम् ? पावनं पवित्रम् । पुनः किंभूतम् ? ऋषेः विश्वामित्रात् श्रुतं आकर्णितम् । राघवः प्रथमजन्मचेष्टितानि बलिबन्धनानि पूर्वजन्मचरितानि अस्मरन्नपि उन्मनाः उत्क-ण्ठितः बभूव अभूत् ॥२२॥

२३. आससाद० ।

ततस्तदनन्तरं मुनिः आत्मनः तपोवनं आससाद प्राप । किंभूतं तपोवनम् ? शिष्यवर्गपरिकल्पितार्हणम् । शिष्यवर्गेण शिष्यगणेन परिकल्पिता विहिता पूजा यत्र तत् । पुनः किंभूतम् ? बद्धपल्लवपुटाञ्जलिद्रुमम् । बद्धा पल्लवपुटा एव अञ्जलयो यैः एवंविधा द्रुमाः यत्र, तत् । किंभूतम् ? दर्शनोत्सुकमृगं मुनिदर्शनेन उत्कण्ठिता मृगाः यत्र तत् ॥२३॥

२४. तत्र दीक्षित० ।

तत्र तस्मिन् सिद्धाश्रमे नृपसुतौ सितैः तीक्ष्णैः शरैः बाणैः दीक्षितं दीक्षायज्ञ-प्रविष्टं ऋषि(र्षिं) विघ्नतः राक्षसादिकृतविघ्नात् ररक्षतुः [अ]रक्षताम् । कौ, कस्मात्, कमिव ? रश्मिभिः किरणैः क्रमोदितं रात्रिदिवं गतौ शशिदिवाकरौ अंधतमसात् । गाढेन्धतमसं तमः इति **हैमः** । लोकमिव । यथा शशिदिवाकरौ क्रमोदितौ सन्तौ रश्मिभिः अन्धतमसात् लोकं रक्षतः[1] ॥२४॥

२५. वीक्ष्य० ।

अथ अथानन्तरं ऋत्विजां याज्ञिकानां संभ्रमः बभूव । किं कृत्वा ? बन्धुजीवपृथुभिः बन्धुककुसुमसमानैः रक्तबिन्दुभिर्दु(र्दू)षितां अपवित्रीकृतां वेदिं यज्ञस्थलीं वीक्ष्य । किं-भूतानां ऋत्विजानम् ? उपोढकर्मणां त्यक्तयज्ञकार्याणाम् । पुनः किंभूतानाम् ? च्युत-विकङ्कतश्रु(स्रु)चां, च्युता भ्रष्टा विकङ्कताख्यस्य दारो श्रवो (?) [स्रुचः] येषां पतितकङ्कखदिरहोमसाधना[नाम] । विकङ्कतः श्रु(स्रु)चांवृक्षः **इत्यमरः** ॥२५॥

२६. उन्मुख० ।

सपदि शीघ्रं लक्ष्मणाग्रजो रामः उन्मुखः ऊर्ध्वमुखः अम्बरे आकाशे रक्षसां बलं अपश्यत् ददर्श । किं कुर्वन् ? आश्रयमुखात् तुणवक्त्रात् बाणं समुद्धरत् आकर्षयत् । किंभूतं बलम् ? गृध्रपक्षवने कृतध्वजं पक्षवातनिर्धूतकेतुम् ॥२६॥

२७. तत्र याव० ।

स रामस्तत्र बले यावत् मखद्विषां राक्षसानां तौ अधिपती स्वामिनौ मारीचि(च)-सुबाहौ शरव्यं वेध्यं अकरोत् । इतरान्[न] । महोरगविसर्पिविक्रमः नागेन्द्रप्रसर्प{व}त्-पौरुषः गरुडः किं राजिलेषु दर्दुरेषु प्रवर्तते ? ॥२७॥

---

1. In this verse Jina. quotes हैम । But Malli. has–'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः ।

२८. सो[ऽ]स्त्रमुग्रा(ग्र)० ।

स रामः उग्रजवं महावेगं वायुदैवतमस्त्रं धनुषि सन्दधे अयोजयत् । किंभूतः ? अस्त्रकोविदः अस्त्राणां प्रयोगे संप्रहारे च कोविदः पण्डितः । तेन अस्त्रेण शैलगुरुमपि पर्वतस्थूलमपि ताट(ड)कासुतं मारीचं पाण्डुपत्रमिव अपाहरत् अपजहार ॥२८॥

२९. यः सुबाहुरिति ।

यः सुबाहुः अपरः राक्षसः मायया यज्ञप्रदेशे विससर्प बि(ब)भ्राम कृती पण्डितः रामः तं सुबाहुं आश्रमात् बहिः बाह्यप्रदेशे पक्षिणां काकादीनां व्यभजत् विभागीचकार । किंभूतं तम् ? क्षुरप्रशकलीकृतं क्षुरप्रेण बाणेन शकलीकृतं {क्षुरप्रेण बाणेन शकलीकृतं} खण्डशः कृतम् ॥२९॥

३०. इत्यपास्त० ।

ऋत्विजः याज्ञिकः कुलपतेः विश्वामित्रस्य यथाक्रमं यथानुक्रमेण क्रियाः यज्ञकर्म निरवर्तयन् । समाप्तिं नीताः । किंभूतस्य कुलपतेः ? वाग्यतस्य वाचंयमस्य । किं कृत्वा ? इति तयोः पुत्रयोः सांयुगिनं सं(सां)ग्रामिकं विक्रमं अभिनन्द्य प्रशस्य । किंभूत-योस्तयोः ? अपास्तमखविघ्नयोः नासि(शि)तयोपद्रवयोः ॥३०॥

३१. तौ प्रणाम० ।

मुनिः तौ भ्रातरौ आशिषां अनुपदं पाणिना समस्पृशत् पस्पर्श । किंभूतेन पाणिना ? ग(द)र्भपाडि(टि)ततलेन कुशाग्रविदारिततलेन । किंभूतौ तौ ? प्रणामचलकाक-पक्षौ नमस्कारचञ्चलचूलिकौ । किंभूतो मुनिः ? अवभृत(थ)प्लुतः यज्ञान्तस्नातः ॥३१॥

३२. तं न्यमन्त्र्य० ।

मैथिलः जनकस्तं ऋषिं न्यमन्त्रयत निमन्त्रयामास । किंभूतः ? संसृतक्रतुः प्रारब्ध-यज्ञः, वशी जितेन्द्रियः । स ऋषिः मिथिलां व्रजन् गच्छन् राघवावपि रामलक्ष्मणावपि निनाय अनैषीत् । तद्धनुःश्रवणजं तत्कार्मुकाकर्णनसमुत्थं कुतूहलं कौतुकं बिभ्रतौ धारयन्तौ ॥३२॥

३३. तैः शिवेषु० ।

तैः रामलक्ष्मणविश्वामित्रैः सायं सन्ध्यासमये शिवेषु कल्याणकारिषु आश्रमतरुषु आश्रमवृक्षेषु वसतिं अगृह्यत । येषु आश्रमवृक्षेषु दीर्घतपसः गौतमस्य परिग्रहः अहि-(ह)ल्या भार्या वासवक्षणकलत्रतां इन्द्रस्य क्षणमात्रभार्यात्वं ययौ जगाम ॥३३॥

३४. प्रत्यपद्यत० ।

शिलामयी पाषाणरूपा गौतमवधूः अहि(ह)ल्या चिरस्य चिरकालेन, यत् पुनः चारु रम्यं स्थं(स्वं)वपुः प्रति(त्य)पद्यत प्राप्त[वती] । स किल, किलेत्यागमे रामपादरजसां राघवपादरेणूनां अनुग्रहः प्रसादः । किंभूतानां रामपादरजसाम् ? किल्बि[ष]-च्छिदां पापक्षेपकाणाम् ॥३४॥

३५. राघवान्वित० ।

जनेश्वरः राजा जनकः तं मुनिं सपर्यया पूजया कृत्वा अभ्यगात् सन्मुखं जगाम । किं कृत्वा ? राघवान्वितं मुनिं उपस्थितं आकर्ण्य निशम्य । मुनिं कमिव ? अर्थकाम-सहितं देहबद्धं धर्ममिव ॥३५॥

३६. तौ विदेह० ।

विदेहनगरीनिवासिनां मिथिलापुरीवास्तव्यानां मनश्चित्तं पक्ष्मपातमपि निमेषमपि वञ्चनां मन्यते, अमन्यत । किंभूतानां विदेहनगरीनिवासिनाम् ? तौ राघवौ विलोचनैः नेत्रैः पिबतां पश्यताम् । तौ काविव ? दिवः स्वर्गात् गां गतौ प्राप्तौ पुनर्वसुपुष्या-विव ॥३६॥

३७. यूपवत्यवि्रषये० ।

स कुशो(शि)[क]वंशवर्धनः कुशिकान्वयवर्धनः विश्वामित्रः मैथिलाय जनकाय रामं कथयांबभूव, कथयामास । किंभूतं रामम् ? इष्वसनदर्शनोत्सुकं, इशवो बाणाः अस्यन्ते क्षिप्यन्ते[ऽ]नेनेति इष्वसनं चापः(पं), तस्य दर्शने उत्सुकं उत्कण्ठितम् । किंभूतः रामः ? कालवित् समयज्ञः । कस्मिन् सति ? यूपवति यूपसहिते क्रियाविधौ यज्ञकर्मणि अवसिते समाप्ते ॥३७॥

३८. तस्य वीक्ष्य० ।

पार्थिवः जनकः दुहितृशुल्कसंस्थायाः दुहितुः शी(सी)तायाः शुल्कः(ल्कं) पणबन्धस्तस्य संस्था व्यवस्था, तया पीडितः । अदूयत दुःखितो बभूव । किं कृत्वा ? धनुः दुरासनं(दं) दुरारोपं विचिन्त्य विचार्य । पुनः किं कृत्वा ? प्रथितवंशजन्मनः प्रख्यातान्वयस्य तस्य शिशोः रामस्य ललितं रम्य(म्यं) वपुः वीक्ष्य विलोक्य ॥३८॥

३९. अब्रवीच्च० ।

च पुनः स जनकः अब्रवीत् उवाच । भो भगवन् ! महद्भिरपि प्रौढैः मतंगजैः हस्तिभिः यत्कर्म कार्यं दुस्क(ष्क)रं दुश्शक्यं अहं तत्र कर्मणि कलभस्य बालकस्य

मोघवृत्तिः, मोघा निष्फला वृत्तिर्व्यापारो यस्य, तत् चेष्टितं विलसितं अनुज्ञातुं न उत्सहे, नाङ्गीकुर्वे ॥३९॥

४०. ह्रेपिता हि० ।

हि निश्चितं हे तात ! ते धानुष्काः बहवः धनुर्भृतः धानुष्काः नरेश्वराः, ह्रेपिताः लज्जिताः । स्वान् निजान् बाहुदण्डान् धिक् इति, धिक्कारोऽस्त्विति । विधूय निर्भर्त्स्य प्रति(त)स्थिरे {यथा गतं}ययुः । किंभूतान् भुजान् ? ज्यानिर्घातकठिनत्वचः ज्यानिर्घातेन प्रत्यञ्चानिष्पेषेण कठिना कठोरा त्वक् छविर्येषां ते, तान् ॥४०॥

४१. प्रत्युवाच० ।

ऋषिस्तं राजानं प्रत्युवाच प्रत्यवोचत् । उक्तिप्रकारमाह – हे नृप ! अयं रामः वीर्यतः बलविषये निषम्यतां अवधार्यतां त्वया, अथवा गिरा वाचा बलवर्णना(न)या पर्याप्तम् । भवतस्तव चाप एव धनुष्येव व्यक्तशक्तिः प्रकटसामर्थ्यः भविष्यति । कस्मिन् क इव ? गिरौ अशनी(नि)[रि]व । यथा अशनीः(निः) वज्रः गिरौ पर्वते व्यक्तशक्ति-र्भवति ॥४१॥

४२. इत्थमाप्त० ।

स जनकः इत्थं अमुना प्रकारेण आतम(प्त)वचनात् ऋषिवचनात् राघवे रामे अमंस्त । तस्मिन् का इव ? त्रिदशगोपमात्रि(त्र)के इन्द्रगोपसूक्ष्मकृष्णवर्त्मनि वह्नौ दाहशक्तिमिव । यथा कश्चित् पुमान् तृ(त्रि)दशगोपमात्रके कृष्णवर्त्मनि दाव(ह)शक्तिः श्रद्दधाति । किंभूते[ऽ]पि रामे[ऽ]पि ? काकपक्षधरे[ऽ]पि चूडाधारिण्यपि ॥४२॥

४३. आदिदेश० ।

अथानन्तरं मैथिलः जनकः कार्मुका[भि]हरणाय धनुरानयनाय गणशः शतसंख्यान् पार्श्वान् अनुचरान् आदिदेश ज्ञापयामास । कः, कस्य, कानिव ? सहस्रलोचनो इन्द्रः, तेज[स]स्य तेजोमयस्य धनुषः चापस्य प्रवृत्तये व्यवहराय, तोयदानिव ॥४३॥

४४. तत्प्रसुप्त० ।

दाशरथिः रामः, तत्धनुः प्रेक्ष्य आलोक्य आददे जग्राह । किंभूतं धनुः ? प्रसुप्तभुजगेन्द्रभीषणं शयितनागेन्द्रभयङ्करम् । वृषभध्वजः ईश्वरः येन धनुषा बाणं असृजत् अक्षिपत् । किंभूतं बाणम् ? विद्रुतक्रतुमृगानुसारिणं रुद्रभयपलायितयज्ञहरिणं(ण)-यायिनम् ॥४४॥

४५. आततज्यं० ।

च पुनः स रामः नातियत्नतः अवहेलयैव शैलसारमपि गिरि[रि]व दृढमपि धनुः आततज्यं ज्यायुक्तं अकरोत् चकार । कः, कमिव ? स्मरः पेलवं कोमलं पुष्पचापमिव । यथा स्मरः कन्दर्पः पेलवं कोमलं पुष्पचापं आततज्यं करोति । किंभूतः रामः ? संप(स)दा वर्षदा(?) विस्मयस्तिमितनेत्रं यथा भवति तथा ईक्षितः दृष्टः । विस्मयेन कौतुकेन स्तिमिते अनिम(मे)षशेषे नेत्रे लोचने यत्र तत् । क्रियाविशेषणम् ॥४५॥

४६. भज्यमान० ।

धनुषः तेन रामेण अतिमात्रकर्षणात् अत्य(त्या)कृष्टवा(त्वा)त् भज्यमानं स्फुटन्(त्) भार्गवाय परशुरामाय, पुनः उद्यतं उद्गतं, क्षत्रं राजन्यकमिव क्षत्रमुत्पन्नं न्यवेदयत् कथयामास । किंभूताय भार्गवाय ? दृढमन्यव(वे) दृढक्रोधाय । किंभूतं धनुः ? वज्र-पु(प)रुषस्वनं वज्रकठोरध्वनिं, तत्स्वनेन {गमनस्पृशाधनुः ?} ॥

पाठान्तरम् ।[1] अतिकर्षणाद्भज्यमानं धनुः गमनव्यापिना स्वरेण क्षत्रियान्प्रति दृढवैर(रा)य {वा} परशुरामाय क्षत्रियमुत्पन्नं न्यवेदयत् ॥४६॥

४७. मैथिलः० ।

मैथिलः जनकः सपदि शीघ्रं तपोनिधेः विश्वामित्रस्य सन्निधौ समीपे अयोनिजां तनयां सीतां रामाय अतिसृष्टवान् ददौ च । अग्निः साक्षी यस्मिन् कर्मणि तदिव । सीतां करे गृहीत्वा रामाय समर्पितवान् इत्यर्थः । अग्निसमो हि मुनिः । किंभूतस्य तपोनिधेः ? धृतिमतः कान्तिमतः । किंभूतः जनकः ? सत्यसङ्गरः सत्यप्रतिज्ञः ॥४७॥

४८. प्राहिणोच्च महि० ।

महारथः योद्धा जनकः कोशलाधिपते(त)[ये] दशरथाय महितं पूज्यं पुरोधसं पुरोहितमिति प्राहिणोत् न्यससर्ज प्रा(प्र)स्थापयत् प्रेषयामास इति । {किं}हे राजन् दुहितुः पुत्र्याः सीताया प्रतिग्रहात् अङ्गीक[र]णात् निमेः, निमिर्नाम जनका{दि}नामात्मजः (०नां पूर्वजः), इदं कुलं इष्यतां सम्मान्यताम् । किंभूतं कुलम् ? भृत्यभावि भृत्यत्वेन भृत्यं भवितुं शीलं यस्य तत् । अन्यो[ऽ]पि यः कन्यां प्रयच्छति सः अस्य भृत्य इव स्यात् ॥४८॥

४९. अन्वि(ष)ये[ष]० ।

स दशरथः सदृशीं योग्यां स्नुषां वधूं अन्वियेष गवेषयामास । अनुकूलवाक् प्रिय-वादी द्विजः एनं दशरथं प्राप आययौ । हि यतः सुकृतां पुण्यवतां काङ्क्षितं अभिलष-

---

1 Malli. ४७ is missing in Jina. The expression 'पाठान्तरम्' seems to be out of place here.

(षि)ति(तं), सद्य एव पच्यते फलति । किंभूतं काङ्क्षितम् ? कल्पवृक्षसमधर्मम् । कल्पवृक्षेण समो धर्मः स्वभावो विद्यते यस्य तत् ॥४९॥

५०. क(त)स्य कल्पित० ।

बली दशरथः उच्चचार अचलत् । किं कुर्वन् ? तस्य द्विजस्य अग्रजन्मनः पुरोहितस्य वचनं शुश्रुवान् अङ्गीकृतवान् । किंभूतस्य तस्य ? कल्पितपुरस्क(स्क्रि)याविधेः । कल्पितः विहितः, पुरस्क्रिया पूजाविधिर्यस्मै, तस्य । किंभूतः दशरथः ? बलभित्सखः इन्द्रसखः । पुनः किंभूतः दशरथः ? सैन्यरेणुमुखि(षि)[1]तार्कदीधितिः, सैन्यरेणुना मुखि(षि)ता आच्छादिता अर्कदीधिति(त)[यः] सूर्यकिरणाः येन सः ॥५०॥

५१. आससाद० ।

स राजा बलैः सैन्यैः मिथिलां नगरीं वेष्टयन् सन् आससाद प्राप । किंभूतैः बलैः पीडितोपवनपादपैः, गजादिबन्धनवशात् पीडिताः उपद्रुता उपवनपादपाः उद्यानवृक्षाः यैः । सा पुरी प्रीतिरोधं स्नेहवेष्टि(ष्ट)नं असहिष्ट विषेः(सेहे) । का ? कमिव ? स्त्री आयतं विस्तीर्णं कान्तपरिभोगमिव । आलिङ्गनादिचुम्बननखक्षतसम्मर्दो हि स्त्री(स्त्रि)या सह्यते ॥५१॥

५२. तौ समेत्य० ।

तौ उभौ भूपती, समेत्य मीलित्वा, कन्यकातनयकौतुकक्रियां पुत्राणां च विवाहदीक्षां वितेनतुः चक्रतुः अकुरुताम् । किंभूतां कन्यकातनयकौतुकक्रियाम् ? स्व[प्र]भावसदृशीं, निजमहिमानुरूपाम् । किंभूतौ तौ दशरथजनकौ ? समये स्थितौ, अलङ्घितमर्यादौ । पुनः किंभूतौ तौ ? वरुणवासवोपमौ, वरुणोपमो जनकः वासवनिभो दशरथः ॥५२॥

५३. मैथिली० ।[2]

रघूद्वहो रामः, पार्थिवीं मैथिलीं उद्वहत् उपजे(ये)मे । लक्ष्मणः ऊर्मिलां सीताकनिष्ठां उद्वहत् । कथंभूतां ऊर्मिलाम् ? ललितवाचं मधुरगिरां {ययोस्तौ} । तयोः रामलक्ष्मणयोः अवर{रु}जौ लघुभ्रातरौ भरतशत्रुघ्नौ वर्तेते, तौ कुशध्वजसुते जनकभ्रातृपुत्र्यौ उद्वहतां (उदवहताम्) । किंभूते कुशध्वजसुतौ(ते) ? सुमध्यमे कृशोदर्यौ । किंभूतौ अवरजौ ? वरौजसौ, वरं ओजः तेजः ययोस्तौ ॥५३॥

---

1 The scribe writes 'ख' for 'ष'.

2 Jina. has preferred the reading 'मैथिली' for 'पार्थिवी' of मल्लि० ११/५४., though in the comm. he mentions both.

५४. ते चतुर्थ० ।

ते त्रयः भरतरामलक्ष्मणाः सूनवः पुत्राः चतुर्थसहिताः{सन्त}बभुः । किंभूतास्ते ? नववधूपरिग्रहाः अभिनवजायासमेताः । ते के इव ? तस्य भूपतेः सिद्धिमन्तः कार्यसिद्धिसंयुक्ताः सामदानविधिभेदविग्रहा इव ॥५४॥

५५. ता नराधि० ।

नराधिपसुताः नृपात्मजैः दशरथपुत्रैः कृतार्थतां अगच्छन् अगमन् । ते राजानः ताभिः कन्याभिः कृतार्थतां अगमन् । स वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः {प्रत्ययप्रकृतियोगसन्निभः} प्रत्ययश्च प्रकृतिश्च प्रत्ययप्रकृती, तयोर्योगः प्रत्ययप्रकृतियोगः तेन सन्निभस्तुल्योऽभवत् ॥५५॥

५६. एवमात्तर० ।

स दशरथः तां पुरीं न्यवर्तत प्रत्याययौ । किंभूतः दशरथः ? त्रिषु अध्वसु प्रयाणकेषु विसृष्टमैथिलः निवर्तितजनकः । किं कृत्वा ? एवं चतुरोऽपि तान् आत्मसंभवान् पुत्रान् तत्र मिथिलायां निवेश्य विवाह्य परिणीय । किंभूतः दशरथः ? आप्तरतिः, आप्ता गृहीता रतिः प्रीतिः येन सः, विवाहकार्यत्वात् ॥५६॥

५७. तस्य जातु० ।

मरुतः वाताः जातु कदाचित् मार्गो तस्य राज्ञः वरूथिनीं चिक्लिशुः अबाधं क्लेशयामासुः । के कामिव ? उत्कटाः तीरोद्गताः सरिद्रयाः नदीपूरमिव, यथा सरिद्रयाः नदीवेगाः उत्कटाः(उत्तटाः)अतिक्रान्ततटाः सन्तः स्थलीं क्लिस्य(ष्य)न्ती(न्ति) । कथंभूताः मरुतः ? प्रतीपगाः प्रतिकूलगामिनः सन्मुखगताः । पुनः कथंभूताः । मरुतः ? भू(ध्व)-जपटप्रमाथिनः ध्वजवस्त्रध्वंसिनः ॥५७॥

५८. लक्ष्यते स्य० ।

तदनन्तरं रविः लक्ष्यते स्म । किंभूतो रविः ? बद्धभीमपरिवेशमण्डलः रचितोग्रपरिधिवलयः, बद्धं भीमं रौद्रं परिवेशमण्डलं यस्य सः । सूर्यः क इव ? भोगिनः सर्पस्य च्युतः पतितः मणिरिव । किंभूतः मणिः ? भोगवेष्टितः शरीरकुण्डलीकृतः । किंभूतस्य भोगिनः ? वैनतेयेन शमितस्य गरुडाहतस्य ॥५८॥

५९. श्येनपक्ष० ।

दिशः अवलोकनक्षमाः दर्शनयोग्याः न बभूवुः अभुवन् । किंभूताः दिशः ? श्येनपक्षपरिधूसरालकाः, श्येनानां पक्षाः श्येनपक्षाः {एव श्येनपक्षाः} [तैः] परिधूसरालकाः

यासां ताः । पुनः कथंभूताः दिशः ? सान्ध्यमेघरुधिरार्द्रवाससः सान्ध्यमेघरुधिरेण आर्द्राणि वासांसि यासां ताः । पुनः किंभूताः दिशः ? रजस्वलाः धूलीधूसराः । दिशः का इव ? अङ्गना इव । रजसा व्याप्तत्वात् । न शक्यन्ते रजस्वलाः[अवलोकनक्षमाः] एवं रजस्वलायाः वर्णनम् [अपि न शक्यम् ।] ॥५९॥

६०. भास्करश्च० ।

भास्करः सूर्यः यां दिशं अध्युवास अधितस्थौ शिवाः तां दिशं श्रिताः आश्रिताः र(प्र)तिभयं भयानकं ववाशि(सि)रे, शब्दं चक्रुः । शिवाः किं कुर्वन्त्यः ? भार्गवं नोदयन्त्य इव, प्रेरयन्त्य इव । किंभूतं भार्गवम् ? क्षत्रशोणितपितृक्रियोचितं, क्षत्रियाणां शोणितेन पितृक्रियायां उचितो योग्य यः सस्तम् ॥६०॥

६१. तत्प्रतीप० ।

तत्प्रतीपपवनादि वैकृतं प्रतिकूलवातनिहारादिकमुत्पातं प्रेक्ष्य दृष्ट्वा क्षितेः ईश्वरः स दशरथः क्षिप्रं शान्तं(न्तिं)अधिकृत्य उद्दिश्य गुरुं वसिष्ठं अन्वयुङ्क्त अपृच्छत् पप्रच्छ । किं पप्रच्छ ? हे भगवन् ! प्रतीप[पवने]{इ}त्यादि प्रशान्तं भविष्यति {न वा} । स गुरुः एतत्स्वन्तं शोभनो[ऽ]न्तो यस्य तत् शुभोदर्कं[भावि]इति तद्व्यथां, तस्य दशरथस्य व्यथां पीडां अलघयत् लघुं(घू)चकार ॥६१॥

६२. तेजसः० ।

किल इति प्रसिद्धौ । तेजसः उत्थितः राशिः सपदि शीघ्रं वाहिनीमुखे सेनामुखे प्रादुरासः प्रादुर्बभूव । यः राशिः सैनिकैः नयनानि प्रमृज्य उत्पुंस्य चिरात् लक्षणीय-पुरुषाकृतिः अल(भ)वत् । लक्षणीया ज्ञेया पुरुषस्येवाकृतिः {संस्थानम्} ॥६२॥

६३. पित्र्यमंश० ।

यः परशुरामः स सोमः स चन्द्रः घर्मदीधितिरिव रविरिव अभवत् । सिद्धिजिह्वः ससर्पचन्दनद्रुमः चन्दनवृक्ष इव प्रादुरास । किं कुर्वन् ? उपवीतलक्षणं यज्ञोपवीतं पित्र्यं पितृसक्तं{अंशं}दधत् धारयत् । किं कुर्वन् ? ऊर्जितं मातृकं लक्षणं धनुश्च दधत् । माता क्षत्रिया{णि}पिता ब्राह्मणः भार्गवस्य ॥६३॥

६४. येन शेष० ।

युग्मम् । येन भार्गवेन प्राक् पूर्वं घृणा अजीयत विजिग्ये । ततः प्रश्चात् महीः पृथ्वी अजीयत । किंभूतेन येन ? जमदग्नेः आज्ञायां तस्थुषा स्थितेन । किंभूतस्य पितुः ? रोषस्य(रोषेण) पु(प)रुषात्मनः, रोषेण परुषीकृतः आत्मा यस्य सस्तस्य । पुनः किं[भू]तस्य पितुः ? तस्य स्थितिभिदो[ऽ]पि, स्थितिं आचारं भिनत्ति इति, मर्यादोल्लं-

घिनो[ऽ]पि, मर्यादात्यागिनोऽपि ! किंभूतेन येन ? वेपमानजननीशिरच्छिदः । वेपमानायाः मरणभयकम्पमानायाः जनन्याः शिरः छिनत्ति इति । तेन पुरा हि पुष्टेन (तस्थुषा ?) जमदग्निः मातुः शिरो लुनीहीत्यादिष्टस्तच्छैत्सीदतः अतः कृपात्यागः, पश्चाच्च निःक्षत्रं कृतवानिति पृथ्वीजयः ॥६४॥

६५. अक्षबीज० ।

यः परशुरामः अक्षबीजवलयेन निर्बभौ शुशुभे । किंभूतेन अक्षबीजवलयेन ? दक्ष(क्षि)णश्रवणसंस्थितेन दक्षिणकर्णारोपितेन । किं कुर्वन्निव ? क्षत्रियांतकरणैकविंशतेः क्षत्रियाणामन्तकरणस्य वधस्य योऽसौ, एकविंशतिसंख्या तस्याः व्याजपूर्वगणनां मिषान्तरगणनां, उद्वहन् धारयन्निव ॥६५॥

६६. तं पितुः० ।

पार्थिवः दशरथः विषसाद व्यषीदत् । किं कृत्वा ? भार्गवं अवलोक्य दृष्ट्वा । च पुनः स्वां आत्मीयां अवस्थां वृद्धत्वं विलोक्य । किंभूतः अहं दशरथः ? बालसूनुः । बाला अप्रगल्भा पुत्रा यस्येति विषादहेतुः । अयं भार्गवः क्रूरः, अयं च वृद्धः एते च पुत्राः बालाः किं भविष्यतीति खिन्नः इत्यर्थः । किंभूतं भार्गवम् ? राजवंशनिधनाय राजकुलच्छेदनाय दीक्षितं गृहीतव्रतं कृतप्रतिज्ञम् । केन ? मन्युना कोपेन । किंभूतेन कोपेन ? पितुः यमदग्नेः वधभवेन विनाशोत्थेन ॥६६॥

६७. रामनाम० ।

अस्य दशरथस्य राम इति नाम हृद्यं मनोहरं अभवत् । च पुनः भयदायि अभवत् । किंभूतं नाम ? आत्मजे पुत्रे च पुनः दारुण्णे(णे) अहिते शत्रौ वर्तमानं, तुल्यं सदृशम् । कयोः कमिव ? रत्नजातं रत्नश्रेष्ठं रत्नवृन्दं वा तदिव रत्नानां जातं प्रादुर्भाव इति कश्चित् हारसर्पयोरिव । यथा रत्नं जातं हारसर्पयोः वर्तमानं सदृशं हृद्यं भयदायि भवति । तस्मिन् दशरथे आत्मजस्य नाम हृद्यं अभवत् शत्रोः नाम भयदायि अभवत् ॥६७॥

६८. अर्घ(र्घ्य)मर्घ(र्घ्य)० ।

स भार्गवः यतः भरताग्रजः रामो वर्तते, ततस्तत्रैव दृशं दृष्टिं संदधे चिक्षेप अक्षिपत् । किंभूतां दृशम् ? उग्रतारकाम् । किं कृत्वा ? नृपं दशरथं अनिवेक्ष्य अगणय्य । किंभूतं नृपम् ? अर्घ(र्घ्य) मिति वादिनं वदन्तम् । किंभूतां दृशम् ? क्षत्रकोपदहनार्चिषम् । क्षत्रेषु यः कोपाग्निस्तस्यार्चिषं, ज्वालानिभाम् ॥६८॥

६९. तेन कार्मुक० ।

तेन परशुरामेण राघवो रामः निर्जगाद(निजगदे) । किंभूतेन तेन ? युयुत्सुना योद्धुकामेन । पुनः किंभूतेन तेन ? कार्मुकविषक्तमुष्टिना, कार्मुके धनुषि विषक्ता लग्ना मुष्टिर्यस्य, तेन । पुनः किंभूतेन ? इषुं बाणं अङ्गुलीविवरचारिणि(णं) कुर्वता विदधता । अङ्गुलीनां विवरं अङ्गुलीविवरं, अङ्गुलीविवरे चरतीति {इति} अङ्गुलीविवरचारि-{णो} ताम् (तत्) । किंभूतः राघवः ? विगतभीः निर्भयः । पुनः किंभूतः ? पुरोगतः अग्रस्थितः ॥६९॥

७०. क्षत्रजात० ।

क्षत्रकुलं मे मम अपकारि वैरि द्रोहकारि शत्रुर्वर्तते । तत्क्षत्रकुलं अनेकवारान् निहत्य विनाश्य अहं प्रशमं गतः प्राप्तः । तव विक्रमश्रवात् पौरुषाकर्षणात् अहं उद्यतो[ऽ]स्मि, उत्थितो[ऽ]स्मि । कस्मात् ? क इव ? दण्डघट्टनात् लगुडाभिघातात् गुप्तसर्पवत् ॥७०॥

७१. मैथिलस्य० ।

मैथिलस्य जनकस्य धनुः त्वं किल अक्षीणोः (अक्षणोः), अभाङ्क्षीः । किंभूतं धनुः ? अन्यपार्थिवैः अपरराजन्यकैः अनमितपूर्वकं अनारोपितम् । तन्निशम्य धनुषः भङ्गं निषम्य आकर्ण्य भवता मम परशुरामस्य आत्मना भग्नं वीर्यशृङ्गमिव, वीर्यमेव शृङ्गं, समर्थये ॥७१॥

७२. अन्यदा(पूर्वं) जगदि(ति)० ।

लोके राम इत्ययं शब्दः उच्चर(रि)त एव मां अगात् जगाम । सम्प्रति स शब्दः मे ममव्रीडां(डं) लज्जां आवहति धारयति । कस्मिन् सति ? त्वयि उदयोन्मुखे अभ्युदयामुखे सति । किंभूतः ? व्यस्तवृत्तिः व्यभागी(?)कृतव्यापारः ॥७२॥

७३. बिभ्रतो० ।

भो राम ! मम भार्गवस्य समागसौ तल्यापराधिनौ द्वौ रिपू शत्रू तुल्यौ । किंभूतस्य मे ? अपि निश्चितं अचले पर्वते अकुण्ठितं भग्नप्रसरं तीक्ष्णं अस्त्रं बिभ्रतः । तौ कौ द्वौ ? तातधेनुहरणात् हैहेयः । हैहेयो नाम सहस्रार्जुनः । चः पुनः कीर्तिं अपहर्तुं उद्यतः [त्वम्] ॥७३॥

७४. क्षत्रियान्त० ।

तेन कारणेन क्षत्रियान्तकरणोऽपि क्षत्रियाणां अंतकरणो विनाशकर्ता[ऽ]पि विक्रमः पराक्रमः त्वयि [अ]जिते सति मां न अवती(ति) प्रीणाति । पावकस्य महिमा प्रभावः सं(स) गण्यते यः कक्षवत् तृणवत् सागरे[ऽ]पि ज्वलति ॥७४॥

७५. विद्धि चात्त० ।

भो राम ! त्वया यत ऐश्वर्यं(रं) सा(शा)म्भवं धे(ध)नुः अभाजि भग्नम् । च पुनः तद्धनुः हरेः विष्णोः ओजसा आत्तरसं ग्रस्तसारं विद्धि जानीहि । अपि निश्चितं, मृदुः अनिलः वायुः तटद्रुमं पातयति । किंभूतं तटद्रुमम् ? नदीरयैः नदीवेगैः खात-मूलं उन्मूलितं(त)मूलम् ॥७५॥

७६. तन्मदीय० ।

तत्तस्मात्कारणात् इदं मदीयं मामकीनं आयुघ(धं) धनुः, {आयुधं धनुः} ज्या प्रत्यंचया सङ्गमय्य संमील्य, सशरं बाणसहितं विकृष्यतां, प्रधनं युघं(द्धं) तिष्ठत्(तु) आस्ताम् । एवमपि धनुराकर्णे(र्षे)[णे][ऽ]पि त्वया अहं जितः । किंभूतेन त्वया तुल्य-बाहुतरसा, सदृशभुजबलेनापि ॥७६॥

७७. कातरो[ऽ]सि० ।

भो राम ! यदि त्वं कातरोऽसि ज्यानिघातकठिनाङ्गुली(लिः) तव वृथा, अभय-याचनाञ्जलिः अभययाचनार्थमञ्जलिः बा(ब)ध्यतां योज्यताम् । किंभूतस्त्वम् ? उद्गतार्चिषा ज्वलज्ज्वालया मम परशुधारया तर्जितः निर्भर्त्सितः ॥७७॥

७८. एवमुक्तवति ।

राघवः रामः तद्धनुग्रहणमेव तदीयं चापरोपणमेव समर्थं प्रौढं उत्तरं प्रत्युत्तरं प्रत्यपद्यत अङ्गीचकार । कस्मिन् सति ? भीमदर्शने रौद्रदर्शने भार्गवे एवमुक्तवति सति । किंभूतः राघवः ? स्मितविकम्पिताधरः, स्मितेन हसितेन कम्पितोऽधरो यस्यासौ ॥७८॥

७९. पूर्वजन्म० ।

स रामः अतिमात्रलघुदर्शनः, अतिशयेन प्रियालोकः अभवत् बभूव । किंभूतः स रामः ? पूर्वजन्मधनुषा प्रागज्न्मचापेन समागतः । {मिलिता(तो} नवाम्बुदः नवजलधरः केवलोऽपि शु(सु)भगो भवति, त्रिदशचापलांछितः [०मिलितः] किं पुनः ? ॥७९॥

८०. [तेन]० ।

तेन रामेण कार्मुकं चापं अधिरोपितं अवनामितम् । किंभूतेन तेन ? बलिना, बलिष्ठेन । पुनः किंभूतेन ? भूमिनिहितैककोटिना, भूमौ निहिता एककोटिर्येनाऽसौ [तेन] ॥ भार्गवश्च परशुरामः वर्णविकृतिं मुखमालिन्यं प्राप अवाप । क इव ? वृष्टि-धौत मेघक्षालित वासवध्वज इन्द्रध्वजः [इव] ॥८०॥[1]

1 This is Malli. XI–८१. But Malli. has भूमिनिहितैककोटि तत् कार्मुकं; and the second half in Jina. is completely different.

८१. तावुभावपि० ।

जनता जनसमूहः उभावपि तौ पश्यति स्म प्र(द)दर्श । किंभूतौ तौ ? परस्पर-स्थितौ अन्योन्यस्थितौ । पुन किंभूतौ ? वर्धमानपरिहीनतेजसौ । तौ काविव ? दिनात्यये सन्ध्यासमये पार्वणौ पूर्णिमासम्बन्धिनौ शशिदिवाकराविव ॥८१॥

८२. तं कृपामृदु० ।

राघवस्तं भार्गवं व्याजहार प्रत्युवाच । आत्मनि स्वस्मिन्नेव रामे स्खलितवीर्यं प्रतिहतपराक्रमं भार्गवं अवेक्ष्य दृष्ट्वा । किंभूतो राघवः ? कृपामृदुः करुणाकोमलः । पुनः किंभूतः ? हरसूनुसन्निभः कार्तिकेयतुल्यः ॥८२॥

८३. न प्रहर्तुं० ।

भो भार्गव ! विप्र इति हेतोः अभिभवत्यपि त्वयि निर्दयं दयारहितं यथा भवति तथा प्रहर्तुं प्रहारं कर्तुमलं समर्थः न अस्मि, न भवामि । 'ब्राह्मणो न हन्तव्यः' इति श्रुतेः । शंस कथय, अनेन पत्रिणा वाणेन किं ते, तव, गतिं गमनं हन्मि विनाशयामि, अथ(उत) मखार्जितं यज्ञार्जितं लोकं परलोकम् ॥८३॥

८४. प्रत्युवाच० ।

[ऋषिः] प्रत्यवोचत् । {कस्मात् ?} तत्त्वतः परमार्थतः त्वां पुरातनं सनातनं पुरुषं न वेद्मि [इति न], किन्तु जानामि । हि यतः यस्मात् कारणात् मया त्वं कोपितः रोषितः असि । किंभूतेन मया ? गां गतस्य भुवं अवतीर्णस्य तव वैष्णवं धाम तेजः दिदृक्षुणा दृष्टुकामेन ॥८४॥

८५. भस्मसात्कृतवतः० ।

परमेष्ठिना विष्णुरूपेण त्वया रामेण मे मम आहितोऽपि कृतः[अपि] जयमुपजयः (जयविपर्ययः) पराजयः श्लाघये । किंभूतस्य मम ? पितृत्वि(द्वि)षः राजन्यान् भस्मसात् कृतवतः । पुनः किंभूतस्य मम ? ससागरां [स]समुद्रां पृथ्वीं पात्रसाच्च विप्राय तां कृतवतः ॥८५॥

८६. तद्गतिं मतिं० ।

भो मतिमतां वर पुरुषोत्तम, तत् तस्मात्कारणात् पुण्यतीर्थगमनाय यात्रायै, मे मम, ईप्सितं(तां) अभिप्रेतां गतिं रक्षा(क्ष) । खिलीकृता उज्जटीकृता स्वर्गसङ्गतिः स्वर्गलोकः मां न पीडयिष्यति न बाधयिष्यति । किंभूतं माम् ? अभोगलोलुपं, त्यक्तविषयाभि-लाषम् ॥८६॥

८७. प्रत्यपद्यत० ।

राघवः तथेति, एवं करिष्यते इति प्रत्यपद्यत, अङ्गीचकार । प्राङ्मुखश्च पूर्वस्यां दिशि सायकं बाणं विससर्ज अक्षिपत् । मुक्तोऽपि पुण्यवतोऽपि{स बाणाः} भार्गवस्य परशुरामस्य दुरत्ययः अनाक्रमणीयः स्वर्गमार्गपरिघः अभवत् बभूव ॥८७॥

८८. राघवोऽथ० ।

अथ अथानन्तरं राघवस्तपोनिधेश्चरणं समस्पृशत् पस्पर्श । किं कुर्वन् ? भो भगवान् ममापराधं क्षम(स्य)तामिति वदन्, तरसा बलेन निर्जितेषु तरस्विनां बलवतां प्रणतिरेव शोभते ॥८८॥

८९. राजसत्व० ।

ननु इति संबोधने । भो राम ! अनिन्द्यफलः प्रशस्यफलोऽपि अयं मम निग्रहः त्वया अनुग्रहीकृतः प्रसादीकृतः यतः मातृकं मातृकुलागतं राजसत्वं कोपलक्षणं अवधूय तिरस्कृत्य पित्र्यं पितृभवं समं गमितोऽस्मि ॥८९॥

९०. साधया० ।

स{ह}लक्ष्मणं लक्ष्मणसहितं लक्ष्मणा{नु}ग्रजं रामं ऊचिवान् ऋषिस्तिरोदधे । इतीति किम् ? साधयामि व्रजामि, ते तव अविघ्नं अस्तु भवतु । कथंभूतस्य ते ? देवकार्यं राक्षसवधं उपपादयिष्यतः करिष्यतः ॥९०॥ युग्मम् ।

९१. तस्मिन्गते० ।

पिता दशरथः स्नेहात् प्रेमवशात् रामं पुनरेव रा(जा)तं, पुनः प्रसूतं अमन्यत अमंस्त । किं कृत्वा ? विजयिनं जयनशीलं रामं परिरभ्य, आलिङ्ग्य । कस्मिन् सति ? तस्मिन् भार्गवे गते सति । गतशुचः निवृत्तशोकस्य दशरथस्य परितोषलाभः अभवत् बभूव । कस्य क इव ? कक्षाग्निं दवाग्निं लङ्घिततरोः कक्षानलाक्रान्तस्य व(वृ)क्षस्य वृष्टिपात इव । यथा कक्षाग्निलङ्घिततरोः दवदग्धवृक्षस्य वृष्टिपातः परितोषलाभो भवति ॥९१॥

९२. अथ पथि० ।

अथ अथानन्तरं अवनिपालः राजा दशरथः अयोध्यां पुरं [अ]विशत् विवेश । किंभूतां अयोध्याम् ? मैथिलीदर्शनीनां जानकीविलोकिनीनां अङ्गिता(ङ्गना)नां लोचनैः नयनैः कुवलयितगवाक्षां इन्दीवरितवातायनाम् । किंभूतः अवनिपालः ? शर्वकल्पः ईश्वरसदृशः । किं कृत्वा ? पथि मार्गे कतिचित् स(श)र्वरीः निशाः गमयित्वा । किंभूते पथि ? क्रु(क्लृ)प्तरम्योपकार्ये रचितपरार्ध्यपर्णकुटिम् ॥९२॥

इति श्री भट्टारकजिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे भार्गवपराजयो नाम एकादशमः सर्गः ॥११॥

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

द्वादशः सर्गः ।

१. निर्विष्टवि० ।

स राजा दशरथः उषसि प्रभाते दीपार्चिः दीपशिखा इव आसीत् अभूत् । अर्चिरिकारान्तः पुल्लिंगे इति केचित् । किंभूतः दशरथः ? निर्विष्टविषयस्नेहः । निर्विष्टः उपभुक्तः विषयस्नेहः येन सः । किंभूतः दीपार्चिः ? निर्विष्टविषयस्नेहः । पुनः किंभूतः दशरथः ? दशान्तं उपे[यि]वान् प्राप्तवान् । दीपस्तु{दीप}तैलदशायाः अन्तं प्राप्तो, वृद्ध इत्यर्थः ॥१॥

२. तं कर्णमूल० ।

जरा पलितच्छद्मना परिपक्वकेशव्याजेन कर्णमूलं श्रोत्रविवरं आगत्य इति तं दशरथं आह, ब्रूते स्म । इतीति किम् ? रामे श्रीः राज्यलक्ष्मीः न्यस्यतां स्थाप्यताम् । कयेव ? कैकेयीशङ्कयेव श्रवणभयेनेव ॥२॥

३. सा पौरान् ।

सा रामस्य अभ्युदयश्रुतिः राज्याभिषेकश्रुतिः प्रत्येकं सर्वान् पौरान् नागरान् आह्लादयांचक्रे, प्रमोदयामास । का, कानिव ? कुल्यासारणीः उद्यानपादपान् उपवन-वृक्षानिव, यथा कुल्या आश्रमवृक्षान् आह्लादयति । किंविशिष्टस्य रामस्य ? पौरकान्तस्य पौरप्रियस्य ॥३॥

४. तस्याभिः० ।

कैकेयी तस्य रामस्य अभिषेकसम्भारं अभिषेकार्थं सम्भारं सामग्रीं, पुनः दु(दू)षयामास अदूषयत् । किंभूतं अभिषेकसम्भारम् ? विधिवत् कल्पितम् । कैः ? नयनाश्रुभिः । शोकोष्णैः दुःखसंतप्तैः ॥४॥

५. सा किलाश्वा० ।

किल इत्यागमे । सा कैकेयी वरौ उद्वा(द्व)[वा]म प्रकाशं चक्रे । का, काविव ? इन्द्रसिक्ता भूः मेघवृष्टिसिक्ता भूः बिलमग्नौ विवरस्थौ उरगाविव सर्पाविव । यथा पृथ्वी बिलग्नौ(बिलगौ) उरगौ उद्वमति । किंभूतौ विवरौ ? (विवरस्थौ ?) तत्संश्रितौ, प्राक्-प्रतिपन्नौ । किंभूता सा ? चण्डी, कोपना । पुनः किंभूता ? भर्त्रा दशरथेन आश्वासिता प्रसादिता ॥५॥

६. तयोश्च० ।

तयोः वरयोः मध्यात् एकेन वरेण चतुर्दशसमाः चतुर्दशवर्षाणि रामं प्राव्राजयत् निष्कासयामास । द्वितीयेन वरेण सुतस्य मातुल[वेश्म]स्थभरतस्य श्रियं राज्यलक्ष्मीं ऐच्छत् अभिललाष । किंभूतां श्रियम् ? वैधव्यैकफलां, वैधव्यमात्रफलदां, वैधव्यमेवफलं यस्यास्ताम् । रामगमने भर्तृमरणात् ॥६॥

७. पित्रा दत्तां० ।

रामः पित्रा दशरथेन दत्तां महीं प्राक् पूर्वं रुदन् बाष्पायमाणः प्रत्यपद्यत अग्रहीत् अङ्गीचकार । पश्चाद्वनाय गच्छेति {इति} तदाज्ञां दशरथाज्ञां मुदितः संतुष्टः अग्रहीत्, जग्राह ॥७॥

८. दधतो मङ्गल० ।

जनाः लोकाः विस्मिताः साश्चर्यास्तस्य रामस्य मुखच्छायां{मुखच्छायां} समं ददृशुः । किंभूतस्य रामस्य ? मङ्गलक्षौमे माङ्गल्यांशुके दधतः धारयतः । {न} च पुनः कथंभूतस्य रामस्य ? वल्कले वस(सा)नस्य, परिदधतः ॥८॥

९. स सीत(ता)० ।

स रामः दण्डकारण्यं विवेश, प्राविशत् । प्रत्येकं सतां मनश्च विवेश । किं कुर्वन् ? सत्यात् गुरुं पितरं आ(अ)लोपयन् अभ्रंशयन् । किंभूतः रामः ? सीतालक्ष्मणा(ण)सखः सीतालक्ष्मण(णा)[भ्यां] सह ॥९॥

१०. [राजाऽपि]तद्वियोगार्तः० ।

आर्तः पुत्रविरहपीडितः राजाऽपि शरीरत्यागमात्रेण देहत्यागेन शुद्धिलाभं प्रायश्चित्तशुद्धिलाभं अमन्यत अमंस्त । किं कृत्वा ? स्वकर्मणां द्विजतनयवधभवं शापं स्मृत्वा ॥१०॥

११. विप्रोषि० ।

तद् राज्यं द्विषां शत्रु(त्रू)णां आमिषतां ग्राह्यत्वं ययौ । आमिषं तु स्त्रियां मांसे तथा स्याद्भोगवस्तुनि । किंभूतानां द्विषाम् ? रन्ध्रान्वेषणदक्षानां च्छिद्रगवेषणपटूनाम् । किंभूतं तद्राज्यम् ? विप्रोषितकुमारं, असन्निहितराजपुत्रचतुष्टयम् । पुनः किंभूतम् ? अस्तमितेश्वरम् स्वर्गीभूत(?)पार्थिवम् ॥११॥

१२. अथानाथाः० ।

अथ अथानन्तरं अनाथाः निःस्वामिका प्रकृतयः अमात्याः भरतं आनाययामासुः आनाययत् । कैः ? मौलैः, निजराज्यपरंपरासेवकैः । किंभूतं भरतम् ? मातृबन्धुनिवासिनं मातुलवेश्मस्थम् । किंभूतैः मौलैः ? स्तम्भिताश्रुभिः निवृत्तरोदनजलैः ॥१२॥

१३. श्रुत्वा तथाविधं० ।

कैकेयीतनयो भरतः केवलं स्वस्याः स्वकीयायाः मातुः पराङ्मुखः न आसीत्, श्रियो[ऽ]पि राजलक्ष्म्या[ऽ]पि पराङ्मुख आसीत् । किं कृत्वा ? पितुः दशरथस्य तथाविधं निजमातृकृतं श्रीरामवियोगात् मृत्युं श्रुत्वा, आकर्ण्य ॥१३॥

१४. ससैन्य० ।

ससैन्यश्च सैन्ययुक्तः सः भरतः रामं अन्वगात् अनुजगाम । किं कुर्वन् ? ससौमित्रस्य सलक्ष्मणस्य तस्य रामस्य वसतिद्रुमान् आश्रमवृक्षान् पश्यन् अवलोकयन् । किंभूतान् वसतिद्रुमान् ? आश्रमालयैः ऋषिभिः दर्शितान् । किंभूतः भरतः ? उदश्रुः सबाष्पनेत्रः ॥१४॥

१५. चित्रकूट० ।

च पुनः भरतः लक्ष्म्या राजलक्ष्म्या तं रामं निमंत्रयांचक्रे निमंत्रयामास । किंभूतं रामम् ? चित्रकूटवनस्थं चित्रकूटाद्रिगतम् । किंभूतः भरतः ? गुरोः दशरथस्य कथितस्वर्गगतिः । किंभूतया लक्ष्म्या ? अनुच्छिष्टसंपदा स्वयमनुपभुक्तया ॥१५॥

१६. स हि प्रथम० ।

हि स्फुटं निश्चितं, स भरतः भुवः पृथिव्याः स्वीकरणात् अङ्गीकारात् आत्मानं आचारबाह्यं अविहितराजलक्ष्मीसंग्रहे [1]ज्येष्ठे अनूढे परिवेत्तानुजो दारपरिग्रही स्वं परिवेत्तारं मेने। दाराग्निराज्यसंयोगां न्यकुर्यादग्रजे सति । परिवेत्ता स विज्ञेयः, परिवित्तिस्तु पूर्वजात् । कस्मिन् सति ? तस्मिन् प्रथमजे ज्येष्ठरामे अकृतश्रीपरिग्रहे अविहितराज्यलक्ष्मीसंग्रहे ॥१६॥

१७. तमशक्य० ।

स भरतः राज्याधिदैवते राज्याधिष्ठायके कर्तुं पश्चात् तं रामं पादुके ययाचे । किंभूतं रामम् ? स्वर्गिणः स्वर्गस्थस्य पितुः निदेशात् आदेशात् अपाक्रष्टुं चालयितुं अशक्यम् ॥१७॥

---

1 Under XII–१६ Malli. quotes अमर. Jina. seems to summerize it. Then Jina. seems to quote from a स्मृति source.

१८. स विसृष्ट० ।

स भरतः पुरीं नगरीं नैव अविशत्, न विवेश । किंभूतः भरतः ? तथेति उक्त्वा विसृष्टः, भ्रात्रा रामेण पुरीं नैवाविशत्, नन्दिग्रामगतः । स भरतस्तस्य रामस्य राज्यं न्यासमिव स्थापनिकामिव अभुनक्, ररक्ष ॥१८॥

१९. दृढभक्ति० ।

भरतः मातुः पापस्य प्रायश्चित्तमिव विशुद्धिमिव अकरोत्, चकार । किंभूतः भरतः ? राज्यतृष्णापराङ्मुखः, राज्याभिलाषविमुखः । पुनः किंभूतः ? इति, अनेन प्रकारेण ज्येष्ठे रामे दृढभक्तिः ॥१९॥

२०. रामोऽपि० ।

युवा रामोऽपि वृद्धेक्ष्वाकुव्रतं वृद्धानां इक्ष्वाकूणां व्रतं चचार आचरत् । कया सह ? वैदेह्या सीतया सह । किं कुर्वन् ? वने वन्येन कंदमूलादिना वर्तयन्, जीवनं कुर्वन् । किंभूतः रामः ? सानुजः लक्ष्मणः । पुनः किंभूतः रामः ? शान्तः ॥२०॥

२१. प्रभाव० ।

स रामः कदाचित् सीतायाः अङ्के उत्सङ्गे शिश्ये, सुस्वाप । उत्प्रेक्ष्यते—कस्मादिव ? किञ्चित् श्रमात्, मार्गक्लमात् इव । किंभूतः रामः ? वनस्पतिं वृक्षं आश्रितः । किंभूतां वनस्पतिम् ? प्रभावस्तम्भितच्छायां, प्रभावेन स्तम्भिता च्छाया यस्य ॥२१॥

२२. ऐन्द्रिः किल० ।

ऐन्द्रिः इन्द्रात्मजः द्विजः काकः पक्षी तस्याः सीतायाः स्तनौ नखैः विददार । किंकुर्वन् ? प्रियोपभोगचिह्नेषु प्रियकृतेषु उपभोगचिह्नेषु नखदशनपदादिषु पौरोभाग्यमिव, दोषैकदृक् पुरोभागी [तस्य भावः, तम्] आचरन् कुर्वन् ॥२२॥

२३. तस्मिन्न(न्ना)स्थ० ।

स रामस्तस्मिन् काके इषीकास्त्रं, इषीका कास उच्यते, आस्थत् अक्षिपत् । सुप्तः कथमज्ञासीत् ? प्राह, रामाविबोधितः प्रियाप्रबोधितः । राम[स्य] विशेषणम् । स तु काकः भ्रान्तः सन् एकनेत्रव्ययेन एकनयनत्यागेन, तस्मात् आ(अ)स्त्रात् मुमुचे, त्यु(मु)क्तः ॥२३॥

२४. रामस्त्वासन्न० ।

तु पुनः रामः चित्रकूटस्थलीं जहौ तत्याज । किं कृत्वा ? आसन्नदेशत्वात् निकटदेशत्वात्, पुनः भरतागमनं आशङ्क्य, ज्ञात्वा । किंभूतां चित्रकूटवनस्थलीम् ? उत्सुकसारङ्गां, उत्कण्ठितमृगाम् । विरहवशात् उत्सुकमृगत्वम् । रक्षकरामगमनात् ॥२४॥

२५. प्रययाः ।

स रामः दक्षिणां दिशं प्रययौ जगाम । केषु, क इव ? वार्षिकेषु ऋक्षेषु नक्षत्रेषु भास्कर इव । यथा भास्करः श्रीसूर्यः, वार्षिकेषु वर्षाकालसंबंधिषु ऋक्षेषु वसन् सन् दक्षिणां दिशं[अ]व्रजत् । किं कुर्वन् ? आतिथेयेषु, अतिथिभ्यो हितानि अतिथेयानि, तेषु अतिथिपरिचर्याकुशलेषु ऋषिकुशलेषु वसन् , तिष्ठन् ॥२५॥

२६. बभौ तमनु० ।

विदेहाधिपतेः जनकस्य सुता पुत्री, तं रामं अनुगच्छन्ती शुशुभे । केव ? गुणोन्मुखी गुणाभिलाषिणी लक्ष्मीरिव । किंभूता सीता ? कैकेय्या प्रतिषिद्धाऽपि, निषिद्धाऽ(पि) ॥२६॥

२७. अनसूया० ।

सा सीता अङ्गरागेण दिव्यविलेपनेन काननं वनं पुष्पोच्चलितषट्पदं, पुष्पेभ्यः उच्चलिता उत्पतिताः षट्पदाः, यत्र यत् तत् चकार अकरोत् । किंभूतेन अङ्गरागेण ? अनसूयाविसृष्टेन । अनसूयया अत्रिऋषिपत्न्या विसृष्टः दत्तः, अनसूयाविसृष्टः, तेन । पुनः किंभूतेन ? [पुण्य]गन्धेन, मनोज्ञसौरभ्येण ॥२७॥

२८. सन्ध्याभ्रकपि० ।

तत्र, तस्मिन् वने विराधो नाम राक्षसः रामस्य मार्गं आवृत्य निरुध्य, अतिष्ठत् तस्थौ । कः कस्यैव ? ग्रहः राहुः इन्दोरिव । यथा ग्रहो राहुः इन्दोश्चन्द्रस्य मार्गं आवृत्य तिष्ठति । किंभूतः राक्षसः ? सन्ध्याभ्रकपिशः सन्ध्यामेघकर्बुरः ॥२८॥

२९. स जहार० ।

स राक्षसस्तयोः रामलक्ष्मणयोर्मध्ये मैथिलीं जहार अहार्षीत् । कयोः कामिव ? नभोनभस्ययोः अन्तरे मध्ये अवग्रहः वृष्टिमिव । यथा अवग्रहः वृष्टिप्रतिबन्धः नभोनभस्ययोः श्रावणभाद्रपदयोः अन्तरे मध्ये वृष्टिं हरति । किंभूतः सः राक्षसः ? लोकशोषणः लोकक्षपकः । वृष्टिप्रतिबन्धः सोऽपि लोकशोषणो भवति, अनावृष्टित्वात् ॥२९॥

३०. तं विनिष्पिष्य० ।

काकुत्स्थौ रामलक्ष्मणौ तं विराधं विनिष्पिष्य विनिहत्य, इति हेतोः वसुधायां विचिख्नतुः निदधतुः अनुचि[ते]न गन्धेन स्थलीं भूमिं दूषयति अपवित्रीकरिष्यति पुरा दूषयिष्यति । यावत् पुरानिपातयोर्[लंट्]{वर्तमाना} भविष्यदर्थे भवति ॥३०॥

३१. पञ्चवट्यां० ।

ततस्तदनन्तरं रामः पञ्चवट्यां पञ्चवटीसंज्ञे वने तस्थौ स्थितवान् । कस्मात् ? कुंभजन्मनः आगस्त्येः (अगस्त्यस्य) शासनात् आज्ञायाः (आज्ञया)। क इव ? प्रकृतौ मर्यादायां विन्ध्याद्रिरिव । यथा विन्ध्याद्रिः विन्ध्याचलः प्रकृतौ तिष्ठति ≤ विचद्धिषमाणोः ≥[1] हि विन्ध्यः अगस्त्य[स्य] शासनात् शान्त इति प्रसिद्धम् । किंभूतः रामः ? अनप्रौ-(पो)ढस्थितिः, अत्यक्तमर्यादः ।३१।।

३२. रावण(णा)वर० ।

तत्र पञ्चवट्यां रावणावरजा शूर्पणखा राघवं रामं अभिपेदे समाययौ । का ? कामिव ? व्याली सर्पिणी मलयद्रुममिव चन्दनवृक्षमिव । किंभूता व्याली ? निदाघार्ता घर्मव्यथिता । यथा व्याली निदाघार्ता चन्दनवृक्षं प्राप्नोति । किंभूता रावणावरजा ? मदनातुरा स्मरार्ता ।।३२।।

३३. सा सीता० ।

सा शूर्पणखा सीतासन्निधावेव सीताप्रत्यक्षमेव तं रामं वव्रे अवृणोत् । किंभूता सा ? कथितान्वया अहं रावणस्य भगिनी, मां वृणीष्वेति अवोचदित्यर्थः । हि यतः यस्मात् कारणात् नारीणां मनोभवः कामः अत्यारूढः अतिवर्धितः सन् अकालज्ञो भवति अनवसरज्ञो भवति, अवसरं न प्रतीक्षते ।।३३।।

३४. कलत्र० ।

हे भद्रे ! अहं कलत्रवान्, मे मम कनीयांसं भजस्व, इति अनेन प्रकारेण रामः वृषस्यन्तीं मैथुनमिच्छन्तीं तां शूर्पणखां शशास शिक्षयामास । कथंभूतः रामः ? वृषस्कन्धः । वृषस्कन्धेन सुलक्षणत्वम् ।।३४।।

३५. ज्येष्ठाभिग० ।

सा राक्षसी भूयः पुनरपि रामाश्रिता रामाश्रया अभूत् बभूव । किंभूता राक्षसी ? पूर्वं प्राक् ज्येष्ठाभिगमनात् तेन लक्ष्मणेनापि अनभिनन्दिता निराकृता अश्लाघिता । सा केव ? उभयकूलभाक् नदीव । यथा नदी उभयकुलभाक् उभयतटभागिनी भवति ।।३५।।

३६. संरम्भं० ।

मैथिलीहासः तां शूर्पणखां संरम्भं कोपं निनाय अनैषीत् । कः कामिव ? चन्द्रोदयः उदधेः समुद्रस्य वेलामिव । यथा चन्द्रोदयः महोदधेर्वेलां मर्यादां संरम्भं नयति । किंभूतां

---

1 Not clear.

तां शूर्पणखाम् ? क्षणसौम्यां, क्षणमात्ररम्याम् । वेलायां विशेषणमपि क्रियते । किंभूतां वेलाम् ? निवातस्तिमितां वाताभावनिश्चलाम् ।।३६ ।

३७. फलमस्योपहासस्य० ।

अस्य उपहासस्य फलं सद्यः प्राप्स्यसि लप्स्यसे, मां पश्य, हि यतस्त्वया व्याघ्रीं-(घ्र्यां)मृगीपराभवः, मृग्या यः पराभवो अपमानः मृत्यवे, मृत्युनिमित्तं कृतः ।।३७।।

३८. इत्युक्त्वा० ।

शूर्पणखा नाम्नः सदृशं रूपं प्रत्यपद्यत अङ्गीचकार । किं कृत्वा ? मैथिलीं इत्युक्त्वा । कथंभूतां मैथिलीम् । भयात् भर्तुः अङ्के निविशतीम् ।।३८।। युग्मम् ।

३९. लक्ष्मणः० ।

लक्ष्मणस्तां शूर्पणखां विकृतां अत्यंतं रौद्ररूपां इति बुबुधे अज्ञासीत् । किं कृत्वा ? प्रथमं कोकिलामञ्जुवादिनीं श्रुत्वा पश्चात् शिवाघोरस्वरां श्रुत्वा ।।३९।।

४०. पर्णशाला० ।

अथ अथानन्तरं स लक्ष्मणस्तां शूर्पणखां वैरूप्यपौनरुक्त्येन च्छिन्नकर्णनाश(सि)-[का]त्वात् द्विगुण(णि)[तेन] वैरूप्येण अयोजयत् योजयामास । किं कृत्वा ? क्षिप्रं पर्णशालां उटजं प्रविश्य । किंभूतः लक्ष्मणः ? विकृष्टासिः कृष्टखड्गः ।।४०।।

४१. सा वक्र० ।

सा राक्षसी अंबरे आकाशे अङ्गुल्या तौ रामलक्ष्मणौ अतर्जयत् । तर्जयामास । किंभूतया अङ्गुल्या ? वक्रनखधारिण्या कुटिलकरजधारिण्या । पुनः किंभूतया ? वेणुक-र्कशपर्वया [1]वंशकच्छिन्नसंधिवंधया (?) । पुनः किंभूतया ? अंकुशाकारया अङ्कुश-वक्रया ।।४१।।

४२. प्राप्य च० ।

तथाविधा कर्णनासा(सा)हीना सती शूर्पणखा रामोपक्रमं रामविहितं नवं नूतनं रक्षःपरिभवं, राक्षसपरिभवं खरादिभ्यः खरदूषणादिभ्यः आचख्यौ कथयामास । किं कृत्वा ? आशु शिघ्रं जनस्थानं रावणदेशसीमानं जनस्थानाख्यं प्राप्य, आगत्य ।।४२।।

---

1 Not clear.

४३. मुखावयव० ।

यत् यस्मात्कारणात् नैऋताः राक्षसास्तां शूर्पणखां पुरोदधुः चक्रुः, अग्रे कृतवन्तः । किंभूतां ताम् ? मुखावयवलूनां छिन्नकर्णनासिकाम् । रामाभियायिनीं रामाभिगच्छन्तीम् । तेषां राक्षसानां तदेव मङ्गलं अभूत् ॥४३॥

४४. उदायुधाना० ।

राघवश्चापे धनुषि विजयशंसां निदधे निचिक्षेपे, लक्ष्मणे सीतां च निदधे । किं कृत्वा ? उदायुधान् उद्यतशस्त्रान् दुष्टान् तान् आप[ततः] आगच्छतः प्रेक्ष्य दृष्ट्वा ॥४४॥

४५. एको दाशरथिः कामं० ।

एकः [दाशरथिः] यातुधानाः राक्षसाः सहस्रशः सहस्रसंख्याः ते, तु पुनः यावन्त एव आसन् बभूवुः तावान् तावत्संख्यः तैः स राम ददृशे दृष्टः । एकैकेन सहस्रसंख्यो रामो दृष्टः इति ॥४५॥

४६. असज्जनेन० ।

अथ अथानन्तरं स काकुत्स्थः दूषणं न चक्षमे न सेहे । कः, कमिव ? शुभाचारः आत्मनः दूषणमिव । यथा शुभाचारः पुमान् आत्मदूषणं न सहते । किंभूतं दूषणम् ? असज्जनेन राक्षसलोकेन प्रयुक्तं प्रेषितम् ॥४६॥

४७. तं शरैः० ।

स रामः दूषणं शरैः प्रतिजग्राह प्रतीच्छति स्म प्रत्यैच्छत् । च पुनः, खरत्रिशिरसौ प्रतिजग्राह । पुनः क्रमशः अनुक्रमेण तस्य रामस्य चापात् धनुषः सममिव युगपदिव उद्ययुः प्रसस्रुः, लघुहस्तत्वात् ॥४७॥

४८. तैस्त्रया० ।

तैः सी(शि)तैः तीक्ष्णैः बाणैः त्रयाणां खरदूषणत्रिशिरसां आयुः पीतं ग्रस्तम् । पत्रिभिः कंकाद्यैः पक्षिभिः रुधिरं च शोणितम् । किंभूतैर्बाणैः ? यथा'पूर्व]विशुद्धिभिः यथापूव पूर्वभागानुसारेण विशुद्धिभिः ≼रणेणिते≽[1] यथापूर्वशुद्धिर्येषां ते इति । [1]बाणातिक्रमणहेतुः, प्रथमो(मं ?) क्षिप्ता बाणाः लक्षणे (?) युध्यन्ति इति कश्चित् । पुनः किंभूतैर्बाणैः ? देहातिगैः देहं शरीरं अतिगच्छन्ति इति, तैः । ॥४८॥

---

1. Not clear—≼ ≽, and also बाणा०..इति कश्चित् ।

४९. तस्मिन्० ।

कबन्धान् वर्जयित्वा अन्यत्र किञ्चन उच्छ्रितं उन्नतं [न] ददृशे, न अलोकयत। कस्मिन् सति ? रक्षसां तस्मिन् महति प्रभूते बले सैन्ये रामशरैः कृत्ते सति ।।४९।।

५०. सा बाणवर्षिं० ।

सा सुरद्विषां राक्षसानां वरूथिनी सेना अप्रबोधाय अजागरणाय गृध्रच्छाये 'च्छाया बाहुल्ये' नपुंसकताभावः च्छायाशब्दस्य । गृध्राणां च्छाया गृध्रच्छाया, ताम् । तस्मिन् सुष्वाप । किं कृत्वा ? बाणवर्षिणं रामं बोधयित्वा युद्ध्वा ।।५०।।

५१. राघवास्त्र० ।

तेषां राक्षसां मध्ये एषा शूर्पणखा एवं रावणं प्रति दुष्प्रवृत्तिहरा दुष्टवार्ता-कथयित्री अभवत् । कथंभूतानां तेषाम् ? राघवास्त्रैः रामबाणैः विदीर्णानां विदारितानाम् ।।५१।।

५२. निग्रहा० ।

धनदानुजः रावणः दशसु मूर्धसु मस्तकेषु रामेण निहतं स्थापितं पादं चरणं मेने अमंस्त । कस्मात् स्वसुः भगिन्याः निग्रहात् पराभवात् । पुनः कस्मात् ? आत्मनां खरदूषणत्रिशिरसां वधात् ।।५२।।

५३. रक्षसा मृग० ।

सः रावणः सीतां जहार अहार्षीत् । किं कृत्वा ? मृगरूपेण रक्षसा मारीचेन राघवौ रामलक्ष्मणौ वञ्चयित्वा च्छलयित्वा । किंभूतः सः ? पक्षीन्द्र[स्य]प्रयास(से)[न]-क्षणं विघ्नितः, पक्षीन्द्रप्रयासेन जटायुषः क्लेशेन क्षणं मुहूर्तमात्रं विघ्नितः कृतान्तरायः ।।५३।।

५४. तौ सीतान्वे० ।

सीतान्वेषिणौ सीतागवेषिणौ तौ राघवौ लूनपक्षं च्छिन्नपक्षं गृध्रं जटायुधं अपश्यताम् । कथंभूतं गृध्रम् ? कण्ठवर्तिभिः प्राणैः दशरथप्रीतेः सकाशात् दशरथस्नेहस्य अनृणं दत्तऋणम् ।।५४।।

५५. स रावण० ।

स गृध्रः ताभ्यां राघवाभ्यां राघवहृतां मैथिलीं वचसा वचनेन आख्याय कथयित्वा । तु पुनः आत्मनः स्वस्य महत्कर्म व्रणैः प्रहारैः आवेद्य उत्का(त्वा)संस्थितः मृतः ।।५५।।

५६. तयोस्तस्मि० ।

तयोः रामलक्ष्मणयोः अस्मिन् जटायुधि पितरीव अग्निसंस्कारात् अग्निदाहात् वह्निसंस्कारमारभ्य पराक्रियाः जलदानादिकाः ववृतिरे प्रावर्तन्त । किंभूतयोस्तयोः ? नवीभूतिः(त)पितृव्यापत्तिदुःखयोः । पुनर्बभूव पितृव्यापत्तिः पितृमरणशोकः ययोः ॥५६॥

५७. वधनिर्धूत० ।

कबंधस्य दैत्यस्य उपदेशतः उपदेशात् रामस्य सख्यं मैत्र्यं हरौ सुग्रीवे मुमूर्छ ववृधे । किंभूतस्य ? वधनिर्धूतशापस्य वधस्फोटितशापस्य । किंभूते हरौ ? समानव्यसने तुल्यदुःखे । मुनिस(श)प्तो हि श्रीतनयो दनुः कवन्धत्वमागतस्ताभ्यां बाहुच्छेदेन हृतः [शापः], स्वरूपमाप्य तयोः प्रत्युपकाराय सहायं ऋष्यमूकवासिनं सुग्रीवमवोचत् ॥५७॥

५८. [स]हत्वा० ।

स वीरः रामः चिरकांक्षितैः(ते) चिराभिला(ल)षैः(षि)[ते] तत्पदे तदीयराज्ये, तस्य वालिनः पदे सुग्रीवं संन्यवेस(श)यत् स्थापयामास । कस्मिन्, क इव ? धातोः स्थाने आदेशमिव । यथा कश्चित् सु(स)मानधातोः स्थाने आदेशं सन्निवेशयति । किं कृत्वा ? वालिनं हत्वा ॥५८॥

५९. इतस्ततश्च० ।

भर्तृचोदिताः सुग्रीवप्रेरिताः कपयः वानराः वैदेहीं अन्वेष्टुं गवेषयितुं इतस्ततश्च चेरुः । के इव ? उत्कस्य उत्कण्ठस्य रामस्य मनोरथाः इव ॥५९॥

६०. प्रवृत्ता० ।

मारुतिः हनुमान् सागरं तीर्णः उत्तीर्णवान् । कः कामिव ? निर्ममः संसारमिव । यथा निर्ममो योगी संसारं तरति । कस्याम् ? सम्प(म्पा)तिदर्शनात् । संपातिनाम गृध्रराजो जटायोरग्रजः । [तस्य]दर्शनात् । तस्याः सीतायाः प्रवृत्तौ वार्तायां उपलब्धायां प्राप्तायां सत्याम् । वानरैर्हि सीतामलभमानैर्विन्ध्याद्रिगुहायां जटायुकथां कुर्वद्भिः संपाति(ते)रालोकेन, तेन च जातपरिचयेन पारे समुद्रां रावणवसतिं तेषामाचक्षे ॥६०॥

६१. दृष्ट्वा(ष्टा)विचि० ।

विचिन्वता गवेषयता तेन हनुमता लङ्कायां राक्षसीवृता जानकी दृष्ट्वा(ष्टा) । काभिः, केव ? विषवल्लीभिः विषलताभिः परिवृता महौषधिरिव ॥६१॥

६२. तस्यै भर्तु० ।

हरिः हनुमान्{तस्य} तस्यै सीतायै भर्तुः रामस्य अभिज्ञानं चिह्नं आ(अ)-ङ्गुलीयकं मुद्रारत्नं ददौ अदत्त । आ(अ)ङ्गुलीयं किमिव ? तदा अनुष्णैः शीतलैः आनन्दाश्रुबिन्दुभिः प्रत्युद्गतमिव उत्थितमिव ॥६२॥

६३. निर्वाप्य० ।

स हनुमान् लंकां पुरीं ददाह अधाक्षीत् । किं कृत्वा ? प्रियसन्देषैः(शैः) भर्तृवाचकैः सीतां निर्वाप्य आश्वास्य । किंभूतः सः ? अक्षवधोद्धूरः अक्षवधाय रावणपुत्रवधाय उद्धूरः उत्कटः अक्षवधोद्धूरः । पुनः किंभूतः ? क्षणसोढारिनिग्रहः, क्षणं क्षणमात्रं स्वयमेव सोढः रिपुकृतो निग्रहो येन ॥६३॥

६४. प्रत्यभिज्ञानर० ।

कृती सः हनुमान् रामाय प्रत्यभिज्ञानरत्नं अदर्शयत् । किमिव ? मूर्तिमत् सशरीरं वैदेह्याः सीतायाः स्वयं आयातं हृदयमिव ॥६४॥

६५. स प्राप हृदय० ।

स रामः अपयोधरसंसर्गां अस्तनसंपर्कां प्रियालिङ्गननिवृ(र्वृ)तिं सीताश्लेषसौख्यं प्राप । किंभूतः रामः ? हृदये न्यस्तमणिः(णि)स्पर्शनिमीलितः । हृदये न्यस्तः स्थापितो यो[ऽ]-सौ मणिस्तस्य स्पर्शस्तेन निमीलितः उल्लसितः ॥६५॥

६६. श्रुत्वा रामः० ।

रामः लङ्कायाः महार्णवपरिक्षेपं समुद्रोल्लंघनं परिषा(खा)लघु मेने अमंस्त । किं कृत्वा ? प्रियोदंतं सीतावार्तां श्रुत्वा । किंभूतः रामः ? तत्सङ्गमोत्सुकः सीतासङ्गम-त्वरितः ॥६६॥

६७. सं(स)प्रतस्थो(स्थे)[ऽ]रिनाशाय० ।

स रामः अरिनाशाय अरिघाताय प्रतस्थे । किंभूतः सः ? हरिसैन्यैर्वानरबलैः अनुद्रुतः अनुगतः । केवलं भुव[ः] पृष्ठे न, खेऽपि आकाशे संबाधवर्त्मनि संकट-मार्गे ॥६७॥

६८. निविष्ट० ।

विभि(भी)षणस्तं रामं प्रपेदे प्राप । विभीषणः क इव ? स्नेहात् रामदेवानु[रा]-गात् राक्षसलक्ष्म्या राक्षसश्रिया बुद्धिं मतं(नः) आविश्य प्रविश्य चोदितः प्रेरित इव । किंभूतं तम् ? उदधेः समुद्रस्य कूले तटे निविष्टं उपविष्टम् ॥६८॥

६९. तस्मै निशाचरै० ।

प्रतिजज्ञे रघूद्वहः, राघवः तस्मै विभीषणाय निशाचरैश्वर्यं राक्षसराज्यं प्रति अङ्गीकृतवान् । खलु निश्चितं, नीतयः राजनीतयः, काले प्रस्तावे समारब्धाः फलं बध्नन्ति कुर्वन्ति ॥६९॥

७०. स सेतुं बन्ध० ।

स रामः सेतुं बन्धयामास अबंधयत् । यः सेतुः लवणोदधौ लवणसमुद्रे बभौ शुशुभे । क इव ? रसातलात् पातालात् उत्तीर्णः निर्गतः शार्ङ्गिणोः विष्णोः स्वप्नाय स्वापार्थं शेषः शेषराज इव ॥७०॥

७१. तेनोत्तीर्ण(र्य) पथा० ।

स रामः वानरैः लङ्कां रोधयमास वेष्टयामास । किंभूतैः वानरैः ? पिङ्गलैः कपिशैः । किं कृत्वा ? तेन सेतुबन्धेन पथा उत्तीर्य अवतीर्य । वानरैः किं कुर्वद्भिः ? द्वितीयं हेमप्राकारं कुर्वद्भिरिव विदधानैरिव ॥७१॥

७२. रणः प्र[ववृते]० ।

प्लवन(ग)रक्षसां वानररक्षसां भीमः रौद्रः रणः प्रववृते: प्रवृत्तः । किंभूतः रणः ? दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः दिक्षु दिशासु विजृंभितः प्रसृतः काकुत्स्थपौलस्त्ययोः रामरावणयोः जयघोषणो जयरवो यत्र ॥७२॥

७३. पादपाविद्ध० ।

पुनः किंभूतः रणः ? पादपाविद्धपरिघः, वानरप्रेरितैः पादपैर्वृक्षैः आविद्धास्ताडिता परिघार्गला यत्र । पुनः कथंभूतः ? शिलानिष्पिष्टमुद्गरः, शिलाभिः पाषाणैः निष्पिष्टा-श्चूर्णिता मुद्गरा यत्र । पुनः किंभूतः ? अतिशस्त्रनखन्यासः, अतिशक्ताः स्त्राः ? शस्त्राति-क्रान्ताः {खड्गाद्या} युद्धजयिनो नखन्यासाः, कररुहैः प्रहाराः यत्र । पुनः कथंभूत ? शैलैः रुग्णा निष्पिष्टा गजा यत्रेति वानरोत्कर्षकथनम् ॥७३॥ युग्मम् ।

७४. अथ राम० ।

अथ अथानन्तरं त्रिजटां(टा)रावणानुजा सीतां समजीवयत् जीवयामास । किंभूता त्रिजटा ? माया इन्द्रजालं इति सं(शं)सन्ती कथयन्ती । किंभूतां सीताम् ? रामशिरःच्छेद-दर्शनोद्भ्रान्तचेतनाम् । रामस्य शिरःछेददर्शनेन उद्भ्रांता गता चेतना यस्याः ॥७४॥

७५. कामं जीवति० ।

कामं मनोरथः (मे नाथः) जीवति[इति]सा सीता {इति}शुचं विजहौ तत्याज । प्राक् अस्य रामस्य अन्तं मरणं सत्यं मत्वा ज्ञात्वा, जीविता[ऽ]स्मि इति लज्जिता ।।७५।।

७६. गरुडापात० ।

मेघनादास्त्रबन्धने(नं) इन्द्रज(जि)[तः] नागपाशत्रन्धनं स्वप्नवृत्तान्तमिव अभवत् । अल्पकालदुःखदायित्वात् । किंभूतं मेघनादास्त्रबन्धनम् ? गरुडापातविश्लेषि, गरुडागमन-विश्लिष्टम् । गरुडः पक्षी तस्यापातेन विश्लेषो दूरीकरणं यस्य । पुनः किंभूतम् ? क्षणक्लेशि, मुहूर्तमात्रव्यथकम् ।।७६।।

७७. ततो विभ्यो(भेद)० ।

ततस्तदनन्तरं पौलस्त्यः रावणः शक्त्या प्रहरणविशेषेण लक्ष्मणं वक्षसि विभेद, ताडयामास । तु पुनः, रामः अनाहतो[ऽ]पि अविद्धो[ऽ]पि शुचा अनुजशोकेन विदीर्णहृदयः विदारितहृदयः आसीत् ।।७७।।

७८. स मारुति० ।

स लक्ष्मणः शरैर्बाणैः लङ्कास्त्रीणां प्रलापाचार्यकं उपाध्यायत्वं चक्रे विदधे, कृतवान् । किंभूतः लक्ष्मणः ? मारुति-समानीत-महौषधि-कु(हृ)त[व्य]थः, मारुतिना हनूमता आनीता या महौषधिः विशल्याख्या तया हृता अपास्ता व्यथा वेदना यस्य सः ।।७८।।

७९. [स]नादं{स}मे० ।

स लक्ष्मणः मेघनादस्य ना[दं] इन्द्रायुधप्रभं शक्रायुधकांतिं धनुश्च चापं च, न किञ्चित् पर्यशेषयत् धनुश्च न पर्यशेषयत्[1]।।७९।।

८०. क्लेशेन महता निद्रां० ।[2]

रावणः आत्मनः स्वस्य अनुजं कुम्भकर्णं युद्धाय प्रेरयामास प्राहिणोत् । किंभूतम् ? रणदुर्जयम् । अजेयम् । क्लेशेन महता निद्रां त्याजिताम् ...।।८०।।

---

1 The comm. on XII–79,&80, seems to be incomplete.

2 ७९-८० श्लोकयोर्मध्ये इमौ श्लोकौ दृश्येते । पृ. २६२, foot-note, ibid. They are Jina. ८०, क्लेशेन०, and Jina. ८१-स जघान.

८१. स जघान० ।

तदादेशात् रावणादेशात् अनेकशः अनेकसंख्यकान् उग्रान् रौद्रान् कपीन् जघान हतवान् । च पुनः हरीश्वरं सुग्रीवं समादाय गृहीत्वा लङ्कां पुरीं विवेश प्राविशत् ॥८१॥

८२. कुम्भकर्णः० ।

कुम्भकर्णः रामं रुरोध अरौत्सीत् । क इव ? टंकच्छिन्नमनःशिलः टंकैश्छिन्ना एव मनःशिला यस्य सः । श्रृङ्गी पर्वतः इव । किंभूतः कुम्भकर्णः ? कपीन्द्रेण सुग्रीवेण स्वसुः शूर्पणखायाः तुल्यावस्था(स्थः) समानरूपः कृतः सुग्रीवेण च्छिन्नकर्णः कुम्भकर्णो राममभियातः ॥८२॥

८३. अकाले बो० ।

भ्राता रावणेन अनुजः कुम्भकर्णः अकाले अप्रस्तावे वृथा बोधितः जागरितः । किंभूतः अनुजः ? प्रियस्वप्नः प्रियस्वापः । असौ कुम्भकर्णः इतीव हेतोः रामेषुभिः रामेशरैः दीर्घनिद्रां मरणाख्यां प्रवेशितः प्रापितः ॥८३॥

८४. इतराण्यपि० ।

इतराण्यपि रक्षांसि राक्षसाः वानरकोटिषु पेतुः अपतन् । कासु, कानीव ? तच्छोणितनदीषु राक्षसरुधिरनदीषु समरोत्थानि रणजानि रजांसि इव ॥८४॥

८५. निर्ययावथः० ।

अथ अथानन्तरं पौलस्त्यः रावणः मंदिरात् पुनः शु(यु)द्धाय निर्ययौ । इति निश्चितः । इतीति किम् ? अद्य जगत् अरावणं अरामं वा ॥८५॥

८६. रामं पदाति० ।

पुरन्दरः इन्द्रः तस्मै रामाय हरियुग्यं कपिलाश्वं पीताश्वं रथं प्रजिघ्रा(घा)य प्रेषयामास प्राहिणोत् । किं कृत्वा ? तं रामं पदातिं आलोक्य, पुनः लङ्केशं वरूथिनं रथस्थं अवलोक्य ॥८६॥

८७. तमाधूत० ।

राघवः समस्तं रथं अध्यास्त आरुरोह । किंभूतं रथम् ? जैत्रं, जयावहम् । किंभूतः रामः ? देवसुतभुजालम्बी देवसुतभुजं अवलंब्य इति पर्यायः । किंभूतं रथम् ? व्योमगङ्गोर्मिवायुभिः स्वर्गगङ्गातरङ्गवातैः आधूतध्वजपटं नर्तितवैजन्तीकम् ॥८७॥

८८. मातलि० ।

मातलिस्तस्य रामस्य म(मा)हेन्द्रं इन्द्रसम्बन्धिनं तनुच्छदं कवचं आमुमोच बबंध । यत्र तनुच्छदे सुरद्विषां अस्त्राणि उत्पलदलकल्पैर्व्यं कुवलया(य)किसलयकोमलत्वं आपुः, प्रापुः ॥८८॥

८९. अन्योन्य० ।

रामरावणयोर्वैरं चिरात् चरितार्थमिव कृतार्थमिव अभवत् बभूव । किंभूतं वैरम् ? अन्योन्यदर्शनप्राप्तविक्रमावसरं, अन्योन्यदर्शनेन पर[स्पर]स्यावलोकनेन प्राप्तो विक्रमावसरो यत्र ॥८९॥

९०. भुजोत्तमं० (भुजमूर्धो०) ।

एकोऽपि सा धनदानुजः रावणः [अ]यथापूर्वं [अ]यथानुक्रमेण मातृवंशे विवाहाद्युत्सवे मातृस्थापनै(?) इव स्थितः ददृशे । कस्मात् ? भुजोत्तमाङ्गबाहुल्यात् भुजमूर्द्धादीनां भूयस्त्वात् ॥९०॥

९१. जेतारं० ।

रामस्तं अरिं रावणं बह्वमन्यत अमंस्त । किंभूतं अरिम् ? लोकपालानां जेतारं अभिभाविनम् । पुनः किंभूतम् ? स्वमुखैः निजवक्त्रैः अर्चितेश्वरम् । पुनः किंभूतम् ? तुलितकैलासं, उन्मूलितकैलासगिरिम् ॥९१॥

९२. तस्य स्फुरति० ।

पौलस्त्यः रावणस्तस्य सव्येतरे दक्षिणभुजे बाहौ शरं बाणं निचखान रोपयामास । किंभूते भुजे ? स्फुरति, कंपमाने । पुनः किंभूते ? सीतासङ्गमसंसे(शं)सिनि सीतासङ्गमकथके । किंभूतः पौलस्त्य; ? अधिककोपः ॥९२॥

९३. रावणस्य० ।

रामास्त्रं राघवशरः रावणस्यापि, हृदयं वक्षः भित्वा विदार्य भुवं पातालं विवेश प्राविशत् । किं कर्तुमिव भुवस्तलं विवेश ? उरगेभ्यः नागेभ्यः प्रियां वार्तां क्षा(आख्या)तुं कथयितुमिव । किंभूतं रामास्त्रम् ? आशुगं, शीघ्रगामि ॥९३॥

९४. विक्र[म]व्यतिहारे० ।

जयश्रीः द्वयोरपि रामरावणयोरपि विक्रमव्यतिहारेण, पर्याप्तवृत्त्या कदाचिद्रावणो विजयते कदाचिद्रामः, सामान्या साधारणी मध्यमस्था [अ]भूत् । कयोः, केव ?

मत्तवारणयोः मत्तयोः द्विपयोः अन्तरा वेदिरिव । यथा मत्तवारणयोः द्वयोः गजयोः अन्तरा वेदिः, जयश्रीः सामान्या भवति ॥९४॥

९५. वचसे(सैव)० ।

तयोः रामरावणयोः अन्योन्यं जयसंरभः परस्परजयक्षोभः वव्र्वे अवर्धिष्ट । कथंभूतयो{स्त}स्तयोः रामरावणयोः ? अस्त्रेणास्त्रं निघ्नतोः निरस्यतोः । तयो कयोरिव ? वादिनोरिव । कथंभूतयोर्वादिनोः ? वचसा वाक्यं निघ्नतोः । यथा वाक्यविवादकारिणोः अन्योन्यजयसंरम्भो वद्र्धते । वादिनावपि वचसैव वाक्यं निहतः प्रमाणादिनियमेन पक्षप्रतिपक्षयोरपि परिग्रहो वादः ॥९५॥

९६. परस्परं शरव्रातौ० (कृतप्रतिकृत)० ।

अन्योन्यबाणसमूहस्तयोः रामरावणयोः पुष्पवृष्टिं न सेहिरे । किंभूतां पुष्पवृष्टिम् ? सुरासुरैर्देवदानवै- मुक्तां निक्षिप्ताम् । कथंभूतैः सुरासुरैः ? कृतप्रतिकृतप्रीतैः कृतप्रत्युपकारप्रीतैः ॥९६॥

९७. अयःश० ।

अथातन्तरं रक्षः रावणः शत्रवे रामाय शक्तिं अक्षिपत् चिक्षेप । किंभूतां शक्तिम् ? शतघ्नीम् । पुनः किंभूताम् ? अयःशंकुचितां, लोहमयकीलकव्याप्ताम् । पुनः किंभूताम् ? कूटशाल्मलिं, कूटशाल्मलिनाम्नीं शक्तिम् । कामिव ? वैवस्वतस्य यमस्य हृतां शक्तिमिव ॥९७॥

९८. राघवो रथ० ।

राघवः रामः अद्र्धचन्द्रमुखैः अर्धचन्द्राकारं मुखं येषां, [ते, तैः] बाणैस्तां शक्तिं चिच्छेद । न केवलं शक्तिं चिच्छेद, सुरद्विषः रावणस्य आशां च । कमिव ? कदलीमिव । किंभूतां ताम् ? रथं अप्राप्तां, अनवगताम् ॥९८॥

९९. अमोघं० ।

च पुनः एकधनुर्धरः रामः आशु शीघ्रं धनुषि चापे अमोघं सफलं ब्राह्मं ब्रह्मदेवताकं अस्त्रं शस्त्रं संदधे समधत्त । किंभूतं अस्त्रम् ? प्रियाशोकशल्यनिष्कर्षणौषधं, प्रियायाः शोक एव शल्यं प्रियाशोकशल्यं तस्य निष्कर्षणं तत्र औषधमिव, औषधम् ॥९९॥

१००. तद् व्योम्नि० ।

दशधा भिन्नं दशप्रकारैर्भिन्नं, तत् अस्त्रं व्योम्नि आकाशे ददृशुः अद्राक्षुः ? किंभूतं तत् ? दीप्तिवत् मुखं भासुरवक्त्रम् । किमिव ? महोरगस्य शेषराजस्य वपुः शरीरमिव । किंभूतं वपुः ? करालफणमंडलं भीषणफलवलयम् ॥१००॥

१०१. तेन मंत्र० ।

स रामः मंत्रयुक्तेन तेनास्त्रेण निमेषार्द्धात् क्षणमात्रात् रावणशिरपङ्क्तिं अशातयत् । किंभूतां रावणशिरःपंक्तिम् ? अज्ञातव्रणवेदनां अज्ञातप्रहारपीडाम् ॥१०१॥

१०२. बालार्क० ।

पतिष्यतः भुवं यियासोः कायस्य राक्षसवपुषः कण्ठच्छेदपरंपरा ग्रीवाच्छेदमाला रराज, शुशुभे । केव ? अप्सु पानीयेसु वीचिभिन्ना कल्लोलर्बाहुल्यं आप्ता बाला(ल)-सूर्यप्रतिमा इव ॥१०२॥

१०३. मरुतां...पतितानि० ।

तस्य रावणस्य शिरांसि पश्यतां मरुतां मनश्चित्तं अपि निश्चितं न अतिवि[श]-श्वास्य(स), न विश्वासं चक्रे । कथंभूतानां मरुताम् ? पुनःसंधानं(न)शङ्किनाम् ॥ पुनः संधानं संयोगं शङ्कते, पुनः संधानशङ्किनस्तेषाम् ॥१०४॥

१०४. अथ मद० ।

अथ अथानन्तरं पौलस्त्यशत्रोः रामस्य मूर्ध्नि पुष्पवर्षं कुसुमवर्षं पपात, अपतत् । किंभूतं पुष्पवर्षम् ? अलिवृन्दैः अनुगतं अन्वीयमानम् । किं कृत्वा ? लोकपालद्विपानां गण्डभित्तीकपोलप्रदेशान् विहाय परित्यज्य । किंभूतैः अलिवृन्दैः ? मदगुरुपक्षैः । दानाम्बुगुरुपक्षैः । पुनः किंभूतं पुष्पवर्षम् ? सुरविमुक्तं, देवप्रेरितम् । पुनः किंभूतम् ? सुरभि सुगन्धम् । किंभूते मूर्ध्नि ? उपनतमणिबन्धे प्राप्तचूडामणिबन्धे ॥१०४॥

१०५. यन्ता हरेः० ।

हरेः यन्ता रथं ऊर्ध्वं उर्ध्वलोके निनाय अनैषीत् । किंभूतं रथम् ? नामाङ्करावणशराङ्कितकेतुयष्टिं, नाम्नः अङ्कोऽस्मिन् सनामाङ्कश्चासौ रावणशरश्च, नामांकरावणशरः तेनांक(कि)[त]केतुयष्टिर्यस्य । पुनः कथंभूतम् ? हरिसहस्र{आ}युजं स्वर्णवर्ण–अश्वसहस्रयुक्तम् । किं कृत्वा ? राघवं रामं आपृच्छ्य आमंत्र्य । किंभूतं राघवम् ? सपदि संहृतकार्मुकज्यं संवृत्तशरचापम् । पुनः किंभूतम् ? अनुष्ठित देव-कार्यम् ॥१०५॥

१०६. रघुपति० ।

स रघुपतिः रामोऽपि पुरीं अयोध्यां प्रतस्थे गन्तुमारेभे । किं कृत्वा ? जातवेदोविशुद्धां प्रियां सीतां प्रगृह्य आदाय । पुनः किं कृत्वा ? विभीषणे वैरिणः रावणस्य श्रियं संक्रमय्य संस्थाप्य । किं विशिष्टे विभीषणे ? प्रियसुहृदि प्रियमित्रे । किंभूतः रघुपतिः ? भुजविजितविमानरत्नाधिरूढः । भुजाभ्यां विजितं अर्जितं यद्विमानरत्नं पुष्पकं तत्राधिरूढः । पुनः किंभूतः ? रविसुतसहितेन सुग्रीवसहितेन तेन सौमित्रिणा अनुयातः ॥१०६॥

इति भट्टारकश्रीजिनचन्द्रसूरिशिष्य आचार्यश्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे रावणवधो नाम द्वादशः सर्गः ॥१२॥

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

त्रयोदशः सर्गः ।

१. अथात्मनः० ।

अथ अथानन्तरं स रामाभिधानो हरिर्विष्णुः मिथः परस्परं जायां सीतां इति उवाच, बभाषे । किं कृत्वा ? रत्नाकरं समुद्रं वीक्ष्य, अवलोक्य । किंभूतः सः ? आत्मनः स्वस्य पदं आकाशं विमानेन पुष्पकेन विगाहमानः अधितिष्ठन् । किंभूतं पदम् ? शब्दगुणम् । शब्देन (शब्दः ?) गुणो यस्य तत् शब्दगुणमाकाशम् । किंभूतः सः ? गुणज्ञः विशेषज्ञः ॥१॥

२. वैदेहि० ।

वैदेहि ! सीते ! अम्बुराशिं समुद्रं पश्य । किंभूतं तं अंबुराशिम् ? फेनिलं, फेनसहितम् । पुनः कथंभूतम् ? मलयात् मलयाद्रेरारभ्य मत्सेतुना विभक्तं द्विधाकृतम् । केन, कमिव ? च्छायापथेन स्वच्छेन गङ्गाप्रवाहेण वा आकाशमिव । कथंभूतं आकाशम् ? शरत्प्रसन्नं, शरत्कालनिर्मलम् । पुनः किंभूतम् ? आविष्कृ[त]चारुतारं, प्रकटितचारुनक्षत्रम् ॥२॥

३. गुरोर्यियि० ।

नः अस्माकं पूर्वैः ज्येष्ठतरैः अयं सागरः परिवृद्धि(र्वर्धि)तः, वृद्धिं नीतः किल । किंभूतैः पूर्वैः ? तदर्थं अश्वाय उर्वी पृथ्वीं अवदारयद्भिः नख(खन)द्भिः । कस्मिन् सति ? यियक्षोः यष्टुंकामस्य गुरोः सा(स)गरस्य तुरगे अश्वे रसातलं पातालं संक्रमिते सति । नीते, केन ? कपिलेन ऋषिणा । किंभूते तुरगे ? मेध्ये पवित्रे ॥३॥

४. गर्भं दध० ।

अस्मात् समुद्रात् अर्कमरीचयः सूर्यकिरणाः गर्भं धारयन्ति । अत्र वसूनि धा-(ध)नानि विवृद्धिं स्फीतिं अश्नुवते प्राप्नुवन्ति । असौ सागरः अनिंधनं इन्धनरहितं वह्निं अग्निं बिभर्ति धारयति । अनेन समुद्रेण प्रह्लादनं ज्योतिश्चन्द्राख्यं अजनि जनितम् ॥४॥

५. तां तामवस्थां० ।

अस्य समुद्र[स्य]रूपं इदकृतया एतादृशः इयत्तया च इयत्परिमाणो वा, अनवधारणीयं

दुर्बोधम् । कस्येव ? विष्णोरिव । किंभूतं रूपम् ? तां तामवस्थां पूर्वोक्तामवस्थां प्रतिपद्यमानं प्राप्यमानं, दशदिशो व्याप्य आपूर्य महिम्ना माहात्म्येन स्थितम् ।।५।।

६. नाभिप्ररू० ।

पुरुषः विष्णुः कोला(लोका)न् संहृत्य संक्षिप्य अमुं समुद्रं अधिशेते स्वपिति । किंभूतः पुरुषः ? प्रथमेन धात्रा ब्रह्मणा संस्तूयमानः, वर्ण्यमानः । किंभूतेन धात्रा ? नाभिप्ररूढाम्बुरुहासनेन नाभौ प्ररूढं उत्पन्नं च तत् अम्बुरुहं तत्रासनं यस्य सः तेन । पुनः किंभूतः ? युगां[तो]चितयोगनिद्रः । युगान्ते प्रलये उचिता योग्या योगनिद्रा यस्य ।।६।।

७. पक्षच्छिदा० ।

शतशः शतसंख्याः महीध्राः पर्वताः एनं समुद्रं [शरण्यं] शरणे साधुः [तं] आश्रयन्ते भजन्ते । के, कमिव ? पु(प)रेभ्यः शत्रुभ्यः उपप्लविनः सोपप्लवाः नृपाः धर्मोत्तरं मध्यमं अर्थमिन्व(व) । यथा नृपाः परेभ्यः उपप्लविनः पराभूताः सन्तः धर्मोत्तरं मध्यमं अर्थं आश्रयंति(ते) । किंभूताः महीध्राः ? गोत्रभिदा{गोत्रेण}आत्तगर्वा गृहीतगर्वाः । किंभूतेन गोत्रभिदा ? पक्षच्छिदा पक्षघातकेन ।।७।।

८. रसातला० ।

अस्य समुद्रस्य अच्छं निर्मलं अंभः पानीयं भुवः पृथिव्याः मुहूर्तवक्त्राभरणं बभूव । किंभूतं अंभः ? प्रलयप्रवृद्धं कल्पांतोल्लसितम् । किंभूतायाः भुवः ? रसातलात् पातालात् आदिभवेन वराहरूपेण पुंसा नारायणेन [प्र]युक्तोद्वहनक्रियायाः प्रारब्धोद्धरणक्रियायाः ।।८।।

९. मुखार्पणेषु० ।

असौ समुद्रः सिन्धूः नदीः पिबति पाययते च । किंभूताः सिन्धूः ? मुखार्पणेषु प्रकृतिप्रगल्भाः स्वभावदक्षाः । कथंभूतः असौ ? स्वयं तरङ्गाधरदानदक्षः कल्लोलौष्टार्पणचतुरः । पुनः किंभूतः ? अनन्यसामान्यकलत्रवृत्तिः अनन्यसामन्य(न्या) लोकोत्तरः(रा) कलत्रेषु वृत्तिर्यस्य सः ।।९।।

१०. स सत्त्वमादाय० ।

अमी ति(स्ति)मयः मत्स्याः शिरोभिः जलप्रवाहान् ऊर्ध्वं प्रतन्वन्ति । किंभूतैः शिरोभिः ? सरन्ध्रैः । मीनानां {हे} शिरसि विवरं वर्तते इति सुप्रतीतम् । किंभूताः मत्स्याः ? ससत्त्वं जीवसहितं नदीमुखांभः आदाय गृहीत्वा विवृताननत्वं प्रसारितमुखत्वं संमीलयन्तः, संयोजयन्तः प्रकटयन्तः ।।१०।।

११. मातंग० ।

हे सीते ! समुद्रफेनान् पश्य । किंभूतान् समुद्रफेनान् ? उत्पतद्भिः उल्ललद्भिः मातंगनक्रैः करिमकरैः सहवेगेन द्विधा भग्नान् । ये समुद्रफेनाः कपोलसंसर्पितया गण्डाश्लेषत्वेन एषां करिमकराणां कर्णक्षणचामरत्वं व्रजन्ति यान्ति ॥११॥

१२. वेलानिला० ।

एते भुजङ्गाः सर्पाः फणस्थैः मणिभिः व्यज्यन्ते प्रकटीक्रियन्ते । किंभूताः भुजङ्गाः ? वेलानिलाय प्रसृताः । पुनः किंभूताः ? महोर्मिविस्फूर्जितनिर्विशेषाः । महोर्मिणा विस्फूर्जितमुल्लासस्तेन निर्विशेषसदृशः । किंभूतैर्मणिभिः ? सूर्यांशुसंपर्कसमिद्धरागैः रविकरपरिचयस्फुरितदीप्तिभिः ॥१२॥

१३. तवाधर० ।

एतत् शङ्खयूथं शङ्खसमूहं कथंचित् क्लेशात् अपक्रामति निर्याति । किंभूतं शङ्खयूथम् ? सहसोर्मिवेगात् तरङ्गवेगात् विद्रुमद्रुमेषु प्रवालतरुषु पर्यस्तं पतितं स्खलितम् । कथंभूतेषु विद्रुमेषु ? तवाधरस्पर्द्धिषु । पुनः किंभूतं शङ्खयूथम् ? ऊर्ध्वाङ्कुरप्रोतमुखं ऊर्ध्वांकुरप्रविष्टवक्त्रात् क्लेशापक्रमणहेतुः ॥१३॥

१४. प्रवृत्तमात्रेण० ।

असौ समुद्रः गिरिणा मन्दराद्रिणा भूयः पुनरपि प्रमथ्यमानः इव विलोड्यमान इव, भूयिष्ठं आभाति, शोभते । केन ? घनेन, मेघेन । किंविशिष्टेन मेघेन ? पयांसि पातुं प्रवृत्तमात्रेण प्रस्तुतमात्रेण । पुनः किं विशिष्टेन ? आवर्तवेगाद् भ्रमता ॥१४॥

१५. दूरादय० ।

हे सीते ! लवणाम्बुराशेः लवणोदधेर्वेलाजलवृद्धिः आभाति । केव ? धारानिबद्धा । धारास्वरूपा, कलङ्कलेखेव । किंभूतस्य लवणाम्बुराशेः ? द्राद् अयश्चक्रनिभस्य लोक (ह)चक्रतुल्यस्य । किंभूता कलंकलेखा ? तन्वी, सूक्ष्मा । पुनः कथंभूता ? तमालतालि (ली)वनराजिनीला ॥१५॥

१६. वेलानिलः० ।

वेलाऽनिलः केतुकि(तक)रेणुभिस्ते तव आयताक्षं विशालनेत्रं आननं संभावयति योजयति । मण्डनकालहानेः मण्डनकृतकालक्षेपस्य, अक्षमं असमर्थं मां वेत्तीव जानतीव । किंभूतं माम् ? बिंबाधरबद्धतृष्णं, बिंबफललोहितोष्ठपानलंपटम् ॥१६॥

१७. एते वयं० ।

हे सीते ! एते वयं विमानवेगात् मुहूर्तेन क्षणमात्रेण पयोधेः समुद्रस्य, कूलं तीरं प्राप्त(प्ताः) । किंभूतं कूलम् ? सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलम् । सैकते तटे भग्नायाः सु(शु)क्तयः ताभ्यः पर्यस्तं पतितं मुक्तापटलं मौक्तिकनिकुरु(करं)यत्र तत् । पुनः किंभूतम् ? फलावर्जितपूगमालम् । फलैरावर्जिता नमिता पूगमाला, {ते बिभ्रते तरून्} यत्र तत् {फलनिमित्त} पूगीफलसो(शो)भमानम् ॥१७॥

१८. कुरुष्व० ।

हे करभोरु ! हे मृगप्रेक्षिणि मृगालोकने ! तावत् तावदिति वाक्यालङ्कारे । पश्चात् पृष्टतः मार्गे पथि दृष्टिपातं दृष्टिनिरीक्षणं कुरुष्व । एषा समुद्रात् विदूरीभवतः, अनिकटीभवतः समुद्रात् सकानना भूमिः निष्पततीव निस्सरतीव ॥१८॥

१९. क्वचित्पथा० ।

हे सीते ! यथाविधः यादृशः मे मनसः चित्तस्य अभिलाषो मनोरथस्तथा विमानं वर्तते तत् पश्य । इच्छानुसारेण प्रवृत्तिं आह–क्वचित् सुराणां देवानां पथा संचरतो(ते) गच्छति । क्वचित् घनानां मेघानां पथा संचरते, क्वचित् पततां पक्षिणाम् ॥१९॥

२०. असौ महेन्द्र० ।

असौ आकाशवायुः व्योमानिलस्ते तव मुखात् वक्त्रात् स्वेदलवान् प्रस्वेदकणान् आचामति पिबति । किंभूतः आकाशवायुः ? महेन्द्रद्विपदानगन्धिः, ऐरावणमदजलसुरभिः । पुनः किंभूतः ? त्रिमार्गगावीचि[वि]मर्दशीतः स्वर्नदीतरंग{ः}कंपशिशिरः । कथंभूतान् स्वेदलवान् ? दिनयौवनोत्थान् मध्याह्नलवान् ॥२०॥

२१. करेण० ।

हे चण्डिके ! हे कोपनशीले ! घनः मेघस्ते तव द्वितीयं आभरणं आमुञ्चतीव बध्नातीव । किंभूतः घनः ? उद्भिन्नविद्युद्वलयः उद्भिन्नं प्रकटं विद्युद्वलयं यस्य सः, उद्भ्रांता(त)तडित्कटकः । पुनः कथंभूतः घनो मेघः ? वातायनलंबितेन गवाक्षनिर्गतेन करेण हस्तेन, कुतूहलिन्या त्वया स्पृष्टः स्पर्शितः ॥२१॥

२२. अमी जना(न)० ।

अमी चीरभृतः मुनयः चिरोबभि(ज्झि)तानि चिरकालोबिभ(ज्झि)तानि चिरकालत्यक्तानि आश्रममण्डलानि तपोवनानि यथास्वं, यथास्थानं अध्यासितं(सते)आश्रयन्ते । किं कृत्वा ? जनस्थानं खरदूषर(ण)स्थानकं अपोढविघ्नं अपगतराक्षसोपद्रवं मत्वा ज्ञात्वा । कथंभूतानि आश्रममण्डलानि ? समारब्धनवोटजानि प्रारब्धप्रत्यग्रपर्णशालानि ॥२२॥

२३. सैषा स्थ० ।

हे सीते ! सा एषा स्थली यत्र यस्यां स्थल्यां त्वां विचिन्वता अवलोकयता मया ऽर्व्यां भूमौ एकं भ्रष्टं नूपुरं अदृश्यत आलुलोके(क) नूपुरं किमिव ? त्वच्चरणारविन्द-विश्लेषदुःखात् त्वत्पादपद्मविरहशोकात् बद्धमौनमिव ॥२३॥

२४. त्वं रक्षसा० ।

हे भीरु ! रक्षसा रावणेन त्वं यतः यस्मिन् पथि त्वं अपनीता अपहृता तं मार्गं एताः लताः वल्लयः कृपया करुणया आवर्जितपल्लवाभिः कंपितकिशल्याभिः नमितपल्लवाभिः शखाभिः मे मह्यं अदर्शयन् दर्शयामासुः । किंभूताः लताः ? वक्तुं जल्पितुं अशक्नुवंत्यः न क्षमाः ॥२४॥

२५. मृग्यश्च० ।

हरिणा मां समबोधयन् बोधयायासुः । किंभूतं माम् ? तव अगतिज्ञं, गतिं जानाति इति गतिज्ञः, न गतिज्ञः अगतिज्ञः, तम् । किंभूताः मृगाः ? दर्भांकुरनिर्विप(र्व्यपे)क्षाः कुशप्ररोहवाञ्छारहिताः । पुनः किंभूताः ? दक्षिणस्यां दिशि विलोचनानि व्यापारयन्तः । किंभूतानि विलोचनानि ? उत्पक्ष्मराजीनि, ऊर्ध्वा पक्ष्मराजयो यासां, उत्थापित{नाभ्रंपंक्ति} नेत्रलोमानि ॥२५॥

२६. एतद्गि० ।

माल्यवतः गिरेः एतत् श्रृङ्ग शिखरं पुरस्तात् अग्रतः आविर्भवति प्रकटीभवति । कथंभूतं श्रृङ्गम् ? अम्बरलेखि अभ्रंलिहं, यत्र मौ(मा)ल्यवतः श्रृङ्गे घनैः मेघैः नवं पयः विसृष्टं विमुक्तं मया च त्वद्विप्रयोगास्तु(श्रु), त्वद्विरहाश्रुजलं समं समकालं मुक्तम् ॥२६॥

२७. गंधश्च० ।

हे सीते यस्मिन् माल्यवति गिरौ त्वया विरा(ना) मे एतानि वस्तूनि असह्यानि दुःसहानि अभूवन् । एतानि कानि ? धाराहतपल्वलानां जलधरधाराताडि{तत्रेशं}तानां गन्धश्च, अर्द्धं हतकेशरं(अर्द्धोद्गतकेशरं)च किञ्चित्संजातकिञ्जल्कं कदंबकुसुमं असह्यं अभूत्, शिखिनां मयूराणां स्निग्धा मधुरा केकाश्च ॥२७॥

२८. पूर्वानुभूतं० ।

हे भीरु ! मया गुहाविसारीणि दरीमूर्च्छितानि घनगर्जितानि, कथंचित् कथमपि अतिवाहितानि गमितानि । किंभूतेन मया ? कंपोत्तरं कंपाधिकं तवोपगूढं आलिङ्गनं रात्रौ स्मरता च । किंभूतं आलिङ्गनम् ? पूर्वानुभूतं आदौ प्राप्तम् ॥२८॥

२९. आसार० ।

यत्र यस्मिन् नगे ते तव, विवाहधूमारुणलोचनश्रीः विवाहधूमारुणनयनशोभा मां अक्षिणोत् अतापयत् । कथंभूता विवाहधूमारुणलोचनश्रीः ? नवकंदलैः नवकंदलकुसुमैः विडंम्ब्यमाना अनुक्रियमाणा । किंभूतैः नवकंदलैः ? विभिन्नके(को)शैः, विकसितकुड्मलैः । कस्मात् ? आसारसिक्तक्ष(क्षि)तिबाष्पयोगात् । आसारेण वेगवद्वर्षणेन सिक्ता उक्षिता या[ऽ]सौ क्षितिस्तस्याः बाष्पयोगस्तस्मात् ॥२९॥

३०. उपान्तवा[नी]र० ।

अमूनि पंपासलिलानि खेदात् प्रयासात् पिबतीव । कथंभूता दृष्टिः ? दूरावतीर्णा दूरावतरणखिन्ना । किंभूतानि पंपासलिलानि ? उपान्तवानीरवनोपगूढानि, उपांते वा(स)-मीपे यानि वानीरवनानि वंजुलतरुकाननानि तैरुपगूढानि परिवृतानि । पुनः कथंभूतानि ? अलक्ष(क्ष्य)पारिप्लवसारसानि अलक्षा(क्ष्याः) [अ]दर्शनीयाः पारिप्लवाश्चटुलाः सारसाः {अक्ष्मणाः ?} येषु तानि ॥३०॥

३१. अत्रावि० ।

हे प्रिये ! अत्र स्थाने रथाङ्गनाम्नां चक्रवाकानां द्वन्द्वानि युगलानि मया सस्पृहं यथा भवति तथा ईक्षितानि दृष्टानि । किंभूतेन मया ? ते तव दूरान्तरवर्तिना दूरस्थेन । किंभूतानि द्वन्द्वानि ? अवियुक्तानि अविरहितानि । पुनः कथंभूतानि ? अन्योन्यदत्तोत्पलकेसराणि, अन्योन्यं परस्परं दत्तानि उप(त्प)लकेसराणि यैस्तानि ॥३१॥

३२. [इ]मां तटा० ।

च पुनः, साश्रुसहितः सौमित्रिणा लक्ष्मणेन निषिद्धः निवारितः । किंभूतो[ऽ]हम् ? इमां तन्वीं तटाशोकलतां तीरस्थाशोकवल्लीं त्वत्प्राप्त(प्ति)बुद्ध्या त्वद्भ्रांत्या परिरम्भमानः(णः) आलिंगितुकामः । कथंभूतां तन्वीम् ? स्ना(स्त)नाभिरामस्तबकावनम्रां कुचमनोहरगुच्छेन नम्रीभूताम् ॥३२॥

३३. अमूर्विमा० ।

अमूः एताः उत्पतन्त्यः उद्गच्छंत्यः गोदावरी[सार]सपङ्क्तयः गोदावरी जल(न)-स्थाननिकटे नदी, तस्याः एताः सारसपङ्क्तयः सारसश्रेणयः त्वां प्रत्युद्व्रजं(न्ती)ति इव संमुखागमनं कुर्वन्तीव । किं कृत्वा ? विमां(मा)नान्तविलम्बिनीनां कांञ्चनकिंकिणीनां स्वनं शब्दं श्रुत्वा ॥३३॥

३४. एषा त्वया...चिरात् दृष्टा० ।

एषा पञ्चवटी मे मम मन अ (आ)क्लेदयति आह्लादयति । किंभूता पञ्चवटी ? त्वया पेलवमध्ययाऽपि कृशोदर्यापि घटांबुसंवर्धितबालचूता, घटांबुभिः कूंभजलैः संवर्धिताः बालचूताः बालाम्राः यस्यां सा । पुनः किंभूताः ? उन्मुखकृ[ष्ण]साराः, उन्मुखाश्च घंटास्वनेन कृष्णसाराः मयूराः(?) यत्र । उक्तं च-वीक्ष्य राघवमुपात्तकार्मुकं स्वे(से)न्द्रचापनभमेघशङ्कया, तत्र तत्र ननृतुः शिखण्डिन[1] ...उपरि विमानदर्शनादौ मुख्यमितिकश्चित् । कृष्णसारा मृगा इत्यपि ॥३८॥

३५. अत्रानु० ।

अत्र पञ्चवट्यां अहं वानीरगृहेषुवी (वे)तसगृहेषु सुतं स्मरामि । कथंभूतो[ऽ]हम् ? रहः एकान्तो(न्ते) त्वदुत्सङ्गनिषन्न(ण्ण)मूर्द्धा । त्वदुत्सङ्गे त्वदङ्के निषन्न(ण्णः) स्थापितो मूर्धा मस्तकं येन सः । पुनः किंभूतो[ऽ]हम् ? अत्र अनुगोदं गोदावरीसमीपे मृगयानिवृत्तः आखेटकत्र्याव्रृत्तः । पुनः किंभूतो[ऽ]हम् ? तरे(रं)गवी(वा)तेन विनीतखेदः अपनीतश्रमः ॥३५॥

३६. भ्रूं(भ्रू)भङ्गमात्रेण० ।

यः मुनिः भ्रूभंगमात्रेण नहुषं नहुषाख्यं देवराजः(जस्य) मघोनः इन्द्रस्य पदात् नियोगात् प्राभ्रंशयत् अपातयत् । किंभूतं नहुषम् ? प्रमत्तं गर्वितम् । तस्य मुनेः अगस्त्यस्य । अयं भूमौ पृथ्वीसंबंधी स्थानपरिग्रहः, आवासस्थानम् । किंभूतस्य तस्य ? आविलाम्भः परिशुद्धिहेतोः कलुषकुलनैर्मल्यकरणस्य ॥३३॥

३७. त्रेताग्निधूमा० ।

मे मम आत्मा लविमानं समश्नुते प्राप्नोति । किंभूतः आत्मा ? रजोविमुक्तः रजस्तमोविमुक्तः । किं कृत्वा ? तस्य अगस्त्यस्य इदं त्रेताग्निधूमाग्रं अग्नित्रयी(य)धूमाग्रं घ्रात्वा आघ्राय । किंभूतं त्रेताग्निधूमाग्रम् ? आक्रान्तविमानमार्गम्[2] ...॥३७॥

३८. एतन्मुने० ।

हे मानिनि ! एतत् शातकर्णेः शातकर्णिनाम्नः पञ्चाप्सरो नाम विहारवारि आभाति शोभते । कथंभूतं पञ्चाप्सरो नाम विहारवारि ? पर्यन्तवनं, तरुमालापरिवृतम् । किमिव ? विदूरात् दूरादेव लक्ष्यते मेघान्तरालक्ष्यं जलदमध्यदृश्यं इन्दुमिव ॥३८॥

---

1 The quotation is incomplete.

2 The comm. is incomplete on XIII. 37

३९. पुरा० ।

मघोना इन्द्रेण स ऋषिः पञ्चाप्सरोयौवनकूटबन्धं, पञ्चानां अप्सरसां सुराङ्गनानां यौवनमेव कूटबन्धं अभिनीतः प्रापितः किल । किंभूतेन मघोना ? समाधिभीतेन, सुरराज्यहरणशङ्कया तपोभीतेन । कथंभूतः सः ऋषिः ? दर्भाङ्कुरमात्रवृत्तिः दर्भाङ्कुरमात्रभोजी । किं कुर्वन् ? पुरा पूर्वं मृगैः सार्धं चरन् वसन् ॥३९॥

४०. तस्याय० ।

तस्य शातकर्णेः अयं प्रश(स)क्तसंगीतमृदङ्गघोषः, अविच्छिन्नप्रेक्षणीयकं मुरजनादः वियद्गतः सन् आकाशं प्राप्तः सन् पुष्पकचन्द्रशालाः पुष्पकशिरोगृहान् क्षणं क्षणमात्रं, प्रतिस्वनमुखराः प्रतिशब्दयुताः करोति विदधाति । किंभूतस्य तस्य ? शातकर्णेः अंतर्हितसौधभाजः अदृश्यीभूतहर्म्यस्थस्य ॥४०॥

४१. हविर्भुजा० ।

असौ अपरः अन्यस्तपस्वी तपस्यति तपश्चरति । किंभूतः अपरः ? नाम्ना सुतीक्ष्णः । पुनः किंभूतः चरितेन ? चरितेन दान्तः प्रशान्तः । क्व ? चतुर्णां एधवतां सेन्धनानां हविर्भुजां अग्नीनां मध्ये । पुनः कथंभूतः ? अन्यः ललाटंतपसप्तसप्तिः, ललाटतपः उपरितपः सप्तसप्तिः सप्ताश्वः यत्र ॥४१॥

४२. अमुं सहास० ।

सुराङ्गनाविभ्रमचेष्टितानि अप्सरोविलासव्यापाराः अमुं मुनिं विकर्तुं धैर्याच्चालयितुं न अलं, न समर्थानि । कथंभूतानि सुराङ्गनाविभ्रमचेष्टितानि ? सहासं प्रहितानि क्षिप्तानि ईक्षणानि कटाक्षाः यत्र तानि । पुनः किंभूतानि ? व्याजार्धसंदर्शितमेखलानि व्याजेनान्य-(न्या)पदेशेन अर्द्धसंदर्शिता किञ्चित्प्रकटीकृता मेखला, रसना यत्र । किंभूतं अमुम् ? जनितेन्द्रशङ्कं, उत्पादितशक्रभयम् ॥४२॥

४३. एषोऽक्षमा० ।

ऊर्ध्वबाहुः एषः मुनिः सव्येतरं दक्षिणं प्रांशु भुजं इतः मयि प्रयुंक्ते प्रेरयति । किं कुर्वन् ?[1] {मासं भावयन् मान्वता प्रयुंक्तु कुर्वन् ?} (मां भावयन्...प्रयुक्तं कुर्वन् ?) कथंभूतं भुजम् ? अक्षमालावलयम् । पुनः कथंभूतम् ? मृगाणां कण्डूयितारम् । पुनः कथंभूतम् ? कुशसूचिलावम् ॥४३॥

---

1 Words in { } are not clear. We have tried to get some sense in ( ).

४४. वाचंयमत्वा० ।

एष मुनिः पुनः सहस्रार्चिषि सूर्य(र्ये) दृष्टिं संनिधत्ते, संयोजयति । किं कृत्वा ? वाचंयमत्वात् आश्रितमौनत्वात् मूर्ध्नः मस्तकस्य किञ्चित्कम्पेन मे प्रणामं [प्रति]गृह्य आदाय । किंभूते सहस्रार्चिषि ? विमानव्यवधानमुक्तं(क्ते) । विमानेन पुष्पकेन व्यवधानं स्थगनं, तेन मुक्ते ॥४४॥

४५. अदः शरण्यं० ।

अदः एतत् शरभङ्गनाम्नः ऋषेः तपोवनं दृश्यते । किंभूतं तपोवनम् ? पावनं, पवित्रम् । पुनः कथंभूतम् ? शरण्यं शरणे साधुः । किंभूतस्य शरभङ्गनाम्नः आहिताग्नेः अग्न्याहितस्य (?) । यः मुनेः मंत्रपूतां मंत्रपवित्रां तनुं शरीरमपि अहार्षी(हौषी)त् जुहाव । किं कृत्वा ? समिद्भिः समिधैः चिराय चिरकालेन अग्निं संतर्प्य तर्पयित्वा ॥४५॥

४६. छायाविनी० ।

तस्य मुनेः अतिथीनां सपर्या पूजा अधुना अमी[षु] पादपेषु स्थिता रहिता । केष्विव ? सुपुत्रेष्विव । पितरि मृते यथा सत्पुत्रः अतिथीन् आनन्दयति [1]{यथाऽत्रथ ?} इत्यर्थः । किंभूतेषु पादपेषु ? च्छायाविनीताध्वपरिश्रमेषु च्छायया विनीतः स्फोटिता(तो)-[ऽ] ध्वपरिश्रमो मार्गखेदो यैस्तेषु । पुनः किंभूतेषु ? भूयिष्ठसंभाव्यफलेषु । भूयिष्ठं अतिशयेन संभाव्यानि प्राप्यानि फलानि येभ्यः ॥४५॥

४७. धारा० ।

हे बन्धुरगात्रि ! असौ दृष्टः चित्रकूटगिरिः मे मम, चक्षुः बध्नाति दृश्यान्त-रान्निवृत्य स्वात्मनि स्थापयति, प्रीतीमुत्पादयतीत्यर्थः । ककुद्मानिव वृषभ इव । किंभूतः असौ ? धारास्वनोद्गारिदरीमुखः । धारास्वनोद्गारीणि निर्भरध्वनिमुखराणि ह(द)रीमुखानि यस्य । पुनः किंभूतः ? श्रृङ्गाग्रलग्नांबुदवप्रपङ्कः । श्रृङ्गाग्रे लग्नाः अंबुदा एव वप्रपङ्क-स्तस्य कर्दमो यस्य सः ॥४७॥

४८. एषा...मन्दाकिनी० ।

गंगासरित(त्) नदी नगोपकण्ठे चित्रकूटनिकटे भाति शोभते । किंभूता एषा ? प्रसन्नस्तिमितप्रवाहा निर्मलनिश्चलप्रवाहा । पुनः किंभूता ? विदूरान्तरभावतन्वा(न्वी) अति-दूरांतरालकृशा चित्रकूटसमीपे दूरदेशत्वात् । कृशा, दूरात् नदी स्वल्पा दृश्यते । केव ? भूमेः कण्ठगता मुक्तावलीव ॥४८॥

---

1 Not clear

४९. अयं० ।

अयं एषः स तमालः अनुगिरिं गिरिसमीपे जातः उत्पन्नः यस्य तमालस्य प्रवालं पल्लवं आदाय गृहीत्वा नीत्वा, मया ते तव अवतंसः मुकुटः परिकल्पितः रचितः । किंभूतं प्रवालम् ? सुगन्धि । पुनः किंभूतम् ? यवांकुरापाण्डुकपोलशोभि(भी) यवांकुरवत् आपाण्डुरः कपोलस्तत्र शोभते इत्येवंशीलस्तथा यस्य सः ॥४९॥

५०. अनिग्रह० ।

एतत् अत्रेः अत्रिमुनेः तपःसाधनं आश्रमभवनं दृश्यते । किंभूतं वनम् ? अनिग्रहत्रासविनीतसत्त्वम् । अनिग्रहः त्रासस्तदभावेऽपि शिक्षिता प्राणिनो यत्र तत् । पुनः किंभूतम् ? अपुष्पलिङ्गात् फलबंधिवृक्षम् । पुष्पचिह्नव्यतिरेकेण फलवंतो वृक्षा यत्र तत् । सत्सु च पुष्पेषु फलबंधः, इह तु[न] तथेति तपःसामर्थ्यम् । पुनः किंभूतम् ? आविष्कृतोदग्रतपःप्रभावम् ॥५०॥

५१. अत्राभिषेका० ।

किल इत्यागमे । अत्र अनसूया अनसूयाख्या अत्रिपत्नी त्रिस्त्रोतसं गङ्गां प्रवर्तयामास अवतारयत् । कथंभूतां त्रिस्रोतसम् ? त्र्यंबकमौलिमालां शिवशिरःस्त्रजम् । पुनः कथंभूताम् ? सप्तर्षिहस्तोदधृतहेमपद्मां सप्तर्षिकरोचितकनककमलाम् । कस्मै प्रयोजनाय ? तपोधनानां अभिषेकाय स्नानाय । तथा हि तपस्विना(न्या) क्लेशनिवृत्तये तपोऽनुभावेन दूरस्थापि सुरग(स)रित्तत्र प्रवर्तितेति श्रूयते ॥५१॥

५२. वीरासनैः० ।

अमी शाखिनोऽपि तरवोऽपि योगाधिरूढा इव योगासीना इव विभान्ति शोभन्ते । कया ? निर्वातनिष्कंपतया निर्वातक्षोभतया । कथंभूताः शाखिनः ? वीरासनैः ध्यानजुषां ऋषीणां मुनीनां समाध्यासितवेदिमध्याः अधिष्ठितमूलतलाः । समाध्यासितानि अध्यारूढानि वेदिमध्यानि यैस्ते ॥५२॥

५३. त्वया पुरा० ।

सोऽयं पश्यामि इति प्रकाशो विख्यातो वटः विभाति । स इति कः ? यः पुरस्तात् त्वया उपयाचितः वृद्धिं नीतः । किंभूतः वटः फलितः ? क इव ? विभाति सपद्मरागः ग(गा)रुडानां मणीनां राशिः इव ॥५३॥

५४–५५. क्वचिच्च कृष्णोरग० ।

हे अनवद्याङ्गि ! हे बन्धुरगात्रि ! गङ्गा विभाति शोभते । कथंभूता गङ्गा ? यमुनातरङ्गैः कालिन्दीकल्लोलैः भिन्नप्रवाहा मिलितप्रवाहा । गङ्गा केव ? क्वचित् कस्मिंश्चित्प्रदेशे प्रभालेपिभिः कान्तियुक्तैः इन्द्रनीलैः अनुविद्धा प्रोता मुक्तामयी यष्टिरिव । अन्यत्र अन्यस्मिन्प्रदेशे इन्दीवरैः नीलोत्पलैः उत्खचितान्तरं, उत्खचितं मिश्रितं अन्तरं मध्यं यस्याः सा शि(सि)त[पङ्क]जानां मालेव ।।५४–५५।।

५६. क्वचित्ख० ।

क्वचित्कस्मिंश्चित्प्रदेशे प्रियमानसानां राजहंसानां पक्षिणां कादम्बसंसर्गवती कलहंससंसर्गवती पङ्क्तिरिव । अन्यत्र अ[न्य]स्मिन् [प्रदेशे] कालागुरुदत्तपत्रां कृष्णागुरुविहितभङ्गि चन्दनकल्पिता श्रीखण्डरचिता भुवः पृथिव्याः भक्तिरिव रचना इव ।।५६।।

५७. क्वचित्प्रभा० ।

क्वचित्कस्मिंश्चित् प्रदेशे च्छायानिलीनैः च्छायाश्रितैः तमोभिः सब(शब)लीकृता कर्बुरिता च(चा)न्द्रमसी चन्द्रसक्ता प्रभा इव, ज्योत्स्ना इव । अन्यत्र अन्यस्मिन् प्रदेशे रन्ध्रेषु च्छिद्रेषु अलक्ष्यनभं(भः)प्रदेशा दुर्लक्ष्याकाशप्रदेशा शुभ्रा पाण्डुरा शरदभ्रलेखेव ।।५७।।
चतुर्भिरंतक्रिया(?)कुलकम् ।[1]

५८. समुद्रपत्न्यो० ।

अत्र तनुत्यजां तनुमुचां तत्त्वावबोधेन परमात्मज्ञानेन विनाऽपि भूयः पुनरपि शरीरबन्धः देहनिर्माणं नास्ति न विद्यते । कस्मात् ? जलाभिषेकात् जलस्नानात् । कथंभूतानां तनुत्यजाम् ? समुद्रपत्न्योः गङ्गायमुनयोः नद्योः जलसंनिपाते जलसमूहे पूतात्मानं पवित्रात्मनाम् ।।५८।।

५९. पुरं नीषादा० ।

भो सीते । इदं तत् निषादाधिपतेः कैवर्तनाथगुहस्य पुरं नगरं, यस्मिन् पुरे नगरे मूलमणिं चूडामणिं विहाय मया जटासु बद्धासु {सीत्तीषुः ?सतीषु ?}सुमंत्रिः(त्रः) इति अरुदत् । इतीति किम् ? हे कैकेयि ! तव कामाः मनोरथाः फलिताः ।।५९।।

---

1. Actually this is 'कलापक' as suggested by Malli. It is made of four verses. Actually Jina. has covered the four verses in three.

६०. पयोधरैः० ।

आप्तवाचः आप्तगिरः मुनयः ब्राह्मं[ब्रह्म]संबंधि सरः मानससरः यस्याः कारणं प्रभवं उदाहरन्ति कथयन्ति । कस्याः, किमिव ? बुद्धेः कारणं अव्यक्तमिव, परमतत्त्वमिव । किंभूतं ब्राह्मं सरः ? पुण्यजना[ङ्गना]नां यक्षवनितानां पयोधरैः स्तनैः निर्विष्टहेमाम्बुजरेणु निर्विष्टं अङ्गरागकरणादुपभुक्तं हेमाम्बुजरेणु कनककमलरजो यस्मात् ॥६०॥

६१. जलानि० ।

या सरयूः अयोध्यां राजधानीं अनुलक्ष्यीकृत्य जलानि वहन्ति । किंभूतानि जलानि ? इक्ष्वाकुभिः अस्मत्पूर्वजैः पुण्यतरीकृतानि पवित्रतरीकृतानि । कथंभूतैः इक्ष्वाकुभिः । तुरङ्गमेधावभृथावतीर्णैः अश्वमेधानां(धेषु) तां अभिषेकार्थं अवतीर्णैः, अश्वमेधकृतयज्ञप्रान्त-स्नानैः । पुनः किंभूतैः ? तीरनिखातयूपैः तटरोपितयूपैः ॥६१॥

६२. यां सैकतोत्सं० ।

मे मम मानसं यां सरयूं उत्तरकोसलानां अयोध्याधिपतीनां सामान्यधात्रीमिव उपमातरमिव संभावयति अवबुध्यते । कथंभूतानां उत्तरकोसलानाम् ? सैकतोत्सङ्गसुखोचितानां, तत्पुलिनोत्सङ्गसुखयोग्यानाम् । पुनः किंभूतानाम् ? पुण्यैः पवित्रैः पयोभिर्जलैः दुग्धश्च परिवर्धितानां संवर्धितानाम् ॥६२॥

६३. सेयं मम० ।

सा इयं सरयूः दूरतरमपि सन्तं दूरस्थमपि मां शिशिरानिलैः शिशिरवातैः तरङ्ग-हस्तैः उपगूह{य}तीव उप(आ)लिङ्गतीव । सरयूः केव ? मदीया जननी इव । किंभूता सरयूः ? किंभूता जननी ? मान्येन पूज्येन तेन राज्ञा अस्मत्पित्रा विमुक्ता विरहिता ॥६३॥ (पञ्चभिः कुलकम् ।)

६४. विरक्तसंध्या० ।

यथा पार्थिवं पृथ्वीसंभवं रजः पुरस्तात् अग्रतः उज्जिहीते उत्तिष्ठति । किंभूतं रजः ? विरक्तसंध्यापुरुष(कपिश)म् । विरक्ता किञ्चित् प्रशान्ता याऽसौ संध्यावेला तया कपिशं, [तया] सदृशं इषद्रक्तत्वात् । हनूमत्कथितप्रवृत्तिः हनूमता कथिता प्रवृत्तिरस्मदा-गमनवार्ता यस्मै, ससैन्यः सेनासहितः भरतः मां प्रत्युद्गतः प्रत्यायातः सन्मुखमागत ॥६४॥

६५. अद्धा श्रियं० ।

अद्य साधु भरतः मे मह्यं अखण्डां श्रियं राजलक्ष्मीं प्रत्यर्पयिष्यति । कः कामिव ? अनघां, मृधे संग्रामे खरादीन् राक्षसान् हत्वा विनाश्य निवृत्ताय प्रत्यागताय, लक्ष्मणः संरक्षितां त्वामिव । सीता हि रामेण खरदूषणादिसंग्रामप्रस्तावे अद्रिगुहायां लक्ष्मणपार्श्वे

धृता अभूत्। यथा लक्ष्मणः मृधे संग्रामे खरादीन् हत्वा निवृत्ताय आगताय मे मह्यं त्वां प्रत्यार्पयत्। किंभूताय मे मह्यम्? पालितसगराय रक्षिता प्रतिज्ञा चतुर्दशवर्षवनवासरूपा रावणवधविषया वा येन, तस्मै समाप्तप्रतिज्ञाय ॥६५॥

६६. असौ पु० ।

असौ भरतः वृद्धैः अमात्यैः सह मां अभ्युपैति, अभिमुखमागच्छति। किं कृत्वा? गुरुं वसिष्ठं पुरस्कृत्य अग्रतः कृत्वा। कथंभूतः भरतः? पदातिः पादचारी। पुनः कथंभूतः? पश्चात् अवस्थापितवाहिनीकः पृष्ठवता(भागे) [अव]स्थापितवाहिनीकः इति विनयोक्तिः। पुनः किंभूतः? अर्थ(र्घ्य)पाणिः अर्थ(र्घ्य)हस्तः ॥६६॥

६७. पित्रा विसृ० ।

यः युवा भरतः मदपेक्षया, ममापेक्षा मदपेक्षा तया, <मासुहस्त्येतर्थः>। पित्रा विसृष्टां दत्तां श्रियं राजलक्ष्मीं अभ्ये(भो)क्ता। किंभूतां श्रियम्? अङ्कगतां उत्सङ्गस्थाम्। अयं भरतः इयन्ति वर्षाणि तया श्रिया सह असिधारा[व्रतं], खड्गधाराव्रतं अभ्यव(स्य)तीव, अभ्यासं करोतीव। असिधाराव्रतैः एकसमस्थापि(एकतल्पस्थाऽपि?) एकासनस्थापि प्रमदाऽपि न भुज्यते ॥६७॥

६८. एतावदुक्तव० ।

विमानं ज्योतिष्पथात् आवा(का)सा(शा)त् अवततार अवातरत्। किं कृत्वा? तदीयां इच्छां रामाभिप्रायं अधिदे(दे)वतया अधिष्ठा देवता, तया, विदित्वा ज्ञात्वा। कस्मिन् सति? दाशरथौ रामे एतावत् इत्थं उक्तवति अभिवदति सति। किंभूतं विमानम्? सविस्मयाभिः सकौतुकाभिः भरतानुगाभिः भरतानुयायिनीभिः प्रकृतिभिः अमात्यैः अथवा सेनाभिः उद्वीक्षितं अवलोकितम् ॥६८॥

६९. तस्मात्पुरः० ।

रामस्तस्मात् यान(ना)[त्] विमानात् मार्गेण पथा अवतारयत् अवततार। किंभूतेन मार्गेण? पुरःसरविभीषणदर्शितेन अग्रगामिविभीषणदर्शितेन। पुनः किंभूतेन? अदूरमहीतलेन निकटवर्तिभूपृष्ठेन। पुनः किंभूतेन? भङ्गिरचितस्फटिकेन। भङ्गिर्विच्छित्तिस्तया सोपानरूपरचनया रचितस्फटिकेन। किंभूतः रामः? सेवाविचक्षणहरीश्वरदत्तहस्तः सेवाचतुरसुग्रीवदत्तहस्तः ॥६९॥

७०. इक्ष्वाकु० ।

पर्यश्रुः बाष्पायमानः सः रामः भ्रातरं भरतं अस्वजत आलिलिङ्ग, आलिङ्गितवान्। क्व? अर्घ(र्घ्य)परिग्रहान्ते अर्घदानपर्यन्ते। च पुनः मूर्धनि उपजि(ज)घ्रौ च(चु)चुम्ब।

किंभूते मूर्ध्नि ? तद्भक्त्यपोढपितृराज्यमहाभिषेके, तस्य रामस्य भक्तिस्तद्भक्तिः, तया अपोढः दूरीकृतः पितृराज्यमहाभिषेको येन तस्मिन् । किं कृत्वा ? इक्ष्वाकुवंशगुरवे वसिष्ठाय प्रणम्य । किंभूतः रामः ? प्रयतः विनीतः ॥७०॥

७१. श्मश्रुप्र० ।

च पुनः स रामः प्रणमतः नमस्कुर्वतः मन्त्रिवृद्धान् अन्वग्रहीत् आवर्त(र्ज ?)-यामास । कैः ? शुभदृष्टिदानैः । पुनः कया ? वार्तानुयोगमधुराक्षरया कुशलप्रश्नमिष्टाक्षरया वाचा वाण्या च । किंभूतान् मन्त्रिवृद्धान् ? श्मश्रुप्रवृद्धिजनिताकृतिविक्रियान् श्मश्रु-प्रवृद्धिस्तया जनिता उत्पादिता आकृतिविक्रिया आकारविकारो येषां ते तान् मन्त्रिवृद्धान् । कामि(नि)व ? {श्मश्रुणः कूर्चस्य प्रवृद्धोकानिव(?)} प्ररोहजटिलान् प्लक्षानिव ॥७१॥

७२. दुःखैक० ।

भरतः उभौ सुग्रीवविभीषणौ ववन्दे प्रणमाम । किं कृत्वा ? लक्ष्मणं व्युत्क्रम्य उपेक्ष्य । किंभूतौ उभौ ? इति आदृतेन सादरेण रघुनन्दनेन रामेण कथितौ, निवेदितौ । इतीति किम् ? मे ममायं ऋक्षहरीश्वरः सुग्रीवः दुःखैकबन्धुः कष्टैकबान्धवः, समरेषु संग्रामेषु पुरः प्रहर्ता अग्रयायी पौलस्त्यः विभीषणः ॥७२॥

७३. सौमित्रिणा० ।

तदनुपश्चात् सः भरतः सौमित्रिणा सह संससृजो(जे) । कर्तरिप्रयोगः दैवादिकस्य(०कात्), मिलितः । च पुनः एनं लक्ष्मणं उत्थाप्य भृशं आलिलिङ्ग आश्लिष्यन्(त्) । किंभूतं एनम् नम्रशिरसं प्रणतम् । किं कुर्वन् इव ? उरःस्थलेन हृदयेन अस्य भरतस्य भुजमध्यं हृदयं क्लिश्यन्निव पीडयन्निव । किंभूतेन उरःस्थलेन ? रूढेन्द्रजित्प्रहरणव्रणकर्कशेन । रूढानि सब्रीभूतानि यानि इन्द्रजित्प्रहरणव्रणानि तैः कर्कशेन ॥७३॥

७४. सानुप्लवः० ।

क्षणदाचराणां राक्षसानां प्रभुरपि रथं भेजे आशिश्राय । किंभूतः प्रभुः ? सानुप्लवः सानुचरः । किंभूतं रथम् ? दशरथप्रभवानुसृष्टं रामानुज्ञातम् । रथस्तदीयैः राक्षसीयैः मायाविकल्पचरितैरपि कपटसंकल्परचितैः स्यन्दनैः रथैः सह तुलितकृत्रिमभक्तिशोभः न तुलिता न अनुकृता अकृत्रिमा भक्तिशोभा विच्छित्तिशोभा यस्य सः ॥७४॥

७५. रामाज्ञा(ज्ञ)[या]० ।

हरिचमूपतयः जाम्बुवन्नलनीलाङ्गदादयः कपीश्वराः रामाज्ञया रामादेशेन मनुष्य-वपुः कृत्वा तदानीं तदा गजेन्द्रान् महेभाग्रान् आरुरुहुः आरूढवन्तः । ते कपीन्द्राः

येषु गजेषु शैलाधिरोहणसुखानि पर्वतारोहणसुखानि उपलेभिरे अनुबभूवुः । किंभूतेषु{येषु} गजेषु ? मदवारिधाराः दानांबुनिर्झरान् बहुधा सप्तधा क्षरत्सु स्रवत्सु ॥७५॥

७६. भूयस्ततो० ।

ततस्तदनन्तरं पुनः पुनरपि सावरजः सानुजः रघुपतिः विमानं अध्यास्त अधितस्थौ । कः, कमिव ? ताराधिपश्चन्द्रस्तरलविद्युत् अभ्रकूटमिव । यथा ताराधिपश्चन्द्रः अभ्रकूटं मेघपटलं अध्यास्ते । किंभूतं अभ्रकूटम् ? दोषातनं सन्ध्यासम्बन्धिनम् । किंभूतः ताराधिपः ? वृद्ध(बुध)बृहस्पतियोगदृश्यः, वृद्ध(बुध)बृहस्पतिसमाग[म]रम्यः । किंभूतं विमानम् ? विलसत्पताकं उल्लसत्(द्)ध्वजम् । पुनः किंभूतम् ? कामगतिं स्वेच्छाचारम् ॥७६॥

७७. तत्रेश्व० ।

तत्र तस्मिन्नवसरे भरतः मैथली(ल)सुतां सीतां ववन्दे अवन्दत । किंभूतां मैथिलीम् ? धृतिमतीं संतुष्टाम् । पुनः किंभूताम् । दशकण्ठकृच्छ्रात् रावणसङ्कटात् प्रत्युद्धृतां उन्मोचिताम् । केन, कस्मात् ?{कारणमिव(?)}जगतां ईश्वरेण विष्णुना प्रलयात् प्रलयजलौघात् उर्वीं पृथ्वीमिव । पुनः केन कस्मात् कामिव ? वर्षात्ययेन शरदागमने, अभ्रघनात् अभ्राणां घनः काठिन्यं, तस्मात् इन्दोश्चन्द्रस्य रुचिं शोभामिव ॥७७॥

७८. लङ्केश्व० ।

उभयं द्वयं भरतमस्तकं सीताचरणयुगं च समेत्य मिलित्वा अन्योन्यं परस्परं पावनं पवित्रं अभूत् । किं तदुभयम् ? लङ्केश्वरप्रणतिभङ्गदृढव्रतं, लङ्केश्वरस्य रावणस्य प्रणतिः पादपतनं तस्य भङ्गस्तेन दृढव्रतं तत् । जनकात्मजायाः सीतायाः वन्द्यं वन्दनीयं चरणयोर्युगं ज्येष्टानुव(वृ)त्तिजटिलं भरतस्य शिरश्च ॥७८॥

७९. को(क्रो)शार्द्धः ।

आर्यः काकुत्स्थः रामः उदारं उत्कृष्टं साकेतोपवनं अयोध्योद्यानं अध्युवास भेजे । किं कृत्वा ? पुष्पकेन विमानेन क्रोशार्द्धं क्रोशादर्धमात्रं गत्वा । कथंभूतेन पुष्पकेन ? प्रकृतिपुरःसरेण, प्रकृतयो अमात्या पौरपुरःसराः अग्रेसराः यत्र(यस्य) [तेन] । पुनः किंभूतेन ? स्तिमितजवेन निश्चलवेगेन । किंभूतं साकेतोपवनम् ? शत्रू(त्रु)घ्नप्रतिविहितोपकार्यं, शत्रुघ्नविकृतपटगृहम् ॥७९॥

इति श्री भट्टारक श्रीजिनचन्द्रसूरिशिष्य-आचार्य श्रीजिनसमुद्रविरचिते रघुकाव्यन्त्रयमात्रे समुद्रवर्णनोनाम त्रयोदशमः सर्गः ॥१३॥

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

चतुर्दशः सर्गः ॥

१. प्रभुप्रणे(णा)ष०(शा)० ।

अथ अथानन्तरं दाशरथि(थी) रामलक्ष्मणौ जनन्यौ मातरौ तत्र गृहे अपश्यतां ददृशतुः । किंभूते जनन्यौ ? प्रभु[प्र]णाशात् दशरथमरणात् शोचनीया(यं)शोच्यां(च्यं) दशान्तरं प्रयन्न(पन्ने) आश्रिते । कस्मात्केव ? उपघ्नतरोः समीपवृक्षस्य छेदात् व्रतत्यौ लते इव ॥१॥

२. उभावुभाभ्यां० ।

उभाभ्यां मातृभ्यां कौसल्यासुमित्राभ्यां उभौ रामलक्ष्मणौ प्रणतौ नमस्कुर्वंतौ तौ हतारी हतशत्रू यथाक्रमं अस्त्रान्धतया बाषाव्याकुलित[त्वे]न विस्पष्टं प्रकटं न दृष्टौ न लक्षितौ । किंभूतौ तौ ? विक्लांतपत्यौ (?) (विक्रमशोभिनौ) । {जनकसुता ?} सुतस्पर्शसुखोपलम्भात् ज्ञातौ ॥२॥

३. आनन्दजः० ।

हर्षोत्थाश्रु(हर्षोत्थबाष्पः) शिशिरः शीतलः बाष्पः नेत्रजलं शोकजलं अशीतं तप्तं अश्रु रोदितजलं बिभेद विनाशयत् । कः कमिव ? अवतीर्णः आगतः हिमाद्रिनिस्यन्दः हिमालयप्रवाहः गङ्गासरय्वोः जलं विनस्ति (भिनत्ति) ॥३॥

४. ते पुत्र० ।

ते मातरौ [क्षत्र]कुलाङ्गनानां क्षत्रियाणां ईप्सितं वाञ्छितमपि वीरसूशब्दं न अकामयेतां न वाञ्छयेताम् । किं कुर्वन्त्याविव ? पुत्रयोः अङ्गे आर्द्रान् प्रत्यग्रान् नैऋतशस्त्रमार्गान् राक्षसायुधप्रहारान् सदयं सकृपं स्पृशन्त्याविव कृपन्त्याविव (?) ॥४॥

५. क्लेशावहा० ।

वधूः सीता स्वर्गं प्रविष्टस्य स्वर्गस्थस्य गुरोः श्वसुरस्य महिष्यौ पत्न्यौ अभक्तिभेदेन ववन्दे अवन्दत । किंभूता वधूः ? इति स्वं नाम उदाहरन्ति(न्ती) उच्चारयन्ति (न्ती) । इतीति किम् ? भर्तुः पत्युः क्लेशावहा क्लेशजननी अलक्षणा निर्लक्षणा अहं सीता ॥५॥

६. उत्तिष्ठ० ।

ननु भो वत्से ! उत्तिष्ठ, असौ सानुजः लक्ष्मणसहितः भर्ता तवैव शुचिता(ना) निर्मलेन वृत्तेन चरितेन महत् गुरु कृच्छ्रं कष्टं उत्तीर्णः इति ते श्वश्र्वौ तां सीतां अ(प्रि)-यमपि अमिथ्या सत्यं ऊचतुः कथयामासतुः । किंभूतां ताम् ? प्रियार्हां प्रिययोग्याम् ॥६॥

७. अथाभिषेकं० ।

अथ अथानन्तरं अमात्यवृद्धास्तीर्थाहृतैः तीर्थानीतैः काञ्चनकुम्भतोयैः कनकक-लशतोयैः रघुवंशकेतोः रघुवंशध्वजस्य रामस्य अभिषेकं राज्यस्नानं [नि]र्वर्तयामासुः कारया-मासुः । कथंभूतं अभिषेकम् ? जननीया(न्योः)मात्रा(मात्रोः) आनन्दजलैः आनन्दबाष्पैः प्रारष्टं(ब्धं) प्रसृतम् ॥७॥

८. सरित्समु० ।

तस्य जिष्णोर्जयशीलस्य रामस्य मूर्ध्नि मस्तके [आपः] जलानि अपतन् । काः कस्येव ? मेघप्रभवा आपः विन्ध्यस्य इव । यथा मेघप्रभवा आपः विन्ध्यस्य {अभि-षेक} मूर्ध्नि मस्तके पतन्ति । कथंभूतानि जलानि ? रक्षःकपीन्द्रैः उपपादितानि राक्षसवानरनाथैः सम्पादितानि । किं कृत्वा ? सरित्समुद्रान् सरसीः सरांसि गत्वा ॥८॥

९. तपस्विवेष० ।

यः रामः, तावदिति वाक्यालङ्कारः, तपस्वी(स्वि)वेशक्रि[य] यापि जटावल्कलादि-वेषेणापि सुतरां अतिशयेन प्रेक्षणीयः रमणीयः बभूव अभूत् । तस्य रामस्य राजेन्द्रनेपथ्य-विधानशोभा महाराजवेशसम्पत्तिः पुनरुक्तदोषाय उदिता कथिता आसीत् । तेनापि वेषेण शोभमानस्य नेपथ्येन शोभाद्विगुण्यं जातमित्यर्थः ॥९॥

१०. स मौल० ।

स रामः अन्वयराजधानीं कुलनगरमयोध्यां विवेश प्राविशत् । कथंभूतां अन्वयराज-धानीम् ? तु(तू)र्यस्वनानन्दितपौरवर्गाम् । पुनः किंभूताम् ? सौधोद्गतलाजवर्षाम् । सौधेभ्यः धवलगृहेभ्यः उद्गातां(ता)प्रसृतां(ता) लाजवर्षां(र्षा) अक्षतवृष्टिर्यस्याः सा, ताम् । पुनः कथंभूताम् ? उत्तोरणां, उर्ध्वीकृतानि तोरणानि यस्यां सा ताम् । कथंभूतः स रामः ? मौलि(ल)रक्षोहरिमिश्रसैन्यः मौलाः कुलभृत्याः रक्षांसि विभीषणादीनि हरयः सुग्रीवादय-स्तैर्मिश्रं सैन्यं यस्य सः, तथा ॥१०॥

११. सौमित्रिणा० ।

पुनः किंभूतः स रामः ? सावरजेन शत्रुघ्नसहितेन सौमित्रिणा लक्ष्मणेन आधूत-बालव्यजनः उपवीजितचामरः । पुनः किंभूतः ? रथस्थः, स्यन्दनस्थः । पुनः किंभूतः ?

भरतेन धृतातपत्रः धृतधवलच्छत्रः । रामः क इव ? साक्षात् प्रत्यक्षेण प्रवृद्धः वृद्धिं गतः उपायसंघात इव, सामाद्युपायवर्ग इव ।।११।। युग्मम् ।

१२. प्रासादकालागु० ।

तस्याः पुरः अयोध्यायाः प्रासादकालागुरुधूमराजिः हर्म्येभ्यः कृष्णागुरुधूमराजिः आबभासे शुशुभे । किंभूता प्रासादकालागुरुधूमराजिः ? वायुवशेन भिन्ना प्रसृता । प्रासादकालागुरुधूमराजिः, केव ? वनात् निवृत्तेन प्रत्यागतेन रघूत्तमेन श्रीरामेण स्वयं मुक्ता वेणिरिव केशरचनेव ।।१२।।

१३. श्वश्रूजना० ।

साकेतनार्यः अञ्जलीभिः योजितकरैः रघुवीरपत्नीं सीतां प्रणेमुः ववन्दिरे । किंभूतां रघुवीरपत्नीम् ? श्वश्रूज[ना]नुष्ठितचारुवेषां, श्वश्रूजनविरचितरम्यनेपथ्याम् । पुनः किंभूताम् ? कर्णीरथस्थां यूग्पका(?)रूढाम् । किंभूतैः अञ्जलिभिः ? विमानवातायनदृश्यवन्तैः(बन्धैः) विमानस्य सौधस्य वातायनानि विमानवातायनानि तेषु दृश्यबन्धः येषां ते तैः ।।१३।।

१४. स्फुरत्प्रभा० ।

सा सीता रराज । किं कुर्वती ? शाश्वतं अविनश्वरं आनसूयं अनुसूयया[दत्तं] आनसूयं, तं, ऋषिपत्नी अनुसूया [तया] दत्तं अङ्गरागं विलेपनं बिभ्रती धारयन्ति(न्ती) । कथंभूतं अङ्गरागम् ? स्फुरत्प्रभामण्डलं, देदीप्यमानकान्तिमण्डलम् । पुनः शुद्धा, निर्दोषा इति अनेन प्रकारेण भर्त्रा रामेण वह्निगतेव अग्निमध्यस्थेव स्वपूर्यै स्वनगर्यै संदर्शिता दर्शिता ।।१४।।

१५. वेश्मानि० ।

सौहार्दनिधिः मैत्र्यनिधिः रामः आलेख्यशेषस्य चित्रगतस्य पितुः जनकस्य (? दशरथस्य?) निकेतनं गृहं विवेश प्राविशत् । कथंभूतं गृहम् ? बली(लि)मत् बलिः पुष्पादिकृता(तो) विद्यते यत्र तत् बलिमत् । किंभूतः रामः ? बाष्पायमाने(णः) साश्रुनेत्रः । किं कृत्वा ? सुहृद्भ्यः सुग्रीवादिमित्रेभ्यः वेश्मानि गृहाणि विश्राण्य दत्वा । किंभूतानि वेश्मानि ? परिवह(र्ह)वन्ति सपरिच्छदानि अथवा सोपहाराणि ।।१५।।

१६. कृताञ्जलिः० ।

तत्र गृहे कृताञ्जलिः रचिताञ्जलिः रामः भरतस्य मातुः कैकेय्याः लज्जा इति जहार तत्याज । इतीति किम् ? हे अम्ब ! हे मातः, नोऽस्माकं गुरुः पिता स्वर्गफलात् सत्यात् {स स्वात्} न अभ्रश्यत न भ्रष्टः तत् विचिन्त्यमानं सुकृतं तवैव ।।१६।।

१७. तथैव० ।

च पुनः श्रीरामः सुग्रीवविभीषणादीन् कृत्रिमसंविधाभिः कल्पितैः उपचारैः तथा उपचारत(उपाचरत्) अपूपुजत् यथा ते सुग्रीवविभीषणादयः चेतसि विस्मयेन आश्चर्येण {अस्माकमपि एषां अग्रीना(ग्रिमाः)नास्ति इति क्रान्ता व्याप्या(?)}[1] किंभूतास्ते ? संकल्पमात्रोदितसिद्धयः संकल्पमात्रेण चिन्तामात्रेण उदिताः उत्पन्नाः सिद्धयो येषां ते ॥१७॥

१८. सभाजना० ।

स रामस्तेभ्यः मुनिभ्यः हतस्य शत्रोः रावणस्य प्रभवादि जन्मभुवनविजयादिकं वृत्तं चरित्रं सु(शु)श्राव अश्रौशीत् । किंभूतः रामः ? स्वविक्रमे निजपौरुषे गौरवं विस्मयं आदधानः कुर्वाणः इति श्रवणहेतुः । किं कृत्वा ? सभाजनाय प्रीतिनिमित्तं उपगतान् दृष्टमागतान् अगस्त्यादीन् मुनि(नी)न् ऋषि(षी)न् पुरस्कृत्य परिपूज्य । सभाजनप्रीतिसेवनयोरिति वुदौ(?)[2] ॥१८॥

१९. प्रतिप्रया० ।

रामः रक्षःकपीन्द्रान् विभीषणसुग्रीवादीन् विससर्ज व्य{स}र्जयत् । केषु सत्सु ? तपोधनेषु प्रतिप्रयातेसु(षु) गतेसु(षु) सत्सु । किंभूतान् रक्षःकपीन्द्रान् ? अविज्ञातगतार्धमासान् अविज्ञातो गतोऽर्धमासः पक्षो येषां ते तान् । पुनः किंभूतान् । सीतास्वहस्तोपहृताग्र्यपूजान् सीतया स्वहस्तेन उपहृता विहता अग्रा(ग्र्या) प्रधाना पूजा येषां ते तान् ॥१९॥

२०. तच्चात्म० ।

च पुनः तत्पुष्पकं विमानं भूयः पुनरपि कैलासनाथोद्वहनाय वैश्रवणोद्वहनाय अन्वयासित् ज्ञातवान् अनुज्ञां दत्तवान् । किंभूतं विमानम् ? दिवः स्वर्गस्य पुष्पं भूषणम् । पुनः किंभूतम् ? सुरारेः रावणस्य जीवितेन सह हृतं अपहृतम् । पुनः किंभूतम् ? आत्मचिन्तासुलभम् । स्मृतेन त्वया सन्निधातव्यं इत्युक्त्वा, वाञ्छानुगामि ॥२०॥

२१. पितुः० ।

{पितुः} राम यथा धर्मार्थकाममोक्षेषु समं(मां) तुल्यां वृत्तिं व्यापारं प्रपेदे प्रपन्नवान् । तथैव अवजे(रे)षु अनुजेषु । किं कृत्वा ? पितुः जनकस्य नियोगात् आदेशात् । एवं पूर्वोक्तप्रकारेण वनवासं निस्तीर्य समाप्य । किंभूतः रामः ? प्रतिपन्नराज्यः, प्राप्ताधिराज्यः ॥२१॥

---

1. Not clear
2. Some कोश is mentioned. Not clear.

२२. सर्वासु० ।

स रामः {प्रति}वत्सलत्वात् अतिस्नेहत्वात् सर्वासु मातृषु निर्विशेषप्रतिपत्तिः सर्वसामान्यप्रवृत्तिः आसीत् बभूव । कासु, क इव ? कृत्तिकासु चमूनां नेता इव, यथा चमूनां नेता स्वामी कार्तिकेयः कृत्तिकासु निर्विशेषप्रतिपत्तिर्बभूव । कथभूता[सु] कृत्तिकासु ? षडाननापीतपयोधरासु षड्भिराननैः आसमन्तात् पीताः पयोधराः यासां, तासु ॥२२॥

२३. तेनार्थ० ।

तेन रामेण कृत्वा लोकः अर्थवान् आढ्यः आस बभूव । किंभूतेन रामेण ? [येन] लोकः क्रियावान् धार्मिकः आस । किंभूतेन रामेण ? शोकाय(प)नुदेन, सुख-जनकेन ॥२३॥[1]

२४. स पौर का० ।

स रामः काले पौरकार्याणि समीक्ष्य विधाय, विदेहाधिपतेः जनकस्य दुहित्रा सीतया सह रामः चिक्रीड । किं कृत्वेन ? उपभोगोत्सुकया रतिलालसया लक्ष्म्या उप-स्थितं(तः) सङ्गतः तदीयं सीतासम्बन्धि चारु वपुः कृत्वेव । सम्भोगलौल्याच्छीतावपुरा-स्थाय स्थितं(तां) श्रियमिवेति भावः ॥२४॥

२५. तयोर्यथा० ।

तयोः दम्पत्योः दण्डकेषु दण्डकारण्येषु प्राप्तानि दुःखानि संचिन्त्यमानानि पर्या-लोच्यमानानि सुखीबभूवुः सुखकारीण्यभुवन् । किंभूतयोस्तयोः ? चित्रवत्सु विचित्रितेषु प(स)द्मसु सौधेषु यथाप्रार्थितं यथाभिलाषं इन्द्रियार्थान् शब्दादिविषयान् आसेदुषोः प्राप्तवतोः ॥२५॥

२६. अथाधि० ।

अथ अथानन्तरं सीता मुखेन परिणेतुः रामस्य आनन्दयित्री आनन्दकारिणी आसीत् बभूव । किंभूतेन [मुखेन] ? अधिकस्निग्धे विलोचने नेत्रे यस्याः, तत्तेन । पुनः किंभूतेन ? शरपाण्डुरेण शुभ्रेण । पुनः किंभूतेन ? अनक्षरव्यञ्जितदोहदेन अन-क्षरे[ण] व्यञ्जितो सूचितो दोहदो येन ॥१६॥

२७. तामङ्क० ।

रमणः रामः रहसि एकान्ते रामां सीतां अभिलाषं वाञ्छितं पप्रच्छ अपृच्छत् । किं कृत्वा ? तां सीतां, अङ्कं उत्सङ्गं आरोप्य गृहीत्वा । किंभूतां रामाम् ? कृशाङ्गयष्टिं,

1 The comm. on XIV–23 is incomplete.

कृशतनुलताम् । पुनः किंभूताम् ? वर्णान्तराक्रान्तपयोधराग्राम् । वर्णान्तरेण श्यामत्वेन आक्रान्तं पयोधराग्रं चुचूकं यस्याः । पुनः किंभूताम् ? विलज्जमानां त्रपावतीम् । किंभूतः रमणः ? प्रतीतः प्रहृष्टः ॥२७॥

२८. सा{सीता} ।

भूयः पुनरपि भागीरथीतीरतपोवनानि मन्दाकिनीतटाश्रमान् गन्तुं इयेष अभिललाष । किंभूतानि भागीरथीतीरतपोवनानि ? संबद्धा वैखानसानां वानप्रस्थानां कन्या यत्र तानि । पुनः किंभूतानि ? कुशवन्ति कुशसहितानि । पुनः किंभूतानि ? हंसैः दष्टनीवारफलानि, दष्टानि उपभुक्तानि, नीवारः व्रीहिः [त एव] फलानि यत्र तानि ॥२८॥

२९. तस्यै० ।

रघुप्रवीरः अभ्रंलिहं प्रासादं आरुरोह आरूढवान् । किं कृत्वा ? तदीप्सितं तदभिलषितं तस्यै प्रतिश्रुत्य अङ्गीकृत्य । किंभूतः रघुप्रवीरः ? पार्श्वचरानुयातः समीपसेवकानुगतः । {यतः} किं कुर्वन् ? मुदितां प्रमुदितां अयोध्यां आलोकयिष्यन्, द्रष्टुकामः ॥२९॥

३०. ऋद्धापणं० ।

स रामः रमे, तुतोष । किं कुर्वन् ? ऋद्धापणं समृद्धं हट्टं राजपथं पश्यन् । नौभिः नौकाभिः विगाह्यमानां सरयुं(यूं) च विलासिभिः पौरैः पुरोपकण्ठोपवनानि नगरनिकटोद्यानानि अध्युषितानि सेव्यमानानि च [पश्यन्] ॥३०॥

३१. स किं० ।

स किंवदन्ति(न्तीं) जनश्रुतिं भद्रं भद्रनामानं पप्रच्छ । किं कृत्वा ? स्ववृत्तं निजचरित्रं उद्दिश्य । किंभूतः रामः ? वदतां वाग्मिनां पुरोगः अग्रणीः । पुनः किंभूतः ? विशुद्धवृत्तः, निर्मलचरितः । पुनः किंभूतः ? सर्पाधिराजोरुभुजः, सर्पाधिराजः शेषाहिः तद्वदुरू भुजौ [यस्य सः], दीर्घबाहुः । पुनः किंभूतः ? विजेता निर्जिताऽरिभद्रा रिपुश्रेष्ठा येन ॥३१॥

३२. निर्बन्ध० ।

निबधपृष्ठः अत्याग्रहपृष्ठः स चरः जगाद बभाषे । हे मानवदेव । रक्षोभवनोषितायाः राक्षसभुवने चिरस्थितायाः देव्याः परिग्रहात् स्वीकरणात् अन्यत्रेति वर्जनार्थे । पौराः त्वदीयं चरितं स्तुवन्ति । परगृहमात्रे स्थिता स्त्री शङ्क्या । किं पुनः राक्षसस्य दुराचारस्येति भावः ॥३२॥

३३. कलत्रनिन्दां० ।

वैदेहीबन्धोः जानकीभर्तुः हृदयं विदग्ध्रे(द्रे), विदीर्णं किल, दुखितं अभूत् । केन किमिव ? अयोघनेन तप्तं उष्णं अय इव, लोहमिव । किंभूतं हृदयम् ? कलत्रनिन्दा-गुरुणा दारगर्हादुःसहेन कीर्तिविपर्ययेण अयशसा एवं प्रकारेण अन्या(भ्या)हतं ताडितम् ।।३३।।

३४. किमात्म० ।

स रामः दोलाचलचित्तवृत्तिः दोलावत् प्रेङ्खावत् चला चञ्चला चित्तवृत्तिः मनो-भिप्रायः यस्य सः [एवं] आसीत् बभूव । तस्मात् इति एकपक्षाश्रयविक्लवत्वात्, एकपक्षाश्रये एकपक्षांगीकरणे विक्लवत्वं, अधीरत्व, तस्मात् । इति इति किम् ? आत्म-निर्वादकथां निजायशः [अ]कीर्तिवार्तां आत्मनि कलङ्कवार्तां उपेक्षे अवधा(धी)रयामि । कुतः ? अथादोषां निर्दोषां किं जायां संत्यजामि परित्यजामि ? ।।थ४।।

३५. निश्चित्य० ।

च पुनः स रामः पत्न्याः भार्यायाः त्यागेन त्यजनेन वाच्यं अयशः पर(रि)मार्ष्टुं(र्ष्टुं) क्षालयितुं ऐच्छत् अभिललास(ष) । किंभूतं वाच्यम् ? अनन्यनिवृत्ति नान्येन {द(दा)नादिना ?} निवृत्तिर्यस्य । किं कृत्वा ? निश्चित्य निर्णीय । हि यतः यशोधनानां स(स्व)देहादपि यशो गरीयः । इन्द्रियार्थात् स्त्र्यादिकात् किमुत, कः सन्देहः इत्यर्थः ।।३५।।

३६. स सन्निपात्या० ।

स रामस्तेभ्यः अनुजेभ्यः आत्माश्रयं आत्मीयां(यं) कौलि(ली)नं जनापवादं आचचक्षे कथयामास । किं कृत्वा ? अवरजान् {अनु}सन्निपात्य मेलयित्वा । किंभूतान् अवरजान् ? तद्विक्रियादर्शनलुप्तहर्षान्, तस्य रामस्य विक्रियादर्शनं विकारा-वलोकनं, तेन लुप्तो हर्षो येषां, तान् । पुनः कथंभूतान् ? हतौजान् तेजहीनान्, अथवा रामविहितौजः कान्तिः [तया] हीनाः, अथवा हतं ओजो यस्य सः हतौजाः । पुनरपि वाक्यमूचे, पुनश्च इदं वाक्यं उवाच बभाषे ।।३६।।

३७. राजर्षि० ।

राजर्षिवंशस्य राजर्षिकुलस्य मत्तः मत्सकाशात्, कीदृशः अयं कलङ्कः उपस्थितः उत्पन्नः पश्यत । कस्मात्, कस्येव ? पयोदवातात् मेघवातात् दर्पणस्येव । किंभूतस्य राजर्षिवंशस्य ? रविप्रसूतेः, रवेः सकाशात् {अ}जन्म यस्य सः, तस्य । पुनः किंभूतस्य ? सदाचारनिर्मलस्य ।।३७।।

३८. पौरेषु० ।

अहं तत्पूर्वं प्रथमप्रवृत्तं अ{प}वर्णं अपवादं सोढुं क्षन्तुं न शक्तः । कमिव ? द्विपेन्द्रः आलानिकं आलानभूतं स्तम्भमिव । कथंभूतं अवर्णम् ? पौरेषु लोकेषु बहली-भवन्तं प्रसरन्तम् । केषु, कमिव ? अपां तरङ्गेषु जलकल्लोलेषु तैलबिन्दुमिव ।।३८।।

३९. तस्या० ।

तस्य कलंकस्य अपनोदाय निराकरणाय विदेहसुतां सीतां त्यक्ष्यामि । कथंभूतोऽहम् फलप्रवृत्तौ फलनिष्पत्तौ अपत्यलक्षणायां उपस्थितायां अपि निकटायामपि निर्व्यपेक्षः । कामिव ? पितुः दशरथस्य आज्ञया पुरस्तात् पूर्वं समुद्रनेमिं पृथिवीं, नेमिशब्देन पर्यन्तो लक्ष्यः, समुद्रो नेमिः यस्याः सा । अत्र फलप्रवृत्तिः राज्यप्राप्तिः ॥३९॥

४०. अवैमि० ।

किं सा पापा इति त्यज्यते, इत्याह–च पुनः एनां सीतां अनघ्नां(घां) अवैमि जानामि । किन्तु लोकापवादः मे मम बलवान् गरीष्ठः मतः कथितः । किं यतः भूमेश्छाया प्रजाभिः लोकैः शुद्धिमतः निर्मलस्य शशिनश्चन्द्रस्य मलत्वे निरुपिता कल्प[ना]तः प्रतिरोपिता ॥४०॥

४१. रक्षोवधा० ।

रक्षोवधान्तो शत्रुवधपर्यन्तो मे मम प्रयासः क्लेशः न व्यर्थः, न च निष्फलः । स च क्लेशः किमर्थम् ? वैरि(र)प्रतिमोचनाथ {यदि} वैरशुद्ध्यै {किन्तु} वैरि(र)निर्यातनार्थः । अमर्षणः कोपनः द्विजिह्वः सर्पः यदा पादेन स्पृशन्तं पुरुषं आक्रमन्तं शोणितकांक्षया रुधिरपानार्थं किं दशति ? ॥४१॥

४२. तदेष० ।

तत्तस्मात् कारणात् करुणार्द्रचित्तैः दयार्द्रचित्तैः भवद्भिः एष मे मम सर्गः भार्यात्यागलक्षणो निश्चयः न प्रतिषेधनीयः । निर्गतवाच्यशल्यान् निर्गतं उद्धृतं वाच्यमेव शल्यं येभ्यः, प्राणान् चिरं धारयता मया यदि वः युष्माकं अर्थिता वाञ्छिता ॥४२॥

४३. इत्युक्तवन्तं० ।

इति पूर्वोक्तप्रकारेण उक्तवन्तं रामं तेषु भ्रातृषु बान्धवेषु मध्ये कश्चन ईशं स्वामिनं रामं निषेद्धुं निवारयितुं वारयितुं अनुमोदयितुं अनुज्ञां उर्वीकतु शक्तो न, न समर्थः आसीत् । किंभूतं ईशम् ? जनकात्मजायां सीतां प्रति नितान्तरूक्षाभिनिवेशं, नितान्तं अतिशयेन रूढः(क्षः) परुषोऽभिनिवेशः आग्रहो यस्य सस्तं, इति उक्तवन्तं कथयन्तम् ॥४३॥

४४. स लक्ष्मणं[लक्ष्मण]पूर्वजन्मा० ।

रामः विलोक्य लक्ष्मणं पृथक् इतरानुजेभ्यः एकान्ते आदिदेश किं कृत्वा ? हे सौम्य ! इति आभाष्य च आज्ञापयत् [आदिष्टवान् । किंभूतं लक्ष्मणम् ? निदेशे आदेशे स्थितम् । किंभूतः रामः ? लोकत्रयगीतकीर्तिः, लोकत्रये गीता कीर्तिर्यस्य [सः] ॥४४॥

४५. प्रजावभो(ती)० ।

एषा तव प्रजावती भ्रातृजाया तपोवनेषु आश्रमेषु स्पृहयालुः स्पृहावती वर्तते । किंभूता प्रजावती ? दोहदशंसिनी गर्भवाञ्छानिवेदयित्री । स त्वं रथी रथस्थः एतां सीतां वाल्मीकिपदं वाल्मीकिस्थानं प्रापय्य नीत्वा त्यज मुञ्च । सीतां तद्व्यपदेशनेयां, स पूर्वोक्तः चासौ व्यपदेशश्च {तद्यु ?}उपदेशः तेन त(ने)या ज्ञातव्या, ताम् ।।४५।।

४६. स शुश्रु० ।

स लक्ष्मणस्तदा अग्रजशासनं प्रत्यग्रहीत् प्रतिजग्राह । किंभूतः स लक्ष्मणः ? पितुः जमदग्नेः निर्देशात् आज्ञायाः मातरि रेणुकायां भार्गवेण द्विषव(द्व)त् शत्रुवत्, अपहृतं शिरः छिन्नं शुश्रुवान् श्रुतवान् । हि यतः गुरुणां आज्ञा अविचारणीया न विचारणीया ।।४६।।

४७. अथानुकूल० ।

अथानन्तरं स लक्ष्मणः विदेहसुतां सीतां रथमारोप्य प्रतस्थे प्रययौ । किंभूतं रथम् ? सुमित्रप्रतिपन्नरश्मिं, सुमित्रेण सारथिना प्रतिपन्ना रश्मिः प्रग्रहो यत्र तत् । कथंभूतां विदेहसुताम् ? अति(नु)कूलश्रवणेन अभिमताकर्णनेन प्रतीतां हृष्टाम् । पुनः कथंभूतं रथम् । अत्रसु(स्नु)भिः निर्भयैः तुरङ्गैः युक्तध(धु)रं युक्ता धुर्यस्य ।।४७।।

४८. सा नीयमाना० ।

सा सीता इति [अ]नन्दत् अभि(भ्य)नन्दत् । इतीति किम् ? मे मम प्रियः प्रियंकरः । किंभूता सा ? रुचिरप्रदेशान् नि(नी)यमान(ना) प्राप्यमान(ना) । तं रामं आत्मनि स्वस्मिन् असी(सि)पत्रवृक्षं जातं न अबुद्ध न अज्ञासीत् । किं कृत्वा ? कल्पद्रुमतां कल्पवृक्षत्वं विहाय त्यक्त्वा । असिपत्रं(त्रः)<सेहुन्ड स्तुरीसंज्ञा>[1]वृक्षविशेषः ।।४८।।

४९. अगोप तस्याः० ।

पथि मार्गे लक्ष्मणस्तस्याः सीतायाः यद् भावि दुःखं [तत्] अगोपयत् । सव्येतरेण दक्षिणेन स्फुरता कम्पमानेन अक्ष्णा लोचनेन तत् गुरु भावि दुःखं अस्यै सीतायै आख्यातं कथितम् । किंभूतेन अक्षिणा(क्ष्णा)? अत्यन्तलुप्तप्रियचुम्बनेन अत्यन्तं लुप्तं नष्टं प्रियचुम्बनत्वं(०चुम्बनं ?) येन । पुनः संयोगाभावात् अत्यंतलुप्तप्रियदर्शनेन अत्यंतं लुप्तं गतं प्रियदर्शनं यस्य तत्तेन ।।४९।।

---

1 Not clear.

५०. सा दुर्नि० ।

सा सीता अवाह्यैः अ(आ)भ्यन्तरैः बुद्धि-मनोऽहङ्कारैः करणैः इन्द्रियैः इति आ[श]शंसे आशिषं ददौ । इतीति किम् ? सावरजस्य सानुजस्य राज्ञः रामस्य प्रियं अभीष्टं भूयात् भवेत् । किंभूता सा ? परिम्लानमुखारविन्दा । कस्मात् ? विषादात् । पुनः किंभूता ? [1]दुर्निमित्तोपगता[त्] दुष्टं निमित्तं दक्षिणाक्षिस्फुरणं तदुद्भू[त]-त्वात् ॥५०॥

५१. गुरोः० ।

अग्रतः स्थितया जह्नोः जह्नुकुमारस्य दुहित्रा तन[य] या गङ्गया सुमित्रातनयः लक्ष्मणः उद्धृतवीचिहस्तैः उत्क्षिप्तकल्लोलकरैः अवार्यत इव निषिध्यते इव । किंभूतः सुमित्रातनयः ? गुरोः रामस्य निर्देशात् अपि निश्चितं तां साध्वीं वनान्ते वनमध्ये विहास्यन् त्यक्तुकामः ॥५१॥

५२. रथात्स० ।

स लक्ष्मणः गङ्गां ततार उत्ततार । का, कामिव ? सत्यसन्धः सत्यप्रतिज्ञः सन्धामिव । किं कृत्वा ? यंत्रा सारथिना निगृहीतवाहात् धृततुरङ्गात् रथात् स्यंदनात् तां भ्रातृजायां सीतां पुलिने तीरे अवतार्य उतार्य(उत्तार्य ?) । किंभूतः स लक्ष्मणः ? निषादाकृ(हृ)तनौविशेषः, वि(नि)षादेन कैवर्तेन [आ]हृतः आनीतो नौविशेषः यस्य सः ॥५२॥

५३. अथ व्यवस्था०

अथ अथानन्तरं सौमित्रिः लक्ष्मणः महीपतेः शासनं आदेशं उज्जगार उच्चचार । कः, कमिव ? मेघः उ(औ)त्पातिकं अस्म(श्म)वर्षं पाषाणवृष्टिमिव । कथंभूतः सौमित्रिः ? कथंचित् व्यवस्थापितवाक्, व्यवस्थापिता कथनाय वाग् येनासौ । पुनः किंभूतः ? अन्तर्गतबाष्पकण्ठः बाष्पायमाणः ॥५३॥

५४. ततोऽभिषङ्गा० ।

ततस्तदनन्तरं सीता सहसा धरित्रीं जगाम अगमत् । भूमावपतदित्यर्थः । केव ? लतेव । किंभूता सीता ? किंभूता लता ? अभिषङ्गान(नि)लविप्रबुद्धा अभिषङ्गान(नि)लेन

---

1 दुर्निमित्तो०...etc. should be placed after परिम्लानमुखारविन्दा & विषादात् should follow it. 'कस्मात्' and 'पुनः किंभूता' may be scrapped.

व्यसनवातेन विप्रबुद्धा प्रेरिता । पुनः किंभूता ? प्रभ्रश्यमानाभरणप्रसूना । किंभूतां धरित्रीम् ? स्वमूर्तिलाभप्रकृतिं निजदेहप्राप्तिकारणम् ॥५४॥

५५. इक्ष्वाकु० ।

पतिः रामः कस्मात् त्वां, कथं त्यजेत्, निर्वास्यते इति शं(सं)शयिनीव उत्पन्नाशंस(क)येव । क्षितिः जननी तावत् तस्यै सीतायै प्रवेशं न ददौ । किंभूतः पतिः ? इक्ष्वाकुवंशप्रभवः महाकुलीनः । पुनः किंभूतः ? प्रथितार्यवृत्तः श्रेष्ठचरित्रः ॥५५॥

५६. सा लुप्त० ।

लुप्तसंज्ञा नष्टचेतना सा सीता दुःखं न विवेद नानुबभूव । प्रत्यागतासुः प्राप्तप्राणा सती अन्तः हृदये समतप्यत अदूयत । तस्याः सीतायाः प्रबोधः चैतन्यं मोहात् मूर्च्छायाः कष्टतरः अभूत् बभूव । किंभूतः प्रबोधः ? सुमित्रात्मजयत्नलब्धः । सुमित्रात्मजः लक्ष्मणः [तेन] कृतेन व्यजनादिना यत्नेन लब्धः प्राप्तः ॥५६॥

५७. न चावद० ।

सा आर्या धर्मज्ञा सीता भर्तुः रामस्य अवर्णं दूषणं अयशः न अवदत् । किंभूतस्य भर्तुः ? वृजिनात् पापात् ऋतेऽपि विनाऽपि निराकरिष्णोः त्यक्तवतः । पुनः आत्मानमेव निनिन्द । किंभूतं आत्मानम् ? स्थिरदुःखभाजं, अतिदुःखसहितम् । पुनः किंभूतम् ? दुष्कृतिनं, अपुण्यवन्तम् ॥५७॥

५८. आश्वास्य० ।

स रामावरजः लक्ष्मणः सीतां आश्वास्य इति नम्रः बभूव । [इतीति किम् ?] हे देवि ! मे मम, वि(नि)घ्नस्य परायत्तस्य भर्तुनिदेशरौक्ष्यं राजाज्ञापरुषत्वं क्षमस्व । किंभूतः रामावरजः ? आख्यातवाल्मीकिनिकेतमार्गः । कथितो वाल्मीकिनिकेतमार्गः तपोवनपन्था येन सः ॥५८॥

५९. सीता तं० ।

सीता तं लक्ष्मणं उत्थाप्य वाक्यं जगाद बभाषे । हे सौम्य ! ते तव प्रीताऽस्मि, चिराय जीव, आयुष्मान् भूयाः । यदि त्वं अग्रजेन ज्येष्ठेन भ्रात्रा रामेण इत्थं अनेन प्रकारेण परवानसि परायत्तः भवसि । केन, क इव ? बिडौजसा इन्द्रेण विष्णुरिव । यथा बिडौजसा इन्द्रेण भ्रात्रा विष्णुः परवान् वर्तते ॥५९॥

६०. श्वसु(श्रू)जनं० ।

प्रापितमत्प्रणामः कृतास्मदीयप(पा)दवन्दनस्त्वं श्वसु(श्रू)जनं अनुक्रमेण इति विज्ञापये विज्ञप्तिं कुर्याः । इतीति किम् ? सूनोः पुत्रस्य रामदेवस्य प्रजाभिषेकं पुत्राथ बीजाधानं मयि वर्तमानं विद्यमानं चेतसा शुभेन मनसा अनुध्यायत, अनुचिन्तयत ॥६०॥

६१. वाच्यस्त्व० ।

स राजा रामदेवः मद्वचनात् वाच्यः कथनीयः । यत् लोकापवादश्रवणमात्रात् मां त्वं अहासीः अत्याक्षी, ते तव श्रुतस्य पठितस्य किं सदृशं, कुलस्य वा । किंभूतां माम् ? लोकसमक्षमपि निश्चितां, वह्नौ अग्नौ विशुद्धाम् ॥६१॥

६२. कल्याणबुद्धेः० ।

अथवा कल्याणबुद्धेः शुभमतेः तव रामस्य अयं कामचारः दोषाभिनिवेशः मयि न शङ्कनीयः, न परिभावनीयः । मम एव जन्मान्तरपातकानां पूर्वजन्मविहितपापानां अप्रसह्यः दुस्सहः विपाकः विस्फुर्जथुः परिपाकवृद्धिः । ममैव कर्मफलं तदित्यर्थः परिणामविजृम्भितम् ॥६२॥

६३. उपस्थितं(तां)० ।

भो राम ! पूर्वं प्रथमं उपस्थितां आगतां लक्ष्मीं राज्यलक्ष्मीं अपास्य त्यक्त्वा मयासार्धं त्वं वनं प्रपन्नः आश्रितोऽसि । नु इति वितर्के । तया लक्ष्म्या त्वयि आस्पदं प्रतिष्ठां प्राप्य, त्वद्भुवने त्वद्वेश्मनि वसन्ती तिष्ठन्ती रोषात् न सोढास्मि ॥६३॥

६४. निशाचरो० ।

भो प्राणनाथ ! त्वयि दीप्यमाने प्रभवति शरणार्थं अन्यं कथं प्रपश्ये(त्स्ये) ? कथं अन्यं शरणं यास्यामि । किं कृत्वा ? भवतः प्रसादात् तपस्विनीनां शरण्यां भूत्वा । किंभूतानां तपस्विनीनाम् ? निशाचरोपप्लुतभर्तृकाणाम् ॥६४॥

६५. किं वा तवा० ।

किं वा तव अत्यन्ते(न्त {तव}वियोगमोघे अत्यन्तविरहफले अस्मिन् ह्ना(ह)त-जीविते दग्धजीविते उपेक्षां अवज्ञां कुर्यां, अहं कुर्वे । यदि मे मम त्वदीयं अंतर्गतं गर्भलक्षणं तेजः अंतरायं(यः)विघ्नं(घ्नः); रक्षणीयं पालनीयं न स्यात् ॥६५॥

६६. साऽह तपः० ।

साऽहं प्रसूतेः प्रसवात् ऊर्ध्वं अनन्तरं, तपः चरितुं कर्तुं यतिष्ये, यत्नं करिष्ये ।

किंभूताऽहम् ? सूर्यनिविष्टदृष्टिः, सूर्ये निविष्टा दत्ता दृष्टिर्यया सा ! भूयः पुनरपि मे मम जनान्तरेऽपि त्वमेव भर्ता, विप्रयोगः विरहः न च भूयात् ।।६६।।

६७. नृपस्य० ।

नृपस्य यत्वर्णाश्रमपालनं वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणां आश्रमाणां ब्रह्मचारि-गृहस्थवानप्रस्थयतीनां यत्पालनं रक्षणं मनुना ऋषिणा, स एव धर्मः प्रणीतः निरुपितः । त्वया एवं अनेन प्रकारेण निर्वासिता निष्कासिताऽपि अहं अतः कारणात् तपस्विसामान्यं अन्यतपस्विवत् अवेक्षणीया पालनीया ।।६७।।

६८. तथेति० ।

सा सीता व्यसनातिभारात् मुक्तकण्ठं भूयः चक्रन्द विललाप । केव ? भीता, त्रस्ता । कुररी पक्षिभेद इव । कस्मिन् सति ? रामानुजे लक्ष्मणे दृष्टिपथं दर्शनमप्राप्ते, व्यतीते सति । किं कृत्वा ? तथेति तस्याः सीतायाः वाचं परिगृह्य अङ्गीकृत्य ।।३८।।

६९. नृत्यं मयु(यू)राः० ।

मयु(यू)राः नृत्य विजहुः तत्यजुः । वृक्षाः कुसुमानि विजहुः । हरिण्यः दर्भान् विजहुः । तस्याः सीतायाः समदुःखभावं समदुःखत्वं तुल्यदुःखस्वभावं प्रपन्ने प्राप्तेऽपि [वने],अत्यथ रुदितं रोदनं आसीत् ।।६९।।

७०. तामभ्य० ।

रुदितानुसारी रुदितशब्दानुसारी कविः वाल्मीकिः तां सीतां अभ्यगच्छत् संमुखमगात् । किंभूतः कविः ? कुशेध्म(धमा)हरणाय दर्भेधनानयनार्थं यातः निर्यातः । यस्य वाल्मीकेः शोकः श्लोकत्वं जगाम । किंभूतः श्लोकः ? निषादविद्धाण्डजदर्शनोत्थः निषादेन विद्धश्चासौ अण्डजश्च निषादविद्धाण्डजस्तस्य दर्शनं, तस्मादुत्थानं यस्य सः ।

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ।।१।।७०।।

७१. तमश्रु...विलापात्...० ।

रुदितात् निवृत्ता सीता तं ऋषिं ववन्दे । किं कृत्वा ? नेत्रावरणं लोचनावरणं अश्रुबाष्पं प्रमृज्य । दोहदलिङ्गदर्शी स मुनिः तस्यै सीतायै पुत्राशिषं दत्वा इति उवाच इति बभाषे ।।७१।।

७२. जाने...प्रणिधानतः० ।

प्रणिधानेन मिथ्यापवादक्षुभितेन मिथ्यापवादभीतेन भर्त्रा रामेण विसृष्टां त्यक्तां

त्वां अहं जाने । हे वैदेहि ! विषयानन्तरस्थं देशान्तरस्थं पितुः जनकस्य निकेतं गृहं प्राप्ताऽसि । तत्तस्मात्कारणात् त्वं मा व्यथिष्ठाः खेदं मा कार्षीः ॥७२॥

७३. उत्खातलो० ।

मे मम भरताग्रजे रामे मन्युः कोपः अस्त्येव वर्तते एव । कथंभूते भरताग्रजे ? उत्खातलोकत्रयकण्टकेऽपि, उत्खाताः उत्पाटिताः लोकत्रयस्य कण्टकाः रावणादयो येन, तस्मिन् । पुनः किंभूतेऽपि ? सत्यप्रतिज्ञेऽपि, सत्यसं{बं}धेऽपि ।{पुनः किंभूतेऽपि ? सत्यप्रतिज्ञेऽपि सत्यसंधेऽपि ।}पुनः किंभूतेऽपि ? अविकत्थने स्वश्लाघावर्जितेऽपि । पुनः किंभूते ? अकस्मात् त्वां प्रति कलुषप्रवृत्तौ प्रतिकूलवृत्तौ ॥७३॥

७४. तवेन्दु० ।

इन्दुकीर्तिः शुभ्रकीर्तिः तव श्वसुरः मे मम सखा । ते तव पिता जनकः सतां साधूनां भवोच्छेदकरः, शिष्टानां भयत्राता । पतिदेवतानां प्रतिव्रतानां मध्ये त्वं धुरि अग्र(ग्रे){णी}स्थिता । तत् किं, येन मया त्वं अनुकम्प्या रक्षणीया न असि, न भवसि ॥७४॥

७५. तपस्वि० ।

भोः सीते ! अस्मिन् तपोवने वीतभया निर्भया सती त्वं च निवासं कुरु । किंभूते वने ? तपस्विसंसर्गविनीतसत्त्वे तपस्विसंसर्गेण विनीताः सत्त्वाः, शान्ताः सत्त्वाः जीवाः यस्य तत्, तस्मिन् । इतोऽस्मत्सकाशात् ते तव अनघ[प्र]सूतेः अपत्यसंस्कार-विधिः उपनयनादिजातसंस्कारविधिः भविष्यति ॥७५॥

७६. अशून्य० ।

हे सीते ! तव मनसश्चित्तस्य प्रसादः आह्लादः संपत्स्यते भविष्यति । काभिः तत्सैकतोसङ्गबलिक्रियाभिः, तस्य सैकतोत्सङ्गस्तत्र बलियाताभिः तत्तीरोत्सङ्गपूजाभिः । किं कृत्वा ? तमसां नदीं वगाह्य । किंभूतां तमसाम् ? तमोपहन्त्रीं शोकविनाशिनीम् । पुनः किंभूताम् ? मुनिसंनिवेशैः ऋषीणामुटजैः अशून्यतीरां निर्भयतटाम् ॥७६॥

७७. पुष्पं फ० ।

मुनिकन्यकाः त्वां विनोदयिष्यन्ति । किंभूताः कन्यकाः ? उदारवाचः महार्थगिरः । पुनः किंभूताः ? आर्तवं ऋतुभवं पुष्पं फलं च आहरन्त्यः ढौकयन्त्यः आनयन्त्यः । न केवलं पुष्पं फलं, यत् अकृष्टरोहि स्वच्छन्दजातं बीजं च काले आहरन्त्यः ॥७७॥

७८. पयोघटैः० ।

भो सीते ! तनयोपपत्तेः प्राक् पूर्वं अशंस(संश)यं निस्सन्देहं त्वं स्तनंधयप्रीतिं पुत्रस्नेहं आवाप्स्यति(सि) लप्स्यसे । किं कुर्वती ? स्वबलानुरूपैः निजबलयोग्यैः पयोघटैः जलकलशैः आश्रमवृक्षान् तपोवनवृक्षकान् संवर्धयन्ती पोषयन्ती वर्धमाना । द्रुम एव पुत्रीयत इत्यर्थः ॥७८॥

७९. अनुग्रह०

वाल्मिकी(ल्मीकिः) ऋषिः तां सीतां आदाय सायं सन्ध्यायां स्वं निजमाश्रमं तपोवनं निनाय अनैषीत् । किंभूतः वाल्मीकिः ? दयालुचेता दयाद्रि(र्द्र)चित्तः । किंभूतां तां सीताम् ? अनुग्रहप्रत्यभिनन्दिनी, ताम् । किंभूतं आश्रमम् ? शान्तसुखं सुखकारि । पुनः किंभूतम् ? मृग्या(गा)ध्यासितवेदिपार्श्वम् । मृगैरध्यासितो वेदिबन्धो यस्मिन् तद्वेदिमित्यर्थः ॥७९॥

८०. तामर्पया० ।

च पुनः स वाल्मीकिस्तां सीतां तापसीषु अर्पयामास । कः, कां, काष्विव ? दर्शः{सुर्येन्दु ?} खं गतः । अमावास्याहिमांशोश्चन्द्रस्य अन्त्यां षोडशीं कलां औषधीष्विव । किंभूतां कलाम् ? पितृभिः निर्विष्टसारां उपभुक्ताश्रितं(तां) दर्शस्तमिश्र-(स्र)पक्षान्ते विधिर्वेदोक्त इष्यते । किंभूतां तां सीताम् ? शोकदीनां सशोकाम् । किंभूतासु तापसीषु ? तदागमप्रीतिषु तदागमसन्तुष्टासु ॥८०॥

८१. ता इङ्गु० ।

ताः तापस्यः तस्यै सीतायै सपर्यानुपदं फलमूलादिपूजासमानन्तरं दिनान्ते प्रदोषे निवासहेतोः वासार्थं उटजं पर्णवेश्म वितेरुः ददुः । किंभूतं उटजम् ? इङ्गुदीस्नेहकृतप्रदीपम् । इङ्गुदीस्नेहेन तैल्ये(ले)न कृतः प्रदीपो यत्र, तत् । पुनः किंभूतम् ? अन्तमध्ये आस्तीर्णा म(मे)ध्याजिनतल्पं प्रस्तृत(तं ?)पवित्रं [तल्पं], मृगत्वक्शय्याम् ॥८१॥

८२. तत्राभि० ।

तत्र आश्रमे वसन्तीति तिष्ठन्ती सा सीता वा(व)न्येन फलमूलादिना पत्युः भर्तुः प्रजासंततये प्रजावृद्ध्यर्थं प्रजालोके संततौ च शरीरं देहं बभार आ(अ)धारयत् । न तु जीवितेच्छया । किंभूता सा ? अभिषेकप्रयता अभिषेकेण स्नानेन प्रयतः(ता), शुचिः । पुनः किंभूता ? अतिथिभ्यः विधिना प्रयुक्तपूजा विहितार्चा । पुनः किंभूता ? वल्कलिनी मुनिवस्त्रधारिणी ॥८२॥

८३. अपि प्रभुः० ।

शक्रजितः इन्द्रजितः हन्ता लक्ष्मणः अग्रजाय रामाय अनुष्ठितं विहितं शासनं आदेशं इति उत्सुकः त्वरावान् शशंस अकथयत्, कथयामास । इतीति किम् ? अधुना इदानीं अपि प्रभुः स्वामी सानुशयः सपश्चात्तापः स्यात् भवेत् । किंभूतं शासनम् ? सीतापरिदेवनान्तं, जानकीप्रलापपर्यन्तम् ।।८३।।

८४. बभूव० ।

रामः सपदि शीघ्रं सबाष्पः साश्रुः बभूव । क इव ? तुषारवर्षी हिमवर्षी सहस्या-(स्य)चन्द्रः पौषचन्द्र इव । कौलीनभीतेन तेन रामेण वैदेहसुता सीता गृहात् निरस्ता निर्वासिता, मनसः चित्तान्न निर्वासिता ।।८४।।

८५. निगृह्य० ।

स रामः ऋद्धं समृद्धं राज्यं शशास पालयामास । किंभूतः सः ? रजोरिक्तमनाः अज्ञानरहितचित्तः, रजोगुणशून्यचित्तः । किंभूतं राज्यम् ? भातृसाधारणभोगं, अनुजसामान्यभोगम् । किं कृत्वा ? स्वयमेव शोकं निगृह्य विजित्य । पुनः किंभूतः स रामः ? धीमान् । पुनः । किंभूतः ? वर्णाश्रमावेक्षणजागरूकः प्रजापालनतत्परः ।।८५।।

८६. तस्यैक० ।

लक्ष्मीः रेमे(जे) । किंभूता लक्ष्मीः ? तस्य नृपस्य रामस्य वक्षसि हृदये असंघट्टसुखं यथा स्यात्[तथा] वसन्ती तिष्ठन्ती लक्ष्मीः । केव ? सपत्नीरहितेव । किंभूतस्य नृपस्य ? परिवादभीरोः अपवादत्रस्तस्य । साध्वीमपि एकभार्यां त्यक्तवतः उत्सृष्टवतः ।।८६।।

८७. सीतां हित्वा० ।

सा सीता भर्तुः तेन वृत्तान्तेन दुर्वारव्यथमपि दुस्सहमपि परित्यागदुःखं निर्वासनोपद्रवं विषेहे असहत । किंभूतेन वृत्तान्तेन ? श्रवणविषयप्रापिणा, कर्णगोचरं प्राप्तेन । तेनेति केन ? दशमुखरिपुः रामः सीतां हित्वा यत् यस्मात् अन्यां भार्यां न उपयेमे न व्यवाहयत् । तस्या एव सीतायाः एव प्रतिकृतिसखः कनकमयीप्रतिमासहितः सन् यत् क्रतु(तू)न् आजुहाव अकृता(? कृतवान्) ।।८७।।

इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्यान्वेयमात्रे सीतापरित्यागो नाम चतुर्दशः सर्गः ।।१४।।

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

पञ्चदशः सर्गः ॥

१. कृतसीता० ।

पृथिवीपालः रामः केवलां पृथ्वीमेव बुभुजे उपभुक्तवान् । किंभूतः सः ? कृतसीतापरित्यागः विहितसीतात्यागः । किंभूतां पृथिवीम् ? रत्नाकरमेखलां, समुद्रपर्यन्ताम् ॥१॥

२. लवणेन० ।

यमुनाभाजः कालिन्दीतटनिवासिनः तं रामं शरण्यं, शरणे साधुं [मुनयः] अभ्ययुः । किंभूताः मुनयः ? लवणेन दत्ते(दैत्ये)न विलुप्तेज्यां(ज्याः) छिन्नयागाः । पुनः किंभूताः ? शरणार्थिनः दीनाः । किंभूतेन लवणेन ? तामिश्रे(स्रे)ण तमौघेन । तमिस्रायां भावो दृश्यते इति वा तामिश्र(स्रः) तेन ॥२॥

३. अवेक्ष्य...ते{मुनयः}० ।

रामं अवेक्ष्य ज्ञात्वा तस्मिन् दैत्ये स्वतेजसा स्वतपस्तेजसा न प्रजहुः । हि यतः शापास्त्रा मुनयः त्राणाभावे तपसः व्ययं क्षयं कुर्वन्ति ॥३॥

४. प्रतिश्रु(शु)० ।

काकुत्स्थः रामस्तेभ्यः मुनिभ्यः विघ्नप्रतिक्रियां उपद्रवप्रतिघातं प्रतिसुश्राव(शुश्राव) अङ्गीचकार । शार्ङ्गिणः कृष्णस्य भुवि पृथिव्यां प्रवृत्तिः आगमनं अवतारः धर्मसंरक्षणार्थैव धर्मत्राणार्थम् ॥४॥

५. ते रामा० ।

ते मुनयः विबुधद्विषः, विबुधाः देवास्तेषां द्विट्, तस्य लवणस्य वधोपायं विनाशोपायं रामाय आचख्युः कथयामासुः । शूली शूलसहितः लवणो दुर्जयः अजेयः इति हेतोः विशूलः विगत{त्रि}शूलः प्रार्थ्यतां अभिगम्यताम् । अभियाने च याच्ञायां प्रार्थनं च प्रकीर्तिता(त)म् ॥५॥

६. आदिदेश० ।

हि स्फुटं, निश्चितं रघूणां मध्ये यः कश्चन एकः परं शत्रुं व्यावर्तितुं निवर्तयितुं

ईश्वरः समर्थो भवति । किंभूतः एकः ? परंतपः, परान् शत्रु(त्रू)न् तापयतीति परंतपः । कः कमिव ? अपवादः उपस(त्स)र्गमिव ॥६॥[1]

७. अग्रजेन० ।

ततस्तदनन्तरं रथी रथस्थः दाशरथी शत्रुघ्नः ययो जगाम । किंभूतः दाशर थी? अग्रजेन रामेण प्रयुक्ताशीर्वचनः । किं कुर्वन् ययौ ? पुष्पिताः कुसुमिताः वनस्थलीः वनभुवः पश्यन् अवलोकयन् । किंभूता वनस्थलीः ? सुरभीः सुगन्धीः । पुनः किंभूतः शत्रुघ्नः ? अभीः निर्भयः ॥७॥

८. रामादे० ।

रामादेशात् सेनाङ्गं रथगजतुरगपदातिलक्षणं पश्चात् सिद्धये अर्थसिद्ध्यर्थं तस्य शत्रुघ्नस्य अनुपदं अभवत् । कस्य क इव ? अध्ययनार्थस्य अध्ययनः(नं) अर्थो यस्य सस्तस्य । धातोः अधिरिव अधिरुपसर्गः इव ॥८॥

९. आदिष्ट[वर्त्मा] मुनिभिः० ।

आदिष्टवर्त्मा दर्शितमार्गः शत्रुघ्नः गच्छन् विरराज शुशुभे । कैः, क इव ? रथप्रष्ठैः स्यन्दनाग्रगामिभिः वालखिल्यैः अङ्गुष्ठमात्रात् प्रष्टाशीति(?) सहस्राणि ऋषयो बालखिल्यास्तैर्वालखिल्यैः अंशू(शु)मान् सूर्य इव । किंभूतः सूर्यः ? तपतां वरः द्विषंतपः श्रेष्ठः ॥९॥

१०. तस्य मा० ।

यतः गच्छतः शत्रुघ्नस्य मार्गवशात् वाल्मिकीये वाल्मिकीः(ल्मिकेः) {सक्ते ?} तपोवने आश्रमे एका वसतिर्बभूव । किंभूते तपोवने ? रथस्वनोत्सु(त्क)र्णमृगे अपूर्बाकर्णितात् रथस्वनेनोत्कर्णामृगाः यत्र तत्, तस्मिन् ॥१०॥

११. तमृषिः० ।

ऋषिस्तं कुमारं पूजयामास । किंभूतं कुमारम् ? क्लान्तवाहनं श्रान्ताश्वम् शीलवान् बुद्धिसम्पन्नो राजपुत्रः कुमारकः । काभिः ? विषयप्रतिपत्तिभिः उपयोगपूजाभिः । किंभूताभिः विषयप्रतिपत्तिभिः ? तपःप्रभावसिद्धाभिः तपःशक्तिलभ्याभिः ॥११॥

१२. तस्यामे० ।

यस्यां रात्रौ शत्रुघ्नस्तत्रोषितस्तस्यामेव यामिन्यां निशायां अस्य शत्रुघ्नस्य अन्तर्वत्नी गर्भवती सुतौ पुत्रौ असूत अजीजनत् । का, काविव ? सम्पन्ना समृद्धा क्षितिः पृथ्वी कोशदण्डाविव । कोशो धनं दण्डश्चतुरङ्गसैन्यं, तौ ॥१२॥

---

1 Actually Jina. has given the श्लोकप्रतीक of Malli XV 6, but has commented on Malli. XV. 7 viz. यः कश्चन. etc.

१३. संताने(न)० ।

युक्ता(क्त)रथः रथारूढः सौमित्रिः शत्रुघ्नः प्रातः प्रभाते ययौ । किं कृत्वा ? मुनिं आमन्त्र्य । किंभूतः सौमित्रिः ? प्राञ्जलिः । पुनः किंभूतः सौमित्रिः ? भ्रातुः रामस्य संतानश्रवणात् अपत्यजन्माकर्णात् सौमनस्यवान् प्रमुदितः ॥१३॥

१४. स च० ।

स च शत्रुघ्नः मधूपघ्नं मथुरां प्राप्तवान् । मधू(धु)दैत्याश्रमं, [मधुनाम लवणस्य पिता तस्योपघ्नं आश्रयो] मधुवनाख्यः । कुम्भीनस्याः, कुम्भीनशी(सी) लवणस्य माता, तस्याः कुक्षिजः लवणश्च उपस्थितः, ढुढौके । किं कृत्वा ? वनात् सत्त्वराशिं जीवराशिं आदाय ग्रहीत्वा । कमिव ? करमिव दण्डमिव ॥१४॥

१५. धूमधूम्रो० ।

किंभूतः लवणः ? धूमधूम्रः, धूम्रवत् धूम्रधूसरः । पुनः किंभूतः ? वसागन्धी मेदो विस्रगन्धी । पुनः किंभूतः ? बा(ज्वा)लाबभ्रुशिरोरुहः, ज्वालावत् बभ्र(भ्र)वः कपिलाः केशाः यस्य । पुनः किंभूतः लवणः ? क्रव्याद्गणपरिवारः । क्रव्यं मांसं अदन्ति भक्ष[य]न्तीति क्रव्यादीः, तेषां गणः समुहः, राक्षसगणसहितः वा गृध्रादिका(?)-परिवारः सहचरो यस्य । असौ क इव ? जङ्गमः चिताग्निरिव ॥१५॥

१६. अपशूलं० ।

लक्ष्मणानुजः शत्रुघ्नः अपशूलं त्रिशूलरहितं लवणं समासाद्य प्राप्य रुरोध अरौत्सीत् । हि यतः संमुखीनः अभिमुखः जयः रन्ध्राप(न्ध्रप्र)हारिणां छिद्राप(द्रप्र)हारिणां भवति ॥१६॥

१७. नाति पर्याप्त० ।

भो शत्रुघ्न ! दिष्ट्या भाग्येन, भीतेनेव धात्रा वेधसा, त्वं मे मह्यं उपपादितोऽसि आनीतोऽसि । किं कृत्वा ? अद्य मत्कुक्षेः मदीयोदरस्य वेतनं भोजनं, नातिपर्याप्तं नातिपरिपूर्णम् । आलक्ष्य अवलोक्य ॥१७॥

१८. इति सं० ।

राक्षसः तज्जिघांसया शत्रुघ्नं हन्तुमिच्छया प्रांशुं उच्चं द्रुमं उत्पाटयामास उज्जहार । कमिव ? मुस्तास्तंबमिव मुस्ताकाण्डवत् । किं कृत्वा ? इति पूर्वोक्तप्रकारेण शत्रुघ्नं संतर्ज्य निर्भर्त्स्यं ॥१८॥ युग्मम् ।

१९. सौमित्रे० ।

पुष्परेणुः गात्रं शरीरं प्राप आससाद, शाखी वृक्षो न। किंभूतः शाखी ? नैऋते-रितः राक्षसप्रेरितः । पुनः किंभूतः शाखी ? सौमित्रेः शत्रुघ्नस्य निशितैः तीक्ष्णैः शरैः खण्डीकृतः ॥१९॥

२०. निशानं० (विनाशात्)० ।

रक्षः राक्षसः तस्मै शत्रुघ्नाय महोपलं महापाषाणं प्रजिघाय चिक्षेप ।[1] किंभूतं महोपलं महापाषाणम् ? स्वस्य त्रिशूलस्य निशानं(?) लक्ष्यीकरणम् । कृतान्तस्य यमस्य पृथक् स्थितं मुष्टिमिव ॥२०॥

२१. ऐन्द्रमस्त्रं० ।

एन्द्रमस्त्रं वज्रं उपादाय गृहीत्वा शत्रुघ्नेन महोपलः ताडितः । सिकताभ्योऽपि वालुकाभ्योऽपि परमां प्रकृष्टां परमाणुतां सूक्ष्मतां प्रपेदे प्राप ॥२१॥

२२. तमु० ।

निशाचरः राक्षसः दक्षिणं दोर्बाहुं उद्यम्य उत्थाप्य शत्रुघ्नमुपाद्रवत् अधावत् । निशाचरः क इव ? एकतालः वृक्षो(क्षः) {एकतालो वृक्षः} यस्य सः उत्पातपवनप्रेरितः गिरिरिव ॥२२॥

२३. कर्णेन० (काष्ण्र्येन)० ।

शत्रोः शत्रुघ्नस्य काष्ण्र्येन वैष्णवेन पत्रिणा बाणेन भिन्नहृदयः पतन् लवणः र(रा)क्षसः भुवः भूमेः कम्पं प्रणिनाय आनैषीत् कम्पमकार्षीत् । आश्रमवासिनां कम्पं जहार ॥२३॥

२४. वयसां० ।

हतस्य विनाशितस्य रक्षसः उपरि वयसां पङ्क्तयः पेतुः अपतन् । तत्प्रतिद्वन्द्विनः शत्रुघ्नस्य मूर्ध्नि दिव्याः कुसुमवृष्टयः पुष्पवृष्टयः पेतुः ॥२४॥

२५. स हत्वा० ।

वीरः सुभटः शत्रुघ्नः लवणं हत्वा तदा भ्रातुः लक्ष्मणस्य आत्मानं सौन्दर्यं सुन्दरत्वं मेने । किंभूतस्य भ्रातुः ? महौजसः महाप्रतापस्य । पुनः किंभूतस्य ? इन्द्र-जिह्व(दृध्व)जशोभिनः इन्द्रजित्पताका ध्वजा शोभिनः इति वा पाठः ॥२५॥[2]

---

1 किंभूतं .... लक्ष्यीकरणम्— does not become clear.

2 Jina. takes note of an alternate reading इन्द्रजित् ध्वजशोभिनः— but does not show his preference.

२६. तस्य० ।

चरितार्थैः तपस्विभिः ऋषिभिः संस्तूयमानस्य तस्य शत्रुघ्नस्य व्रीडयाऽवनतं लज्जानम्रं शिरः शुशुभे । विक्रमोदग्रं शौर्येणोन्नतं शिरः शुशुभे । [1]नतं कथं उन्नमितमिति विरोधाभासः ॥२६॥

२७. उपकूलं० ।

शत्रुघ्नः कालिन्द्याः यमुनायाः उपकु(कू)लं उपतटं, मधुरापुरं निर्ममे अकारयम् । किंभूतः सः? पौरुषभूषणः पराक्रमभूषणः पुनः किंभूतः ? अर्थेषु द्रव्येषु निर्ममः । निर्ममत्वम् । पुनः किंभूतः ? मधुराकृतिः मनोज्ञाकारः ॥२७॥

२८. या सौरा० ।

या पुरी बभौ शुशभे । काभिः ? सौराज्यप्रकाशाभिः सौराज्येन सम्यक् पालनेन प्रकाशाभिः निर्मलाभिः । पुनः काभिः ? पौरविभूतिभिः पौराणां समृद्धिभिः । [2]मथुरा केव ? स्वर्गाभिष्यन्दवमनं स्वर्गस्य अभिष्यन्दः सारग्रहणं, तदेव वमनं, स्वर्गतुल्येत्यर्थः ! कृत्वे[व] विधायैव विनिवेशिता स्थापिता ॥२८॥

२९. तत्र सौ० ।

तत्र पूर्या सौधगतः सौधस्थः स शत्रुध्नः चक्रवाकिनीं चक्रवाकयुक्तां यमुनां पश्यन् पिप्रिये मुमुदे । यमुनां कामिव ? भूमेः वसुन्धरायाः हेमभक्तिमतिं(तीं) कनकरचनालङ्कृतां वेणीमिव ॥२९॥

३०. सखा द० ।

अथ अथानन्तरं मुनिः मिथिलायै(मैथिलेयौ) सीतापुत्रौ उभयप्रीत्या यथाविधिः यथाविधानेन संचस्कार संस्कारयामास । किंभूतः मुनिः वाल्मीकिः ? दशरथस्य सखा मित्रं, च पुनः जनकस्य मंत्रकृच्च, मन्त्रोपदेष्टा ॥३०॥

३१. स तौ कु० ।

स कविः कुशलवोन्मृष्टगर्भक्लेदौ कुशलवेन गत्वादिलोम्ना (?) च उन्मृष्टोऽपनीतो गर्भक्लेदो ययोस्तौ तदाख्यया ततो नामतः कुशलवावेव चकार किल ॥३१॥

---

1 Jina. tries to explain alaṃkāra.

2 Jina. writes 'मथुरा' for मधुरा.

३२. साङ्गं च वे० ।

कविः वाल्मीकिः तौ कुशलवौ, स्वकृतिं रामायणं को(गो)पयामास । किं कृत्वा ?[1] साङ्गं वेदं अध्याप्य पाठयित्वा ।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।
छन्दसां लक्षणं चैव षडङ्गो वेद उच्यते ॥

किंभूतौ तौ ? किञ्चिदुत्क्रान्तशैशवौ किञ्चिदुन्मुक्तबाल्यौ । किंभूतां स्वकृतिम् ? कविप्रथमपद्धतिं, कवीनां प्रथमकाव्यमार्गं, तदादिवाक्यस्य प्रस्तुतत्वात् ॥३२॥

३३. इतरेऽपि० ।

इतरेऽपि भरतलक्ष्मणशत्रुघ्नाः त्रेताग्नितेजसः अग्नितुल्यतेजसः त्रयः रघोर्वंश्याः वंशोद्भवात् पत्नीसु(षु) द्विसूनवः द्विपुत्राः आसन् बभूवुः । किंभूतासु पत्नीषु ? सद्योगात् सत्संबंधात् पतिपत्नीषु जीवभर्तृकासु (?) ॥३३॥

३४. शत्रुघाति० ।

शत्रुघ्नः शत्रुघातिनि नाम्नि पुत्रे सुबाहौ च सुबाहुनाम्नी सुन्वोः पुत्रयोः मधुरा-विदिशे निदधे विनिक्षेपे । किंभूतः शत्रुघ्नः ? पूर्वजोत्सुकः रामं द्रष्टुं उत्सुकः । पुनः किंभूतः ? बहुश्रुतः बहुविद्यः ॥३४॥

३५. भूयस्तपो० ।

भूयः पुनरपि वाल्मीकेः तपोव्ययो तपःक्षयः मा भूत् इति हेतोः स शत्रुघ्नः आश्रमं अत्यगात् अतिचक्राम । किंभूतं आश्रमम् ? मैथिलीतनयोद्गीतनिःस्पन्दमृगं, मैथिली-तनयोद्गीतेन कुशलवयोः रामायणगानेन निष्पन्दा निश्चलाः मृगाः यत्र तत् ॥३५॥

३६. वशी वि० ।

च पुनः वशी शत्रुघ्नः अयोध्यां विवेश प्राविशत् । किंभूतां अयोध्याम् ? रथ्यासंस्कारशोभिनीं, रथ्या मार्गः, तस्य संस्कारेण प्रमार्जनेन शोभते, रथ्यासंस्कारशोभिनी, ताम्, किंभूतः शत्रुघ्नः ? पौरैः नागरैः अधिगौरवं सबहुमानं ईक्षितः दृष्टः, तस्य लवणस्य वधात् ॥३६॥

---

1 'साङ्ग...पाठयित्वा' Should be read before स्वकृतिं...

३७. स ददर्श० ।

स शत्रुघ्नः सभामध्ये रामं ददर्श, अद्राक्षीत् । किंभूतं रामम् ? सभासद्भिः अमात्यैः उपासितं सेवितम् । पुनः किंभूतं रामम् ? सीतापरित्यागात् भुवः पृथिव्याः असामान्यपतिं, असाधारणपतिम् ॥३७॥

३८. तमभ्य० ।

अग्रजः रामः प्रणतं नम्रं लवणान्तकं तं शत्रुघ्नं अभ्यनन्दत् प्रशशंस । कः, कमिव ? कालनेमिवधात् दानववधात् प्रीतः प्रमुदितः तुषाराड् इन्द्रः शार्ङ्गिणं विष्णुमिव ॥३८॥

३९. स पृष्ट० ।

सर्वत्र वार्तां कुशलं पृष्टः स शत्रुघ्नः राज्ञे नृपाय आख्यत् आचचक्षे । संततिं सन्तानं न । कस्मात् ? काले अवसरे प्रख्यापयिष्यतः आद्यस्य कवेः शासनात् आदेशात् । कथम् ? अहमेव निवेदयिष्यामि इति तेन निवारितत्वादित्यर्थः ॥३९॥

४०. अथ जानपदो० ।

अथ अथानन्तरं, जानपदो जनपदागतो विप्रः द्विजः, अङ्कशय्यास्थं उत्सङ्गशयनस्थं अप्राप्तयौवनं अप्राप्ततारुण्यं पुत्रं अवतार्य उत्तार्य, भूपतेः द्वारे सिंहद्वारे चक्रन्द विललाप ॥४०॥

४१. शोचनीया० ।

हे वसुधे ! पृथ्वि ! त्वं शोचनीयाऽसि, या दशरथात् च्युता भ्रष्टा, रामहस्तं अनुप्राप्ता कष्टात् कष्टतरं गता ॥४१॥

४२. श्रुत्वा तस्य० ।

तस्य विप्रस्य शुचः शोकस्य हेतुं कारणं श्रुत्वा, गोप्ता रक्षकः राघवः रामः जिह्राय लज्जितः । हि यतः अकालल(भ)वः अकालजः मृत्युः यमः इक्ष्वाकुपदं इक्ष्वाकुस्थानं न अस्पृशत्, न अविशत् ॥४२॥

४३. स मुहूर्तं० ।

स रामः वैवस्वतजिगीषया यमं जेतुमिच्छया कौबेरं यानं विमानं व्याजहार अस्मरत् अस्मार्षीत् । किं कृत्वा ? दुःखितं द्विजं इति आश्वास्य सन्तोष्य । इतीति किम् ? मुहूर्तं क्षणमात्रं सहस्व क्षमस्व ॥४३॥

४४. आक्त(त्त)शस्त्र० ।

स रघूद्वहः रामः तत् यानं अध्यास्य, विमानमारुह्य प्रस्थितः प्रतस्थे । किंभूतः सः रघूद्वहः ? आत्तशस्त्रः गृहीतायुधः । अस्य च रामस्य पुरा अग्रे गूढरूपा अदृश्या सरस्वती उच्चचार प्रकटीबभूव ॥४४॥

४५. राजन् प्र० ।

हे राजन् । ते तव प्रजासु कश्चित् अनाचारः प्रवर्तते । तं अनाचारं अन्विष्य, ज्ञात्वा प्रशमय निवर्तय । ततः कृति(ती) कृतार्थो भविष्यसि । कृतार्थो विप्रात्मजजीविता (विप्रात्मजः जीवितो ?) भविष्यसि ॥४५॥

४६. इत्याप्त० ।

रामः इति आप्तवचनात् दैववाक्यात् पा(पत्)त्रेण पुष्पकविमानेन दिशः पपात बभ्राम । किं कुर्वन् ? वर्णविक्रियां वर्णव्यतिक्रमं विनेष्यन् अन्वेष्यन् । किंभूतेन पात्रेण (पत्त्रेण) ? वेगनिष्कम्पकेतुना अतिवेगवशान्निष्कम्पो निश्चलो केतुः पताका यस्य सस्तेन ॥४६॥

४७. अथ० ।

अथ अथानन्तरं इक्ष्वाकुः रामः कि(क)ञ्चित् अज्ञातपुरुषं अधोमुखं तपस्यन्तं तपश्चरन्तं ददर्श । कि(क)ञ्चित् धूमाभि{घा}ता{धू}म्राख्यं(क्षं), धूमारक्तलोचनम् । पुनः किंभूतम् ? वृक्षशाखावि(व)लम्बिनं, तरुशाखालम्बमानम् ॥४७॥

४८. पृष्टनामा० ।

राज्ञा पृष्टनामान्वयः स धूमपस्तस्मै रामाय आत्मानं संचुकं(शंबुकं)नाम सुरपदार्थिनं स्वर्गाभिलाषं शूद्रं आचष्टे आचख्यौ किल ॥४८॥

४९. तपस्य० ।

नियन्ता राजा शस्त्रं आददे जग्राह । किं कृत्वा ? प्रजानां लोकानां अघावहं व्यसनजनकं पापोत्पादकं तं शूद्रं शिर्षच्छेद्यं शिरच्छेदार्हं परिच्छिद्य ज्ञात्वा । कस्मात् ? तपसि अनधिकारत्वात् अयोग्यत्वात् ॥४९॥

५०. स तद्व० ।

सः रामस्तद्वक्त्रं तद्वदनं कण्ठनालात् अपाहरत् व्ययोजयत् । किमिव ? हिमक्लिष्टं किञ्जल्कं, हिमक्लिष्टाः दग्धाः केसराः यस्य तत् पंकजमिव । किंभूतं तद्वक्त्रम् ? ज्योतिष्कणाहतश्मश्रु । ज्योतिःकणैः अग्निस्फुलिङ्गैः हतश्मश्रु दग्धं कूर्चं यस्य तत् ॥५०॥

५१. कृतदण्डः० ।

राज्ञा स्वयं कृतदण्डः शूद्रः सतां गतिं लेभे प्राप । स्वमार्गाविलङ्घिना स्वर्गमार्गमतिक्रमतां दुश्चरेणापि तपसा न ॥५१॥

५२. रघुना० ।

रघुनाथोऽपि रामोऽपि अगस्त्येन सह संयुयुजे संयक्तौ(क्तो) बभूव । केन, क इव ? इन्दुना चन्द्रेण सह शरत्काल इव । किंभूतेन अगस्त्येन ? मार्गसंदर्श(र्शि)तात्मना मार्गे संदर्शितः आत्मा येन । पुनः किंभूतेन ? महौजसा, महातेजसा । द्वन्द्वयोस्तुल्यं (ल्यता) ॥५२॥

५३. कुम्भयोनि० ।

कुम्भयोनिः अगस्त्यैः(स्त्यः) तस्मै रामाय अलङ्कारं ददौ । किंभूतं अलङ्कारम् ? दिव्यपरिग्रहौ(हं), सुवर्णमयसूत्रसहितम् । पुनः किंभूतम् ? अप्पतिना समुद्रेण दत्तम् । किमिव ? आत्ममूल्यं इव ॥५३॥

५४. तं दध० ।

रामः पश्चात् नि[व]वृते प्रत्याययौ । पराशुः(सुः) मृतः द्विजात्मजः प्राक्, पूर्वं, प्रथमं निववृते जीवितः । किं कुर्वन् ? बाहुना तं अलङ्कारं दधन् । किंभूतेन बाहुना ? मैथिलीकण्ठनिर्व्यापारेण, मैथिल्याः कण्ठः मैथिलीकण्ठः [तस्मिन्] निर्व्या[पा]रस्तेन, जानकीपरिष्वङ्गरहितेन ॥५४॥

५५. तस्य पू० ।

पुत्रसमागतः पुत्रेण सह मिलितः द्विजः तस्य रामस्य पूर्वोक्तां प्रागुक्तां निन्दां स्तुत्या निवर्तयामास । कथंभूतस्य ? वैवस्वतादपि यमादपि प्रा(त्रा)तुः रक्षकस्य ॥५५॥

५६. तमध्य० ।

रक्षःकपिनरेश्वराः राक्षसवानरमानवनाथा उपायनैः ढौकनीकैस्तं रामं अभ्यवर्षन् ववृषुः । किंभूतं तम् ? अध्वराय यज्ञाय मुक्ताश्र(श्वं) उत्सृष्टतुरङ्गम् । के, कैः, कमिव ? मेघाः अम्भोभिः पानीयैः सस्यमिव धान्यमिव ॥५६॥

५७. दिग्भ्यो निमं० ।

महर्षयः मुनयश्च दिग्भ्यः दिशाभ्यः एनं रामं अभिजग्मुः आययुः । भौमानि भूमिभवानि धिष्ण्यानि गृहाणि हित्वा न, ज्योतिर्मयान्यपि तेजोमयान्यपि । सप्तर्षयो हि ज्योतिर्गृहाः ॥५७॥

५८. उपश० ।

उपशल्यनिवे(वि)ष्टैः निकटासीनैस्तैर्लोकैश्चतुर्द्वारमुखी चतुःप्रतोलिवदना{म}योध्या बभौ, शुशुभे । अयोध्या केव ? सद्यः सृष्टलोका पि(पै)तामही वैधसी तनुः शरीरमिव, मूर्तिमि(रि)व रेजे । "ग्रामान्तः उपशल्यं स्यात् ।"[1] इत्यत्र ग्रामग्रहणं पर्यायरूपलक्षणं ज्ञेयम् ।।५८।।

५९. श्लाघ्यस्त्या० ।

वैदेह्याः सीतायाः त्यागोऽपि श्लाघ्यः यस्य पत्युः प्राग्वंशवासिनः । प्राग्वंशो यज्ञ{यामान}शाला, तत्र वासिनः । पुनः किंभूतस्य ? अनन्यजानेः, न विद्यते अन्या जाया यस्याऽसौ, अनन्यजानिस्तस्य ।।५९।।

६०. विधेर० ।

ततस्तदनन्तरं मखः यज्ञः प्रववृते । किंभूतः मखः ? विधेः अधिकसम्भारः {अधिकसामग्रीकसंभार}अधिकसामग्रीकः, यत्र मखे क्रियाविघ्नः(घ्नाः) यागविघ्नभूताः राक्षसा एव रक्षिणः रक्षकाः आसन् बभुवुः ।।६०।।

६१. अथ प्राचे० ।

अथ अथानन्तरं गुरुनो(चो)दितौ वाल्मीकीं(कि)निर्दिष्टौ मैथिलेयौ सीतापुत्रौ कुशलवौ प्राचेतसोपज्ञां(ज्ञं),प्राचेतसो वाल्मीकिस्तस्य प्रथमं उपज्ञातं प्रणीतं रामायणं इतस्ततः अनेकप्रदेश[षु]जगतुः गीतवन्तौ ।।६१।।

६२. वृत्त० ।

रामस्य चरित्रं वाल्मीकिकृतिं किन्नरस्वनौ तौ कुशलवौ येन हेतुना शृण्वतां आकर्णयतां मनो हर्तुं आवर्जयितुं न अलं स्याताम्, न भवेताम्, किं तत् ? अपि तु शक्तौ उत्कृष्टनायकत्वात्, मधुरकवित्वात् रम्यत्वात् श्रोतृमनोरञ्जकौ तावभूतावित्यर्थः ।।६२।।

६३. रूपे गीते० ।

सानुजो भ्रातृसहित रामस्तयोः कुशलवयोः रूपे गीते च माधुर्यं ददर्श अद्राक्षीत् । चकारात् कुतुहली शुश्राव । किंभूतं माधुर्यम् ? तज्ज्ञनिवेदितं, प्रवीणकथितम् ।।६३।।

६४. तद्गीत० ।

तद्गीता(त)श्रवणैकाग्रा अश्रुमुखी साश्रुवदना संसद् सभा रेजे । केव ? हिमनिष्यन्दिनी अवश्यायजलश्रा(स्रा)विणी प्रातः प्रभाते, निर्वाता निष्कम्पा वनस्थली इव ।।६४।।

---

1. This is अमर. as quoted by Malli. also see. P. ३१८, ibid.

६५. वयोवेष० ।

सा जनता जनसमूहः रामस्य च तयोश्च लवकुशयौश्च वयोवेशविसदृशं प्रेक्ष्य वीक्ष्य आपन्नविस्मयेन व्यतिष्ठत अतिष्ठत् तस्थौ ॥६५॥

६६. उभयोः० ।

लोकः उभयोः लवकुशयोः प्रावीण्येन गीतकौशलेन तथा न विशि(सि)स्म(ष्मि)ये, न विस्मृतो बभूव, यथा नृपतेः राज्ञः प्रीतिदानेषु प्रसाददानेषु वि(वी)तस्पृहतया निर्लोभत्वेन कृत्वा लोकः विस्मये(स्मितः) ॥६६॥

६७. गेये को नु० ।

वां युवां गेये गीतकलायां केन विनीतौ शिक्षितौ । कस्य च कवेः कृतिः [इयं], इति राज्ञः(ज्ञा) स्वयं पृष्टं(ष्टौ) तं(तौ) वाल्मीकिं अशंसतां अकथयताम् ।

६८. एतदाकर्ण्य० ।[1]

राजीवलोचनः कमलनेत्रो रामः कर्णाभ्यां एतदाकर्ण्य हर्षवि[षा)दाभ्यां समं युयुजे, सम्बद्धो बभूव, मिलितः । किंभूतो रामः ? नीतिकोविदः, नीतिपण्डितः ॥६९॥

६९. अथ० ।

अथानन्तरं सावरजो सानुजः रामः प्राचेतसं वाल्मीकिं उपेयुंक्त(०यिवान्) । आत्मनः देहं शरीरं ऊरीकृत्य वर्जयित्वा अस्मै वाल्मीकये राज्यं न्यवेदयत् दत्तवान्, ददौ । देहव्यतिरिक्तमन्यत् सर्वं समर्पयामास इत्यर्थः ॥६९॥

७०. स तावाख्याय० ।

स कविस्तौ मैथिलेयौ सीतापुत्रौ तवात्मजौ [इति] रामस्य(माय) आख्यानं कथयित्वा सीतायाः परिसंग्रहणं वव्रे प्रार्थयामास । किंभूतः कविः ? कारुणिकः कृपालुः ॥७०॥

७१. तात शु० ।

हे तात । ते तव वधूः नः अस्माकं स्नुषा [तें] समक्षं प्रत्यक्षं जातवेदसि अग्नौ शुद्धा । तु पुनः रा(र)क्षसः रावणस्य दौरात्म्यात् तां सीतां अत्रत्याः इहत्याः प्रजाः न श्रद्दधुः नासम्भावयन् ॥७१॥

---

1. ७१-७२ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । तदाकर्ण्य ... मुनिम् ॥
पृ. ३२० ibid.

७२. ताः स्वचा० ।

मैथिली सीता स्वचारित्रं निजशीलमुद्दिश्य ताः प्रजाः क्रु(प्र)त्याय[य]तु । ततः पुत्रवतीं पुत्रसहितां एनां सीतां त्वदाज्ञया त्वदादेशेन प्रतिपत्स्ये अङ्गीकरिष्ये ॥७२॥

७३. इति प्रति० ।

मुनिः ऋषिः आश्रमात् तपोवनात् शिष्यैः कृत्वा जानकीं आना(न)ययामास । कैः, कामिव ? मिथुनैः (नियमैः) व्रतैः स्वसिद्धिं स्वर्गापवर्गलक्षणं(णां), अथवा अष्ट-महासिद्धिमिव । कस्मिन्सति ? इति रा{मा}ज्ञा प्रतिश्रुते अङ्गीकृते सति ॥७३॥

७४. अन्येद्युः० ।

अथ अथानन्तरं काकुत्स्थः रामः अन्येद्युः अन्यस्मिन् अहनि पुरौकसः पौरान् सन्निपात्य आकार्य (?) प्रस्तुतप्रतिपत्तये प्रारब्धकार्यनिवर्तनाय कविं आह्वाययामास ॥७४॥

७५. स्व{श}रसं० ।

[मुनिः] रामं उपस्थितः डुढौके {कैकेय्या} सह सीतया च सह पुनः पुत्राभ्यां सह । कया, कमिव ? ऋचा उदर्चिषं उदितं सूर्यं इव । किंभूतया ऋचा ? स्वरसंस्का-रवत्या, स्वराः उदात्तादयः संस्कारो निरपशब्दता उच्चारणशुद्धिर्यस्याः सा, तया ॥७५॥

७६. काषाय० ।

सा सीता शान्तेन प्रशमयुक्तेन वपुषैव शरीरेणैव {इति} शुद्धा [इति] अन्व-मीयत समभाव्यत । किंभूतेन वपुषा ? काषायपरिवीतेन रक्तवस्त्रच्छादनेन । पुनः किंभूतेन ? स्वपदार्पितचक्षुषः(षा) निजचरणनिहितनयनेन ॥७६॥

७७. जनाः० ।

सर्वे जनाः तथा(दा)लोकपथात् सीतादर्शनमार्गात् अवाङ्मुखाः अधोमुखाः स्थिताः । किंभूताः जनाः ? प्रतिसंहृतचक्षुषः प्रतिसंहृतानि चक्षूंषि यैस्ते । जनाः के इव ? फलिताः शालय इव । यथा फलिताः शालयः नम्रमुखाः तिष्ठन्ति ॥७७॥

७८. तां दृष्टि० ।

मुनिर्वाल्मीकिः इति तां सीतां असा(शा)त् अशिक्षयत् । इतीति किम् ? हे वत्से । भर्तुः रामस्य दृष्टिविषये स्ववृत्ते निजशीले लोकं जनं निःसंशयं कुरु । किंभूतः मुनिः ? आस्थितविष्टरः अधिष्ठितासनः ॥७८॥

७९. अथ० ।

अथ अथानन्तरं सीता सत्यां सरस्वतीं उदीरयामास उच्चारयामास । किं कृत्वा ? वाल्मीकिशिष्येण आवर्जितं दत्तं पुण्यं पवित्रं पयः पानीयं आचम्य पीत्वा ॥७९॥

८०. वाङ्मनः० ।

मे मम वाङ्मनःकर्मभिः मनोवाक्कायैः पत्यौ भर्तरि यथा व्यभिचारो द्रोहः न, तथा हे विश्वंभरे ! देवि ! मां अन्तर्धातुं विवरं दातुं अर्हसि योग्या भवसि ॥८०॥

८१. एवमुक्तो(क्ते)० ।

तया साध्व्या एवमुक्ते सति, कथिते सति, सद्योभवात् क्षणजाता[त्] भुवः पृथिव्याः रन्ध्रात् प्रभामण्डलं उद्ययौ, निर्गतं उत्थितम् । प्रभामण्डलं किमिव ? शातह्रदमिव वैद्युतं ज्योतिरिव । शतह्रदायाः शातह्रदम् ॥८१॥

८२. तत्र ना० ।

तत्र संसदि समुद्रवसना समुद्र एव वसनं यस्याः सा, प्रादुरासीत् प्रकटीबभूव । किंभूता वसुन्धरा ? नाग-फणोत्क्षिप्त-सिंहासननिषादिनी, नागस्य फणाभिः उत्क्षिप्तं उत्थापितं च तत् सिंहासनं च । तत्र निषादिनी ॥८२॥

८३. सा सीता० ।

सा वसुधा पातालं अभ्यगात् अभिजगाम । किं कृत्वा ? सीतां अङ्कं उत्सङ्गं आरोप्य निधाय । किंभूतां सीताम् ? भर्तृप्र[णि]हितेक्षणां, भर्तरि प्रणिहिते स्थापिते ईक्षणे लोचने यया सा, ताम् । कस्मिन् सति ? रामे 'मा मा' इति व्याहरत्येव ब्रुवत्येव सति ॥८३॥

८४. अथ० ।

अथानन्तरं महीपालः रामः कोपात् धनुषि बाणं संदधे संयोजयामास । किंभूतं बाणम् ? महीविदारणक्षमं, पृथ्वीभेदनक्षमम् ॥८४॥

८५. रसायां० ।

गुरुः वाल्मीकिः तस्य रामस्य रसायां वसुन्धरायां संरम्भ[।] कोपं [शम]यामास निवर्तयामास । किंभूतस्य तस्य ? सीताप्रत्यर्पि(र्प)णैक्ष(षि)णः सीताव्यावर्तनेच्छोः । पुनः किंभूतस्य ? धन्विनः धनुर्धरस्य । [पुनः] किंभूतः गुरुः ? विधिबलापेक्षी । बलवान्

विधिः[1] । किमत्र क्रियते ? नायं पौरुषस्य ते अवसर इति गुरुर्वाल्मीकिः {न्यवीवृतत् ? न्यवारयत् ?} अथवा गुरुं(रुः) ब्रह्मा स्वयंभु{वं}(भुः) वा, ह्यसौ स्वयमागत्य निषिद्धः[1] (०द्धवान् ?) ॥८५॥

८६. ऋषीन्० ।

रामः सीतात्यागं(०गतं) स्नेहं तदपत्ययोः सीतापुत्रयोः निदधे स्थापयामास । किं कृत्वा ? मखान्ते यज्ञान्ते पुरस्कृतान् पूजितान् ऋषीन् विसृज्य । च पुनः पुरस्कृतान् सुहृदः मित्राणि विसृज्य ॥८६॥

८७. युधाजितश्च० ।

धृतप्रजः स्थापितप्रजः युधाजितश्च कैकेय्याधिपतेः सन्देशात् सिन्धुनामकं स्वदेशं भरताय ददौ । किंभूताय भरताय ? दृष्टप्रभावाय दृष्टमाहात्म्याय । वत्स तव मातुलेन समादिष्टं यथा ममायं देशः गन्धर्वैराक्रान्त इति तं जेतुं गृहाणेत्युक्त्वा रामो भरताय सिन्धुकुलगं ददौ इत्यर्थः ॥८७॥

८८. भरत० ।

तत्र सिन्धुदेशे भरतः गन्धर्वान् राजपुत्रान् युधि संग्रामे निर्जित्य अभिभूय, केवलं आतोद्यं वादित्रं प्रा(ग्रा)हयामास आयुधं शस्त्रं समत्याजयत् त्याजयामास ॥८८॥

८९. स तक्ष० ।

स भरतः पुनः रामान्तिकं अगात् । किं कृत्वा ? अभिषेकार्हौ राज्ययोग्यौ तक्षपुष्कलौ पुत्रौ तदाख्ययोः तदभिधानयोः राजधान्योः तक्षावतीपुष्कलवत्योः अभिसि(षि)च्य राज्ये संस्थाप्य ॥८९॥

९०. अङ्गदं० ।

लक्ष्मणोऽपि अङ्गदं चन्द्रकेतुं च आत्मसंभवौ पुत्रौ रघुनाथस्य शासनात् कारापथेश्वरौ चक्रे । करापथं निर्माय तत्राङ्गदं अभि(भ्य)सिञ्चत् चन्द्रवर्त(र्तें) तु चन्द्रकेतुमित्यर्थः ॥९०॥

९१. इति(त्या)रो० ।

इति ते जनेश्वराः राजानः जननीनां मातॄणां क्रमात् क्रमेण निवापांश्च उ(औ)दर्ध्वदैहिकानि निदधुः चक्रुः । किंभूताः जनेश्वराः [आ]रोपितपुत्राः प्रतिष्ठापिततनयाः । किंभूतानां जननीनाम् ? भर्तृलोकप्रपन्नानां स्वर्गगतानाम् ॥९१॥

1 'बलवान् विधिः...to निषिद्धः' does not make any sense. It seems to be redundant.

९२. उपेत्य० ।

अथ अथानन्तरं मुनिवेषः कालः राघव रामं, उपेत्य आगत्य इति प्रोवाच । इतीति किम् ? रहः एकान्ते संवादिनौ मिथः मंत्रयमाणौ आवां नौ, यः पश्येत् तं त्यजेः, निर्वासयेति समयद्(सू)[च]कमूचे ।।९२।।

९३. तथेति० ।

स कालं(लः) नृपाय आचख्यौ जगाद । परमेष्ठी(ष्ठि)नः ब्रह्मणः शासनात् आदेशात् दिवं अध्यास्व आरुरोह । किंभूताय नृपाय ? तथेति एवमस्त्विति प्रतिपन्नाय अङ्गीकृतवते । किंभूतः कालः ? नि(वि)वृतात्मा, प्रकटितरूपः ।।९३।।

९४. विद्वानपि० ।

द्वाःस्थः द्वारि तिष्ठति इति द्वाःस्थः लक्ष्मणस्तयोः कालरामयोः समयं मर्यादां विद्वान् जानन्नपि अभिनत् अतिचक्राम । किंभूतः लक्ष्मणः ? भीतः त्रस्तः । कस्मात् दुर्वाससः ऋषेः शापात् । किंभूतस्य दुर्वाससः ? रामसंदर्शनार्थिनः । रामं संद्रष्टुं अर्थयते रामदर्शनार्थी, तस्य । तस्मिन् एव हि काले दुर्वासाऽऽगत्य लक्ष्मणमवदत् 'रामं द्रष्टुमिच्छामि, निवेदयामीति । नतस्तेनाभ्यधायि, भवान् क्षणमात्रं सहस्व [1]न दृश्यते; राजकार्यं मम निवेदय{त्} (?) यथाऽहमेव सम्पादयामि । ततोऽसौ क्षुभितचेताः पुनरवदत्, यदि ममागमनं न निवेदयसि त[र्हि] सराजकं नगरं सकलमिदमिदानीं एव भस्मीभूतमवेहीत्याकर्ण्य, वरं मम चैकस्य विनाशोऽस्तु न सर्वेषामिति निश्चित्य प्रविश्याग्रजाय मुनिमागतमाख्यत् । राजाऽपि कालमेवं करोमीति विसृज्य संपन्नमांसभोजनायार्थिने मुनये काममापूर्य प्रतिज्ञातिं (?प्रतिज्ञापूर्तिं) च कुर्वता सममा(म)नुजं अत्यजत्—यदुक्तं[2]

> "गच्छ लक्ष्मण शीघ्रं त्वं माऽभूद् धर्मविपर्ययः ।
> त्यागो वा वधो{वो}वाऽपि साधूनामभयं पदम् ।।" ।।९४।।

९५. स गत्वा० ।

स लक्ष्मणः सरयूतीरं गत्वा भ्रातुः रामस्य प्रतिज्ञां अवितथां सत्यां चकार, अकरोत् किंभूतस्य भ्रातुः ? पूर्वजन्मनः, अग्रजस्य । किंभूतः स लक्ष्मणः ? योगवित् योगज्ञः ।।९५।।

---

1 न दृश्यते...does not carry sense. Then Jina. has given a full story.

2 क्षेपकोऽयं दृश्यते । p. ३२४ ibid. Malli. has साधूनामुभयं

९६. तस्मिन्ना० ।

राघवः रामः भुवि पृथिव्यां शिथिलं विरक्तं तस्थौ अतिष्ठत् । क इव ? त्रिपात् धर्म इव । त्रेतायां धर्मः त्रिपादः भवति । कस्मिन् सति ? तस्मिन् आत्मचतुर्भागे प्राक् प्रथमं नाकं स्वर्गं अधि तस्थुषि, गते सति ॥९६॥

९७–९८. स निवेश्य० । [उदक् प्रतस्थे][1]

सानुजः भ्रातृसहितः स्थिरधीः सः रामः उदक् उत्तरस्यां दिशि प्रतस्थे चचार । किं कृत्वा ? कुशावत्यां कुशं निवेश्य, स्थापयित्वा । किंभूतं कुशम् ? रिपुनागाङ्कुशम् । पुनः किं कृत्वा ? लवं श्रावस्त्यां निवेश्य । किंभूतं लवम् ? सतां साधूनां सूक्तैः उत्पादिताश्रुकणम् । किंभूतः रामः ? अग्निपुरःसरः । पुनः किंभूतः पतिवात्सल्यात् गृहवर्जं गृहाणि वर्जयित्वा अयोध्यया अन्वितः ॥ युग्मम् ॥९७/९८॥

९९. [जगृहुः०] ।

चित्तज्ञाः अभिप्रायज्ञाः हरिराक्षसाः तस्य रामस्य पदवीं जगृहुः अनुययुः । किंभूतां पदवीम् ? प्रजाश्रुभिः जनाश्रुभिः कणैः अभिवृष्टां सिक्ताम् । किम्भूतैः अश्रुभिः ? कदम्बमुकुलस्थूलैः कदम्बकुसुमस्थूलैः ॥९९॥

१००. उपस्थि० ।

तेन भर्त्रा रामेण अनुयायिनां अनुगामिनां सरयूः सरित् चक्रे विदधे । किंभूता सरयूः ? त्रिदिवनिःश्रेणिः स्वर्गारोहणसोपानमाला । किंभूतेन तेन ? उपस्थितविमानेन आगतदिव्यविमानेन । पुनः किंभूतेन ? भक्तानुकम्पिना करुणापरेण ॥१००॥

१०१. यद गोप्र० ।

यत् यस्मात्कारणात् तत्र सरय्वां स(म)ज्जतां प्रविशतां गोप्रतरतुल्यः संकटः संमर्दः अभूत् बभूव । अतः कारणात् तदाख्या तन्नाम्ना भुवि पृथिव्या पावनं पवित्रं तीर्थं गोप्रतरणं प्रपथे प्रख्यातम् ॥१०१॥

१०२. स विभुः० ।

[स विभुः]रामः त्रिदशि(शी)भूतपौरार्थं देवि(वी)भूतनागरार्थं स्वर्गान्तरं देवलोकान्तरं अकल्पयत् अकारयत् । केषु सत्सु ? विबुधांशेषु देवांशेषु प्रतिपन्नात्ममूर्तिषु प्राप्तनिजसूर्यादितनुषु ॥१०२॥

---

1. Jina. reads Malli. 97 and 98 together here.

१०३. निर्वर्त्यै० ।

विश्वक्सेनः नारायणः स्वतनुं निजमूर्तिं अविशत् विवेश । किं कृत्वा ? सुराणां कार्यं प्रपञ्चं निर्वर्त्य । किंभूतं कार्यम् ? दशमुखभयोच्छेदी(दि) रावणत्रासप्रशमलक्षणम् । किंभूतां स्वतनुम् ? सप्तलोकप्रतिष्ठां सप्तलोकेषु प्रतिष्ठा यस्याः सा सकलजगदाधारभूता । किं कृत्वा ? दशमुखभयच्छेदकार्यं एवं निर्वर्त्य संपाद्य समाप्य । पुनः किं कृत्वा ? दक्षिणे त्रिकूटे च उत्तरे च गन्धमादेन वीरौ लङ्कानाथं विभीषणं पवनतनयं हनुमन्तं उभयं, द्वयं च, कीर्तिस्तंभद्वयमिव स्थापयित्वा निवेश्य ॥ १०३॥

इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्री जिनचन्द्रसूरिशिष्ये(?) (जिनसमुद्रकृते ?) रघुकाव्यान्वमात्रे स्वर्गारोहणं नाम पञ्चदशः सर्गः ॥१५॥

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

षोडशः सर्गः।

१. अथेतरे० ।

अथ अथानन्तरं इतरे सप्तरघुप्रवीराः लवतक्षपुष्कराङ्गदचन्द्रकेतुशत्रुघातिसुबाह्वादयः कुशं रत्नविशेषभाजं, रत्नविशेषं भजतीति रत्नविशेषभाक्, तं रत्नविशेषभाजं चक्रुः, विदधुः । किंभूतं कुशम् ? पुरोजन्मतया पूर्वजन्मत्वेन गुणैश्च ज्येष्ठं महान्तम् । हि यतः भ्रातॄणां सौभ्रात्रं, सुभातृभावः सौभ्रात्रं, कुलानुसारि प्रबन्धानुगतम् ॥१॥

२. ते सेतु० ।

ते अष्टौ भ्रातरः अन्योन्यदेशप्रविभागसीमां परस्परजनपदविच्छेदमर्यादां न व्यतीयुः नातिक्रमुः । के, कामिव ? समुद्राः वेलामिव । किंभूतास्ते ?[1] सेतुवार्ता गजबन्धमुख्यैः, सेतुः क्रयोविक्रयश्च वार्ता पशुपाल्यं कृषिर्वाणिज्यं च गजबन्धो वारिस्थानं, यत्र इभाः बध्यन्ते । वन्ध्यैः (अवन्ध्यैः ?)सफलैः । {अप}कर्मभिः । अभ्युत्थिताः अभ्युन्नताः ॥२॥

३. चतुर्भुजां० ।

तेषां कुशादीनां अष्टधा अष्टप्रकारैः विभिन्नः वंशः विप्रससार । केषां, क इव ? सुरद्विपानां सामयोनिरिव । यथा सुरद्विपानां वंशः अष्टधा प्रससार । अष्टधा सामयोनित्वम् ।

"हस्ताभ्यां परिगृह्याथ सप्तसामान्यगायत ।
गायतो ब्रह्मणस्तस्य समत्येतो(?) (समुत्पेतुः) मतङ्गजाः ॥"[2]

किंभूतानां तेषाम् ? दानप्रवृत्तेः अनुपातका(रता)नां,[अ]वियुक्तानाम् । गजानां पक्षे दानप्रवृत्तेः मदप्रवृत्तेः । किंभूतः वंशः ? चतुर्भुजांस(श)प्रभवः, चतुर्भुजो विष्णुः तस्यांशाः रामादयस्ते प्रभवः, उत्पत्तिकारणं यस्य सः ॥३॥

---

1 Jina.'s words सेतु... do not make full sense. Malli. has — सेतुर्जलबन्धः । वार्ता कृषिगोरक्षणादिः । "वार्ताकृष्याद्युदन्तयोः" इति विश्वः । गजबन्धः आकरेभ्यो गजग्रहणम् । ते मुख्यं प्रधानं तेषां तैरवन्ध्यैः सफलैः कर्मभिरभ्युच्छ्रिताः etc. Jina. has अभ्युत्थिताः ।

2. Jina. seems to have looked into Malli's work. Malli. has also given this verse under XVI 3 (ibid, pp.३२७)

४. अथाहृत(र्धरात्रे)० ।

अथ अथानन्तरं प्रबुद्धः जागरितः(?) कुशः अर्धरात्रे निशिथे वनितां अपश्यत् अद्राक्षीत् । किंभूते अर्धरात्रे ? स्तिमितप्रदीपे दीप्यमानदीपे । पुनः किंभूते ? शय्या-गृहे शयनीयवेश्मनि सुप्तजने शयिताखिलपरिजने । किंभूतां वनिताम् ? प्रवासस्थकलत्र-वेशां प्रोषितभर्तृकानेपथ्यभवां(? – नेपथ्यां० is enough) मलिनाम् (वनिताम्) । पुनः किंभूताम् ? अदृष्टपूर्वां अज्ञातपूर्वाम् ॥४॥

५. सा साधु० ।

सा वनिता तस्य कुशस्य पुरस्तात् अग्रतः स्थित्वा जयशब्दपूर्व जय त्वां(त्वं) इत्याशिषं दत्त्वा अञ्जलिं बबन्ध । किंभूतस्य कुशस्य ? साधुसाधारणपार्थिवर्द्धेः, साधूनां साधारणा सामान्या पार्थिवर्धिः राज्यलक्ष्मीः यस्य तस्य । पुनः किंभूतया ? पुरुहूतभासः इन्द्रतुल्यकान्तेः । पुनः किंभूतस्य ? परेषां शत्रु(त्रू)णां जेतुः अभिभावकस्य । पुनः किंभूतस्य ? बन्धुमतः, बान्धवयुक्तस्य ॥५॥

६. अथानपो० ।

अथ अथानन्तरं दाशरथेः रामस्य म(त)नुजः कुशः तां देवीं प्रोवाच अवोचत् । किंभूतां ताम् । अनपोढार्गलमपि अनुद्घाटितार्गलमपि आगारं गृहं, प्रतिवेष्टां(प्रविष्टां ?) प्रतिबिम्बिनाम् (?) । कामिव ? प्रतिमामिव ? किंभूतः दाशरथेस्तनुजः ? सविस्मयः साश्चर्यः । पुनः किंभूतः ? पूर्वार्धविसृष्टतल्पः पूर्वार्धेन पूर्वकायेन विसृष्टं त्यक्तं तल्पं शयनीयं येन ॥६॥

७. लब्ध्वा(द्धा)न्तर(रा)० ।

च पुनः त्वं अनवृ(निर्वृ)तानां दुखितानां आकारं विरूपं बिभर्षि धारयसि । का कमिव ? मृणालिनी पद्मिनी हैमं हिमसम्बन्धि उपरागमिव उपप्लवमिव । ते तव योग-प्रभावो योगमाहात्म्यं च न लक्ष्यते न ज्ञायते । किंभूताम् ? सावरणेऽपि अनुद्घाटित-कपाटेऽपि लब्धान्तरा लब्धावकाशा ॥७॥

८. का त्वं शु[भे]० ।

हे शुभे, हे कल्याणि ! का त्वम् ? वा, अथवा कस्य परिग्रहः स्त्री ? वा ते तव [किं] मदभ्यागमकारणम् ? किं मत्सकाशागमनं किं कारणम् ? रघूणां परस्त्रीविमुख-प्रवृत्ति परदारपराङ्मुखं मनश्चित्तं मत्वा ज्ञात्वा आचक्ष्व, कथय । किंभूतानां रघूणाम् ? वशीनां, जितेन्द्रियाणाम् ॥८॥

९. तमब्रवी० ।

सा स्त्री तं कुशमब्रवीत् उवाच । या पुरी तव गुरुणा रामेण द्यां स्वर्गं, नीतपौरा, नीतलोका । किंभूतेन रामेण ? स्वपदोन्मुखेन, विष्णुपदाभिमुखेन । भो राजन्, तस्याः पुरः अयोध्यायाः सम्प्रति वि(वी)तनाथां प्रोषितभर्तृकां अधिकां (अधिदेवतां ?) अधिस्थापितां मां जानीहि, अवबुध्यस्व ॥९॥

१०. [व]स्तौ(स्वौ)क० ।

भो राजन् । साऽहं करुणां दीनां अवस्थां दशां प्रपन्ना[ऽ]स्मि प्राप्ताऽस्मि । कस्मिन् सति ? समग्रशक्तौ सूर्यवंश्ये त्वयि सति, विद्यमाने सति । किं कृत्वा ? सौराज्यबद्धोत्सवया सौराज्यरचितमहोत्सवया । विभूत्या रिद्ध्या वस्त्वौकसारां कुबेरनगरीं अभिभूय पराभूय ॥१०॥

११. विशीर्णतल्पा० ।

मे मम, गृहसन्निवेशः गृहाश्रयः प्रभुणा रामेण विना दिनान्तं प्रदोषं विडम्बयति अनुकरोति । किंभूतं दिनान्तम् ? अस्तनिमग्नसूर्यं, अस्तमितार्कम् । पुनः किंभूतम् ? उग्रानिलभिन्नमेघं, खरपवननिक्षिप्ताभ्रम् । पुनः किंभूतः गृहसंनिवेशः ? विशीर्णतल्पः । विशीर्णाः पतिताः अट्टालिकाः यस्य सः, पतितप्राकारः । पुनः किंभूतः ? पर्यस्तशा(सा)लः, पतितशा(सा)लः ॥११॥

१२. निशासु० ।

यः संचरमार्गः निशासु रात्रिषु अभिसारिकाणां वनितानां संकेतगामिनीनां अभूत्, स राजपथः शिवाभिः, श्रृगालिभिः वाह्यते आक्रम्यते । किंभूताभिः शिवाभिः ? नदन्मुखोक्ता(ल्का)विचितामुखा(मिषा)भिः, नदच्च तन्मुखं तस्योक्ता(ल्का) ज्वाला, तया विचितं अवलोकितं आमिषं याभिस्ताभिः । किंभूतानां अभिसारिकाणाम् ? भास्वत्कलनूपुराणां स्फुरन्मधुरमञ्जरीणाम् ॥१२॥

१३. आस्फालि० ।

यत् जलं मृदङ्गधीरध्वनिं मुरजगम्भीरनिर्घोषं अन्वगच्छत् अनुचकार । किंभूतं जलम् ? प्रमदाकराग्रैः अङ्गनाङ्गुलीभिः [आ]स्फालितम् । तत् अम्भः पानीयं इदानीं महिषैः श्रृङ्गहतं विषाणतालि(डि)तं दीर्घिकासु वापीषु क्रोशति ॥१३॥

१४. वृक्षेश० ।

क्रीडामयु(यू)राः यष्टिनिवासभङ्गात् कनकदण्डालयक्षयात् वनबर्हित्वं प्राप्ताः आश्रिताः । किंभूताः क्रीडामयूराः ? वृक्षेशयाः तरुशायिनः । पुनः किंभूताः ? मृदङ्ग-

शब्दापगमात् मुरजध्वनेरसम्भवात् आ(अ)लस्याः नृत्यरहिताः । पुनः किंभूताः ? दवोल्काहतशेषबर्हाः, दवदहनज्वालादग्धशेषं बर्हं येषां ते ॥१४॥

१५. सोपान० ।

च पुनः, येषु सोपानमार्गेषु दीर्घिकावतारमार्गेषु रामाः अङ्गनाः सरागान् सालक्तकान् चरणान् निक्षिप्तवत्यः, निदधुः, तेषु मे मम सद्योहतन्यङ्कुभिः सद्योविदारितमृगैः व्याधैः अस्रदिग्धं रुधिरलिप्तं पदं चरणं निधीयते निक्षिप्यते ॥१५॥

१६. चित्रद्वि० ।

चित्रद्विपाः आलेख्यका(क)रिणः संरब्धसिंहप्रवृत्तिं(हृतं) ऋष्ट(रू)षितकेसरी(रि)प्रसा(हा)रं वहन्ति । किंभूताः चित्रद्विपाः ? पद्मवनावतीर्णाः कमलवनमध्यनिसृताः । पुनः किंभूताः ? करेणुभिश्चित्रकरिणीभिः दत्तमृणालभङ्गाः, दत्तो मृणालभङ्गो बिसखण्डो येषां ते । पुनः किंभूताः ? नखाङ्कुशाघातविभिन्नकुम्भाः नखाङ्कुशाघातविभिन्नकुम्भः येषां ते ॥१६॥

१७. स्तम्भेषु० ।

स्तम्भेषु योषित्प्रतियातनानां क्रीडापुत्रिकाणां म(फ)णिभिः सर्पैः वियुक्ताः उत्सृष्टि-(ष्टाः) निर्मोकपट्टाः कञ्चुकांशुकानि सङ्गात् सम्पर्कात् तनु(स्तनो)त्तरीयाणि सूक्ष्मवस्त्राणि शरीरोत्तरच्छदानि भवन्ति प्रवर्तन्ते । किंभूतानां योषित्प्रतियातनानाम् ? उत्क्रान्तवर्णक्रम-धूसराणां, उत्क्रान्तेन नष्टेन नीलपीतादिवर्णक्रमेण धूसराणां मलिना[ना]म् ॥१७॥

१८. क(का)लान्तर० ।

त एव चन्द्रपादा चन्द्रकिरणाः, नक्तं रात्रौ, हर्म्येषु गृहेषु न मूर्च्छन्ति न विस्त-रन्ति । कथंभूताश्चन्द्रपादाः ? मुक्तागुणशुद्धयोऽपि मुक्तादामनिर्मलाऽपि । किंभूतेषु हर्म्येषु ? कालान्तरश्यामशुद्धे(सुधे)षु चिरकालवशात् धूसरकृष्णच्छोहेषु(?) । पुनः किंभूतेषु ? इत-स्ततः समन्तात् रूढत्रि(तृ)णाङ्कुरेषु सञ्जातकक्षाङ्कुरेषु ॥१८॥

१९. आवर्ज्य० ।

यासां उद्यानलतानां विलासिनीभिः सदयं च यथा स्यात्, शाखा आवर्ज्य आकृष्य पुष्पाणि उपात्तानि गृहीतानि । सांप्रतं ताः मदीयाः उद्यानलताः वन्यैः वनोत्थैः पुलिन्दैरिव वानरैः कृष्यन्ते बाध्यन्ते ॥१९॥

२०. रात्रा व० ।

गवाक्षा वातायनानि कुर्मिं(कृमि)तन्तुजालैः मर्कटका(?)सूत्रजालैः तिरस्क्रियन्ते आच्छा-द्यन्ते । किंभूताः गवाक्षाः ? रात्रौ नक्तं अनार्चिभिः(?) (अनाविषू ?) कृतदीपभासः

अप्रकटितदीप्ततेजसः । पुनः किंभूताः ? दिवाऽपि दिनेऽपि कान्तामुखश्रीविसृताः रमणीव दिनशोभाविरहिताः (रमणीमुखशोभाविरहिताः ?) । पुनः किंभूताः ? विच्छिन्नधूपप्रसरिताः (प्रसाराः) निवृत्तागुरुसारधूप {धूप}प्रवाहाः ॥२०॥

२१. बलिक्रि० ।

भो राजन् । सरयु(यू)जलानि शून्यानि दृष्ट्वा अहं दूये संतप्ये(प्ता) खिन्ना भवामि । कथंभूतानि सरयु(यू)जलानि ? बलिक्रियावर्जितसैकतानि देवपूजाविरहितपुलिनानि । पुनः किंभूतानि ? स्त(स्ना)नीयसंसर्गं सुगन्धचूर्णि(र्ण)सम्पर्कं अनाप्नुवन्ति अलभमानानि । केषु ? उपान्तवानीरगृहेषु तीरवेतसगृहेषु ॥२१॥

२२. तदर्ह० ।

भो राजन् ! तत् तस्मात् कारणात् इमां वसतिं स्थानं विसृज्य विहाय कुल-राजधानीं, मां अयोध्यां अभ्युपैतुं आदातुं अर्हसि योग्यो भवसि । यथा ते तव गुरुः कारणमानुषीं मनुष्यरूपां तनुं हित्वा त्यक्त्वा तां परमात्ममूर्तिं प्राप्तवान् ॥२२॥

२३. तथेति० ।

प्रतीतः प्रहृष्टः रघूणां प्राग्रहरः श्रेष्ठः तथेति एवं करिष्ये [इति] तस्याः देव्याः प्रणयं प्रार्थनां प्रत्यग्रहीत् अङ्गीचकार । अभिव्यक्तमुखप्रसादा{त्} प्रकटितमुखप्रसादा{त्} पूरपि पुरदेवताऽपि शरीरबन्धेन वपुषा तिरोबभूव अदृश्या बभूव ॥२३॥

२४. तदद्भुतं० ।

नृपतिः कुशः प्रातः प्रभाते संसदि सभायां द्विजेभ्यः वसिष्ठादिभ्यः तदद्भुतं आश्चर्यरूपं रात्रिवृत्तं निशावृत्तान्तं शसौ(सं)स कथयामास । ते द्विजाः कुलराजधान्याः साक्षात्पतित्वे भर्तृत्वे ऋत्वं(वृतं) अभ्यर्थितं एनं कुशं श्रुत्वा आकर्ण्य अभ्यनंदत् समतुमु-(स्तु)वन् अस्तुवन् ॥२४॥

२५. कुशावन्तीं(तीं)० ।

सावरोधः सान्तःपुरः यात्रानुकु(कू)ले अहनि प्रयाणानुकूले दिने सैन्यैः बलैः अयोध्याभिमुखः प्रतस्थे चचाल । कैः, क इव ? अभ्रवृन्दैः मेघसमूहैः अनुधृत(द्रुतः)-{वृतः} वायुरिव । किं कृत्वा ? कुशावतीं श्रोत्रियसात्कृत्वा द्विजेभ्यो दत्त्वा ॥२५॥

२६. सा केतु० ।

सा सेना तस्य कुशस्य प्रयाणे जङ्गमराजधानी सञ्चारिणीपुर्यभूत् । किंभूता राज-धानी ? केतुमालोपवना{त्} केतुमाला एव उपवनानि यस्याः सा । पुनः केव ?

बृहद्भिः अत्युच्चैः वा गरिष्ठः(ष्ठैः) नागैः गजैः विहारशैलानुगतेव क्रीडापर्वतानुगतेव । पुनः किंभूता सा ? रथोदारगृहा रथा एव उदारो(रा)[णि] उत्कृष्टानि गृहा[णि] यस्याः सा ॥२६॥

२७. तेनात० ।

बलौघः सैन्यसमूहः । किंभूतः बलौघः ? तेन राज्ञा पूर्वनिवासभूमिं निजं(जां) वसतिं स्थानं [प्रति] प्रस्थापितं(तः) । किंभूतेन तेन ? आतपत्रामलमण्डलेन छत्रमेवामलं निर्मलं मण्डलं बिम्बं यस्य सः, तेन । बलौघः क इव ? उद्गातेन उदितेन शशिना चन्द्रेण वेलां मर्यादां नि(नी)यमानः उदन्वानिव ॥२७॥

२८. तस्य प्र० ।

वसुन्धरा पृथ्वी रजश्छलेन धूलिव्याजेन द्वितीयं विष्णुपदं आकाशं अध्यारुरोहेव अध्यारूढेव । किंभूता वसुन्धरा ? प्रयातस्य प्रस्थितस्य तस्य कुशस्य वरूथिनीनां सेनानां पीडाभारं सोढुं क्षमितुं(क्षन्तुं) अपर्याप्तवतीव, अशक्ता वयोबाधं न सहते । सो(सा)ऽवश्य-मेवान्यत्र याति ॥२८॥

२९. उद्यच्छमा० ।

नृपस्य सा सेना यत्र ददृशे दृष्टा, तत्रैव सामग्र्यमतिं सामस्त्यमतिं चकार अकरोत् । सेना यत्र दृष्टा तत्रैव संपूर्णा बुद्धिं चक्रे । किंभूता सेना ? गमनाय पश्चात् पृष्ठतः, उद्यच्छमाना उद्यमं कुर्वती । पुनः किंभूता ? पुरः अयतः निवेशे आवासे पथि च व्रजन्ती गच्छन्ती । सेनायाः आधिक्येन सर्वत्र समग्रैव दृष्टेत्यर्थः ॥२९॥

३०. तस्य० ।

द्विपानां रेणुं(णुः) रजः, तस्य नेतुः स्वामिनः, द्विपानां गजानां मदवारिसेकैः पथि मार्गे पङ्कभावं कर्दमत्वं प्रपेदे प्राप । पङ्कोऽपि तुरङ्गमानां खुराभिघातैश्च खुरताडनैः रेणुत्वं रजोभावं प्राप, आययौ ॥२०॥

३१. मार्गेऽपि (मार्गैषि०) ।

वैंध्येषु विन्ध्यासक्तेषु कटकान्तरेषु नतं(वन)प्रदेशेषु मार्गेक्षिणीं(०गैषिणीं) (मार्गाभि-लाषिणी) सा सेना, बहुधा विभिन्ना विप्रकीर्णा बद्धप्रतिश्रुन्ति रचितप्रतिशब्दानि गुहामुखानि दरीद्वाराणि चकार अकरोत् । केव ? रेवेव, नर्मदा इव । किंभूता सेना ? महाविरावा महाशब्दा । नर्मदायाः विशेषणं क्रियते ॥३१॥

३२. स धातु० ।

स प्रभुः कुशः, विन्ध्यां(न्ध्यं) विन्ध्यगिरिं व्यलंघयत् उत्ततार । किं कुर्वन् ? पुलिन्द्रैः सवरैः(?) (किरातैः: ?) उपपादितानि आनि(नी)तानि उपायनानि प्राभृतानि पश्यन् अवलोकयन् । किंभूतः सः ? धातुभेदारुणयाननेमिः, धातूनां भेदेन [अरुणाः]-जा(या)ननेमयः रथधारयो(?) यस्य सः । पुनः किंभूतः ? प्रपातध्वनिमिश्रतु(तू)र्यैः प्रपात-ध्वनिना निर्झररवेण मिश्रितः तु(तू)र्यध्वनिर्यस्य सः ॥३२॥

३३. तीर्थे तदि(दी)० ।

अस्य कुशस्य हंसाः अयत्नबालव्यजनानि अप्रयासचामराणि बभूवुः समपद्यनुत (समपद्यन्त) । किंभूतस्य अस्य ? तदीये गंगासत्वे तीर्थे प्रवाहे गजसेतुबन्धात् जलमध्ये गजप्रवेशात् प्रतीपगा पराङ्मुखी वहन्ति(न्तीं) गङ्गां उत्तरतः उल्लंघयतः । किंभूताः हंसाः ? नभोलङ्घनलोलपक्षाः नभोलङ्घनेन लोलाः चञ्चलाः पक्षाः [येषां ते] ॥३३॥

३४. स पूर्वजा०

स राजा नौलुलितं नौगाहितं त्रैस्रोतसं गङ्गासम्बन्धि अम्भः ववन्दे अवन्दत । किंभूतं अंभः ? पूर्वजानां सगरात्मजानां सुरालयप्राप्तिनिमित्तं त्रिदिवप्राप्तिनिमित्तम् । किंभूतानां पूर्वजानाम् ? रोषात् क्रोधात् कपिलेन ऋषिणा भस्मावशेषीकृतशरीराणाम् ॥३४॥

३५. इत्यध(ध्व)नः० ।

कुशः रघु(घू)णां शतशः शतसंख्यानि (न्) यूपान् अपश्यन् ददर्श । किं कृत्वा ? इति पूर्वोक्तप्रकारेण कैश्चित् कतिपयैः अहोभिर्दिनैः सरय्वाः नद्याः कूलं तटं अध्वनः प्रयाणकस्य अन्ते पर्यन्ते समासाद्य प्राप्य । कथंभूतान् यूपान् ? वेदिप्रतिष्ठान् । किंभूतानां रघूणाम् ? विततोध्वराणां विस्तारितयज्ञानाम् ॥३५॥

३६. आवर्ज्य० ।

कुलराजक(धा)न्याः अयोध्यायाः उपवनान्तवातः उद्यानानिलः तं क्लान्तसैन्यं क्षान्तबलं कुशं प्रत्युज्जगाम, सम्मुखं ययौ । किं कृत्वा ? कुसुमद्रुमाणां पुष्पितवृक्षाणां शाखाः लताः आवर्ज्य आधूय । पुनः किं कृत्वा ? अतिशीतान् सरयु(यू)तरङ्गान् स्पृष्ट्वा परि-स्पृश्य ॥३६॥

३७. अथोप० ।

अथ अथानन्तरं बली पराक्रमी स राजा कुशस्तस्याः पुरः अयोध्यायाः उपशल्ये समीपे तानि बलानि निवेशयामास स्थापयामास । किंभूतानि बलानि ? चलध्वजानि

कम्पत्पताकानि । किंभूतो राजा ? रिपुमग्नशल्यः रिपुणां(षु) मग्नं निखातं शल्यं येन सः । पुनः किंभूतः ? पौरसखः नागरसहायः । पुनः किंभूतः ? कुलध्वजः वंशध्वजः ॥३७॥

३८. तां शिल्पि० ।

प्रभुना(णा) कुशेन नियुक्ताः प्रेरिताः आदिष्टाः शिल्पिसंघाः वैज्ञानिकसमूहाः संपूर्णसामग्रीकत्वात् सन्निहितदुर्वाद्युपकरणत्वात् तथागतां शून्यभूतां तां पुरीं पुनर्नवीचक्रुः । के, कामिव ? मेघाः जलदाः अपां विसर्गात् अम्भोद[जला]त् निदाघग्लपितां ग्रीष्मशोषितां उर्वीमिव पृथ्वीमिव ॥३८॥

३९. ततः स पूर्यां पू(प)र्याः० ।

ततस्तदनन्तरं स रघुप्रवीणः(रः) कुशः पुरः पूर्याः अयोध्यायाः [स]पशु(शू)पहारां च्छागादिबलियुक्तां सपर्यां पूजां निर्वर्तयामास कारयामास । कैः ? वास्तुविधानविद्भिः स्थपतिभिः । किंभूतैः वास्तुविधानविद्भिः ? उपोषितैः । किंभूतायाः पुरः ? परार्ध्य-प्रतिमागृहायाः,[1] परार्ध्यनिवहः मूल्यानि(?) प्रतिमागृहाणि चैत्यानि यस्याः सा ॥३९॥

४०. तस्याः स राजो० ।

स राजा अनुजीविलोकं भृत्यलोकं सम्भावयामास । कैः कृत्वा ? यथार्हं यथानुरूपं तदीयैः अयोध्यासक्तैः अन्यैर्गृहैः कृत्वा । अस्याः पूर्याः राजोपपदं निशान्तं गृहं राजगृहं प्रविश्य । केव ? (क इव ?) कान्तहृदयं प्रियाचित्तं कामीव ॥४०॥

४१. सा मन्दु० ।

सा पूः नगरी तुरङ्गैः च पुनः नागैः गजैः आबभासे शुशुभे । केव ? सर्वाङ्ग-नद्धाभरणा अखिलावयवरचितभूषणा नारीव वनितेव । किंभूतैस्तुरङ्गैः ? मन्दुरासंस्र(श्र)यिभिः, वाजिशाला तु मन्दुरा, वाजिशालागताश्वैः । किंभूतैः गजैः ? शालागृहस्तम्भगतैः शालागृहं हस्तिशाला, तत्र स्तम्भः आलानं, तत्र गतैर्बद्धैः । किंभूता सा ? विपण(णि)-स्थपण्या । विपणिस्थं प्रसारितहट्टस्थं पण्यं क्रयाणकं(?) यस्यां सा ॥४१॥

४२. वसन स० ।

स मैथिलेयः कुशः दिवः स्वर्गस्य भर्त्रे स्वामिने[न] स्पृहां(ह)[यां]बभूव, नाभिलाषं चक्रे । अपि निश्चितं अलकेश्वराय धनदाय न स्पृहां(ह)[यां]बभूव । किं कुर्वन् ? तस्यां अयोध्यायां रघूणां वसतौ वसन् तिष्ठन् । किंभूतायां तस्याम् ? पुराणशोभां पूर्वशोभां अधिरोपितायां आनीतायाम् ॥४२॥

---

1. Not clear.

४३. अथास्य० ।

अथ अथानन्तरं घर्मः ग्रीष्मः आजगाम आययौ । किं कर्तुमिव ? अस्य कुशस्य प्रियावेशं स्त्रीणामलङ्कारं उपदेष्टुमिव कथयितुमिव । किंभूतं प्रियावेशम् ? रत्नग्रथितोत्तरीयम् ? रत्नैः स्यूतमुत्तरीयं वासो यस्मिन् तत् । रत्नस्य सामान्यत्वा(त्वे) नित्येऽपि ग्रीष्मकालोचितत्वात् मौक्तिकपरत्वमिति कश्चित् । पुनः किंभूतम् ? एकान्तपाण्डुस्तनलम्बिहारं, एकान्तरभसां(?) मलयजविलेपनाभ्यां(त् ?) पाण्डुषु स्तनेषु लम्बा मुक्ताः, यत् तत् तम् । वा नियमेन पाण्डुरवर्णयोः स्तनयोर्लम्बो(बी ?)हारो यस्मिन् । पाण्डुता च यौवने स्त्रीणां प्रसिद्धा । तत्कालसामर्थ्याद् वा । पुनः किंभूतम् ? निःश्वा[स]हार्यांशुकम् । तनीयस्त्वात् निःश्वासेन मुखमारुतेन हार्याण्युपवाहयितुं शक्यान्यंशुकानि वस्त्राणि यत्र तत् ॥४३॥

४४. अगस्त्य० ।

उत्तरादिक् उत्तराशा हैमवतीं हिमालयभवां हिमश्रु(स्रु)तिं तुहिम(न)क्षरणं ससर्ज अक्षिपत् असृजत् मुमोच । कामिव ? आनन्दसी(शी)तां बाष्पवृष्टिमिव । कस्मिन् सति ? अगस्त्यचिह्नात् दक्षिणायनात् समीपं निकटं भास्वति सूर्ये सन्निवृत्ते प्रत्यागते सति ≪व्युद्यद्यगते≫[1] सति, वियति उद्गते सति । यदाहुः किल नायकः काञ्चिदेकां नारीं मुक्त्वा अन्यां गच्छति साऽऽनन्दजाश्रूणि मुञ्चति । एवमर्के आगते सति उत्तरा हिमश्रु(स्रु)तिं मुञ्चति इति भावः ॥४४॥

४५. प्रवृद्धता० ।

दिवसः अतिमात्रं अतिशयेन प्रवृद्धतापः वृद्धिंगततापः, क्षणदा च रात्रिः अत्यर्थमेव तन्वी कृशा, विरोधक्रियया मानक(का)रणेन विभक्तौ उभौ जायापती दम्पती सानुशयाविव जातपश्चात्तापौ आस्तां बभूवतुः ॥४५॥

४६. दिने दिने० ।

अम्भः पानीयं, दिने दिने सै(शै)वलयन्ति, सोपानपर्वाणि अधस्तात् [वि]मुञ्चत् उद्दण्डपद्मं दृश्यमान{न}कमलं गृहदीर्घिकानां गृहवापीनां नारीनितम्बद्वयसं अङ्गनाजघनप्रमाणं बभूव ॥४६॥

४७. नवेषु० ।

भ्रमरः एषां कुड्मलानां संख्यामिव गणनामिव चकार । किंभूतः भ्रमरः ? सायंतनमल्लिकायाः प्रदोषमल्लिकायाः विजृंभणोद्गन्धिषु विजृंभणेन विकाशे(से)न सुरभि-[षु] नवेषु प्रत्यग्रेषु कुड्मलेषु मुकुलेसु(षु) सशब्दं प्रत्येकनिक्षिप्तपदः प्रत्येकदत्तचरणः ॥४७॥

---

1. Not clear.

४८. स्वेदानु० ।

कर्णादपि च्युतं पतितं शिरीषपुष्पं सहसा न पपात नाभ्रश्यत् । किंभूतं शिरीषपुष्पम् ? कामिनीनां कपोले सन्दष्टभूयिष्ठशिखं, संदष्टा लग्ना भूयिष्ठं नितरां शिखा प्रान्तं यस्य तत् । किंभूते कपोले ? स्वेदानुविद्धार्द्रनखक्षताङ्के स्वेदजलसम्मिश्रसरसप-[नख]पदचिह्ने ।।४८।।

४९. यन्त्रप्र० ।

ऋद्धिमन्तः ऋद्धिसम्पन्नाः धारागृहेषु जलधाराभिरुपलक्षिता गृहधारागृहाः जलयन्त्रगृहास्तेषु जलयन्त्रगृहेषु शिलाविशेषान् अधिशय्य अधिष्ठाय आतपं घर्मं निन्युः अत्यवाहयन् । किंभूतान् शिलाविशेषान् ? मलयोद्भवस्य चन्दनस्य रसेन धौतान् । पुनः किंभूतान् ? शिशिरैः शीतकालैः यन्त्र[प्र]वाहैः धारायन्त्रविमुक्तैः पयःपूरैः परीतान् परिवृतान् ।।४९।।

५०. स्नानार्द्र० ।

कामः मन्मथः अङ्गनानां केशेषु बलं शक्तिं लेभे प्राप । किंभूतः कामः ? वसन्तात्ययमन्दवीर्यः वसन्तविगममन्दीभूतविक्रमः । किंभूतेषु केशेषु ? स्नानार्द्रमुक्तेषु स्नानार्द्रत्वात् मुक्तेषु । पुनः किंभूतेषु ? अनुधूपवासं धूपसंस्कारानन्तरं विन्यस्तसायंतनमल्लिकेषु निक्षिप्तसायंतनमल्लिकाकुसुमेषु धूपपुष्पसंस्कृतकन्यादर्शनात् कामोद्रेकोऽभूदित्यर्थः ।।५०।।

५१. अ(आ)पिञ्जरा० ।

अर्जुनस्य अर्जुनतरोः उदारा उद्भटा मञ्जरिकेव(मञ्जरी) रुरुचे शुशुभे । गिरिशेन ईश्वरेण कोपात् मनोभवस्य कन्दर्पस्य देहं शरीरं दग्ध्वाऽपि खण्डीकृता खण्डिता ज्या इव प्रत्यञ्चेव रेजे । किंभूता मञ्जरी ? बद्धरजःकणत्वात् सञ्जातरेणुबिन्दुत्वात् आपिञ्जरा अतिपिशङ्गी ।।५१।।

५२. मनोज्ञ० ।

निदाघावधिना ग्रीष्मसमयेन कामीजने[षु] सर्वे स(स्व)दोषाः निजदोषाः प्रमृष्टाः क्षालिताः. मनोज्ञगन्धं सहकारभङ्गं पुराणसिन्धं(सीधुं) नवपाटलं च संबध्नता ।।५२।।

५३. जनस्य० ।

तस्मिन् समये विगाढे तीव्रे, जनस्य लोकस्य द्वौ विशेषकान्तौ अतिप्रियौ बभु-(भू)वतुः, आस्ताम् । कौ द्वौ ? नृपतिः, पुनः शशी चन्द्रश्च । किंभूतः नृपतिः शशी ?

तापापनोदक्षमपादसेवौ, तापः घर्मः तमःपीडा च, पादः रश्मिश्चरणश्च । तापोपशमः तत्र क्षमा समर्था पादसेवा यस्य सः । पुनः किंभूतौ ? सदोदयस्थौ सदोदितौ ॥५३॥

५४. अथोर्मि० ।

अथ अथानन्तर ग्रीष्ममुखे ग्रीष्मप्रारम्भे तस्य नृपतेः श(स)रय्वाः नद्याः अम्भसि पानीये विहर्तुं इच्छा वाच्छा बभूव । किंभूते अम्भसि ? ऊर्मिलोलोन्मदराजहंसे, ऊर्मिषु-कल्लोलेषु लोलाश्चञ्चलाः उन्मदा मत्ताश्च राजहंसाः यत्र तत् तस्मिन् । पुनः किंभूते ? रोधोलतापुष्पवहे रोधसि तटे याः लताः, तासां पुष्पाणि वहन्ति यत् (यस्मिन्) तस्मिन् । किंभूतस्य नृपतेः ? वनितासखस्य युवतीसहायस्य ॥५४॥

५५. स तीरभूमौ० ।

स चक्रधरप्रभावः विष्णुतुल्यमहिमा स राजा श्रीमहिमानुरूपं विभवानुरूपं तां सरयुं(यूं) विगाहितुं स्नातुं प्रचक्रमे प्रारेभे । किंभूतां ताम् ? तीरभूमौ सैकतभुवि रचितोपकार्यां विहितपटकुटिकाम् । पुनः किंभूताम् ? आनायिभिः आनायः जालं, तद्विपद्यते (?) (तद्वर्तते) येषां, आनायिनः धीवराः तैः अपकृष्टनक्रां दूरीकृतजलचराम् ॥५५॥

५६. सा तीर० ।

सा सरित् नदी अङ्गनाभिः वनिताभिः विविग्नहंसा उद्विग्नहंसा आसीत् बभूव । किंभूताभिः अङ्गनाभिः ? अन्योन्यकेयूरविघट्टिनि(नी)भिः । कस्मात् ? तीरसोपानपथा-वतारात् । सोपानपथस्य अवतारः तस्मात् सोपानमार्गोत्तरात् । पुनः किंभूताभिः ? सनूपुरक्षोभपदाभिः सह नूपुरक्षोभेण वर्तन्ते यानि तादृशानि पा(प)दानि पादविक्षेपः, यासां ताभिः ॥५६॥

५७. परस्पर० ।

तासां नारीणां मज्जनरागदर्शी स्नानरसप्रेक्षी नृपः राजा पार्श्वगतां निकटस्थां किरातीं अन्तःपुररक्षकां बभाषे जगाद । किंभूतां किरातीम् ? उपात्तबालव्यजनां गृहीत-चामरतालवृन्ताम् । किंभूतानां तासाम् ? परस्पराक्षेपणतत्पराणाम् । परस्पराक्षेपणं जलनिक्षेपणं तत्र तत्पराः सावधानाः, तासाम् । किंभूतः राजा ? नौसंश(श्र)यः नावासीनः ॥५७॥

५८. पश्यावरो० ।

भो किरात(ति) ! पश्य, एष सरयूप्रवाहः अनेकं वर्णं पुष्यति पोषयति धारयति । क इव ? साभ्रः समेघः सन्ध्योद्गमः इव । किंभूतः सरयु(यू)प्रवाहः ? शतशः शत-

संख्यैः मदीयैः मामकीनैः अवरोधैः अन्तःपुरैः विगाह्यमानः विलोड्यमानः । किंभूतैः अंतःपुरैः ? गलिताङ्गरागैः गलितकुङ्कुमविलेपनैः ॥५८॥

५९. विलुप्त० ।

नौलुलिताभिः नौकाप्रेरिताभिः उत्फालिताभिः अद्भिः पानीयैः अन्तःपुरसुन्दरीणां यदञ्जनं कज्जलं विलुप्तं अपहृतं, तद्बध्नतीभिः रचयन्तीतिः मदरागशोभां आसां स्त्रीणां विरो(लो)चनेषु प्रतिमुक्तं सम्बद्धं समर्पितम् ॥५९॥

६०. एताः० ।

एताः बालाः अप्सु जलेषु बाहुभिः रागवशात् स्नेहवशात् क्लेशोत्तरं प्रयासाधिकं यथा भवति तथा प्लवन्ते तरन्ति । किंभूतैः बाहुभिः ? गाढाङ्गदैः अतिसंलग्नकेयूरैः । किंभूताः एताः ? आत्मानं स्वशरीरं उद्वोढुं उत्थापयितुं अशक्नुवन्त्यः अपारयन्त्यः । कस्मात् ? गुरुश्रोणीपयोधरत्वात्, पीनकटिकुचत्वात् ॥६०॥

६१. आ(अ)मी शि० ।

वारिविहारिणीनां जलकेलिरस(सा){ना}नां अमी शिरीषप्रसवावतंसाः कर्णपु(पू)राः निम्नगायाः नद्याः स्रोतसि प्रवाहे शे(शै)वाललोलान् शे(शै)वाललम्पटान् मीनान् मत्स्यान् च्छलयन्ति वञ्चयन्ति । किंभूताः शिरीषप्रसवावतंसाः ? प्रभ्रंशिनः प्रभ्रष्टाः । पुनः किंभूताः ? पारिप्लवाः चटुलाः ॥६१॥

६२. आसां जला० ।

आसां नारीणां च्छिदुरोऽपि छिन्नोऽपि हारः मुक्ताफलस्पर्द्धिषु मुक्ताफलस्थलेषु शीकरेषु जलकणेषु न संलक्ष्यते न ज्ञायते । कथंभूतः हारः ? शीर्यमाणः भ्रश्यमानः । किंभूतेषु शीकरेषु ? पयोधरोत्सर्पिषु कुचोत्पातिकेषु । किंभूतानां आसाम् । जलास्फालनस्त(त)त्पराणां तोयागा(घा)तासक्तानाम् । जलास्फालनेन जातकुचोत्सङ्गवर्तिनाम्बुकणाः (जातकुचोत्सङ्गाम्बुकणाः)≺क्रियकोचितत्वात्≻[1] मुक्ता इव दृश्यन्ते इत्यर्थः ॥६२॥

६३. आवर्त० ।

अदूरवर्तिनी निकटवर्तिनी एतानि वस्तूनि विलासिनीनां कामिनीनां रूपावयवोपमानानि जातानि, नतनाभिकान्तेः गम्भीरनाभिकान्तेः आवर्तशोभा जलावर्तशोभा, भ्रुवां भ्रूयुगानां भङ्गाः कल्लोलाः, स्तनानां द्वन्द्वचराः चक्रवाकाः । रूपं आकारसौन्दर्यं इत्यमरः ॥६३॥

---

1. Not clear.

६४. तीरस्थ० ।

आसां नारीणां गीतानुगं गीतसंयुक्तं वारिमृदङ्गवाद्यं जलमेव मृदङ्गस्तद्वाद्यं जल-तूर्यवादित्रं अतिरिक्तं अधिकं श्रोत्रेषु कर्णेषु मूर्च्छति प्रसरति। किंभूतं वारिमृदङ्गवाद्यम् ? तीरस्थलीबर्हिभिः पुलिनस्थलीमयूरैः अभिनन्द्यमानं अनुमोद्यमानम् । किंभूतैः तीरस्थलि-(ली)बर्हिभिः ? उत्कलापैः उत्क्षिप्तबर्हिः(र्हैः) । पुनः किंभूतैः ? प्रस्निग्धकेकैः स्निग्ध-केकारवैः । ।[1] ≺स्त्रीभिस्तप्ता सुन्दरां जलमध्ये सिक्तं शब्दः क्रियते ।≻ येन तीरस्था केकिनः मेघगर्जितबुद्ध्या हृष्टैः(ष्टाः) इत्यर्थः ॥६४॥

६५. संदष्ट० ।

अमी रसनाकलापाः मेखलाकलापाः मौनं भजन्ते आश्रयन्ते न शब्दाय्यन्ते । केषु ? अबलानितम्बे संदष्टवस्त्रेषु संलग्नांशुकेषु । किंभूताः रसनाकलापाः ? जलापूरित-सूत्रमार्गाः जलापूरितच्छिद्राः । अतः न शब्दाय्यन्ते । पुनः किंभूताः ? इन्दुप्रकाशान्त-रितोडुकल्पाः चन्द्रदीप्त्या व्यवहितनक्षत्रतुल्याः । उक्तं च **माघे**[2] "रामाणामनवरतोद्-गाहभाजां...मे[ख]लाकलापाः ।" इत्यादि जलक्रीडाकाले दुकूलधारणात् इन्दुप्रभा-साम्यम् ॥६५॥

६६. एता० ।

एतास्तरुण्यः वक्र(क्रे)तराग्रैः(ग्रैः) सरलाग्रैः अलकैः ललाटकेशैः वारिप्ल(ल)वान् उदककणान् वमन्ति । किंभूतान् वारिलवान् ? चूर्णारुणान् कुंकुमादिक्षोदलु(लो)हितान् । किंभूतान् ? तारुण्य(तरुणी)सखीभिः वदनेषु वक्त्रेषु सिक्ताः उत्क्षिप्ताः । [तान् ।] । कस्मात् ? हर्षात् । कथम् ? {यथा भवति तथा} करोत्पीडितदण्डधारं यथा भवति तथा । करिणो (करैरु)त्पीडिताऽवष्टभ्य प्रेरिता दण्डाकारधारा यत्र ॥६६॥

६७. उद्बन्ध० ।

प्रमदामुखानां अबलावदनानां अम्भोविहारा{न्} लुलितोऽपि व्यस्तीकृतो वेशः नेपथ्यः मनोज्ञः एव रम्य एव । किंभूतः वेशः ? उद्बद्धकेशः, उद्बद्धाः विमुक्ताः केशाः यत्र । पुनः किंभूतः ? च्युतपत्रलेखः । च्युताः भ्रष्टाः पत्रलेखाः पत्रलताः यत्र । पुनः किंभूतः ? विश्ले[षि]मुक्ताफलपत्रवेष्टः, विश्ले[षि]तानि मुक्ताफलानि यस्य सः,

---

1 स्त्रभि...क्रियते । Not clear.

2 'माघ' The author of शिशुपालवध, mentioned by name. This verse is not traced in शिशु.

तादृशः पत्रवेष्टः कर्णालङ्कारः । कर्णालङ्कारविशेषो यत्र कर्णपाशभ्रंशि(शी) मुक्तामयः पत्रविशेषस्ताटङ्को यत्र ।।६७।।

६८. स नौ० ।

स नृपः नौविमानात् नौयानात् उत्तीर्य अवतीर्य अप्सु जलेषु ताभिः प्रियाभिः सह रेमे चिक्रीड । काभिः कः इव ? करेणुभिः वन्यः द्विपेन्द्रः इव । {स} विलोलहारः चटुलशेखरः । किंभूतः द्विपेन्द्रः ? स्कन्धावलग्नोद्धृतपद्म(द्मि)नीकः । स्कन्धे अवलग्ना श्लिष्टा उद्धृता उत्पाटिता पद्मिनी यस्य सः ।।६८।।

६९. ततो नृपे० ।

ततस्तदनन्तरं भ्राजिस्थु(ष्णु)ना शोभा(भ)मानेन नृपेण अधिगताः संगताः ताः स्त्रियः सातिशयं आधिक्यसहितं यथा भवति तथा विरेजुः शुशुभिरे । प्रागेव पूर्वमेव मुक्ताः मुक्ताफलानि, नयनाभिरामाः लोचनाह्लादिन्यः भवन्ति । उन्मयूखं प्रसरत्किरणं इन्द्रनीलमणिं प्राप्य आस्वाद्य किमुत, किं पुनः ? ।।६९।।

७०. वर्णोदकैः० ।

आयताक्ष्यः स्त्रियः वर्णोदकैः कुंकुमाम्भोभिः प्रणयात् स्नेहात् तं नृपं असिञ्जन् प्रोक्षामासुः । किंभूतैः वर्णोदकैः ? काञ्चनशृङ्गसंस्थैः कनकविषाणनिक्षिप्तैः तथागतः वर्णोदकैः सिक्तः स नृपः, अतितरां अतिशयेन बभाषे(से) शुशुभे । क इव ? सधातुनिष्यन्दः सह सिन्दुरादिधातुनिष्यन्देन वर्तते स अद्री(द्रि)राजः इव हिमवारि(नि)व ।।७०।।

७१. तेनावरोधः० ।

तेन राज्ञा तां सरिद्वरां विगाहमानेन मरुत्वान् इव अनुजा(या)तलीलः इन्द्रोऽनुगतः विडम्बितः इत्यर्थः । किंभूतः मरुत्वान् ? अप्सरोभिः दिव्यस्त्रीभिः वृतः परिवृतः । पुनः किंभूतः ? आकाशगङ्गारतिः आकाशगङ्गायां सुरश(स)रिति रतिः प्रीतिर्यस्य सः । किंभूतेन तेन ? अवरोधप्रमदासखेन अन्तःपुरसहायेन । किंभूतेन ? तां सरिद्वरां सरयूं विगाहमानेन, क्रीडता ।।७१।।

७२. यत्कुंभ० ।

विहर्तुः क्रीडतः अस्य नृपस्य तत् जैत्राभरणं उत्कृष्टाभरणं सलिले ममज्ज अबूडत्[1] । किंभूतं जैत्राभरणम् ? अज्ञातपातम् । अविदितभ्रंशम् । क्रीडारहस्यत्वात् । यत्

1. Gujarati ?

आभरणं कुम्भयोनेः अगस्त्यसकाशात् अधिगम्य प्राप्य रामः राज्येन समं कुशाय दिदेश ॥७२॥

७३. स्नात्वा यथा० ।

सदारः सभार्यः असौ नृपः यथाकामं स्वेच्छया स्नात्वा तीरोपकार्यां तटस्थ-पर्णकुटिं गतमात्र एव दिव्येन वलयेन कटकेन शून्यं स्वबाहुं ददर्श अद्राक्षीत् । किंभूतः राजा ? उपोढनेपथ्यविधिः धृतनेपथ्यविधिः । तेन अलङ्कारेण विना अलङ्कारोत्तरेण विना न तथा शोभा इत्यर्थः । अपोढो नष्टोऽलङ्कारविधिर्यस्य सः ॥७३॥

७४. जयश्रि० ।

यस्माद्धेतोः तद्धेतोः तत्वलयं जयश्रियः जयलक्ष्म्याः संवननं वशीकरणं यतश्च गुरुणा अमुक्तपूर्वं पूर्वबद्धं, अतः कारणात् अस्य वलयस्य भ्रंशं पातं न सेहे न सोढवान्, लोभात् न । हि निश्चितं धीरः स नृपः तुल्यपुष्पाभरणः समानकुसुमरत्नः ।७४।

७५. ततः० ।

ततः स राजा आशु शीघ्रं सर्वान् आनायिनः धीवरान् तद्वि[च]घे(ये) कटक-गवेषणाय सा(स)माज्ञापयत्, आदिदेश । किंभूतान् आनायिनः ? नदि(दी)ष्णान् जलप्रचारकुशलान् । वि(व)न्ध्या(न्ध्य)श्रमाः निष्फलप्रयासास्ते आनायिनः सरयुं(यूं) विगाह्य विलोड्य तं नृपं ऊचुः [अ]विज्ञापयन् । किंभूतं तम् ? अम्लानमुखप्रसादं अविच्छाय मुखप्रसादम् ॥७५॥

७६. कृतः क्र(प्र)य० ।

भो देव ! प्रयत्नः कृतः विहितः न च लब्धं ते तव आभरणोत्तमं अलङ्करण-रत्नं, पयसि जले मग्नं, ब्रुडितम् ।[1] नूनं निश्चितं तद्वलयं कुमुदेन नागेन उपात्तं गृहीतम् । कस्मात् ? लोभात् । कथंभूतेन कुमुदेन ? अन्तर्हृदवासिना मध्यनदवासिना ॥७६॥

७७. ततः स० ।

ततस्तदनन्तरं तीरगतस्तटप्राप्तः सः धनुर्धरः गारुत्मतं गारुडं अस्त्रं शस्त्रं समाददे जग्राह । कस्मै प्रयोजनाय ? भुजङ्गनाशाय कुमुदनागनाशाय । कि कृत्वा ? आततज्यं आरोपितगुणं धनुः कृत्वा । किंभूतः सः ? कोपविलोकि(हि)ताक्षः क्रोधरक्तनेत्रः । पुनः किंभूतः ? नरस्त्री (तरस्वी) बलवान् ॥७७॥

---

1 Not Sanskrit.old Gujarati ?

७८. तस्मिन्० ।

ह्रदः नदः परुषं कठोरं ररास शब्दं चकार । क इव ? अवपातमग्नः वन्यः करीव । अवपातस्तु हस्त्यर्थे गर्तो लीन[1] स्तृणाति(दि)नेति यादवः । कस्मिन्निव ? तस्मिन् गरुडास्त्रे संहितमात्र एव योजितमात्रे । किं कुर्वन् ? रोधांसि तटानि भिन्दन् विदारयन् । किंभूतः ह्रदः ? क्षोभात्समाविद्धतरङ्गहस्तः, समाविद्धाश्चालितास्तरङ्गा एव हस्ताः येन सः ॥७८॥

७९. तस्मात्० ।

तस्मात् ह्रदात् भुजङ्गराजः कुमुदः कन्यां पुरस्कृत्य अग्रे कृत्य सहसा उन्मथ्य-(म)[ज्ज] निःससार । कया सार्द्धम् ? क इव ? लक्ष्म्या सार्द्धं, सुरराजवृक्षक इव । {कस्मात् ?} कस्मादिव ? मथ्यमानां(ना)[त्] विलोड्यमानात् समुद्रादिव । किंभूतात् समुद्रात् ? उद्वृत्तनक्रात् क्षुभितमकरात् । अथवा तस्मात् ह्रदात् । विशेषणं क्रियते ॥७९॥

८०. विभूषण० ।

विशांपतिः राजा सौपर्णं गारुडं अस्त्रं प्रतिसंहार न्यवर्तयत् । किं कृत्वा ? तं कुमुदं उपस्थितं आगतं वीक्ष्य आलोक्य । हि यतः सन्तः सज्जनाः प्रह्वेषु गणनेषु निर्बंधरुषः क्ष(क्षि)प्रक्रोधा भवन्ति । किंभूतं कुमुदम् ? विभूषणप्रत्युपहार[ह]स्तं, विभूषणमेव आभरणमेव प्रत्युपहारः ढौकनिका हस्त यस्य स स्तम् ॥८०॥

८१. त्रलोक्य०....कुमुद(दो)० ।

मूर्द्ध्ने अभिषिक्तः तं कुशं बभाषे जगाद । किं कृत्वा ? मूर्द्ध्ना अभिवन्द्य प्रणम्य । किंभूतेनापि मूर्द्ध्ना ? मानोन्नतेनाऽपि गर्वोन्नतेनाऽपि । किंभूतः कुमुदः ? प्रभावात् महिम्नः द्विषां शत्रूणां अङ्कुशं आशु शीघ्रं विद्वान् अवगच्छन् । किंभूतं कुशम् । त्रैलोक्यनाथप्रभा(भ)वं, त्रैलोक्यनाथात् विष्णोः प्रभवः उत्पत्तिर्यस्य सस्तं विष्णुपुत्रम् ॥८१॥

८२. अवैमि० ।

भो कुश ! कार्यान्तरम(मा)नुष्य(ष)स्य प्रयोजनवशात् मनुष्यरूपिणो {रामाख्य} रामाख्यस्य विष्णोः हरेः सुताख्यां पुत्रसंज्ञा अपरां अन्यां तनुं मूर्तिं त्वां अवैमि जानामि । अहं आराधनीयस्य आराध्यस्य तव धृतेः र(प्री)तेः विघातं विनाशं कथं आचरेयं कुर्याम् ? ॥८२॥

---

1 Malli. also quotes this. He has 'छन्न' for 'लीन', p. ३४३, ibid.

८३. करा० ।

कराभिघातेन उत्थितं कण्डु(न्दु)कं यस्याः सा इयं बाला त्वदीयं जैत्राभरणं वलयरत्नं आदत्त अग्रहीत् । जैत्राभरणं किमिव ? अन्तरिक्षात् आकाशात् अभ्यात्मकं परमं ज्योतिरिव {किं कृत्वा ? असि}कुतूहलेन आलोक्य ॥८३॥

८४. तदेतत्० ।

यातु तदेतत् {सो इयं}प्रसिद्धमिदं आभरणं ते तव भुजेन पुनः योगं सम्पर्कं उपैतु प्राप्नोतु । किंभूतेन भुजेन ? आजानुलम्बिना । आजानुविलम्बितं शीलं यस्याऽसौ । पुनः किंभूतेन ? ज्याघातलेखास्थिरकाञ्च(लाञ्छ)नेन, ज्याघातलेखैव स्थिरं लाञ्छनं चिह्नं यस्यासौ, तेन । पुनः किंभूतेन ? भूमेः रक्षापरिघ(घे)न रक्षार्थं परिघेन अर्गलेन । पुनः किंभूतेन ? अंसलेन पीवरेण ॥८४॥

८५. इमां स्व० ।

भो पार्थिव ! मे मम यवीयसीं लघीयसीं इमां स्वसारं भगिनीं कुमुद्वतीं ग्रहीतुं नार्हसि [इति] न, अपि तु योग्यो भवसि । किंभूतां कुमुद्वतीम् ? ते तव पादयोः शुश्रूषया आत्मापराधं चिराय नुदतीं स्फोटयन्तीम् ॥८५॥

८६. इत्यु(त्यू)चि० ।

समन्त(मेत)बन्धुः संघजि(बंधि)स्वजनः कुमुदः कुलभूषणेन कुलमण्डनेन कन्यामयेन विधिवत् संयोजयां आस अयोजयत् । इति क्षितीशं ऊचिवान् उक्तवान् । इतीति किम् ? भवान् श्लाघ्यः स्वजनः इति अभिभाषितारं {अ}ब्रुवाणम् । किंभूतं क्षितीशम् ? उपहृताभरणम् । उपहृतं दत्तं आभरणं यस्मै कुशाय सस्तम् ॥८६॥

८७. तस्याः स्पृ० ।

दिव्यसू(तू)र्यध्वनिः उदचरत् आविरभूत् । किंभूतः दिव्यसू(तू)र्यध्वनिः ? दिगन्तान् दिग्भागान् व्यस्क्र(श्नु)वानः व्याप्नुवन् । तदनु पश्चात् मेघाः गन्धोदग्रं यथा भवति आश्चर्यमेत(घाः) पुष्पं ववृषुः अवर्षन् । कस्मिन् सति ? मनुजपतिना तस्याः नागकन्यायाः साहचर्या(र्या)[य] हस्ते पृ(स्पृ)ष्टे गृहीते सति । क्व ? उच्छिखस्य ज्वलद्रूपस्य पावकस्य अग्नेः [पुरः] । किंभूते हस्ते ? मं(मां)गल्योर्णा(र्णा)वल[यि]नि मांगल्यं शकुननिमित्तं ऊर्णावलयं, ऊर्णं कंकणं, विद्यते यस्य सस्तस्मिन् ऊर्णामेषादितो(लो)म(म्नि) इति यादवः ॥८७॥

८८. इत्थं नाग० ।

एकः कुमुदः [पितृवध]रिपोः वैनतेयात् शङ्कां अत्यजत् तत्याज । पौरका[न्तः] नगरप्रियः अपरः कुशः शान्तव्यालां उपशान्तनागां अवनिं शशास ररक्ष । किं कृत्वा ? नागः कुमुदः इत्थं असुना प्रकारेण त्रिभुवनगुरोः विष्णोः अ(औ)रसं पुत्रं मैथिलेयं सीतात्मजं बन्धुं लब्ध्वा । पुनः किं कृत्वा ? च पुनः र(त)क्षकस्य पञ्चमं प्रपौत्रं कुशस्तमपि कुमुदमपि लब्ध्वा ॥८८॥

इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे कुमुद्वतीलाभो नाम षोडशः सर्गः ॥१६॥

श्री जिनसमुद्रविरचितायां रघुवंशटीकायां

सप्तदशः सर्गः ।

१. अतिथिं० ।

कुमुद्वती काकुत्स्थात् कुशात् अतिथिं नाम पुत्रं अवाप लेभे । कस्मात् ? किमिव ? चेतना बुद्धिः पश्चिमात् चतुर्थात्, यामिनी रात्रिः, [यामिनी]यामात् प्रहरात् प्रसादमिव नैर्मल्यमिव ।।१।।

२. स पितु० ।

स अतिथिः पितुः जनकस्य मनोश्च [मातुश्च] वंशं कुलं अपुनात् पवित्रीचकार । कः, काविव ? सरि(वि)ता सूर्यः उभौ द्वौ उत्तरदक्षिणौ मार्गाविव । किंभूतः सः ? पितृमान् । पुनः किंभूतः ? अनुपमद्युतिः महातेजाः ।।

३. तमादौ० ।

पिता कुशः आदौ प्रथमं तं अतिथिं कुलविद्यानां राजविद्यानां अर्थं {अ}ग्राह-यामास । पश्चात् पार्थिवकन्यानां राजकुमारीणां पाणिं करं अग्राहयत् । किंभूतः पिता ? अर्थविदांवरः । अर्थविदां पण्डितानां मध्ये वरः श्रेष्ठः ।।३।।

४. जातं० ।

तेनाभिजाते वशी जितेन्द्रियः कुशः अभिजातेन कुलीनेन तेन अतिथिना एकं अभिन्नं आत्मानं स्वं अनेकं जातं अमन्यत मेने । किंभूतेन तेन ? शौर्यवता शौर्य-सहितेन । पुनः किंभूतेन ? वसि(शि)ना जितेन्द्रियेण । किंभूतः ? शूरः ।।४।।

५. स कुलो० ।

स कुशः समरे संग्रामे दुर्जयं दैत्यं जघान आ(अ)वधीत् । च पुनस्तेन दैत्येन कुशः अवधि हतः । स इन्द्रस्य कुलोचितं दशरथादिभिरभ्यस्तं सहायकं सहाय्यं उपेयिवान् उपगतः ।।५।।

६. तं स्वसा० ।

नागराजस्य कुमुदस्य स्वसा भग्नी(गिनी) कुमुद्वती तं कुशः अन्वगात् अनुययौ । का ? कमिव ? कौमुदी ज्योत्स्ना कुमुदानन्दं कैरवनन्दकं शशाङ्कमिव ।।६।।

७. तयोर्दिव० ।

तयोर्दंपत्योर्मध्यात् एकः कुशः दिवस्पतेः इन्द्रस्य सिंहासनार्द्धभाक् सिंहासनेऽर्द्धऽहारः आसीत् । द्वितीयाऽपि कुमुद्वती शच्याः इन्द्राण्याः सखी आसीत् । किंभूताऽपि द्वितीयाऽपि ? पारिजातांस(श)भागिनी कल्पवृक्षमाल्यानुलेपनादिभागहरा ॥७॥

८. तदात्म० ।

मन्त्रिवृद्धास्तदात्मसंभवं तत्पुत्रं कुशपुत्रं राज्ये समादधुः न्ययोजयन् । मन्त्रिवृद्धाः किं कुर्वन्तः ? संग्रामयायिनः योद्धुं व्रजतः भर्तुः स्वामिनः पश्चिमां अन्त्यां आज्ञां स्मरन्तः ॥८॥

९. ते तस्य० ।

ते मन्त्रिणस्तस्य अतिथेः अभिषेकाय राज्याभिषेकाय शिल्पिभिः नवं विमानं कल्पयामासुः रचयामासुः । किंभूतं विमानम् ? उद्वेदि उद्गता वेदिस्थं(मं)ण्डलं यत्र तत् । पुनः किंविशिष्टम् ? चतुःस्तम्भप्रतिष्ठितम् । {चतुस्तम्भप्रतिष्ठितम् }चतुःसंख्यैः स्तम्भैः प्रतिष्ठितं निर्मितं कृतम् ॥९॥

१०. तत्रैनं० ।

तत्र विमाने प्रकृतयः पौराः एनं अतिथिं अभ्यसिञ्चत् । कैः तीर्थवारिभिः, पुण्यतोयैः । किंभूतैस्तीर्थवारिभि; ? हेमकुम्भेषु कनककलशेषु सम्भृतैः न्यस्तैः । किंभूतं एनम् ? भद्द(द्र)पीठोपवेशितम् ॥१०॥

११. नदद्भिः० ।

तस्य नृपस्य कल्याः(ल्या)[णं] अन्वमीयतं(त) ऊहांचक्रे । कैः ? तूर्यैः टक्वादि(?) मङ्गलवादित्रः । किंभूतैः ? स्निग्धगंभीरं मधुरं नदद्भिः ध्वनिभिः (ध्वनद्भिः) । पुनः किंभूतैः ? आहतपुष्करैः ताडितमुखैः । किंभूतस्य ? अविच्छिन्नसंततेः अविच्छिन्नसन्तानस्य ॥११॥

१२. दुर्वाय० ।

स अतिथिः निराजना{दि}विधीन् [1]शान्तिकश्रिया(?) भेजे शिश्राय । किंभूतां निराजनादिविधिम् ? ज्ञातिवृद्धप्रयुक्तान्, ज्ञातिवृद्धैः ज्ञातिमहत्तरैरर्पितान् । पुनः किंभूतान् ? दुर्वायवाङ्कुरप्लक्षत्वगभिन्नप(पु)टोत्तरान्, दुर्वाङ्कुर(रा)श्च प्लक्षत्वक् च तैः अभिन्ना मिलिता प(पु)टोत्तराः पुटाग्रभागाः येषु ते, तान् ॥१२॥

---

1 Not clear.

१३. पुरोहित० ।

पुरोहितपुरोगा वसिष्ठप्रमुखा द्विजातयः ब्राह्मणाः जिष्णुं जयनशीलं तं अतिथिं पूर्वं अभिषेक्तुं उपचक्रमिरे प्रारेभिरे । कैः । अथर्वभिः ? अथर्वणि(ण)मंत्रैः । किंभूतैः अथर्वभिः ? जैत्रैः ॥१३॥

१४. तस्यौघ० ।

तस्य अतिथेः मूर्ध्नि मस्तके निपतन्ति(न्ती) उद्यन्महती महाप्रवाहा, सशब्दं सरवं यथा भवति तथा अभिषेकश्रीः जलाभिषेकलक्ष्मीः व्यरोचत । कस्य, केव ? त्रिपुरद्विषः हरस्य गङ्गेव ॥२४॥

१५. स्तूय० ।

तस्मिन् क्षणे अवसरे बंदिभिः वैतालिकैः स्तूयमानः स अतिथिः अलक्ष्यत अज्ञायत ददृशे । कैः, क इव ? सारङ्गैः चातकैः अभिनन्दितः अनुमोदितः प्रकृष्टः पर्यन्न(र्जन्यः) मेघ इव ॥१५॥

१६. तस्य स० ।

तस्य अतिथेः द्युतिः ≤ग्रहणतः तस्य≥[1] । कस्येव ? वृष्टिसेकात् जलवृष्टिसेकात् वैद्युतस्य अग्नि(ग्ने)रिव ॥१६॥

१७. स ताव० ।

स अतिथिः अभिषेकान्ते स्नानान्ते स्नातकेभ्यः तावत् वसु द्रव्यं ददौ अदात् । यावत् तेषां ऋषीणां पर्याप्तदक्षिणाः परिपूर्णदक्षिणाः ज(य)ज्ञाः समाप्येरन् समाप्ताः भवेयुः ॥१७॥

१८. ते प्रीत० ।

प्रीतमनसः दक्षिणापरितुष्टास्ते स्नातका तस्मै अतिथये यां आशिषं उदीरयन् ददुः सा आशीस्तस्य नृपस्य कर्मनिवृ(वृ॑)त्तैः कर्मसंपादितैः फलै दूरैः(रं) अतिशयेन, तथाकृता अभिभूता ॥१८॥

१९. बन्धच्छे० ।

स नृपः बद्धानां बंधच्छेदं बंधनच्छेदं मोक्षं, आदिशत्, आदिदेश । वधार्हाणां वधयोग्यानां, धुरं वहन्तीति धुर्याः अनडुहादयस्तेषां धुरो मोक्षं आदिशत् । गवां धेनूनां

1 Not clear. could it be 'गृह्णतः' ?

आ(अ)दोहं ओ(अ)दोहनं चादिशत् इत्यन्तः । क्रियादीपकम् । महोत्सवे हि ये(इ)दं क्रियते इत्याचारः ॥१९॥

२०. क्रीडाप० ।

पञ्जरस्थाः शुकादयः क्रीडापतत्रिणोऽपि केलिशकुनयस्तस्य अतिथेः लब्धमोक्षाः पञ्जरान्मुक्ताः । तदादेशात् अतिथेरादेशात् यथेष्टगतयः स्वच्छाचारिणः अभवन् ॥२०॥

२१. ततः कक्षा० ।

ततस्तदनन्तरं स अतिथिः नेपथ्यग्रहणाय अलङ्कारग्रहणार्थं वेषसम्पादनार्थं शुचि निर्मलं गजदन्तासनं अध्यास्त, अधितस्थौ । किंभूतं गजदन्ताश(स)नम् ? सोत्तरच्छदं उत्तरीयसंयुक्तम् । पुनः किंभूतम् ? कक्षान्तरन्यस्तं वेश्मान्तररचितम् । कक्षावरस्त्रातायां[1] कट्यां देहप्रकोष्टके' इति वैजयन्ती । स्वगृहात्पुरः स्थितं गृहं ज्ञेयम् ॥२१॥

२२. तं धूपा० ।

प्रसाधकाः मण्डनकारकास्तैस्तैर्नानाविधैः आकल्पसाधनैः वेषहारादिभिः राजानं उपसेदुः उपतस्थुः । किंभूतं तम् ? धूपास्या(श्या)नकेशान्तं, धूपेन आस्या(श्या)नः ईषत्सु(त्छु)ष्कः केशान्तः यस्य सस्तम् । किंभूताः प्रसाधकाः ? तोयनिर्नि(र्णि क्त पाणयः जलक्षालितकराः ॥२२॥

२३. तेऽस्य मुक्ता० ।

ते साधकाः अस्य राज्ञः मुक्तागुणानद्धं मुक्तादामवेष्टितं मौलिं मुकुटं प्रत्यूचुः(पुः) समर्पयामासुः । किंभूतं मौलिम् ? अभ्यंतरस्रजं, अभ्यन्तरे मध्ये स्रक् पुष्पमाला यत्र तत् । पुनः किंभूतम् ? पद्मरागेणोपलक्षितम् । किंभूतेन पद्मरागेण ? प्रभामण्डलबन्धिना कान्तिवलयमुचा ॥२३॥

२४. चन्दनेना० ।

ततस्तदनन्तरं अस्य पत्रं पत्रलेखाकारं चक्रुः विदधुः । किंभूतं पत्रम् ? विन्न(न्य)-स्त{गो}रोचनं, रचितगोरोचनम् । किं कृत्वा ? मृगनाभिसुगन्धिना कस्तूरिकासुगन्धिना चन्दनेन अङ्गरागं च समापा(प)य्य विधाय ॥२४॥

२५. आमुक्ता० ।

राज्यश्रीवधूवरः राज्यश्रीरि(रे)व वधूः तस्याः वरः पतिः, स राजा अतिशयप्रेक्ष्यः नितरां दर्शनीयः आसीत् बभूव । किंभूतः सः ? अ(आ)मुक्ताभरणः बद्धानेकालङ्कारः ।

1 Not clear.

पुनः किंभूतः ? स्रग्वी मालावान् । पुनः किंभूतः ? हंसचिह्नदुकूलभृत् हंसाङ्कितांशुकधारी ॥२५॥

२६. नेपथ्य० ।

हिरण्मये कनकमये आदर्शे तस्य राज्ञः नेपथ्यदर्शिनः अभिनववेशालोकिनश्छायां प्रतिबिंबं [र]राजः(ज), शुशुभे । कस्मिन्, कस्येव ? नवे सूर्ये मेरौ पर्वते कल्पतरोरिव ॥२६॥

२७. स राज० ।

नृपः सभां पर्षदां(दं) ययौ जगाम । किंभूता सभाम् ? सुधर्मानवमां, सुधर्माख्या नामैन्द्रसभा तद्वत् अनवमां उत्कृष्टाम् । किंभूतः सः ? पार्श्ववर्तिभिः अनुचरैः उदीरितालोकः उच्चारितालोकशब्दः । किंभूतैः पार्श्ववर्तिभिः ? राजककुदव्यग्रपाणिभिः, राजककुदी(दा)नि छत्रचामरादीनि, तैर्व्यग्राः व्याकुलिताः पाणयो हस्ता येषां ते, तैः ॥२७॥

२८. वितान० ।

तत्र सभायां पैतृकं कुलक्रमागतं आसनं भेजे, शिश्राय । किंभूतं आसनम् ? वितानसहितं उल्लोचसहितम् ? पुनः कथंभूतम् । महीभृतां राज्ञां चूडामणिभिः शिरोरत्नैः उद्घृष्टपादपीठं, उद्घृष्टो(ष्टं)घर्षितः(तं) पादपीठः(ठं) यस्य सिंहासनस्य; {सः} ॥२८॥

२९. बभौ० ।

स राजा बभौ । किं कृत्वा ? कुमारत्वात् बाल्यात्वात् भूमेः पृथिव्याः अधिराज्यं आधिपत्यं अवाप्य प्राप्य, लेखाभावात् लेखायाः भावः लेखाभावस्तस्मात् लेखाभावात् सामग्र्यं परिपूर्णत्वं उपारूढः प्राप्तः चन्द्रमाः इव ॥२९॥

३०. शुशुभे० ।

तेन च राज्ञा अ(आ)क्रान्तं महत् राज्यं मङ्गलायतनं कल्याणाश्रयं शुशुभे रेजे । केन, किमिव ? कौस्तुभेन मणिना श्रीवत्सलक्ष्म(क्ष)णं श्रीवत्सचिह्नं कैशवं वैष्णवं वक्ष इव ॥३०॥

३१. प्रसन्न० ।

अनुजीविनः सेवकाः तं नृपं मूर्तिमन्तं [स]शरीरं विश्वासं अमन्यत(न्त) अ॒ ॒यन्त । किंभूतं तम् ? प्रसन्नमुखरागं, प्रसन्नमुखवर्णम् । पुनः किंभूतम् ? [स्मित] पूर्वाभिभाषिणं, हास्यपूर्वालापिनम् ॥३१॥

३२. स पुरं० ।

पू(पु)रुहु(हू)तश्रीः इन्द्रतुल्यः स नृपः पुरीं अयोध्यां द्यां स्वर्गनिभां चकार । किं कुर्वन् ? नागेन गजेन क्रमेण (०ममाणः) प्रदक्षिणीकुर्वन् । किंभूतेन नागेन ? ऐरावणौजसा ऐरावणतेजसा । किंभूतां पुरीम् ? कल्पद्रुमनिभाः कल्पद्रुमतुल्याः ध्वजाः पताकाः यत्र, नागरत्नयुक्तत्वात् ॥३२॥

३३. तस्यै० ।

एकस्य तस्य नृपस्य, मूर्ध्नि मस्तके छत्रं उच्छि(च्छ्रि)दं(तं) नृदं(धृतं); अमलद्वि(त्वि)षा निर्मलतेजसा तेन छत्रेण कृत्स्नस्य समस्तस्य जगतः पूर्वराजवियोगै(गौ)ष्म्यं कुशविरद(ह)शां(जं) तापं हृतम् ॥३३॥

३४. धूमादग्ने० ।

स नृपस्तेजसां रवेश्च तेजसां वृत्तिं स्वभावं अतीत्य उल्लंघ्य गुणैः प्रतापादिभिः सममेव सहैव उत्थितः उत्तस्थौ । कथं तेजोधर्मोल्लंघनमित्याह – अग्नेः धूमात् पश्चात् धूमानन्तरं शिखाः ज्वालाः भवति(न्ति) । रवेः सूर्यस्य उदयात् पश्चात् उदयानन्तरं अंशवः किरणाः भवन्ति; तस्य च गुणाः नविलंध्य (न विलम्ब्य) सा(भा)विनः, किन्तु सहजाः ॥३४॥

३५. तं प्रीति० ।

पौरयोषितः नगरवनिताः नेत्रैः लोचनैः तं नृपं अन्वयुः ऐक्षन्त । काः कैः ? कमिव ? विभावर्यः निशाः ज्योतिर्भिः तारकैः उडुपं चन्द्रमिव । किंभूतैर्ज्योतिर्भिः ? शरत्प्रसन्नैः शरत्कालनिर्मलैः । किंभूतैर्नेत्रैः ? प्रीतिविशदैः प्रीतिप्रसन्नैः ॥३५॥

३६. अयोध्या० ।

च पुनः, अयोध्यादेवताः प्रतिमागतैः प्रतिमास्थितैः सांनिध्यैः, अनुधे(ध्ये)यं अनुग्रहयोग्यं एनं नृपं अनुदध्युः अनुग्रहं चक्रुः । किंभूताः अयोध्यादेवताः ? प्रशस्तायतनार्चिताः श्रेष्ठेषु ग्रहेषु अर्चिताः ॥३६॥

३७. यावन्ना० ।

अभिषेकजलप्लुता स्नानोदकक्षालिता वेदिस्थली यावन्नास्या(श्या)यते यावन्न शू(शु)ष्यति तावदेव अस्य राज्ञः दुःसहः प्रतापः वेलान्तं समुद्रपारं प्राप ॥३७॥

३८. वशि(सि)ष्ठ० ।

वशि(सि)ष्ठस्य गुरोः मन्त्राः अस्य धन्विनः धनुर्धरस्य सायकाः बाणाश्च उभयसंगताः मिलिताः यत् न साधयेयुः न कुर्युः तत् साध्यं किम् ॥३८॥

३९. स धर्म० ।

स राजा शश्वत् निरंतरं व्यवहारान् विवादान् स्वयं ददर्श [अ]विचारयत्, तेषां अर्थ(र्थि)प्रत्यर्थिनां वादिप्रतिवादिनाम् । किंभूतः सः ? धर्मस्थसखः, धर्मसहितः । पुनः किंभूतः ? अतन्द्रितः अनलसः । पुनः किंभूतः ? संशयच्छेदी संदेहच्छेत्ता ॥३९॥

४०. ततः० ।

ततः परं स राजा भृत्यान् सेवकान् विज्ञापनाफलैः विज्ञापिकाफलैः युयोज अयोजयत् । किंभूतैर्विज्ञापनाफलैः ? अभिव्यक्तसौमनस्यनिवेदितैः, अभिव्यक्तेन आविर्भूतेन राजकीयेन सौमनस्येन मुखप्रसादेन निवेदितैः कथितैः । पुनः किंभूतैः ? पाकाभिमुखैः परिपक्वैः । नह्यसौ वचनैः वक्ति । यदुक्तं—

नाकारमुद्गिरसि नैव जहासि कालं
दत्वा न शोचयति(सि) नैव विकत्थसत्वम् (विकत्थनस्त्वम्) ।
निःशब्दवर्षन्निव(०र्ष इव) अम्बुधरस्य राजन्
संदृश्यते फलत एव तव प्रसादः ॥१॥—॥४०॥

४१. प्रजास्तद्गु० ।

तद्गुरुणा प्रजा विवर्धिताः पोषिताः केन, का इव ? नभसा श्रावणेन नद्यः इव । यथा नभस्य(सा) वर्धिताः नद्यः भान्ति । तु पुनः तस्मिन् अतिथौ ताः प्रजाः भूयसिं(सीं) वृद्धिं आययुः प्रापुः । तस्मिन् कस्मिन्निव ? नभसे(स्ये) इव । यथा नभस्येन भाद्रपदेन भूयसिं(सीं) वृद्धिं प्राप्नुवन्ति ॥४१॥

४२. यदुवा० ।

स राजा यत् उवाच बभाषे तन्मिथ्या न, अलीकं न, यद् ददौ न जहार [तत्], स भग्नव्रतः भ्रष्टप्रतिज्ञः अभूत् । किं कुर्वन् ? शत्रून् उत्खाय उन्मूल्य प्रतिरोपयन् स्थापयन् ॥४२॥

४३. वयोरू० ।

वयोरूपविभूति(ती)नां तारुण्यस्वरूपसमृद्धिनां एकैकं मदकारणं भवति । तस्मिन् राज्ञी(ज्ञि) तानि वयःप्रभृतीनि समस्तानि सन्ति, च पुनः अस्य राज्ञः मनः न उत्सिषिचुः(चुः), न गर्वितं चक्रुः ।

[1]कुलममलिनं भद्रा मूर्तिः मतिः श्रुतिशालिनि(नी)
भुजबलमलं स्फि(स्फी)ता लक्ष्मीः प्रभू(भु)त्वमख[ण्डि]तम् ।
प्रकृतिसुभगा भावा ह्येते मदस्य च हेतवो
व्रजति पुरुषो चैकं मार्गं ? त एव तवाङ्कुशाः ॥१॥ ॥४३॥

४४. इत्थं जनि० ।

नवोऽपि नूतनोऽपि स नृपः अनुवासरं अनुदिनं अक्षोभ्यः अकम्प्यः आसीन् बभूव । क इव ? दृढमूलः द्रुमः इव । कासु ? इत्थं जनितरागासु उत्पन्नरागासु प्रकृतिषु प्रजासु ॥४४॥

४५. अनित्याः० ।

बाह्याः शत्रवः अनित्याः अशाश्वताः, यत् यस्मात् ते बाह्याः शत्रवः विप्रकृष्टाश्च दूरीभूताश्च । अतः स अतिथिः आभ्यन्तरान् कामक्रोधमदमात्सर्यहर्षान्[2] नित्यान् पूर्वं प्रथमं षड्रिपून् अजयत् जिगाय ॥४५॥

४६. प्रसादा० ।

तस्मिन् नृपे [स्व]भावतः प्रकृत्या चटुलाऽपि चपलाऽपि श्रीर्लक्ष्मीः अनपायिनि(नी) स्था(स्थि)रा आसीत् । केव ? निकषे निकषोपले हेमलेखेव कनकलेखेव । किंभूते तस्मिन् ? प्रसादसुमुखे प्रसन्नवदने ॥४६॥

४७. कातर्य० ।

केवला नीतिः कातर्यं कातरत्वं भवति । शौर्यं सु(शू)रत्वं चापलवेष्टितं, अतः कारणान् स राजा समेताभ्यां मिलिताभ्यां उभाभ्यां सिद्धिं अन्व(न्वि)येष ॥४७॥

४८. न तस्य० ।

तस्य राज्ञः राज्ञां मण्डले देशे किञ्चत् अदृष्टं न अभवत् । तस्य कस्येव ? व्यभ्रस्य निरभ्रस्य विवस्वतः सूर्यस्य इव । किंभूतस्य तस्य । न्यस्तप्रणिधिदीधितेः निक्षिप्तव(च)रदीधितेः ॥४८॥

---

1 The verse is found in the K.P. (P. ६८७) Edn. Thalkikar Verse no. ५०८, as an illustration of समुच्चय अलङ्कार. The second half reads as.

'प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजन् त एव तवाङ्कुशाः ॥'

2. 'हर्षान्' is surprising.

४९. रात्रिं दि० ।

रात्रिन्दिवविभागेषु महीक्षितां राज्ञां यत् आदिष्टं कथितं तत्कार्यं सिषेवे भेजे । स अतिथिः अभियोगेषु उद्यमेषु विकल्पपराङ्मुखः अभवत्, विमुखः बभूव ॥४९॥

५०. मन्त्रः प्रति० ।

तस्य राज्ञः प्रतिदिनं प्रत्यहं मन्त्रिभिः सह मन्त्रे बभूव । कदाचित् सेव्यमानोऽपि स राजा गुप्तद्वारेण गुप्तमन्त्रेण न भिद्यते न भेदं याति ॥५०॥

५१. परेषु० ।

स नृपः यथाकालं स्वपन्नवि(पि) ष(श)यानोऽपि अपसर्पैश्चरैः जजागार सावधानः अभूत् । किंभूतैः अपसर्पैः ? [अ]विज्ञातपरस्परैः, न विज्ञातं परस्परं यैस्ते । न हि चरोऽपि चरान्तरं जानातीति । पुनः किंभूतैः ? परेषु शत्रुषु स्वेषु मित्रादिषु क्षिप्तैः नियुक्तैः ॥५१॥

५२. भव्यमु० ।

तस्य राज्ञः भव्यमुख्याः, भव्यं कल्याणं मुख्यं प्रधानं येषां ते, द्वितीयपक्षे शालयोऽपि । भव्यं रम्यं, मुखे भवं मुख्यं मञ्जर्यादि येषां ते । समारम्भाः प्रारब्धकार्याणि गूढं यथा स्यात् [तथा] विपेचिरे फलदानयोग्यतां प्राप्ताः । कथंभूताः समारंभाः ? प्रत्यवेक्ष्याः निरत्ययाः । प्रत्यवेक्षाकृताः कृतनिरूपणैः{न} निर्बाधाः अथवा प्रत्यवेक्षया जागरणेन निरत्ययाः निर्बाधाः । द्वितीयपक्षे पश्वादिभक्षणरूपात्ययरहिताः । पुनः किंभूताः ? गूढशालिसधर्माणः गूढशालयो[1] भट्टगाद्यास्तैः समानो धर्मो येषाम् । ते हि गूढं [2]फालिकाभ्यन्तरं ह्येव पच्यन्ते ॥५२॥

५३. अपथेन० ।

यत् कदाचित् उपचितोऽपि समृद्धिवृद्धोऽपि स राजा अपथेन अमार्गेण न प्रववृते न प्रवृत्तः । लवणाम्भसः लवणसमुद्रस्य वृद्धौ उल्लासे{न} नदीमुखेन न तु मर्यादातिक्रमेण प्रस्थानं भवति ॥५३॥

५४. दुर्गाणि० ।

द्विषां शत्रूणां तस्य राज्ञः दुर्गाणि गिरिप्राकाराः दुर्गग्रहाणि दुर्ग्राह्याणि आसन् बभूवुः । किंभूतस्य तस्य ? रोद्धुरपि विजयिनोऽपि । हि यतः गजास्कंधि(दी) सिंहः भयान्न गिरिगुहाश्रयः न गिरिगुहायां आश्रयो यस्य सः ॥५४॥

---

1 Not Clear 2 Could it be स्थालिका ?

५५. कामं प्रकृति० ।

यस्य राज्ञः प्रतीकारः कार्यः प्रकृतीनाममात्यादीनां वैराग्यं सद्यः शमयितुं उपशमयितुं कामं अतिशयेन क्षमः समर्थः । स नृपः तत्कार्यं नैवोदपादयत् नाचचार, न उदपादयति स्म ॥५५॥

५६. शक्ये० ।

तस्य राज्ञः शक्येषु यातुं शक्येषु यात्रा[1] {प्रणायकं(?)} अभवत् । समीरणसहायोऽपि दवानलः अम्भःप्रार्थि(र्थी), अम्भः प्रार्थयते जेतुमिति अम्भःप्रार्थी, [न] । किंभूतस्य तस्य ? शक्तिमतः शक्तित्रयप्रस[प]न्नस्य । पुनः किंभूतस्य ? सतः ॥५६॥

५७. न धर्म० ।

अर्थकामाभ्यां धर्मं न बबाधे, न पीडयामास । तेन धर्मेण तौ अर्थकामौ, न च कामेन अर्थेन वा, स राजा अर्थेन कामं न बबाधे । किंभूतः सः ? त्रिषु धर्मार्थकामेषु सदृशः तुल्यः ॥५७॥

५८. हीनान्य० ।

हि(ही)नानि मित्राणि अनुपकतृ(र्तृ)णि अनुपकारकानि प्रवृद्धानि उच्छ्रितानि मित्राणि विकुर्वते द्रुह्यन्ति । अतः कारणात् तेन राज्ञा मध्यमशक्तीनि मध्यमबलानि स्थापितानि ॥५८॥

५९. पर(रा){मा}त्मनो० ।

स नृपः एभिः शक्त्यादिभिः परस्मात् वशि(बलि)ष्ठश्चेत् अधिकश्चेत् तर्हि ययौ जगाम । अन्यथा हि(ही)नः [चेत्]आस्त तस्थौ । किं कृत्वा ? परमात्मनोः (परात्मनोः) परस्वयोः शक्त्यादीनां शक्तिदेशकालदैवसिद्धीनां बलाबलं [परि]च्छिद्य विचार्य ॥५९॥

६०. कोश(शा)दा० ।

कोशां(शात्) अर्थपत्या (०प्राप्त्या) सर्वेषां आश्रयणीयत्वं सेव्यत्वं भवति इति हेतोः तस्य राज्ञः अर्थसंग्रहः द्रव्यपरिग्रहः । हि यतः अम्बुगर्भो जीमूतः मेघः चातकैः अभिगम्यते आश्रीयते ॥६०॥

---

1 {प्रणायकं} Not clear. could it be 'प्रयाणकं'?

६१. परक० ।

स नृपः परकर्मापि[हः] शत्रुकर्मध्वंसतः(कः) अभूत् । स्वेषु कर्मसु निजकार्येषु उद्यतः अभूत्, आत्मनः रन्ध्रं आवृणोत् आच्छादयामास, द्विषां रन्ध्रेषु प्रहारान् जहार ॥६१॥

६२. पित्रा सं० ।

दण्ड[व]तः, दण्डो विद्यते यस्यासौ, तस्य राज्ञः दण्डः बलं स्वदेहात् निजशरीरात् न व्यशिष्यत न व(वि)शिष्टो बभूव । किंभूतो दण्डः ? पित्रा{त्} कुशेन संवर्धितः, वृद्धिं प्रापितः । पुनः किंभूतः ? नित्यं कृतास्त्रः कृतयुद्धः । पुनः किंभूतः ? सांपरायिकः संपराये संग्रामे भवः, सांपरायिकः ॥६२॥

६३. सर्पस्य० ।

परः शत्रुः अस्य राज्ञः शक्तित्रयं प्रभुत्वोत्साहमंत्रलक्षणं न चकर्ष ण(न) आकृष्टवान् । कस्य, किमिव ? सर्पस्य शिखारत्नमिव मणिरत्नमिव । स राजा परस्मात् शत्रुसकाशात्, तच्छक्तित्रयं चकर्ष{तः} कमिव ? अयस्कान्त आयसं लोहमिव ॥६२॥

६४. वापीष्वि० ।

सर्वाः संघाताः वापीष्विव स्रवन्ति(न्ती)षु नदीषु स्वैरं यथेष्टं चेरुः संचरन्ति स्म । उपवनेष्विव वनेषु चेरुः । तदीयेषु नृपसंबंधिषु वेश्मसु इव गृहेष्विव अद्रिषु चेरुः ॥६४॥

६५. तपो रक्ष० ।

स नृपः यथा यथास्वं यथात्मानं आश्रमैस्तपस्विभिः षडंशभाक्, षष्ठभागभागी षडंशभागी <वक्रविद्ध आश्रमैः>[1] कैरिव ? वर्णैः, किंकुर्वन् ? विघ्नेभ्यः राक्षसादिभ्यः तपो रक्षन्, च पुनः तस्करेभ्यः संपदं रक्षन् ॥६५॥

६६. खनिभिः० ।

खनिभिः आकरैः रत्नं शुशुभे (सुषुवे), असूयत । क्षेत्रैः सस्यं अन्न शु(सु)षुवे वनैः गजान् । भूः पृथ्वीरक्षासदृशं एव वि(वे)तनं स्थूलं तस्मै राज्ञे दिदेश ददौ ॥६६॥

६७. स...बला० ।

स राजा बलानां, मौलि(मूल)भृत(त्य)श्रेणिमित्रामित्राटवीकानां बलानि, षण्णां

---

1 Not clear < >.

गुणानां च संधिविग्रहयानासनसंश्रय{च}द्वैधीभावानां साधनीयेषु साध्येषु वस्तुषु कार्येषु विनियोगज्ञः बभूव । किंभूतः सः ? षण्मुखविक्रमः कार्तिकेयपराक्रमः ॥६७॥

६८. इति क्र० ।

स राजा आतीर्थान्(त्) अप्रति(ती)घातं अप्रविनष्टं तस्याः राजनीतेः फलं आनसो(शे) प्राप । किं कुर्वन् ? इति पूर्वोक्तप्रकारेण चतुर्विधां दण्डनीतिं राजविद्यादिकं क्रमात् प्रयुञ्जानः प्रवर्तयन् ॥६८॥

६९. कूटयु० ।

वीरका(गा)मिनी वीराभिलाषिणी जयश्रीः जयलक्ष्मीः तस्मिन् राज्ञी(ज्ञि) अभिसारिकावृत्तिं अभिसारिकाव्यापारं भेजे शिश्राय । किंभूते तस्मिन् ? कु(कू)टयुद्धविधिज्ञेऽपि मायायुद्धप्रपञ्चज्ञेऽपि । पुनः किंभूते ? सन्मार्गयोधिनी(नि), अच्छलहा(धा)रिणी(णि) ।६९।

७०. प्रायः० ।

अरि(री)णां शत्रूणां, तस्य राज्ञः रणः संग्रामः प्रायः दुर्लभः अभवत् । कस्मात् प्रतापभग्नत्वात् प्रतापेन भग्नाः, प्रतापभग्नाः, प्रतापभग्नानां भावः प्रतापभग्नत्वं, तस्मात् । तस्य कस्य ए(इ)व ? गन्धद्विपस्येव । किंभूतस्य गन्धद्विपस्य ? गन्धभग्नान्यदन्तिनः, गन्धेन भग्नाः पलायिताः अन्ये दन्तिनः करिणो येन सः तस्य ॥७०॥

७१. प्रवद्धो० ।

प्रवृद्धो वृद्धिं गतः चन्द्रः हि(ही)यते क्षीयते तथाविधः प्रवृद्धोऽपि समुद्रोऽपि हीयते, स तु नृपः ताविव शशी(शि)सागराविव ≤शैनच≥[1](क्षयी न ?) अभूत् । किंभूतः सः ? तत्समवृत्तिः, ताभ्यां शशी(शि)सागराभ्यां समा तुल्या वृत्तिः व्यापारो यस्य सः ॥७१॥

७२. सन्तस्त० ।

अत्यर्थं कृशाः अर्थिनः याचकाः सन्तः साधवः पण्डिताः महतः समृद्धस्य तस्य राज्ञः अवि(भि)गमनात् दातृत्वं दान[शील]त्वं प्रापुः लेभिरे । कस्मात्क इव ? उदधेः समुद्रात् जीमूत(ताः) इव ॥७२॥

७३. स्तूयमानः० ।

स्तूयमानः प्रशस्यमानः स राजा जिह्राय ललज्जे । किं कुर्वन् ? स्तुत्यमेव प्रशस्यमेव समाचरन् उद्यमं कुर्वन् । तस्य राज्ञः तथाऽपि यशः पप्रथे वित{त}स्तार । किंभूतस्य तत्कारि[णः] ? द्वेषिणः तत्कारिविरोधिनः ॥७३॥

---

1 Not clear

७४. दुरितं० ।

उदितः स राजा शश्वत् निरंतरं प्रजान् संवर्द्धयांचक्रे पुपोष । क इव ? सूर्य इव । किं कुर्वन् ? दर्शनेन दुरितं द्रारिद्यं पापं च घ्नन् विनाशयन् पुनः किं कुर्वन् ? तत्त्वार्थेन तमः मोहं नुदन् स्फोटयन् ॥७४॥

७५. इन्दो० ।

इन्दोश्चन्द्रस्य अंशवः किरणाः पद्मे अगतयः अप्रवेशकाः, सूर्यस्य अंशवः कुमुदे अगतयः,तस्य गुणिनः गुणाः विपक्षेऽपि अन्तरं अवकाशं लेभिरे ॥७५॥

७६-७७. पराभि० । [एवं] ।

अस्य राज्ञः यदपि विचेष्टितं विलसितं पराभिसंधानपरं, परस्य शत्रोः अभिसंधानं उन्मूलनं, पराभिधानं [तत्]परं, जिगीषोः जेतुमिच्छोः तस्य नृपस्य अश्वमेधार्थं अश्वमेधाय तद् धर्ममेव धर्मनिमित्तं बभूव । एवं प्रभावेन(ण) महिम्ना उद्यन् उद्यमं कुर्वन् स अतिथिः राज्ञां राजा बभूव । केषां, क इव ? देवानां देवः वृषा इन्द्र इव । किंभूतेन प्रभावेन(ण)? शास्त्रनिर्दिष्टवर्त्मना । शास्त्रेण निर्दिष्टं वर्त्म पन्थाः यस्य सः, तेन ॥७६॥ [७७॥]

७८. पञ्चमं० ।

पण्डिताः तं राजानं लोकपालानां इन्द्रयमवरुणधनदानां मध्ये पञ्चमं ऊचुः, आचख्युः । कस्मात् ? साम्ययोगातः । साम्यस्य तुल्यस्य योगः, साम्ययोगः तस्मात् । महतां गरीयसां भूतानां षष्ठं ऊचुः, कुलभूभृतां कुलाव(च)लानां अष्टमं ऊचुः ॥७८॥

७९. दुरापव० ।

भूपालाः राजानः शिरोभिस्तस्य राज्ञः आज्ञां दधुः । आज्ञां कामिव ? पौरन्दरीं, पुरन्दरस्य इयं, तां पौरन्दरीम् । इन्द्रध्व[ज]सक्तां शेषामिव मालामिव । किंभूतां आज्ञाम् ? शासनार्पितां लेखनिविष्टाम् । किंभूतैः शिरोभिः ? दुरापवर्जितच्छत्रैः दूरं अपवर्जितानि छत्राणि येषां ते, तैः ॥७९॥

८०. ऋत्विजः० ।

स राजा महाक्रतौ महायज्ञे दक्षिणाभिर्दानैः ऋत्विजः यज्ञ(याज)कान् तथा आनर्च्य(र्च) पूजयामास यथा अस्य राज्ञः [ध]नदस्य नाम साधारणीभूतां(त)म् ॥८०॥

८१. इन्द्रा० ।

लोकपालाः तस्मिन् राजनी(नि) दण्डोपनतचरितं, दण्डोपनतं संघटितं चरितं व्यवहारं तं भेजिरे अशिश्रयन् । इन्द्रात् वृष्टिः अभूत् । नियमितगदोद्रेकवृत्तिः नियमिता नियंत्रिता गदानां व्याधि(धी)नां उद्रेकेण आधिक्येन वृत्तिः प्रसारो येन असौ यमः अभूत् । यादोनाथः वरुणः नौचराणां सं(नौ)यात्रिकादीनां कर्मणो(णे) शिवजलपथः, शिवः कल्याणः जलपन्थाः यस्य सः, अभूत् । तदनु पूर्वापेक्षा(पेक्षी) शक्रयमवरुणाः अस्यानुकूला इति विचार्य कुबेरः कोशवृद्धिं धनवृद्धिं विदधे ॥८१॥

इति भट्टारकश्री जिनचन्द्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघु-काव्यटीकान्वयमात्रे प्रकृतिसंग्रहो नाम सप्तदशः सर्गः ॥ [१७॥]

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

अष्टादशः सर्गः ॥

१. स नैषध० ।

स अतिथिः नैषधस्य, नैषधस्तस्य अर्थपतेः राज्ञः सुतायां पुत्रिकायां पुत्रं उ[त्पा]दयामास जनयामास । किंभूतं पुत्रम् ? निषधात् ना(न)गेन्द्रात् गिरीन्द्रात् अनु(नू)नसारं, न न्यूनः सारो बलं यस्य सस्तम् । किंभूतः सः ? निषिद्धशत्रुः पराजितशत्रुः । इयं(यं)पुत्रं वि(नि)षधाख्यमेवाहुः ॥१॥

२. तेनोरु० ।

पिता अतिथिः तेन पुत्रेण ननन्द तुतोष । केन, क इव ? सुद्द(वृ)ष्टियोगात् सस्येन ध(धा)न्येन जीवलोकः जगदिव । किंभूतेन सस्येन ? संपत्तिफलात्मकेन संपत्तिनिष्पत्तितया फलात्मकेन फलितेन । तेन उरुवीर्येण । पुनः किंभूतेन ? प्रजायै संतानार्थं कल्पी(लिप)-क्ष(ष्य)माणेन संपश्यमानेन । पुनः किंभूतेन ? यु(यू)ना तरुणेन ॥२॥

३. {स} शब्दादि० ।

कौमुद्वतेयः कौ(कु)मुद्वत्याः अयं कौमुद्वतेयः यां(द्यां) स्वर्ग आरूढवान् । किंभूतां द्याम् ? कुमुदावदातैः कैरवधवलैः कर्मभिः अर्जितां उपार्जिताम् । किं कृत्वा ? चिराय चिरकालं यावत् शब्दादिसुखं निर्विश्य उपभुज्य । किंभूतः कौमुद्वतेयः ? तस्मिन् निषधे प्रतिष्ठापितः स्थापितः राजशब्दो येन सः ॥३॥

४. पौत्रः कु० ।

कुशस्यापि पौत्रः निषधः एकातपत्रां एकच्छत्रां भुवुं(वं)महीं बुभोज बुभुजे । किंभूतः पु(पौ)त्रः ? कुशेशयाक्षः कमललोचनः । पुनः किंभूतः ? सागरधीरचेताः समुद्रविस्तीर्ण-मनाः । पुनः किंभूतः ? पुरार्गलादीर्घभुजः, पुरे अर्गला परिघस्तद्वत् दीर्घभुजः प्रलम्बबाहुः । किंभूतां भुवम् ? ससागरां समुद्रपर्यन्ताम् ॥४॥

५. तस्यानलौ० ।

तस्य निषधस्य, तदन्ते तस्यावसाने नलाभिधानः, वंशश्रियं राज्यलक्ष्मीं प्राप । यः पुत्रः परेषां शत्रूणां बलानि अमृद्नान् ममर्द । कानीव ? गजः नड्वलानीव मृणालानीव । किंभूतः ? नलाभिधानः अनलौजा अग्नितेजाः । पुनः किंभूतः ? नलिनाभवक्त्रः, नलिनं कमलं तस्य भाः नलिनाभाः, तद्वत् वक्त्रं यस्य सः ॥५॥

६. नभश्च० ।

स नलस्तनुजं पुत्रं लेभे प्राप । किंभूतं पुत्रम् ? नभस्तलश्यामतनुं, आकाशश्यामशरीरम् । किंभूतः स नलिनः ? नभश्चरैः विद्याधरैर्गीतयशाः गीतकीर्तिः । पुनः किंभूतम् ? नभःशब्दमयेन नाम्ना ख्यातं, प्रसिद्धम् । कासां, कमिव ? प्रजानां लोकानां, तं रमणीयं नभोमासमिव श्रावणमिव ॥६॥

७. तस्मै० ।

स राजा अदेहबंधाय अनुत्पत्तये मोक्षाय मनः बबन्ध अबन्धात् । किंभूतं मनः ? मृगैः अजस्यं(र्यं), संगतम् । पुनः किंभूतम् । जरसा जरया उपदिष्टम् । किं कृत्वा ? धर्मोत्तरः धर्मप्रधानः, तत्प्रभवः, तस्य नभसः प्रभवः उत्पत्तिस्थानं, तत्प्रभवोऽनलः तस्मै नभसे उत्तरकोशलानां प्रभुत्वं राज्यं विसृज्य ॥७॥

८. तेन द्विपा० ।

तेन नभसः(सा) पुण्डरीकनाम्ना राज्ञां अजय्यः जेतुमशक्यः अजनि जनितः । केषां, क इव ? द्विपानां पुण्डरीकाख्यं पुत्रं पुण्डरीकाक्षमिव विष्णुमिव । श्रीः राज्यलक्ष्मीः भेजे आश्रिता । कस्मिन् सति ? पितरि नभसि शान्ते स्वर्गं गते सति । किंभूतं यं पुत्रम् ? [पुण्डरीकाक्षमिव]आहितपुण्डरीका, आहितं पुण्डरीकं[यया सा आहितपुण्डरीका], इष्टः पुण्डरीकाक्षः यज्ञो (विष्णुः),तम् आश्रिता ।] ॥८॥

९. स क्षाम० ।

क्षामतनुः क्षीणदेहः सः पुण्डरीकवने तपश्चचार अकरोत् । किं कृत्वा ? लक्ष्मीं (क्ष्मां) पृथ्वीं क्षेमधन्वानं पुत्रं लम्भयित्वा समर्पयित्वा । किंभूतः सः ? अमोघधन्वा, अमोघ सफलं धनुर्यस्यासौ । पुनः किंभूतः ? क्षमया उपपन्नः संयुक्तः । किंभूतं पुत्रम् ? प्रजाक्षेमविधानदक्षं, प्रजाक्षेमविधाने दक्षस्तम् ॥९॥

१०. अनीकि० ।

तस्यापि क्षेमधन्वाख्यस्य देवप्रतिमः देवतुल्यः सुतः अभूत् यस्य पुत्रस्य अनीकपदावसानं, 'अनीक' इति पदं अवसाने अन्ते यस्य देवादिनाम, त्रिदिवेऽपि स्वर्गेऽपि अश्रूयत शुश्रुवे । किंभूतः सुतः ? समरे संग्रामे अनिकी(नीकि)नीनां सेनानां अग्रयाजी (यी) अग्रगामी ॥१०॥

११. पिता समाराधनतत्परेण० ।

[समाराधनपरेण] शुश्रूषा[परेण], तन्निष्ठेन तेन पुत्रेण यथैव स पिता पुत्री पुत्रवान्

बभूव अभूत्, अधिकवत्सलेन अधिकवात्सल्ययुक्तेन तेन पित्रा स देवानीकः पुत्रः, तथैव पितृमान् बभूव ॥११॥

१२. पुर्वस्त० ।

यज्वा याज्ञिकः क्षेमधन्वा यजमानलोकं जगाम, अगमत् । किं कृत्वा ? आत्मोद्भवे{न} पुत्रे{ण} वर्णचतुष्टयस्य धू(धु)रं निधाय निक्षिप्य । किंभूते{न}आत्मोद्भवे{न} ? आत्मसमे{न}आत्मतुल्ये{न} । किंभूतां धुरम् ? पूर्वस्तयोः पितापुत्रयोः[मध्ये]चिरोढां चिरधृताम् । किंभूतः यज्वा ? गुणानां सू(शौ)र्यादीनां एकनिधिः ॥१२॥

१३. वशी० ।

वशी जितेन्द्रियः तस्य देवानीकस्य सुतः वशंवदत्वात् वदान्यत्वात् स्वेसा(षा मिव आत्मीयानामिव द्विषतामपि शत्रूणामपि इष्टः प्रियंवदः आसीत्, बभूव । हि यतः, सकृत् एकवारं प्रयुक्तं व्यापारितं माधुय गेयं विविग्नान् पलायितानपि हरिणान् मृगान् ग्रहीतुं इष्टे {अ}भवति ॥१३॥

१४. अहि(ही)नगुः० ।

अहि(ही)नगुर्नाम स नृपः समग्रां समस्तां गां पृथ्वीं शशास ररक्ष । किंभूतः अहि-(ही)नगुः ? अहि(ही)नबाहुद्रविणः, न हीनं बाहुद्रविणं बलं यस्यासौ । यः राजा हीन-संसर्गपराङ्मुखत्वात् दुर्जनसंपर्कवर्जनात् युवाऽपि तरुणोऽपि अनर्थैः द्यूतादिभिर्व्यसनैः विहीनः आसीत् ॥१४॥

१५. गुरोः स चा० ।

च पुनः स अहीनगुः गुरोः देवानीकात् अनन्तरं अस्खलितैश्चतुर्भिस्सामादिभिः उपक्रमैः उपायैश्चतुर्दिगीशश्चतुर्दिगीश्वरः प्रवीणः बभूव । किंभूतः सः ? अवतीर्णः पुंसां पुरुषाणां अंतरज्ञः विशेषतः । क इव ? अ(आ)द्यः पुमान् इव ॥१५॥

१६. तस्मिन्प्र० ।

लक्ष्मीः राजलक्ष्मीः तदीयं पारिजातं नाम तनयं शि(सि)षेवे किल, आशिश्राय किल । कस्मिन् सति ? तस्मिन् अहीनगौ परलोकयात्रां स्वर्ग प्रयाते सति । किंभूते तस्मिन् ? अरीणां या(जे)तरि विध्वंसके । किंभूतं पारिजातम् ? जितपारिजातं, जितः पारिजातः कल्पवृक्षः येन सस्तम् । कस्मात् ? उच्चैःशिरस्त्वात् उन्नतत्वात् ॥१६॥

१७. तस्माद्बभू० [1] ।

अथ अथानन्तरं तस्मात् पारिजातात् दलाभिधानः पुत्रः बभूव । किंभूतः दलाभिधानः ? दयान्वितः । पुनः किंभूतः ? पद्मदलाभदृष्टिः पद्मदलस्य आभेव आभा ययोस्ते पद्मदलाभे दृष्टि(ष्टी) यस्याऽसौ । पुनः किंभूतः ? कुन्दाभदन्तः कुन्दाभा दन्ताः यस्याऽसौ । पुनः किंभूतः ? रिपुदन्तिसिंहः । पुनः किंभूतः ? पृथिव्याः पतिः । पुनः किंभूतः ? कुलकैरवेन्दुः, कुलकैरवस्य इन्दुः ॥१७॥

१८. तस्या० ।

[2]तस्य दलस्य श(शी)लः सूनुः अभवत् । शिलीमुखैः बाणैः जितारिपक्षोऽपि जिताखिलविपक्षोऽपि ॥१८॥

१९ तमात्म० ।

स दलः सुखानि अभुङ्क्त, बुभुजे । किं कृत्वा ? तं श(शी)लं आत्मसंपन्नं पुत्रं युवानं युवराजमेव यौवराज्याभिषिक्तं कृत्वा । किंभूतः सः ? अनिन्दितास्मा(त्मा) प्रशस्यात्मा । हि यतः, राज्ञां अ(उ)परुद्धवृत्तं वार्तं सुखोपरोधि भवति ॥१९॥

२०. तं राग० ।

वृथा निष्कारणमेव मत्सरिणी मात्सर्ययुक्ता जरा तं दलं जहार अहार्षीत् । किंभूतम् ?—रागबन्धिषु भोगेषु अवितृप्तमेव लम्पटम् । किंभूतम् सौभाग्यविशेषभोग्यं {सौभाग्यविशेषभोग्यः विशेषेणभोग्यः} सौभाग्यविशेषेण भोग्यः सौभाग्यविशेषभोग्यः, तम् । किंभूताऽपि जरा ? विलासिनीनां अरतिक्षमाऽपि, अरतियोग्याऽपि ॥२०॥

२१. हित्वाऽथ० ।[3]

अथ अथानन्तरं नृसोमः नृचन्द्रः तदात्मजः {चंद्रः} सकलां पृथ्वीं शशास । कस्मिन् सति ? क्षितीशे दले उत्तमेन तपसा त्रिविष्टपं स्वर्गं प्राप्तवती(ति) सति । किं कृत्वा ? भोगान् हित्वा, त्यक्त्वा । किंभूतः श(शी)लः ? सागरधीरचेताः ॥२१॥

२२. उन्नाभ:० ।

तस्य शै(शी)लस्य उन्नाभः पुत्रः इति उद्गतनामधेयः, उद्गतं विख्यातं नामधेयं यस्यासौ सुतः आसीत् । किंभूतः उन्नाभः ? यथार्थोन्नतनाभिरन्ध्रः गम्भीरनाभिः

---

1 १६-१७ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते । "तस्माद्बभूवाथ ..।" p. ३६७, ibid. Jina. has कुन्दाभदन्तः for कुन्दावदातः

2 The comm. seems to be incomplete.

3 १९-२० श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते, p. ३६८, ibid.

नाभिः पुनः किंभूतः ? पंकजनाभिकल्पः कृष्णतुल्यः । पुनः किंभूतः ? कृत्स्नस्य समस्तस्य नृपमण्डलस्य द्वादशराजकनृपचक्रस्य नाभिः स्वामी ॥२२॥

२३. ततः पर० ।

तदात्मजः वज्रनाभः बभूव किल । किंभूतः वज्रनाभः ? वज्रधरप्रवाहः (०भावः) शक्रमहिमा । पुनः किंभूतः ? संयति संग्रामे वज्रघोषः वज्रस्येव घोषः सिंहनादो यस्य सः । पुनः किंभूतः वज्रनाभः ? पृथिव्याः पतिः । वज्राकरभूषणायाः, वज्राख्याः मणयः तदाकरः समुद्रः, स एव भूषणं यस्याः सा, तस्याः ॥२३॥

२४. तस्मिन् वसुधः(गते)० ।

वसुधा शब्देन हि तद्वास्तव्यजनाः उच्यन्ते । तत्संभवं तत्पुत्रं खण्डनं नाम उपतस्थे सिषेवे । {कैः रत्नौपहारैः ? वसुपायिनैः} किंविशिष्टैः रत्नोपहारैः खनिभ्यः आकरेभ्यः उदितैः उत्पन्नैः । कस्मिन् सति ? तस्मिन् वज्रनाभे खं स्वर्गं गते सति । किंभूतं खम् ? सुकृतोपलब्धम् । किंभूतं खण्डनम् ? उत्खातशत्रुं उन्मूलितरिपुम् । किंभूतः(ता) वसुधः(धा) ? अर्णवान्ता समुद्रपर्यन्ता ॥२४॥

२५. तस्याव० ।

तस्य वज्रनाभस्य अवसाने हरिदश्वधा[मा] सूर्यतेजा इदं पदं प्रपेदे प्राप । किंभूतः हरिदश्वः ? अश्वी(श्वि)रूपः, अश्विनीकुमाररम्यः । पुराविदः पण्डिता {इ}यं पुत्रं व्युशि(षि)ताश्वनाम्ना आहुः, कथयन्ति । किंभूतं व्युषिताश्वम् ? वेलातटेषु उषिता सैनिकाश्वा आवासितसेनातुरङ्गम् ॥२५॥

२६. आराध्य० ।

तेन क्षितीश्वरेण विश्वसहः नामा पुत्रः अधिजन्मे(ज्ञे) प्राप्तः । किं कृत्वा ? विश्वेश्वरं आराध्य । किंभूतः विश्वसहः ? समग्रां विश्वंभरां पृथ्वीं रक्षितुं सह समर्थः । किंभूतां विश्वंभराम् ? विश्वसहाम् । पुनः किंभूतः विश्वसहः ? आत्मजमूर्तिरात्मा पुत्ररूपशरीरः इत्यर्थः ॥२६॥

२७. अंशे हिर० ।

स विश्वसहः द्विषां शत्रु(त्रू)णां असह्यः दुःसहः अभूत् । केषां क इव ? सुतरां अतिशयेन तरु(रू)णां वृक्षाणां स(सा)निलः हिरण्यरेता अग्निरिव । कस्मिन्सति ? हिरण्याख्य(क्ष)रिपोः विष्णोः वंशे अन्वये हिरण्यनाभे तनये जाते सति ॥२७॥

२८. पिता पि० ।

कृति(ती) वल्कलधरः तपस्वी बभूव । किं कृत्वा ? तं पुत्रं राजानं कृत्वा । किंभूतं राजानम् ? आजानुविलंबितबाहुं, दीर्घभुजम् । किंभूतः पिता ? पितृ(तॄ)णामनृणः । पुनः कथंभूतः ? अन्ते वयसि वार्धक्ये अनन्तानि सुखानि लिप्सुः, लब्धकामः(माः)॥२८॥

२९. कौश(स)ल्य० ।

तस्य हिरण्यनाभस्य उरसः {उरी}भवः औरसः शरीरजः सोमसुतः चन्द्रतुल्यः इति कौसला(ल्या)यां भवः कौसल्यासुतः अभूत् । क इव ? नेत्रोत्सवः नयनानन्दः, द्वितीयः अपरः सोम इव । किंभूतस्य तस्य ? पतङ्गान्वयभूषणस्य सूर्यवंशप्रकाशस्य । पुनः किंभूतः ? उत्तरकोसलायां(नां) अयोध्यावासिनां पत्युः भर्तुः ॥२९॥

३०. यशोभिः० ।

स कौसल्यः ब्रह्मभूयाः(यं) गतिं आजगाम आययौ । किं कृत्वा ? स्वतनुप्रसूतम् । ब्रह्मिष्ठमेव पुत्रं निजे अधिकारे राज्ये आधाय निक्षिप्य । किंभूतम् ? ब्रह्मिष्ठं ब्राह्मण-भक्तम् ।किंभूतः स कौसल्यः ? यशोभिः आब्रह्मसभं ब्रह्मलोकपर्यन्तं प्रकाशः ख्यातः ।।३०॥

३१. तस्मिन् कुला० ।

प्रजाः चिरं ननन्दुः । कस्मिन् सति ? तस्मिन् ब्रह्मिष्ठे विपीडं निराबाधां (निर्बाधं) महीं सम्यक् शासति रक्षति । किंभूतां महीम् ? शासनाङ्काम् शासनं आज्ञा, [आज्ञा]चिह्नाम् । किंभूते तस्मिन् ? कुलापीडनिभे, कुलशेखरसदृशे । पुनः किंभूते ? सुप्रजसि, शोभना प्रजा संततिर्यस्यासौ सुप्रजाः । पुनः किंभूते ? प्रजेशे, प्रजानां ईशः प्रजेशस्तस्मिन् । किंभूताः प्रजाः आनन्दजलोक्षिताक्ष्यः, आनन्दजलसिक्तदृशः ॥३१॥

३२. पात्री कृ० ।

पुष्करपत्रनेत्रः कमलदलनयनः पुत्रः पुत्रिणां पुत्रवतां अग्रसंख्यां अग्रगणनां समा-रोपयत् आरोपयामास । किंभूतः पुष्करनेत्रः ? गुरुसेवनेन गुरुसेवया पात्रीकृतात्मा पात्री-कृतो योगी(ग्यी)कृतः आत्मा येन सः । पुनः किंभूतः ? पत्ररथेन्द्रकेतोः पत्ररथेन्द्रः केतौ यस्य सस्तस्य, विष्णुरित्यर्थः । तस्य विष्णोः स्पष्टाकृतिः ॥३२॥

३३. वंशस्थितिं० ।

स पुष्करपत्राक्षः त्रिषु त्रिषु पुष्करेषु तीर्थविशेषेसु(षु) उपस्पशन् स्नानं कुर्वन् शान्तिं स्वर्गं आप प्राप । किं कृत्वा ? वंशकरेण कुलकरेण ते पुष्करपत्रनाम्ना वंश-

स्थितिं संभाव्य ज्ञात्वा । किंभूतः सः ? मघोनः इन्द्रस्य भावी भविष्यन् सखा । पुनः किंभूतः ? स्पर्शनिवृत्तलौल्यः विषयनिवृत्तलोल्यः ॥३३॥

३४. तस्य प्रभा० ।

तस्य पुष्करपत्रस्य पत्नी पौष्यां पुष्येण चन्द्रयुक्तेन (?) (पुष्यनक्षत्रयुक्तेन चन्द्रेण), युक्ता रात्रिः पौषी, तस्यां तिथौ । पूर्णिमायां पुष्यं नामानं[पुत्रं]असूत सुषुवे । यस्मिन् उदिते, जाते जनाः लोकाः समग्रां पुष्टिं अपुष्यन् अवर्धयन् । कस्मिन्निव ? द्वितीये पुष्ये इव । पुष्यनक्षत्रमिव । किंभूतं पुष्यम् ? प्रभानिर्जितपुष्परागं, प्रभया निर्जितः पुष्परागः येन सस्तम् ॥३४॥

३५. महीं० ।

महेच्छः विपुलाशयः पुष्यः अजन्मनो(ने), न जन्म अजन्म, तस्मै मोक्षाय अकल्पत समपद्यत । किं कृत्वा ? सूनौ पुत्रे महीं परिकीर्य । पुनः किं कृत्वा ? सयोगात् अस्मात् जैमिनिमुनेः योगं ज्ञानं अधिगम्य प्राप्य । किंभूतः पुष्यः ? जन्मभीरुः संसारभीरुः । पुनः किंभूतः ? मनीषिणे पण्डिताय जैमिनये जैमिनिमुनये अर्पितात्मा दत्तात्मा । कोऽर्थः ? शिष्यो जातः ॥३५॥

३६. तमः(तः) परं० ।

ततः परं तत्प्रभवः तत्पुत्रः ध्रुवसंधिः उर्वी पृथ्वीं प्रपेदे प्राप । किंभूतः ध्रुवसंधिः ? ध्रुवोपमेयः, ध्रुवेण सह उपमा यस्याऽसौ । सत्यसंधे सत्यप्रतिज्ञे ज्यायसि उत्कृष्टे गरिष्टे यस्मिन् ध्रुवसन्धौ संनमतां प्रण[म]तां नृपाणां ध्रुवः शाश्वतः संधिर्मेलापकः असू(भू)त् ॥३६॥

३७. सुते० ।

स नृपसिंहः ध्रुवसंधिः सिंहात् विपदं मृत्युं अवाप प्राप । कस्मिन्नेव सति ? सुदर्शनाख्ये [सुदर्शन]नाम्नि सू(सु)ते पुत्रे शिश(शा)वेव सति बालैव सति । किंभूतः ध्रुवसंधिः ? मृगायताक्षः मृगस्येव आयते अक्षिणी यस्य सः मृगविपुललोचनः । पुनः किंभूतः ? मृगयाविहारी । किंभूते सति ? दर्शात्ययेन्दुप्रियदर्शन, दर्शस्य अमावास्यायाः अत्ययो विनाशस्तस्य इन्दुश्चन्द्रस्तद्वत् प्रियं दर्शनं यस्य सस्तस्मिन् ॥३७॥

३८. स्वर्गामि० ।

अमात्यवर्गः ऐकमत्यात् एकमतेर्भावः ऐकमत्यं तस्मात्, तं बालकं साकेतनाथं विधिवत् विधिपूर्वकं चकार अकार्षीत् । किं कृत्वा ? प्रकृतीः प्रजाः अनाथदीनाः अराजक[त]योद्विग्नाः अवेक्ष्य आलोक्य । किंभूतं तं बालकम् ? स्वर्गामिनं(नः)स्वर्गीभूतस्य राज्ञः एकं कुलतन्तुं मूलतन्तुभूतं, अनवलंबनं कुलशेषम् ॥३८॥

३९. नवेन्दुना० ।

तद्रघोः कुलं अप्रौढनरेन्द्रं शिशुराजानं आसीत् बभूव । केन, कमिव ? वा इवार्थे । नवेन्दुना उपमेयं सदृशं नभसा आकाशेन शावैकसिंहेन शिशुकेसरिणा काननेन उपमेयम् । कुड्मलपुष्करेण मुकुलितकमलेन तोयेन ॥३९॥

४०. लोकेन० ।

स सुदर्शनः लोकेन पितुरेव तुल्यः भावी भविता इति, मौलिपरिग्रहात् मौलेः कुलामात्यैः परिग्रहः आश्रितः तस्मात् संभावितः अनुमितः । हि यतः कलभप्रमाणः करिपोतकमात्रोऽपि मेघः कुसेवितं पूर्ववातं अवाप्य प्राप्य आशाः दिशः वृण्वन् व्याप्नुवन् दृष्टः ददृशे ॥४०॥

४१. तं राजवी० ।

पौराः नागराः प्रभुत्वात् पितृगौरवेण जनकबहुमानेन तं सुदर्शनं प्रैक्षन्त अद्राक्षुः । किंभूतं [तम्] ? राजवि(वी)थ्यां राजमार्गे अधिहस्ति यन्तं, हस्तिना व्रजन्तम् । पुनः किंभूतम् ? आधोरणा{वि}लंबितमध्यदेशं, बालत्वात् आधोरणेन हस्तिपकेन अवलंबितं अवष्टब्धं मध्यदेशम् । पुनः किंभूतम् ? षड्वर्षदेशीयं षड्वर्षा[णि] प्रमाणं अस्यासौ, तम् ॥४१॥

४२. कामं न० ।

कामं अतिशयेन सुदर्शनः पैतृकसिंहासनस्य प्रतिपूरणाय व्याप्तये न अकल्पत,[न] समर्थो बभूव । पुनः स राजा तेजोमहिम्ना तेजोमात्रेण तेजोमाहात्म्येन आविति(ता)नात् यावत् तत् सिंहासनं व्याप, व्याप्तम् । किंभूतेन तेजोमहिम्ना ? चामीकरपिंजरेण कनकपिशङ्गेन ॥४२॥

४३. तस्मादधः० ।

तस्य सुदर्शनस्य पादौ भूपतयः नृपाः मौलिभिः मस्तकैः ववन्दिरे प्राणमन् । किंभूतमौलिभिः ? प्रसिद्धैः अलङ्कृतैः उन्नतैः । किंभूतौ पादौ ? तस्मात् सिंहासनात् अधः अधस्तात् किञ्चित् मनाक् मात्रं अवतीर्णौ लम्बमानौ । पुनः किंभूतौ ? तपनीयपीठं काञ्चनपादपीठं अस्पृशन्तौ, अदीर्घपादत्वात् । पुनः किंभूतौ ? सार(ल)क्तकौ, यावकरसरंजितौ ॥४३॥

४४. मणौ महा० ।

अल्पप्रमाणेऽपि सूक्ष्मेऽपि मणौ रत्ने महानील इति शब्दः यथा मिथ्या न,

प्रभावात्, तथैव तस्मिन् अर्भकेऽपि बालकेऽपि प्रयुक्तः उक्तः महाराज इति शब्दः युयुजे सम्बद्धो बभूव । अत्र प्रभावः कोशदण्डजं तेजः ॥४४॥

४५. प{रि}य(र्य)न्त० ।

तस्य राज्ञः आननात् मुखात् उच्चरितोऽपि निर्गतोऽपि वादो निदेशः अर्णवानां समुद्रानां वेलास्वपि तटेष्वपि न चचाल न प्रतिजज्ञे । किंभूतस्य तस्य ? पर्यन्त{स्य}-संचारितचामरस्य पर्यन्तयोः संचारिते चामरे यस्य सस्तस्य । किंभूतात् आननात् ? कपोललोलोभयकाकपक्षात् कपोलयोर्लोलौ चञ्चलौ उभयौ (उभौ ?) काकपक्षौ चूले यस्यासौ, तस्मात् ॥४५॥

४६. निवृत्त० ।

स्मेरमुखः विकसिताननः स राजा अरिसुन्दरीणां रिपुवनितानां मुखानि तेनैव कि(ति)लकेन शू[न्या]नि चकार । किंभूतः सः ? ललाटे भाले न्यन्तं स्थापितं तिलकं दधानः धारयन् । किंभूते ललाटे ? निवृत्तजाम्बूनदपट्टबंधे निष्पादितः अभिषेककालयोग्यः स्वर्णपट्टबंधः यस्य सस्तस्मिन् ॥४६॥

४७. शिरीष० ।

स राजा भूषणेन आभरणेन अपि निश्चितं खेदं भारं यायात् गच्छेत् । किंभूतः ? शिरीषपुष्पोपमसौकुमार्यः शिरीषकुसुमसदृशमार्दवः । नितान्तगुर्वीं {महीं}महाभारभूतां च अनुभवात् प्रतापात् धरित्र्याः धुरं विभरांचकार बभार ॥४७॥

४८. न्यस्ताक्ष० ।

स राजा अक्षरभूमिकायां वर्णकफलके न्यस्ताक्षरां रचितवर्णां लिपिं कात्स्र्न्येन सामस्त्येन यावत् न गृह्णाति तावत् स नृपः सु(श्रु)तवृद्धयोगात् पण्डितसम्पर्कात् दण्डनीतेः सर्वाणि फलानि उपयुङ्क्त उपभुजे ॥४८॥

४९. उरस्य० ।

लक्ष्मीः संजातलज्जेव आतपत्रछायाच्छलेन च्छत्रीच्छायाव्याजेन तं राजानं उपजुगूह आलिलिङ्ग । अन्याऽपि कमपि कामयमाना {स} लज्जाव्याजेन [आ]लिङ्गति । किंभूता लक्ष्मीः ! उरसि वक्षसि अपर्याप्तनिवेशभागा अपर्याप्तो निवेशभागो अवस्थानभागो यस्याः सा । पुनः किंभूता ? प्रौढीभविष्यन्तं वर्धिष्यमाणं नृपं उदीक्षमाणा प्रतीक्षमाणा ॥४९॥

५०. अनश्नु० ।

तस्य राज्ञः भुजेन भूमिः रक्षावती पालित(त्न ?)वती आसीत् । किंभूतेन भुजेन ? युगोपमानं, हस्तचतुष्कप्रमाणं युगं, तदुपमानं तत्सादृश्यं(०सदृशं ?) विस्तारं अनश्नुवानेन अप्राप्तेन । पुनः किंभूतेन ? अबद्धमौर्वीकिणलाञ्छनेन न बद्धं धृतं मौर्वीकिणं प्रत्यञ्चाचिह्नं येनासौ, तेन । पुनः किंभूतेनाऽपि च ? अस्पृष्टखड्गत्सरुणा, न स्पृष्टः खड्गत्सरुः मुष्टिर्येन सस्तेन ॥५०॥

५१. न केव० ।

काले गच्छति सति, राज्ञः शरीरावयवो(वा) वक्षोभुजादयः केवलं प्रवृद्धिं न ययुः, न जग्मुः । खलु निश्चयेन लोककान्ताः जनाभिमताः वंश्या कुलोचिताः गुणाः शौर्यादयः अपि निश्चितं प्रथिमानं विस्तारं आपुः, प्रापुः । किंभूताः गुणाः ? आरम्भसूक्ष्माः आरंभसमये सूक्ष्माः फले व्यस्ताः ॥५१॥

५२. स पूर्वं० ।

स राजा तिस्रः, त्रयीवार्तादण्डनीतिरूपाः विद्याः गुणा(रू)णां अक्लेशकरः एव जग्राह, अग्रहीत् । उपदेशग्रहणैकबुधः इत्यर्थः । च पुनः पित्र्याः पितृसंबंधिनीं[ः] प्रकृति(तीः) जग्राह । किं कुर्वन्निवः ? पूर्वजन्मान्तरदृष्टिः(ष्ट)पारा[ः] पूर्वजन्मान्तरे दृष्टः पारो यासां ताः स्मरन्निव । किंभूताः विद्याः ? त्रिवर्गाधिगमस्य धर्मार्थकामावबोधस्य मूलकारणम् ॥५२॥

५३. व्यूह्य स्थितः० ।

अस्त्रे विनि(नी)यमानः शिक्ष्यमाणः सः नृपः व्यरोचत शुशुभे । किंभूतः सः ? किञ्चिदिव किञ्चिन्मात्रं उत्तरार्धं पूर्वकायं व्यूह्य विस्तार्य स्थितः । पुनः किंभूतः ? अञ्चितसव्यजानुः सुस्थिरवामजानुः । पुनः किंभूतः ? आकर्णं कर्णं यावत् आकृष्टं सबाणं धनुर्येन सः ॥५३॥

५४. अथ मधु० ।

अथ अथानन्तरं स राजा यौवनं प्रपेदे प्राप । किंभूतं यौवनम् ? वनितानां स्त्रीणां नेत्रनिर्वेषपेयम् । पुनः किंभूतम् ? मधु मदकारित्वात्, मध्विव, मधुपानं [इव] । पुनः किंभूतम् ? मनसिजतरुपुष्पं, मनसिज एव तरुः कामतरुः तस्य एव पुष्पं, कामद्रुमपुष्पं, कामद्रुमकुसुमम् । पुनः किंभूतम् ? रागवल्ली{तरु}प्रवालं, रागः स्नेहः तस्य वल्ली, तस्याः प्रवालं, नवपल्लवं, रागलताकिसलयम् । पुनः किंभूतम् ? अकृतविधि न कृतकः कपटः विधिर्यत्र तदकृत्रिमरचनम् । पुनः किंभूतम् ? सर्वाङ्गीणं अखिलावयवव्यापकम् ।

पुनः किंभूतम् ? आकल्पजातं, अलङ्कारस्तनम् (०समूहभूतम्) । पुनः किंभूतम् ? आद्यं प्रथमं विलसितपदं विभ्रमस्थानम् ॥५४॥

५५. प्रतिकृति० ।

तस्य यूनस्तरुणस्य प्रथमपरिगृहीते पूर्वपरिणीते श्रीभुवौ लक्ष्मीपृथिव्यौ राजकन्याः अधिविविदुः सपत्नीके(?) चक्रुः । किंभूताः राजकन्याः ? अमात्यैः आदत्ताः आनीताः । किंभूतैः अमात्यैः ? शुद्धसंतानकामैः. शुद्धसंतानं कामयन्ते, शुद्धसंतानकामाः, तैः । किंभूताः राजकन्याः ? समधिकतरु(र)रूपाः उत्कृष्टतरु(र)रूपाः । काभ्यः ? दूतसंदर्शिताभ्यः दूतैः संदर्शिताः दूतसंदर्शितास्ताभ्यः । प्र[ति]कृतिरचनाभ्यः अधिकतरं रूपं यासां ताः । दूरस्थितविवाह्यराजपुत्रीणां सदृशपट्टलेखा(०ट्टलेख्या ?)दिकरणं प्रतिकृतिरचना । ईदृशी पुत्री इति चित्रदर्शितरूपादपि अतिसुंदर्यः ॥५५॥

इति भट्टारक श्रीजिनचन्द्रसूरिशिष्य आचार्य श्रीजिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वंशवर्णनो नाम अष्टादशः सर्गः ॥१८॥

श्रीजिनसमुद्रविरचितायां रघुवंशटीकायां

एकोनविंशः सर्गः ॥

१. अग्निवर्णं० ।

राघवः सुदर्शनः पश्चिमे वयसि वार्द्धक्ये नैमिषं नैमिषारण्यं शिश्रिये अशिश्रियत् । किं कृत्वा ? स्वे निजे पदे स्थाने अग्निवर्णं नाम तनयं अभिषिच्य संस्थाप्य । किंभूतं अग्नितेजसम् । किंभूतः राघवः ? श्रुतवतां अपश्चिमः, आद्यः । पुनः किंभूतः ? वशी, जितेन्द्रियः ॥१॥

२. तत्र तीर्थं० ।

स सुदर्शनः तत्र तस्मिन् नैमिषारण्ये तपः संचिकाय अवीवृधत्, संचितवान्, बभार । किंभूतः सुदर्शनः ? फलनिःस्पृहः, फलनिरीहः । कथम् ? तीर्थसलिलेन तीर्थोदकेन दीर्घिकाः वापीः क्रीडासरांसि व्यस्मरत् विस्मृतवान् । कुशैः तल्पं शयनीयं व्यस्मरत् । किंभूतैः कुशैः ? अन्तरितभूमिभिः । उटजैः पर्णशालाभिः सौधवासं गृहं व्यस्मरत् ॥२॥

३. लब्धपाल० ।

तत्सुतः अग्निवर्णः लब्धपालनविधौ लब्धराज्यरक्षाविधाने खेदं न आप, न प्राप । हि यतः, गुरुणा पित्रा तस्य भोक्तुमेव मेदिनी कल्पिता दत्ता, प्रसाधयितुं जन्तून् न । किंभूतेन गुरुणा ? भुजनिर्जितद्विषा ॥३॥

४. सोऽधिकार० ।

सः अधिपः राजा कुलोचितं प्रबन्धागतं अधिकारं आधिपत्यं काश्चन कतिपया समाः वर्षाणि स्वयं अवर्तयत् चकार । अतः परं तदधिकारं सचिवेषु मन्त्रिषु निवेश्य निक्षिप्य, स्त्रीविधेयनवयौवनः अंगनाधीनप्रत्यग्रतारुण्यः अभवत् ॥४॥

५. कामिनी०

तस्यः राज्ञः उत्तरः पाश्चात्यः उत्सवः पूर्वं आद्यं उत्सवं अपोहत् विजिग्ये । किंभूतः उत्सवः ? अधिकर्धिः महर्धिः । किंभूतं उत्सवम् ? वृद्धिमन्तं स्फितम् । तस्य पूर्वोत्सवादधिकं परिकरः संपन्नः । अपूर्वमुत्सवमपोहत् । [1] ≤ उपसर्गादस्य त्युहौ वाक्येषु ≥ । वेश्मसु प्रासादेषु । किंभूतेषु वेश्मसु ? मृदङ्गनादिषु गेयवाद्यवत्सु । किंभूतस्य तस्य राज्ञः ? कामिनीसहचरस्य । तरुणीसनाथस्य । पुनः किंभूतस्य ? कामिनः, विलासिनः ॥५॥

---

1 Not clear ≤ ≥.

६. इन्द्रिया० ।

स नृपः समुत्सुकाः दर्शनोत्कण्ठिताः प्रजाः न व्यपे(पै)क्षत, न विक्षांचक्रे । किं कुर्वन् ? दिवानसं(०निशं) अन्तरेव विहरन्, अंतःपुरे विहरन् । किंभूतः ? एकमपि क्षणान्तरं मुहूर्तान्तिरं सोढुं अक्षमः अशक्तः । किंभूतं क्षणान्तरम् ? इन्द्रियार्थपरिशून्यं, स्त्र्यादिविषयैः शून्यम् ॥६॥

७. गौरवात्० ।

स राजा प्रकृतिकाङ्क्षितं प्रजाभिलषितं च दर्शनं जातु कदाचित् मन्त्रिणां गौरवात् बहुमानात् ददौ अदात् तद्दर्शनं केवलेन चरणेन गवाक्षविवरावलम्बिना ॥७॥

८. तत्कृतप्रण० ।

कृतप्रणयतयः विहितनमस्कृतयः अनुजीविनः सेवकाः चरणं भेजिरे सिषेविरे । किंभूतं चरणम् ? कोमलात्मनखरागभूषितम् । कोमलेन सच्छायेन आत्मनखरागेण निजनख[रागेण] भूषितं शोभितम् । पुनः किंभूतम् ? नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहणम् । नवेन जालेन दिवाकरातपेन स्पृष्टस्य च्छु[रि]तस्य पङ्कजस्य तुलां सादृश्यं अधिरोहति श्रयति । बहुवचनात् कर्तरि ल्युट् । चरणोऽस्त्रियाम् ॥८॥

९. यौवनो० ।

स नृपः दीर्घिकाः गृहाणि व्यगाहत विलोडयामास । किंभूतः सः ? विगाढमन्मथः [वि]गाढः मन्मथः यस्य सः । किंभूताः दीर्घिकाः ? यौवनोन्नतविलासिनीस्तनक्षोभलोलको(क)मलाः, यौवनोन्नतानां विलासिनीनां (स्तनानां) क्षोभेण लोला[नि] कमला(नि)यत्र । पुनः किंभूताः ? तदम्बुभिः निजोदकैः गूढं गुप्तं मोहनगृहं कटिभागो यासां(सु) ताः । [1]<स्त्रपि अगाहत अनुभूतेत्यर्थः । पाषाणदिषु तटमुपरिस्थितजलं क्रियते जलक्रीडायां इति कश्चित्, तन्मते गुहानिपातः ॥>॥९॥

१०. तत्र सेक० ।

अङ्गनाः कामिन्यः तत्र दीर्घिकासु तं नृपं अधिकं यथा भवति तथा व्यलोभयन् मोहयामास । कैः ?मुखैः । किंभूतैः मुखैः ? अर्पितप्रकृतिकान्तिभिः, अर्पिता स्थापिता प्रकृतिकान्तिः येषु तानि । अर्पिता प्रकृतिकान्तिनीतानि । अर्पिता मनोज्ञा प्रकृत्या स्वभावेनैव कान्तिर्येषाम् । पुनः किंभूतैः ? सेकहृतलोचनाञ्जलै(नैः), जलकेलिवशात् हृतनेत्रकज्जलैः । पुनः किंभूतैः ? धौतरागपरिपाटलाधरैः, धौतरागा अपि परिपाटलाः रक्ताधराः येषाम् ॥१०॥

---

1 < > Not clear.

११. घ्राणकान्त० ।

प्रियासखः प्रियायुतः स राजा पानभूमिरचनाः भेजे । कः, का इव ? वासितावृतः हस्तिनीवृतः द्विपः पुष्पितः(ताः) कमलिनीरिव । किंभूताः पानभूमिरचनाः ? घ्राणकान्तमधुगन्धवाहिनीः घ्राणकान्तं सुरभित्वा[त्] सा प्रियं मधुगन्धं वहन्तीति ॥११॥

१२. सातिरेक० ।

अङ्गनाः कामिन्यः मुखासवं मुखमद्यं अभिलेषुः अकामयत पपुरित्यर्थः । किंभूतं मुखमद्यम् ? रहः एकान्ते तेन राज्ञा दत्तम् । पुनः किंभूतम् ? सातिरेकमदकारणं सातिरेक[स्य] मदस्योन्मत्तताया: कारणं हेतुं, स राजा ताभिः स्त्रीभिः उपहृतं दत्तं अपिब्रत् । किंभूतः सः ? बकुलतुल्यदोहदः बकुलसदृशदोहदः ॥१२॥

१३. अङ्कमङ्क० ।

उभे द्वे तस्य राज्ञः अङ्कं उत्सङ्गं अशून्यतां अरिक्ततां निन्यतुः । {किंभूते उभे ?} अङ्कपरिवर्तनोचिते उत्सङ्गभ्रमणयोग्ये । उभे के ? हृदयंगमस्वना मनोहरशब्दा वल्लकी वीणा च पुनः मञ्जुवाक् कोमलवाक् वामलोचना च ॥१३॥

१४. स स्वयं० ।

स राजा मनः अहरत् । किंभूतः सः ? स्वयं प्रहतपुष्करः, आस्फालितमृदङ्गमुखः । पुनः किंभूतः प्रति(कृती) प्रवीणः । पुनः किंभूतः ? लोलमाल्यवलयः, लोलानि चञ्चलानि माल्यानि वलयानि च यस्य सः । स राजा नर्तकीः अलज्जयत् लज्जयामास(?) । केषु सत्सु ? गुरुषु विद्योपदेशिषु पार्श्ववर्तिषु निकटस्थेषु सत्सु । किंभूताः नर्तकीः ? अभिनयातिलङ्घिनीः अभिनयं अङ्गविक्षेपं उल्लङ्घयन्ति अतिक्रामन्तीत्येवंशीलाः ॥१४॥

१५. चारु नृ० ।

स राजा अमराल्केश्वरौ इन्द्रधनदौ अन्वजीवत् अनुचकार । किं कुर्वन् ? परिश्रमात् स्वेदभिन्नतिलकं स्वेदमिश्रतिलकं तन्मुखं नर्तकीमुखं चुंबन् । क्व ? चारु, नृत्यविगमेऽपि अङ्गहारसमाप्तौ । किंभूतं तन्मुखम् ? प्रेमदत्तवदनानिलं प्रेम्णा राज्ञा दत्तो वदनानिलो मुखमारुतो यस्य तत् ॥१५॥

१६. तस्य भा(सा)व० ।

तस्य राज्ञः समागमाः संयोगाः बल्लभाभिः प्रेयसीभिः उपसृत्य आगत्य सामिभुक्तविषयाः अर्धभुक्तविषया चक्रिरे विदधिरे । किंभूतस्य तस्य ? नवेषु नूतनेषु

काम(म्य)वत्सु(स्तु)[षु] स्त्रीपदार्थेषु सङ्गिनः आसक्तस्य । किंभूताः समागमाः ? सावरणदृ-(द्द)ष्टसंधयः, सावरणं प्रच्छन्नं दृष्टः संधिः संप्रयोगो यत्र सः ॥१६॥

१७. अङ्गुली० ।

स राजा प्रणयिनीः प्रियतमाः वञ्चयन् एतदेव अवाप प्राप । किं प्राप ? अङ्गुलीकिसलयाग्रतर्जनं, तर्जनीतर्जनादिकं, च पुनः, वीक्षितुं(तं) कटाक्षं प्राप । किंभूतं वीक्षितम् ? भ्रू[वि]भङ्गकुटिलं; मेखलाभिः रसनाभिः असकृत् वारं वारं बन्धनं च । गोत्रस्खलनादिना सापराध[त्वं ?], ≪अनेकार्पिता नयति≫[1] काऽपि तं सारस्य(सूय ?)-मीक्षते, काऽपि काञ्च्या बध्नातीत्यर्थः । तर्जनादि सर्वं क्रियमाणं वञ्चयन्{न} जानातीत्यर्थः ॥१७॥

१८. तेन दूति० ।

तेन राज्ञा प्रियजनस्य वल्लभजनस्य कातरं दीनं वचनं शुश्रुवे अश्रावि । कासु ? सुरतवाररात्रिषु संभोगवारनिशासु । किंभूतेन राज्ञा ? पृष्टतः पश्चाद्भागे निषेदुषा, निषण्णेन । किंभूतं वचः ? दूती(ति)विदितं, दूत्या विदितम् । {पूर्वं} किंभूतस्य प्रियजनस्य ? विप्रलंभपरिशङ्किनः, विरहविधुरस्य ॥१८॥

१९. लौल्यमेत्य० ।

स राजा कथञ्चित् कदाचित् वर्तते स्म, आकुलं तस्थौ । किं कुर्वन् ? तद्वपुः तासां वपुः आलिखन् । किंभूतः सः ? अङ्गुलीक्षरणसंनिवर्तकः, अङ्गुलीनां क्षरणेन स्वेदप्रस्तावेन संनिवर्तको नष्टः, खटिकः(?) । अनुरागाद् ह्यसौ स्विद्यति । किंभूतं तद्वपुः असुलभासु नर्तकीषु अन्यगृहिणीपरिग्रहात्, प्रधानगृहिणीपरिग्रहात्, लोलं चञ्चलं अधिकतरम् ॥१९॥

२०. प्रेमगर्वित० ।

दि(दे)व्यः भामिन्यः तं महि(ही)क्षितं कृतार्थतां कृतकृत्यत्वं निन्युः प्रापुः । केन ? उत्सवविधिच्छलेन महोत्सवव्याजेन । कस्मात् ? मदनात् । किंभूतात् ? प्रेमगर्वितविपक्षमत्सरात् आयतात् [च], दीर्घात्मनः ॥२०॥[2]

---

1 Not clear. ≪ ≫

2 The comm. (on vs 2o) is incomplete

२१. प्रातरेत्य० ।

स राजा पुनः प्रणयिनीः प्रियाः अदुनोत् उप(पर्य)तापयत् । केन ? दर्शनेन परिभोगशोभिना, नखदशनक्षतानि, परिभोगशोभित्वात् । किं कुर्वन् ? प्रसादयन्, अनुनयन् । किं कृत्वा ? प्रातः एत्य आगत्य । किंभूतः [राजा ? कृतखंडनव्यथः ? अपहृतखंडनपीडः । पुनः किंभूतः ? प्राञ्जलिः, नम्रः । पुनः किंभूतः ? ग्रहणमंथरः, ग्रहणे चित्तावर्जने मंथरोऽसमर्थः ॥२१॥

२२. स्वप्नकी० ।

अवदन्त्य एव अकथयन्त्येव, अङ्गनाः तं नृपं प्रत्यभैत्सुः, दोषं अजिग्रहन्, प्रत्युपलंभनं चक्रुः । इत्यनेकैः क्रोधभिन्नवलयैः क्रोधेन भिन्ना[नि] वलया[नि] कङ्कणा[नि] यत्र । पुनः कैः ? विवर्तनैः शय्यापराङ्मुखीभावैः । पुनः कैः ? प्रच्छद(दा)न्तगलिताश्रुबिन्दुभिः, प्रच्छद(दा)न्ते पटान्ते गलिताः अश्रुबिन्दवः यत्र तैः । किंभूतं तम् ? स्वप्नकीर्तितविपक्षं, स्वप्ने स्खलितसपत्नीनाम [येन तम् ।] ॥२२॥

२३. क्लृप्त० ।

स राजा परिजनाङ्गनारतं चेति निधुवनं अन्वभूत् अनुबभूव । किं कृत्वा ? लतागृहान् लतामण्डपान् एत्य आगत्य । किंभूतान् लतागृहान् ? क्लृप्तपुष्पशयनान् रचितकुसुमशय्यान् । किंभूतः सः ? दूतीकृतमार्गदर्शनः । दूत्या कुट्टिन्या कृतं मार्गदर्शनं येन सः । किंभूतम् ? परिजनाङ्गनारतं, अवरोधभयवेपथूत्तरम् । राज्ञि(ज्ञी)दर्शनत्रास-कंपयुक्तम् ॥२३॥

२४. नाम वल्ल० ।

अङ्गनाः स्त्रियः तं राजानं ऊचुः अकथयन् । किंभूतं तम् ? गोत्रतः नामतः स्खलितम् । बत इति खेदे । मे मनः इति लोलुपं असंतुष्टम् । इतीति किम् ? ते तव वल्लभजनस्य नाम प्राप्य तस्य भाग्यमपि मया कांक्ष्यते । तद्दैववशात् यथा तत् नाम प्राप्तं तथा भाग्यमपि स्यादित्यभिप्रायः ॥२४॥

२५. चूर्ण० ।

तस्य राज्ञः उज्झितं त्यक्तं शयनं शयनीयं विभ्रमरतानि निधुवनविशेषान् अपावृणोत् व्याचख्यौ । किंभूतम् ? चूर्णबभ्रु, चूर्णेन कुंकुमादिक्षोदेन बभ्रु कपिशम् । पुनः किंभूतम् ? लुलितं तरङ्गितम् । पुनः कथंभूतम् ? स्रगाकुलं, लुलिताभिः भ्रष्टाभिः स्रग्भिः व्याकीर्णम् । पुनः किंभूतम् ? छिन्नमेखलम् रतिरणवशात् त्रुटितमेखलम् । पुनः किंभूतम् ? अलक्तकाङ्कितं, अलक्तकाङ्कं कृतं, विपरीतसुरतत्वात् ॥२५॥

२६. स स्वयं० ।

स नृपः योषितां स्त्रीणां चरणरागं स्वयं आदधे धृतवान् । विपरीतसुरतत्वात् विदधे । न तु तथा समाहितः न समाधानवान्, न सावधानो बभूव । तत्र हेतुमाह । चरणलाक्षां न निरीक्षितवान् । किंभूतः सः ? मेखलागुणपदैः लोभ्यमाननयनः अपहृतदृष्टिः । किंभूतैः ? मेखलागुणपदैः ? नितम्बिभिः । पुनः कथंभूतैः ? श्लथांशुकैः चलितांबरैः ॥२६॥

२७. चुम्बने० ।

तस्य राज्ञः सर्वतः सामस्त्येन वधूरतं नवोढासुरतं मन्मथेन्धनं कामोद्दीपनं अभूत् । किंभूतं वधूरतम् ? चुम्बनेन विपरिवर्तिताधरम् । विपरिवर्ति[तो]हि स्वमुखान्तरनिहितोऽधरो यत्र तत्, चुम्बने अन्यथाकृतोऽधरो यस्मिन् । किंभूतम् ? रसनाविघट्टने मेखलाचालने हस्तरोधि करनिवारणम् । पुनः किंभूतमपि ? विधूतेच्छमपि निवारितेच्छमपि ॥२७॥

२८. दर्पणे० ।

स राजा वधूः नवोढा ह्रीनिमीलितदृशः लज्जासञ्चितनयना चकार अकार्षीत् । कया ? स्मितमनोज्ञया हसितरम्यया च्छायया प्रतिबिंबेन । किंभूतः स राजा ? नर्मपूर्वं हास्यपूर्वं यथा भवति तथा अनुपृष्ठसंश्रयः पृष्ठावस्थितः । किंभूता वधूः ? दर्पणेषु परिभोगदर्शिनी, दशननखपदादि प्रियोपभोगावलोकिनी । स्मितरम्यच्छायया परिहासपूर्वं वपुः, पश्चाद्भागे स्थितः । प्रतिबिंबगतां च्छायां दृष्ट्वा लज्जावती जातेत्यर्थः ॥२८॥

२९. कण्ठसक्त० ।

प्रियाः योषितः तं नृपं निशात्ययविसर्गचुम्बनं रात्र्यवसानचुम्बनं प्रार्थयन्तः प्रार्थयामासुः । किंभूताः प्रियाः ? शयनोत्थिताः तल्पोत्थिताः । किंभूतं तम् ? प्रियस्य अग्रपादयोः न्यस्तपादतलं प्रियस्य पादाग्रे क्षिप्तं स्वपादतलं यत्र । न्यस्ते निहिते पादतले यत्र । अन्यथा हि नार्यः परिष्वङ्गो दुर्घटः स्यात् । कथं यथा स्यात् ? कण्ठसक्तमृदुबाहुबन्धनं यथा स्यात् । कण्ठे सक्तं मृदूनां बाहूनां बन्धनमाश्लेषो यत्र । प्रियकण्ठे लग्नमृदुबाहुबन्धनं अवनतगात्रत्वात् । प्रातः समये संवादार्थं चुम्बनं क्रियत इति प्रौढा जातिरिति कश्चित् । "निशावसाने यदि चुंबनादि प्रयुज्य यायान्मदनोऽस्य दासः ।" नयनगलकपोलदन्तवासोन्मुखान्तस्तनयुगलललाटानां चुम्बनस्थानमाहुः । दधति जघननाभिमूलकक्षासु, चुम्बनव्यतिकरमुखमुच्चैः देशसात्म्येन(?) ललाट इति रहस्ये[1] ॥२९॥

1. Jina. seems to quote from 'रतिरहस्य'. The text is not clear.

३०. [प्रेक्ष्य०]...स...युवा० ।

तरुणः तथा न पिप्रिये, न तुतोष । किं कृत्वा ? आत्मनः स्वस्य राजवेशं(षं) दर्पणतलस्थं वीक्ष्य अवलोक्य । यथा परिभोगमण्डनं उपभोगालङ्कारं प्रेक्ष्य पिप्रिये प्रीतः । किंभूतं परिभोगमण्डनम् । व्यक्तलक्ष्म प्रकटदशनादिचिह्नम् । किंभूतं राजवेषम् ? अतिसक्त(० शक्र)शोभिनं, शक्रमतिक्रम्य शोभमानम् ।।३०।।

३१. मित्रकृत्य० ।

हे शठ ! ते तव पलायनच्छलानि नासन(?)मिशानि[1] अञ्जसा सामस्त्येन शीघ्रं वा विद्मः जानीमः इति प्रियाः तं राजानं रुरुधुः अरौत्सुः । किंभूतं तम् ? पार्श्वतः समीपात् प्रस्थितं व्रजन्तं अन्यागं तु प्रस्थितम् । किं कृत्वा ? मित्रकृत्यं सुहृत्प्रयोजनं अपदिश्य व्याजीकृत्य । पुनः किंभूतम् ? अनवस्थितं निरवधानम् ।।३१।।

३२. तस्य० ।

तस्याः योषितः स्त्रियः तस्य राज्ञः बृहद्भुजान्तरं विशालवक्षःस्थलं अद्य(ध्य)से-(शे)रत अधितस्थुः । कण्ठसूत्रं हारादि अपविध्य अपास्य । किंभूताः योषितः ? निर्दयरतिश्रमालसाः कठिननिधुवनखेदनिःसहाः । किंभूतं बृहद्भुजान्तरम् ? पि(पी)वरस्तन-विलुप्तकुंकुमं, स्थूलस्तनविलुप्तचन्दनम् । पुरुषायितं कृत्वा तास्तत्र स्वाप्सुरित्यन्ये ।।३२।।

३३. संगमाय० ।

संगमाय अङ्गनाः स्त्रियः तं राजानं चक्रुषुः आचक्रुषुः । इतीति किम् ? हे कामुक ! नः अस्मान् त्वं न वञ्चयिष्यसि । किंभूताः अङ्गनाः ? पुरोगताः । स्वय-मग्रतो गताः तं रुरुधुरित्यर्थः । किंभूतं तम् ? गूढचारिणम् । क्व ? निशि, रात्रौ । किमर्थम् ? संगमाय वनितेतरसंगतये । पुनः किंभूतम् ? चारु(र)दूतिकथितम् । किंभूतः ? तमोवृतः ध्वान्ते संकेतस्थः । रात्रौ संभोगाथ गूढचारिणं तम् । हे कामुक ! अस्मान् कथं वञ्चयिष्यसि इति वदन्त्यस्ताः गृहं नेत्य[2] ≤मेनता विदुरित्याह ।≥ । चाररूपया दूत्या कथितं, छद्मनाऽयमभिसरतीति दूत्या निवेदितं, स्वयमग्रतो गतास्तं रुरुधुरित्यर्थः ।।३३।।

३४. योषिता० ।

असौ राजा कुमुदाकरोपमां आरुरोह आययौ । किं कुर्वन् ? योषितां वनितानां स्पर्शनिर्वृतिं स्पर्शसुखं अनाप्नुवन् अलभमानः । कस्य, कासामिव ? उडुपतेः चन्द्रस्य

---

1 A local touch ? Not Sanskrit.

2 Not clear. ≤ ≥; could it be–'एन ता विदुरिन्याह ?

अर्चिषामिव, यथा उडुपतेः अर्चिषां [स्पर्शं] प्राप्य कुमुदाकरः रात्रौ पुष्यति दिवा संकुचति । किंभूतः असौ ? रात्रिजागरपरः । पुनः किंभूतः ? दिवाशयः ॥३४॥

३५. वेणुना० ।

विजिह्मनयनाः प्रणयकोपेन कुटिलनेत्राः तं नृपं ऐक्षन्त । किंभूताः विजिह्मनयनाः ? उभयेन वंशवीणया(०णाभ्यां)वेजिताः पीडिताः । [1] <सत्यस्था नेत्राणि कुटिलकृत्यैक्षन्त> त्वत्कृतोऽयमुपद्रवोऽस्माकम् । पुनः किंभूताः ? दशनपीडिताधराः । केन ? वेणुना । पुनः किंभूताः ? नखपदाङ्कितोरसः, नखक्षतचिह्नितवक्षसः । कया ? वीणया । पुनः किंभूताः ? शिल्पकार्यैः, शिल्पं कुर्वन्तीति 'कर्मण्यण्'।[2] ॥३५॥

३६. अङ्गसत्त्व० ।

स राजा मिथः एकान्ते मित्रसंनिधौ मित्राणां समीपे दर्शयन् प्रयोक्तृभिः नाट्याचार्यैः सह संजहर्ष स्पर्धां चक्रे परस्परं । किं कृत्वा ? स्त्रीषु वृत्तं(नृत्यं) अवधार्य ज्ञात्वा। किंभूतं नृत्यम् ? अङ्गसत्त्ववचनाश्रयं; आङ्गिकं नृत्यं हस्तात् अभिनयासादितं, स्तंभस्वेदादिकं [सात्त्विकं] वाच्यं, वाच्यं(=वचनाश्रयं) गीतादिकम् । किंभूतैः प्रयोक्तृभिः ? प्रयोगनिपुणैः । लक्ष्यलक्ष्याभ्यां नाटकनाटिकादिप्रयोगज्ञैः ॥३६॥

३७. [अंसल०] ।

तस्य राज्ञः विहारविभ्रमः अभूत् बभूव । कस्याम् ? प्रावृषि घनागमेषु, कृत्रिमाद्रिषु क्रीडापर्वतेषु, प्रमदबर्हिणेषु प्रमत्तमयूरेषु । किंभूतस्य, तस्य ? अंसलम्बिकुटजार्जुनस्रजः {अंसलंबिकुटजार्जुनस्रजः} अंसलंबिनः स्कंधावलग्नाः कुटजार्जुनस्रजः मालाः यस्य सस्तस्य । पुनः किंभूतस्य ? अंगरागिणः । केन ? नीपरजसा कदंबरेणुना ॥३७॥

३८. विग्रहाच्च० ।

स राजा न तत्वरे न त्वरां चक्रे न व्यग्रोऽभूत् । किं कर्तुम् ? अबला प्रेयसी अनुनेतुं प्रसादयितुम् । किंभूता अबला ? विग्रहात् प्रणयकलहात् शयने शय्यायां पराङ्-मुखी । स राजा ताः कान्ताः आचकाङ्क्ष अभिललाष । किं कृत्वा ? विवृत्य संमुखी-भूय । किंभूतास्ताः ? गण(घन)शब्दविक्लवाः, मेघगर्जितभीरुकाः । पुनः किंभूताः ? भुजान्तरं बाहुमध्यं विशतीः प्रविशन्तीः ॥३८॥

३९. कार्तिकीषु० ।

स राजा चन्द्रिकां ज्योत्स्नां अन्वभुङ्क्त अनुबुभुजे । कासु ? यामिनीषु कार्तिकीषु कौमुदीषु । किंभूतः सः ? सवितानहर्म्यभाक् । पुनः किंभूतः ? ललिताङ्गनासखः मनोज्ञ-

1 < > Not clear.

2 Jina. quotes व्याकरण, पाणिनि सूत्र ३. २. १.

विलासिनीसखः । किंभूतां चन्द्रिकाम् ? सुरतक्लमापहां, सुरतखेदापहाम् । पुनः किंभूताम् ? मेघमुक्तविशदां, मेघमुक्तनिर्मलाम् ॥३९॥

४०. सैकतं० ।

स राजा सरयूं व्यलोकयत् ऐक्षत । कैः ? सौधजालविवरैः । किंभूतां सरयूम् ? सैकतं तटं विवृण्वतीं प्रकटयन्तीम् । सैकतं कमिव ? श्रोणिबिम्बमिव, जघनमिव । पुनः किंभूतां सरयूम् ? हंसमेखलाम् । हंसाः एव मेखलाः यस्याः सा, ताम् । पुनः किंभूताम् । स्वप्रियाविलसितानुकारिणीं, निजकान्ताविभ्रमविडंबिनीम् ॥४०॥

४१. मर्मरैः० ।

सुमध्यमाः, सुष्ठु मध्यं यासां ताः सुमध्यमाः तं राजानं जह्रुः अलोभयन् । कैः ? निवसनैः वस्त्रैः । किंभूतैर्निवसनैः ? हैमनैः हिमसंबंधिभिः । पुनः किंभूतैः ? अगुरुधूमगंधिभिः अगुरुधूमधूपितैः । पुनः किंभूतैः ? एकतः एकत्रभागे बद्धहेमरसनैः न्यस्तकनकमेखलैः । किंभूतं तम् ? आग्रथनमोक्षलोलुपम् । आग्रथने मोक्षे ग्रन्थिनिरासे लोलुपं साभिलाषम् ॥४१॥

४२. अर्पित० ।

तस्य राज्ञः शिशिररात्रयः साक्षितां साक्षित्वं ययुः जग्मुः । केषु ? गर्भवेश्मसु अभ्यन्तरगृहेषु । किंभूतेषु गर्भवेश्मसु ? निवातकुक्षिषु निवातोदरेषु । किंभूताः शिशिर-रात्रयः ? अर्पितस्तिमिदीपदृष्टयः । निवातत्वात् अर्पिता रम्या स्तिमिता निश्चला दीपा एव दृष्टयो यासु ताः । पुनः किंभूताः ? सर्वसुरतान्तरक्षमाः निखिलनिधुवनविशेषयोग्याः ॥४२॥

४३. दक्षिणेन० ।

अङ्गनाः स्त्रियः दुरुत्सहवियोगं दुःसहविरहं तं राजानं अन्वनैषुः प्रसादयामासुः । किं कृत्वा ? सपल्लवं चूतकुसुमं प्रेक्ष्य अवलोक्य । किंभूतं चूतकुसुमम् ? दक्षिणेन पवनेन मलयानिलेन संभृतं जनितम् । किंभूताः अङ्गनाः ? अवकीर्णविग्रहाः, {अ}निरस्तमानाः मानं त्यक्त्वा तमनुकूलं चक्रुः ॥४३॥

४४. ताः स्व० ।

स राजा प्रियाणां बाहुभिः कंठबंधनं अवाप्य प्राप्य । कस्मात् ? भयच्छलात् । कथं यथा स्यात् ? मुक्तरज्जु निबिडं यथा स्यात् । मुक्ता त्यक्ता दोलाधारभूता रज्जुर्यस्मिन् कर्मणि तत् । पतनभयव्याजेन तमाश्लिष्य इत्यर्थः । किं कृत्वा ? ताः

युवतयः स्वं अङ्कं नित्योत्सङ्गं अधिरोप्य स्थाप्य । किं कुर्वन् ? परिजनप्रेरितया दोलया प्रेंखयन् भ्रमयन् । स्त्रियः स्वकीयं क्रोडमारोप्य परिजनैः कृतवल्गया दोलया प्रेषयन् ≪स्नास्वेदत्यर्था≫[1] भयाद्गीतिं ≪व्यानिद्रुत्य ?≫[1] प्रियाणां बाहुभिः दृढमालिङ्गनं प्राप ॥४४॥

४५. तं पयो० ।

प्रियास्तं प्रियं सिषेविरे भेजिरे । कैः ? ग्रीष्मवेषविधिभिः घर्मनेपथ्यसंविधानैः । किंभूतैः ? ग्रीष्मवेषविधिभिः ? पयोधरनिषिक्तचन्दनैः । पुनः किंभूतैः ? मौक्तिकग्रथितचारुभूषणैः । पुनः किंभूतैः ? श्रोणीलंबिमणिमेखलैः एतेषां च सितत्वात् ॥४५॥

४६. यत्स० ।

स राजा यत् आसवं भ(ल)ग्नसहकारं [पपौ] । पुनः किंभूतम् ? रत्नपाटलसमागतं तेन आसवेन तस्य राज्ञः चित्तयोनिः मन्मथः पुनर्भ(र्न)वः अभवत् बभूव । किंभूतश्चित्तयोनिः ? मधुनि{स}र्गमात् वसंतापगमात् कृशः दुर्बलः ॥४६॥

४७. एवं० ।

स पार्थिवः एवं अमुना प्रकारेण ऋतून् अन्ववाहयत् अनैषीत् । किं कुर्वन् ? इन्द्रियसुखानि निर्विशन् उपभुंजानः । किंभूतः पार्थिवः ? अन्यकार्यविमुखः राजकार्यादिविमुखः । पुनः किंभूतः ? अनङ्गतत्परः । किंभूतान् ऋतून् ? आत्मलक्षणनिवेदितां, आत्मलक्षणैः जलदकुटजादिभिः निवेदितां कथिताम् ॥४७॥

४८. तं प्रम० ।

अन्यपार्थिवाः प्रमत्तमपि तं राजानं आक्रमितुं न शेकुः न शक्ताः बभूवुः । कस्मात् ? प्रभावतः प्रतापात् । तु पुनः रतिरागसंभवः आमयः रोगः तं राजानं अक्षिणोत् बबाधे । कः कामिव बबाधे ? दक्षशापः चन्द्रमिव । कथा । स हि रोहिण्यामेव सं[र]क्त इति दुहितास्नेहवशात् बोध्यमानोऽपि तदीयं वचनं[न]अगणयत् तदाप्रभृति 'क्षयमाप्नुहि' [इति]दक्षप्रजापतिना शप्तः ॥४८॥

४९. दृष्ट० ।

स राजा तं सङ्गवस्तु स्त्रीव्यसनं नात्यजत् । किंभूतं सङ्गवस्तु ? दृष्टदोषम् । पुनः किंभूतम् ? भिषजां अनास्पदं अगोचरं, हि यतः इन्द्रियगणः ततो विषयेभ्यः दुःखेन क्लेशेन वार्यते । किंभूतः इन्द्रियगणः ? स्वादुभिः मुखमधुरैः विषयैः शब्दादिभिः कृतः अथवा राजविशेषणं क्रियते ॥४९॥

---

1. Not clear.

५०. तस्य० ।

तस्य राज्ञः सपदि शीघ्रं हानिः क्षयः, रोगेण परिक्षीणता कामयानसमवस्थया विरहिणीसमदशया तुलां सादृश्यं आययौ आजगाम । केन ? यक्ष्मणा क्षयरोगेण । किंभूता हानिः ? पाण्डुवदना । पुनः किंभूता ? अल्पभूषणा अल्पानि भूषणानि यत्र, असामर्थ्यात् । पुनः किंभूता ? सावलम्बगमना कार्श्यत्वात् यष्ट्यादिकेन सह गमनं यत्र । पुनः किंभूता ? मृदुस्वना । मृदुस्वनः शब्दो यत्र । तुल्ययोगे तृतीया ॥५०॥

५१. व्योम० ।

राज्ञी(ज्ञि) क्षयातुरे क्षयरोगेणातुरे सति तत्कुलं रघुकुलं, व्योम पश्चिमकलास्थितेन्दु, पश्चिमकलायां स्थितः इन्दुर्यत्र तत् । चतुर्दश्यां इन्दुर्यस्मिन् तद्व्योममे(मि)व तत्कुलम् । पुनः कमिव ? घर्मकालपल्वलमिव । किंभूतं घर्मपल्वलम् । पङ्कशेषम् । पुनः दीपभाजनमिव । किंभूतं दीपभाजनम् ? वामनार्चिः ह्रस्वदीप्ति ॥५१॥

५२. गूढ० ।

पार्थिवः राजा एषु दिवसेषु गूढं प्रच्छन्नं कर्म पुत्रजन्मने साधयति । अस्य राज्ञः मन्त्रिणः शश्वत् निरंतरं अघशङ्किनीः प्रजाः, 'नृपो विपन्नः' इति पापं चिन्तयन्तीः प्रजाः इति ऊचुः । किंभूताः मन्त्रिणः ? अदर्शितरुजः अप्रकटितव्याधयः ॥५२॥

५३. स त्वने० ।

स तु राजा गदं क्षयरोगं न अत्यगात् न जिगाप । कः, कमिव ? [प्र]दीपो वायुमिव । किं कृत्वा ? अनेकवनितासखोऽपि सन् अनेकयुवतीसहायोऽपि पावनीं पवित्रसंततिं सन्तानं अनवलोक्य अदृष्ट्वा । किंभूतं गदम् ? वैद्ययत्नपरिभाविनं अचिकित्स्यम् । पुत्रमलब्ध्वेव मृत इत्यर्थः ॥५३॥

५४. तं गृहो० ।

मन्त्रिणस्तं गतायुषं गृहोपवने संभृते ज्वालिते शिखिनि अग्नौ गूढं गुप्तं आदधुः निचिक्षिपुः । किं कृत्वा ? रोगशान्तिं रोगोपशमं अपदिश्य व्यपदिश्य, चिकित्सां व्याजीकृत्य, तं विचिक्षिपुः अग्निसंस्कारं चक्रुरित्यर्थः । किंभूताः मन्त्रिणः ? पुरोधसा वसिष्ठेन संगताः मिलिताः । किंभूतेन पुरोधसा ? पश्चिमक्रतुविदा ॥५४॥

५५. तैः कृत० ।

तैः मन्त्रिभिः शीघ्रं तस्य अग्निवर्णस्य सहधर्मचारिणो राज्ञी नराधिपश्रियं राज्यलक्ष्मीं प्रतिपादयत अङ्गीकारयामास । किंभूता सहधर्मचारिणी ? साधु सम्यक् दृष्टं शुभ-

गर्भलक्षणं यस्याः सा । किंभूतैस्तैः ? कृतप्रकृतिमुख्यसंग्रहैः कृतः प्रकृतिमुख्यानां सेनापतिकोशाध्यक्षादीनां संग्रहो, [यैः] तैः ॥५५॥

५६. तस्याः० ।

तस्याः गर्भः निर्वापितः समाश्वासितः । केन ? शिशिरेण शीतलेन । वंशाभिषेकपयसा कुलोचिताभिषेकपयसा । किंभूतेन कनककुंभमुखोज्झितेन सुवर्णघटवदननिर्गतेन । किंभूतः गर्भः ? उष्णैः विलोचनजलैः बाष्पजलैः प्रथममभितप्तः, पूर्वमभितप्तः, तस्मात् तथाविधनरेन्द्रविपत्तिशोकात् तथाविधस्य रोगिणो नरेन्द्रस्य विपत्तिशोकस्तस्मात् ॥५६॥

५७. तं भावा० ।

राज्ञी भर्तुः राज्यं विधिवत् अशिषत् पालयामास । कैः सार्द्धम् ? मौलैः क्रमागतैः स्थविरसचिवैः सार्द्धम् । सा राज्ञी बीजमुष्टिं दधाना सती बभौ शुशुभे । केव ? क्षितिरिव भूमिरिव । कस्मै प्रयोजनाय ? प्रसवसमयाकांक्षिणीनां प्रजानां भावाय । किंभूता राज्ञी ? हेमसिंहासनस्था सुवर्णसिंहासनस्था । पुनः किंभूता ? अव्याहताज्ञा अस्खलिताज्ञा ॥५७॥

इति भट्टारक जिनचंद्रसूरिशिष्य आचार्यश्री जिनसमुद्रविरचिते रघुकाव्यान्वयमात्रे वंशप्रतिबन्धो नाम एकोनविंशतितमः सर्गः ॥१९॥

अथ संवत्सराष्टादशशतचतुर्विंशत्यौ भाद्रपदे शुक्लपक्षे त्रयोदश्यां रविदिने चातुर्मासे पट्टाल्यनामनगरे राघवी टीका सम्पूर्णा लिख्यते । शुभमस्तु लेखकपाठकयोः ॥

Appendix I

Squeence of Verses as seen in Jina. and Malli.

सर्ग १		सर्ग २	
Jina.	Malli.	Jina.	Malli.
३६	३५	७२	७३
३८	३७	७३	७४
३९	४२	७४	७२
४०	४५	सर्ग ३	
४१	४३	Jina.	Malli.
४२	३८	३ totally extra	—
४३	३९	४ totally extra	—
४४	४०	५	३
४५	४१	६	४
४६	४४	७	५
४७	४६	८	६
४८	४७	९–१०	८
४९	४८	११	७
५०	४९	१२	९
५३	५०	१३	१०
५४	५३	१४	११
५५	५४	१५	१२
५६	५५	१६	१३
५७	५६	१७	१४
५८	५७	१८	१५
५९	५८	१९	१६
६०	५९	२० totally extra	—
६१	६०	२१	१७
६२	६१	२२	१८
६३	६२	२३	१९
६४	६३	२४	२०
६५	६४	२५	२१
६६	६५	२६	२२
६७	६६+६७	२७	२३

Jina.	Malli.
२८	२४
२९	२५
३०	२६
३१	२७
३२	२८
३३	२९
३४	३०
३५	३१
३६	३२
३७	३३
३८	३४
३९	३५
४०	३६
४१	३७
४२	३८
४३	३९
४४	४०
४५	४१
४६	४२
४७	४३
४८	४४
४९	४५
५०	४६
५१	४७
५२	४८
५३	४९
५४	५०
५५	५१
५६	५२
५७	५३
५८	५४
५९	५५
६०	५६

Jina.	Malli.
६१	५७
६२	५८
६३	५९
६४	६०
६५	६१
६६	६२
६७	६३
६८	६४
६९	६५
७०	६६
७१	६७
७२	६८
७३	६९
७४	७०
७५	७१

सर्ग ४

Jina.	Malli.
२ (extra)	—

सन्यस्त० ॥

This verse is a variant shown under Malli. ४/२ p. ७२ N.S Edn. Bombay 1882, Edited by K. P. Parab.

Jina.	Malli.
९	२
१०	१३
११	१२
१२	१०
१३	९
१४	११
१५	१४
१६ (extra)	—

निर्विष्ट० ॥

This verse is a variant

shown under Malli. ४/१५
p. ७६ ibid,

Jina.	Malli.
१७	१५
१८	६
१९	१७
२०	१६
२१	१८
२२	१९
२३–२४	२१+२०

Jina. has jointly commented on 23, 24.

२५	२२
२६	२३
२७	२४
२८	२५
२९	२६
३०	२७
३१	२८
३२	२९
३३	३०
३४ (extra)	—

read as a क्षेपक, between ३०–३१ Malli. p. ८० ibid

३५	३१
३६	३२
३७	३३
३८	३४
३९	३५
४०	३६
४१	३७
४२	३८
४३	३९
४४	४०

Jina.	Malli.
४५	४१
४६ (extra)	—

read as a क्षेपक between ४१–४२ Malli. p. ८२ ibid

४७	४२
४८	४३
४९	४४
५०	४५
५१	५४
५२	४६
५३	४७
५४ (extra)	—

read as a क्षेपक between ४६–४७ Malli, p. ८४, ibid

५५	४८
५६	४९
५७	५०
५८	५१+५२
५९	५३
६०	५५
६१	५७
६२	५६
६३	५८
६४	५९
६५	६०
६६	६१
६७	६२
६८	६३
६९	६४
७०	६५
७१	६६
७२ (extra)	—

This verse is read as a

क्षेपक under Malli. ४/६६–६७, p. ८९ ibid

Jina.	Malli.
७३	६७
७४	६८
७५	६९
७६	७०
७७	७१
७८	७२
७९	७३
८०	७५
८१	७४
८२	७६
८३	७७
८४	७८
८५	७९
८६	८०
८७	८१
८८	८२
८९	८३
९०	८४
९१	८५
९२	८६
९३	८७
९४	८८

सर्ग ५

Jina.	Malli.
४५ (extra)	—

This verse is read as a variant under Malli ५/४५ p. १०७, ibid

Jina.	Malli.
४६	४५
४७ (extra)	—

Read as a variant under Malli. ५/४६, P. १०८, ibid.

४८ see notes under ५/४६, in appendix II

Jina.	Malli.
४९	४६
५०	४७
५१	४८
५२	४९
५३	५१
५४	५०
५५	५२
५६	५३
५७	५४
५८	५५
५९	५६
६०	५७
६१	८५
६२	५९
६३	६०
६४	६१
६५	६२
६६	६३
६७	६४
६८	६५
६९	६६
७०	६७
७१	६८
७२	६९
७३–७४	७०

see footnote under Jina. ५/७३, ७४ in the printed text, p. ६७

Jina.	Malli.
७५	७१

Jina.	Malli.
७६	७२
७७	७३
७८	७४
७९ (extra)	—

read as a variant under Malli. ५/७५ p. ११७

Jina.	Malli.
८०	७५
८१	७६
८२	७७
८३	७८

सर्ग ६

Jina.	Malli.
१ (extra)	—
२	१
३	२
४	३
५	४
६	५
७	६
८	७
९, १०	८, १०
११	९
१२	११
१३	१२
१४	१३
१५	१४
१६	१५
१७	१६
१८	१७
१९	१८
२०	१९
२१	२०
२२	२१
२३	२२
२४	२३
२५	२४
२६	२५
२७	२६
२८	२७
२९	२८
३०	२९
३१	३०
३२	३१
३३	३२
३४	३३
३५	३४
३६	३५
३७	३६
३८	३७
३९	३८
४०	३९
४१	४०
४२	४१
४३	४२
४४	४३
४५	४४
४६	४५
४७	४६
४८	४७
४९	४८
५०	४९
५१	५०
५२	५१
५३	५२
५४	५३
५५	५४

Jina.	Malli.
५६	५५
५७	५६
५८	५७
५९	५८
६०	५९
६१	६०
६२	६१
६३	६२
६४	६३
६५	६४
६६	६५
६७	६६
६८	६७
६९	६८
७०	६९
७१	७०
७२	७१
७३	७२
७४	७३
७५	७४
७६	७५
७७	७६
७८	७७
७९	७८
८०	७९
८१	८०
८२	८१
८३	८२
८४	८३
८५	८४
८६	८५
८७	८६

Jina. Malli.

सर्ग ७

There is no difference in the sequence of verses.

सर्ग ८

Jina.	Malli.
५	५–६
६	७
७	८
८	९
९	१०
१०	११
११	१२
१२	१३
१३	१४
१४	१५
१५	१६
१६	१७
१७	१८
१८, १९ } extra verses not read in Malli.	—
२०	१९
२१ (extra) read as a क्षेपक under Malli, ८/१९–२० p. १६२, ibid.	--
२२	२०
२३	२१
२४	२२
२५	२३
२६	२४
२७	२५
२८	२६
२९	२७
३०	२८

Jina.	Malli.	Jina.	Malli.
३१	२९	६५	५९
३२	३०	६६	६०
३३	३१	६७	६१
३४	३२	६८	६२
३५	३३	६९	६३
३६	३४	७०	६४
३७	३५	७१	६५ (&६७)
३८	३६	७२	६६
३९	३७	७३	६८
४० (extra)	—	७४	६९
४१	३८	७५	७०
४२	३९	७६	७१
४३	४०	७७	७२
४४	४१B	७८	७३, ७४
४५	४१A	७९	७५
४६	४२	८०–८१	७६
४७	४३	८२	७७
४८	४४	८३	७८
४९	४५	८४	७९
५०	४७	८५	८०
५१	४६	८६	८१
५२	४८	८७	८२
५३	४९	८८	८३
५४	५०	८९	८४
५५	५१	९०	८५
५६	५२	९१	८६
५७	५३	९२	८७
५८	५४	९३	८८
५९	५५	९४	८९
६०	५६	९५	९०
६१, ६२, ६३, ६४	५७, ५८	९६	९१
		९७	९२
		९८	९३

Jina.	Malli.
९९	९४
१००	९५

सर्ग ९

Jina.	Malli.
१० (extra)	—
read as a क्षेपक under Malli- ९/१०–११; p. १८५ ibid	
११	११
१२	१०
१३	१२
१४	१३
१५	१४
१६	१५
१७	१६
१८	१७
१९	१८
२०	१९
२१	२३
२२	२०
२३	२१
२४	२२
२५	२४
२६	२५
२७ (extra)	—
read as a क्षेपक under Malli. ९/२४–२५ p. १८९, ibid	
२८	२६
२९	३२
३० (extra)	—
read as a क्षेपक under Malli. ९/३३, p. १९१, ibid	
३१	३३
३२	२७
३३	२८

Jina.	Malli.
३४	२९
३५ (extra)	—
read as a क्षेपक under Malli. ९/३० p. १३०, ibid	
३६ (extra)	—
read as a क्षेपक under Malli. ९/३५–३६, p. १९१, ibid	
३७ (extra)	—
read as a क्षेपक under Malli. ९/३५–३६ p. १९१ ibid	
३८	३०
३९ extra,	
read in Jina. only	—
४०	४३
४१	३४
४२	३५
४३	३६
४४	३७
४५	३८
४६	३९
४७	४०
४८	४१
४९	४५
५०	४६
५१	४७
५२	४५
५३	४३
५४, ५५ }	४४
५६ extra, read in Jina. only	
५७ extra	—
५८	४८
५९	४९

Jina.	Malli.
६०	५०
६१	५१
६२	५२
६३	५३
६४	५४
६५	५५
६६	५६
६७	५७
६८	५८
६९	५९
७०	६०
७१	६१
७२	६२
७३	६३
७४	६४
७५	६५
७६	६६
७७	६७
७८	६८
७९	६९
८०	७०
८१	७१
८२	७२
८३	७३
८४	७४
८५	७५
८६	७६
८७	७७
८८	७८
८९	७९
९०	८०
९१	८१
९२	८२

सर्ग १०

Jina.	Malli.
३ (extra)	—
४	३
५	४
६	५
७	६
८	७
९	८
१०	९
११	१०
१२	११
१३	१२
१४	१३
१५	१४
१६	१५
१७	१६
१८	१७
१९	१९
२०	१८
२१ extra– read as a 'क्षेपक' under Malli. १०/१८–१९ p. २१०, ibid.	—
२२	२०
२३	२१
२४	२२
२५	२३
२६	२४
२७	२५
२८	२६
२९	२७
३०	२८

Jina.	Malli.
३१	२९
३२	३०
३३	३१
३४	३२
३५	३३
३६	३४
३७	३५
३८	३६
३९	३७
४०	३८
४१	
४२	
४३	
४४	४२
४५	४३
४६	४४
४७	४५
४८	४६
४९	४७
५०	४८
५१	४९
५२	५०
५३	५१
५४	५२
५५	५३
५६	५४
५७	५५
५८	५६
५९	५७
६०	५८
६१	५९
६२	६०
६३	६१

Jina.	Malli.
६४	६२
६५	६३
६६	६४
६७	६५
६८	६६
६९	६७
७०	६८
७१	६९
७२	७०
७३	७१
७४	७२
७५	७३
७६	७४
७७	७५
७८	७६
७९	७७
८०	७८
८१	७९
८२	८०
८३	८१
८४	८२
८५	८३

सर्ग ११

Jina.	Malli.
५	६
६	५
१३	१४
१४	१५
१६	१७
१७	१८
१८	१९
१९	२०
२०	२१

J!na.	Mall!.
२१	१३
४७	४८
४८	४९
४९	५०
५०	५१
५१	५२
५२	५३
५३	५४

५४ extra
read as a क्षेपक under Malli.
११/५६-५७ p. २३८, ibid

५५	५६
५६	५७
५७	५८
५८	५९
५९	६०
६०	६१
६१	६२
६२	६३
६३	६४
६४	६५
६५	६६
६६	६७
६७	६८
६८	६९
६९	७०
७०	७१
७१	७२
७२	७३
७३	७४
७४	७५
७५	७६
७६	७७

Jina.	Malli.
७७	७८
७८	७९
७९	८०
८०	८१
८१	८२
८२	८३
८३	८४
८४	८५
८५	८६
८६	८७
८७	८८
८८	८९
८९	९०
९०	९१
९१	९२
९२	९३

सर्ग १२

८० } extra	—
८१ }	—

These verses are read as क्षेपकs under Malli. १२/७९-८०; p. २६२, Ibid.

८२	८०
८३	८१
८४	८२
८५	८३
८६	८४
८७	८५
८८	८६
८९	८७
९०	८८
९१	८९
९२	९०

Jina.	Malli.
९३	९१
९४	९२
९५	९३
९६	९४
९७	९५
९८	९६
९९	९७
१००	९८
१०१	९९
१०२	१००
१०३	१०१
१०४	१०२
१०५	१०३
१०६	१०४

सर्ग १३

Jina.	Malli.
५४	५७
५५	५५
५६	५६
५७	५४
७४	७५
७५	७४

सर्ग १४

Jina. Malli.

There is no difference in sequence of veres.

सर्ग १५

Jina. has quoted the श्लोक-प्रतीक, viz 'आदिदेश॰' at १५.६ which is also Malli १५.६ But Jina. has commented on १५.७ i.e. यः कश्चन (which is Malli. १५.७). So, then onwards there is a difference of one which continues up to Jina. १५/३२, which is Malli. १५/३३. Then Malli. १५/३४ i.e. रामस्य मधुरं. etc. is not taken note of by Jina. So Jina १५/३३ i.e. इतरेऽपि॰ becomes Malli. १५/३५. This difference of two continues upto Jina. १५/६७ which is Malli. १५/६९ Then Jina. १५/६८ is an extra verse read as a क्षेपक under Malli. १५/७१-७२ p. ३२० ibid. So, the difference remains of just one number. Jina. १५/६९ is Malli. १५/७० This goes on and Jina. १५/८२ viz. तत्र नाग॰ is Malli १५/८३. Jina. १५/८३ is Malli १५/८४. Then Jina. १५/८४ viz. अथ॰ is totally extra, read in Jina. only. Then onwards the numbers are identical

सर्ग १६

There is no difference in sequence of verses between Malli. & Jina. in this सर्ग.

सर्ग १७

Jina.	Malli.
२९	३०

Jina.	Malli.
३०	२९
५२	५३
५३	५४
५४	५२

Jina. १७/७६-७७ are taken up together, which are identical with Malli. १७/७६/७७ The rest is identical.

सर्ग १८

Jina.	Malli.
१७ (extra)	—

read as a क्षेपक under Malli. १८/१६-१७, p. ३६७ ibid.

Jina.	Malli.
१८	१७
१९	१८
२०	१९
२१ extra	—

read as a क्षेपक between Malli. १८/१९-२० p. ३५८, ibid. Now onwords the numbers in Malli are less by two, till the end, i.e. Jina. १९/५५ is Malli. १९/५३.

सर्ग १९

There is no difference in the sequence of verses between Jina. & Malli. in this सर्ग.

Appendix II

Variants seen in Jinasamudra and Mallināatha (N. S. Edn. Bombay, Parab; 1882)

सर्ग १

Jina No.	Jinasamudra	Mallināatha
२	मोहादु० †	लोभादु० §
९	प्रमोदितः§	प्रचोदितः §
११	मनीषिणां, महीभृतां § †	Both read in 'टीका'
१४	× विभाविना §	० भिभाविना †
१५	प्रारंभस० §	आरंभस०
१६	अधिगम्य §	अभिगम्य †
१९	× सेनापरिच्छदस्त §	सेना परिच्छदस्त †
	× व्यापृता †	अकुण्ठिता §
२०	संभृतमंत्रस्य §	संवृतमंत्रस्य †
२१	अर्थान् †	अर्थम् §
२८	दष्टोऽङ्गुष्ठ इवाहिना §	अङ्गुलीवोरगक्षता †
३५	'३४-३५' श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते ।	
	इच्छता §	ईप्सिता § †
	कोसला § †	कोशला §
३७	एकस्यन्दनम् §	एकं स्यन्दनम् †
३८	सेनापरिगतौ §	सेनापरिवृतौ †

† accepted by Rewaprasad (= R.) कालिदासग्रंथावली, 2nd Edn. 1986, Varanasi.

§ shown by Rewaprasad in the foot-note, ibid,

☐ Not mentioned by R. even in foot-note, ibid.

It may be noted that R. has not looked into Jina.'s comm. but quite often, but not always, Jina.'s readings tally with the पाटन (हेमचन्द्राचार्य ज्ञानभण्डार) mss. mentioned by R. in his second edition. R. has not looked into the N. S. Edn. Bombay; Parab; 1882, also.

३९		अस्पृष्टालकवेष्टितौ □	० वेष्टनौ †
४२	×	रेणूत्किरैः †	रेणुत्करैः §
४५		कलनिह्रादैः †	कलनिर्ह्रादैः □
५०	×	कन्यासक्तसमित्कुशैः □	समित्कुशफलाहरैः §
	×	अग्निप्रत्युद्गमात्पूतैः § पूर्यमाणं तपस्विभिः	पूर्यमाणमदृश्याग्नि †
५४		अभ्युद्धताग्नि □	अभ्युत्थिताग्नि §
५५		अवारोपयत् †	अवारोहयत् §
५७		अन्वासिनम् §	अन्वासितम् †
६०	×	अथर्वविदः §	अथर्वनिधेः †
	×	विजितारिपुरःसरः §	विजितारिपुरःपुरः †
६१		प्रतिहन्ता §	प्रतिहर्ता §
६२	×	संशमितारिभिः †	प्रशमितारिभिः §
	×	मन्त्रभृत् □	मन्त्रकृत् †
६३		वृष्ट्यौ §	वृष्टिः §
६७	×	पूर्वं स्वनिःश्वासम् □	पूर्वैः स्वनिःश्वासैः §
	×	० मुपभुञ्जते †	० मुपभुज्यते §
६८		अन्धकारः §	अप्रकाशः †
६९		तु □	हि †
७०	×	विनेतर् †	विधातर् §
	×	आश्रमपादपम् †	आश्रमवृक्षकम् §
७१		नवबद्धस्य §	अनिर्वाणस्य †
७२		यथा विमुच्येऽहम् §	मुच्ये यथा तात †
७३		यथा §	इव †
७९		'अवेहि तदवज्ञानाद्यत्ना- पेक्षं मनोरथम्' §	'ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः' †
८१	स	त्वमेकान्तरां तस्या मदीयां वत्समातरम् । † प्रीता कामदुधा हि सा † सा वां कामं विधास्यति ॥ §	सुतां तदीयां सुरभेः § कृत्वा प्रतिनिधिं शुचिः । § आराधय सपत्नीकः § प्रीता कामदुधा हि सा ॥ †
८५		प्रस्रवेन(ण) §	प्रस्नवेन †
८६		महीपतेः §	महीक्षितः †
९३		ऊर्जितश्रियम् †	उदितश्रियम् §

सर्ग २

५	अव्याहतस्वैरगतैः §	अव्याहतैः स्वैरगतैः §
७	राजलक्ष्मीम् †	राज्यलक्ष्मीम् §
८	× रक्षोपदेशात् §	रक्षापदेशात् †
	× गुरुहोमधेनोः §	मुनिहोमधेनोः †
१४	विशेषात् †	विशेषा §
३३	× विस्मापयन् §	विस्माययन् †
	× भूपालसिंहम् §	सिंहोरुसत्त्वम् †
३५	निकुम्भतुल्यम् §	निकुम्भमित्रम् †
३८	मतंगजानाम् §	वनद्विपानाम् †
४०	× गुरौ §	गुरोः †
	× क्षणोति §	क्षिणोति †
४२	× तत्पूर्वसंगे †	तत्पूर्वभङ्गे §
	त्र्यम्बकवीक्षितेन §	त्र्यम्बकवीक्षणेन †
४३	तु §	हि †
४५	विमुच्यताम् †	विसृज्यताम् §
४६	गिरिकन्दराणाम् §	गिरिगह्वराणाम् †
५१	आत्मगुहाशयेन §	अस्य गुहागतेन †
५४	अन्यपयस्विनीनाम् §	चान्यपयस्विनीनाम् †
६३	वत्स §	पुत्र †
६६	गुरोः §	ऋषेः †
६९	× निपीतशेषम् §	०हुतावशेषम् †
	× शुद्धम् †	शुभ्रम् §
